सटीकम्

# श्रीकृष्णभावनामृत महाकाव्यम्

Shri KESHABJI GAUDIYA ... Mathura (U.P.)

श्रीमद्विश्वनाथ चक्रवर्त्ति विरचितम् ।

कलिपावनावतार श्रीमदद्वैतवंशावतंस श्रीवृन्दारण्यवासि-
श्रीमद्राधिकानाथ गोस्वामिना सम्पादितं ।

श्रीमत्कृष्णचैतन्य महाप्रभु प्रियपार्षद्प्रवर श्रील गदाधर पण्डित
गोस्वामिशाखाश्रीजिता मिश्र गोस्वामि वंशसम्भूत
शिरोमण्युपाधिक श्रीनाथशर्म्मात्मज
श्रीकृष्णचन्द्र भागवतभूषणेन
संशोधितं ।

ताड़ाशाधिपति श्रीराधाविनोदैकजीवन श्रीराधाकुण्डवासि राजर्षि-
राय बनमालि राय बाहादुरस्य सम्पूर्ण साहाय्येन श्रीवृन्दा-
वनधामस्थ "श्रीमद्देवकीनन्दना"ख्य स्वकीयमुद्रण-
यन्त्रालये श्रीनित्यस्वरूप ब्रह्मचारिणा
मुद्रितं प्रकाशितञ्च ।

श्रीचैतन्याब्दाः ४१९ ।

# समर्पण ।

आस्ते स्वंहः स्वम्यङ्गनाशं तीर्थश्रेष्ठं भक्तैर्वृन्दं ।
राधा-कृष्ण-क्रीड़ाधारं कृष्ण-प्रेष्ठं राधाकुण्डं ॥

सुतीर्थवर्य्यैरभिवन्दनीयं
वकारिभक्तैरतिसेव्यमानं ।
अरिष्टकुण्डं व्रजधाम्नि राधा-
प्रियेण कुण्डेन समं समास्ते ॥

तदीयतीरे हरिदासगण्यो
दैन्याश्रयः सज्जनतोषकर्त्ता ।
राधाविनोदाङ्घ्रिसरोज-भक्तो
दाता शरण्यो मृदुसत्यवाक्यः ॥

राजर्षिवर्य्यो वनमालिसंज्ञ-
स्ताड़ाशभूपो दमितेन्द्रियश्च ।
श्रीकृष्णलीला-चयभावुकः स-
न्नास्ते गुणानां निलयःसुधीरः ॥

विराजते यस्य मुखे प्रकामं
कृष्णस्य नाम श्रुतिभिः प्रगीतं ।
श्रुतौ च चित्ते सगुणा सुलीला
दृशोर्युगे विश्वविमोहरूपं ॥

संसारक्ष्वेड़संहन्तृ " श्रीकृष्णभावनामृतं ।
मयार्पितं करे तस्य सुखं यच्छत्वनिन्दितं ॥

# भूमिका ।

भक्तिरसामृतसिन्धोः
साधनभक्तिलहर्य्यां श्रीरूपः ।
सपरिकरकृष्णलीला-
स्मरणं साधनश्रेष्ठमलिखत् ॥
गोविन्दलीलामृतनामधेये
ग्रन्थे महाकाव्यतया प्रसिद्धे ।
श्रीकृष्ण-लीलां कविकृष्णदासो
भक्तस्य तुष्ट्यै व्यलिखत् कवेश्च ॥
ताभ्यां विरचिते काव्य
अवलम्व्य कृष्णभावनामृताख्यं ।
महाकाव्यमिदं व्यतनोद्
भक्त-मुदे विश्वनाथचक्रवर्त्ती ॥

वैष्णवैः स्वस्वगृहे "श्रीकृष्णभावनामृत"काव्यमवश्यमवस्थाप्यं विशेषतः काव्यालङ्कारविद्भिश्च । सम्प्रत्यदो वैष्णवमहोपकारि काव्यं कालवशात् प्रायशोऽसुलभमभवत्। अतो मया श्रीवृन्दावनस्थविद्वज्जन-गृहतो वहुयत्नेनानेकानि काव्यानि समाहृत्य श्रीराधारमणविद्यालया-ध्यापकश्रीकृष्णचन्द्रभागवतभूषण-करे समर्पितानि। तेनैकं यत्पुस्तकं संशोधितं तदेव ताड़ाशभूपतिश्रीराधाविनोदसेवनैकव्रतराजर्षि-श्रीमद्दनमालिरायवाहादुरव्ययेन स्वकीये "देवकीनन्दना"ख्य मुद्रण-यन्त्रे मुद्रयित्वा प्रकाशितं। इदानीमस्य वहुसुलभत्वञ्च यथाशक्ति-सम्पादितं। वैष्णवजनाः काव्यमिदं गृहीत्वा तदुक्तश्रीकृष्णलीला-मृतास्वादनेन सफलयन्तु स्वकीयं मामकीनञ्च मानवीयं जन्म, शुभा-शीर्भिर्भूषयन्तु व्ययदातारञ्चेति ।

# सूचीपत्रम् ।

---

## प्रथमसर्गस्य प्रारम्भे मङ्गलाचरणं ।

ततो निशान्त-लीला, तत्रच तत्कालोचितसेवार्थं किङ्करीणां माल्यनिर्म्माणं,लीलामन्दिरगवाक्षदत्तनेत्राणां सखीनां श्रीराधाकृष्णयोः शयनसुखावलोकनं, श्रीकृष्णस्य रहोलीलोचिताङ्गकान्तेर्वसने मलयवायोश्च वर्णनं, श्रीवृन्दादेशतः कुक्कुटादिविहङ्गकुलकलितकलरवैः श्रीराधाकृष्णयोर्जागरणं, जातजागरयोस्तयोः शय्यायामुपवेशनं, पुनरालस्यात् शयनञ्च वर्णितं ।

---

## द्वितीयसर्गे प्राभातिक-लीला ।

तत्र च्युतवसनादिकं श्रीकृष्णं दृष्ट्वा सखीनां मिथःशोभाकीर्त्तनं, श्रीकृष्णचरण-द्वन्द्वे श्रीराधायाः कुचकुङ्कमचिह्नदर्शनं,श्रीराधायाश्च पादयुग्मयावकचिह्नं श्रीकृष्णशिरसि दर्शनं, मञ्जरीगणकृततत्सेवा, श्रीकृष्णं प्रति श्रीराधिकायाः स्वीयवेशनिर्म्माणादेशः, सखीभिश्च तद्रचनार्थं सामग्र्यानयनं, वेशरचनायां श्रीकृष्णस्य मदनावेशः, जालरन्ध्रन्यस्तनयनाभिः दासीभिः सखीभिश्च तद्दर्शनं, समागतप्रभातं दृष्ट्वा विधेर्निन्दा, सखीगणानां केलिमन्दिरप्रवेशः, श्रीकृष्णवक्षोविश्लिष्टायाः श्रीराधाया आसनोपवेशनं, सखीगणसंलापान् श्रोतुं श्रीकृष्णस्य व्याजनिद्रा, तत्संलापश्रवणजातहासश्रीकृष्णेन स्ववक्षोनखचिह्नं दर्शितं, ततश्च भ्रूभङ्ग्या श्रीराधाया हस्तेन तद्वक्षःस्थलावरणं,श्रीराधाकृष्णयो रासालापश्रवणानन्तरं सखीभिः पृष्टेन श्रीकृष्णेन तासामधरदंशनं, दृष्टप्रभातवृन्दादिष्टकुक्कुटीसमुच्चरितं "जटिलेति वर्णत्रयं" श्रुत्वैव प्राप्तभीषणशङ्कानां सर्व्वासामङ्गनागमनं, कतिपयसखीनां दासीनाञ्च मिथश्छिन्नमाल्यादानप्रदाने, परस्पर-स्कन्धार्पितकरयोर्गच्छतोः श्रीराधाकृष्णयोः सर्व्वत्र जटिला-स्फूर्त्तिः, व्रजागतशङ्कावशतः श्रीकृष्णेन श्रीराधिका-स्कन्धदेशात् स्व-करप्रत्यावर्त्तनं, विरहक्लिष्टानां सर्व्वासां गृहप्राप्त्यनन्तरं शय्यायां शयनं च वर्णितं ।

### तृतीयसर्गे रसोद्गार-लीला।

तत्र किङ्करीगणविहितस्नानानुलेपनं, तासाञ्च श्रीराधात्यक्तवस्त्रालङ्कारादिस्वीकारकरणं,श्रीराधाया वृषभानुनिर्म्मितप्रासादवर्णनं,सेवार्थं दासीभिः सामग्रीसम्पादनं, दधिमन्थनध्वनिवर्णनं, गवां तज्जातिशब्दवर्णनं, ब्राह्मणानां वेदध्वनिः, मुखराया आगमनं श्रीराधाया निद्राभङ्गं, श्यामलागमनं, रसोद्गारः, श्रीनन्दगृहात् माधविकागमनं, श्रीकृष्णस्याशय्योत्थानाद् गोदोहाद्यन्तलीलानां वर्णनं, श्रीराधाया असमोर्द्ध्वानुरागं श्रुत्वा स्वभवने श्यामलागमनं च वर्णितं।

---

### चतुर्थसर्गे श्रीराधायाः स्नानभूषणपरिधापनादि-लीला।

तत्र नर्म्मसखीभिर्भूषणादिपरिधापनान्तरं स्वाङ्ग-कान्तिदर्शनात् श्रीराधायाश्चमत्कृतिः, श्रीव्रजेश्वरीसमीपतः कुन्दलतागमनं च वर्णितं।

---

### पञ्चमसर्गे श्रीराधायाः श्रीनन्दालयगमनरन्धनादि-लीला।

श्रीराधाकुन्दवल्योर्वाक्चातुर्य्यं, नन्दालयगमने श्रीराधाया असम्मतिं श्रुत्वापि जटिलायास्तदनुमोदनं, तदनुमत्या गच्छन्त्याः पथि आनन्दभराद्रसकौतुकं, "अनेन पथा राधा याती"ति ज्ञात्वा तत्र सुवलस्कन्ध-न्यस्तवाहोः श्रीकृष्णस्य त्रिभङ्ग्यावस्थानं, सखीवर्णितं श्रीकृष्णरूपं श्रुत्वा श्रीराधिकायाः सात्त्विकविकारः, श्रीराधाकृष्णयोः परस्परदर्शनकाले वटुना श्रीकृष्ण-गले चम्पकमालार्पणं, तदर्पणभावं परिज्ञाय राधां प्रति सखीनां परिहासः, श्रीमन्नन्दस्याट्टालिकावर्णनं, नन्दगृहं प्रविश्य श्रीराधायाः श्रीव्रजेश्वरीचरणे प्रणतिः, तामालिङ्ग्य यशोदया मुखचुम्बनादि, तदाज्ञया श्रीराधायाः पाकार्थं रन्धनगृहप्रवेशः, रोहिणीं प्रति श्रीराधिकायाः प्रणामः, तामङ्कीकृत्य रोहिण्या लालनं, श्रीराधिकाया रन्धनं, दत्तगवाक्षनेत्रकृष्णेन श्रीराधायाः शोभादर्शनं, मधुमङ्गलं प्रति कथितव्याजवाक्यस्य श्रीराधायाः कर्णे प्रवेशः, श्रीकृष्णं प्रति श्रीराधायाः कटाक्षनिःक्षेपः, सखीगणसकाशात् श्रीकृष्णस्याभिलषितप्रार्थना च वर्णिता।

---

षष्ठसर्गे भोजनादि-लीला ।

तत्र रन्धनशालायां श्रीराधिकावलोकनतश्चित्तक्षोभापनयनार्थमध्यापनच्छलाच्छुकशावकेन सह श्रीकृष्णस्य श्रीराधा-नामकीर्त्तनं, वटुना सह व्यायामकौशलकथनं, उज्ज्वलज्योतिर्विद्याकथनेन श्रीकृष्णसकाशात् मधुमङ्गलस्य पारितोषिकप्राप्तिः, श्रीकृष्णं प्रति वटोराशीर्व्वादः, दासजनैः श्रीकृष्णस्य स्नानादिसम्पादनं, सखिमण्डलीमण्डितस्य श्रीकृष्णस्य भोजनं, भोज्यरसमभिरस्य रटोरसतत्त्वविचारकौतुकं, सखीवृन्देन सह श्रीराधिकाया भोजनं, नन्दीश्वरगिरि-गुहायां श्रीराधाकृष्णयोः सन्मीलनं च वर्णितं ।

---

सप्तमसर्गे गोष्ठ-लीला ।

तत्र सखिगणवेशभूषादेर्विलम्बात् श्रीकृष्णस्य उत्कण्ठातिशयः, श्रीव्रजेश्वर्य्यनुमतितः मोदकादिसम्भारभृतां दासानां कृष्णेन सह वनगमनं, नन्दीश्वरगिरि-गुहातः कृष्णस्यागमनं, नर्म्मसखिभिः परिहासः, श्रीकृष्णस्य गोष्ठोचितवेशः, "मुकुन्दो वनं याती"त्यस्य विविधार्थवर्णनं, श्रीकृष्णस्य वनगमनकाले व्रजाङ्गनानां दर्शनलालसाया औत्सुक्यं, श्रीकृष्णस्य पितरौ प्रति विनयोक्तिः, वनपथवर्णनेन सान्त्वना च, श्रीराधासमीपस्थो नेत्राञ्चलेन अभिसारप्रार्थना, तत्रच श्रीराधायाः सम्मतिप्रकाशः, सखिवृन्दैःसह श्रीकृष्णस्य वनगमनं च वर्णितं ।

---

अष्टमसर्गे काननविहार-लीला ।

अत्र श्रीकृष्ण-वनगमनान्तरं श्रीराधाया मूर्च्छा, विगतमूर्च्छया तया श्रीकृष्णान्वेषणे कतिपयसखीनां प्रेरणं, सखीगणदर्शने श्रीकृष्णस्यानन्दः, तेन च श्रीराधाया वार्त्ता जिज्ञासा, सखीभिः राधाविरहावस्थावर्णनं, प्रेयसीवार्त्ता श्रुत्वा श्रीकृष्णस्य वाग्रोधे सति राधाभिसारार्थं रूपमञ्जरीं प्रति मधुमङ्गलवाक्यं, श्रीकृष्णस्य चम्पकमालामानीय रूपमञ्जर्य्या श्रीराधागलेऽर्पणं, जटिलादेशतः सूर्य्यपूजाद्रव्यसंग्रहार्थं यान्त्याः राधाया मुरलीश्रवणाद्विभ्रमाभिसारः, "हे गोगण आगच्छे"ति वेणुनादे गोशब्दस्य विविधधन्यर्थवर्णनं, वेणुनादश्रवणात् स्थावरजङ्गमानां सात्विकविकारः, श्रीराधायाः सूर्य्यप्रणामः, स्तुत्या प्रसादीकरणं, वर-

प्रार्थना, स्वीयसरोवरागमनं, कृष्णाङ्गगन्धं प्राप्य उल्लासश्च, छलतः सखीवृन्दानुमतेः श्रीकृष्णमधुमङ्गलयोः श्रीराधाकुण्डं प्रति गमनं, श्रीराधारूपतः पर्व्वतराजिं स्वर्णमयीं दृष्ट्वा तयोर्वितर्कः, श्रीराधाकृष्णयोः परस्परदर्शनतः परस्परस्य भ्रमः।

---

नवमसर्गे कुसुमकेली-नर्म्मविलासादिलीला।

अत्र श्रीकृष्णदर्शनाद् भीतायां राधायां सखीनां कुञ्जप्रवेशादेशः, सखीमण्डलान्तः कृष्ण-प्रादुर्भावः, सखीभिः कृत्रिमरोषख्यापनं, सखीगणं सम्बुध्य श्रीकृष्णस्य सचातुर्य्यवाक्यं, परस्परस्य वाग्भङ्गी, ललितायाः राधाकृष्णयोश्च साटोपवाक्यं, श्रीकृष्णेन प्रियावक्षसि पाणि निधानं, श्रीराधायाः कुट्टमितभावः, कृष्णस्य मनसि वितर्कः, श्रीराधामुखचन्द्रवर्णनं, श्रीकृष्णस्य भुजवन्धनमोचनं, कन्दर्पयागकथनं, विशाखया श्रीराधामवहित्थभारं ग्राहयितुमादेशः, नान्दीमुख्या श्रीकृष्णस्य हस्ते पत्रसमर्पणं, मनसा पठित्वा श्रीकृष्णस्य रहः प्रवेशः, नान्दीमुख्या सह राधाललितयोरुत्तरप्रत्युत्तरे, नान्दीमुखीपत्रस्य मर्म्मोद्घाटनं, वाम्यनाशकमन्त्रजपः, श्रीकृष्णागमनशङ्कातः अशोककुञ्जप्रवेशः, श्रीकृष्णस्य रमणीमण्डलीमध्यमागमनं, ललितेङ्गितेन कृष्णस्य कुञ्जप्रवेशः केलीगृहे उभयस्य शयनं वर्णितं।

---

दशमसर्गे कुञ्जकेलीरसास्वादनलीला।

श्रीवृन्दादेवीं प्रति षड्तुसेवाया आदेशः, श्रीकृष्णस्य अनङ्गविलासानन्तरं भूषणैर्विभूषितां श्रीराधां स्वसरूपां विधाय निजपार्श्वे-स्थापनं, मन्त्रजपवद्राधाया अभिनयः, सखीनामागमनं, कृष्णद्वयं दृष्ट्वा दासीः प्रति जिज्ञासा, मिथोविचार्य्य श्रीकृष्णं राधेति निश्चित्य सखीनां स्थानान्तरगमनं, श्रीकृष्णस्य राधाकण्ठस्वरेण वाक्योच्चारणं, सर्व्वाङ्ग-स्पर्शनेन सखीनां राधेतिज्ञानं ललितादिभिः श्रीकृष्णस्य छलाद्रहस्य-लीला, कृष्णवेशधारिराधासमीपं सखीनामागमनं, कुन्दलतया रतिचिह्न-सूचना, ललिता-नान्दिमुखी-कुन्दलता-वृन्दानां मिथः परिहासवाक्य-श्रवणात् सखीनां हास्यं, मुकुन्दवेशराधां प्रति प्रश्नोत्तरप्रत्युत्तराणि, सखीभिः श्रीराधाकृष्णवेशदूरीकरणं, पुनरपि स्वभूषणैर्विभूषितीकरणं,

समागतस्य कृष्णस्य सखीभिः सह परिहासः, कुन्दलताललितयोरुक्तिः, सखीनां स्वस्वमुखोच्चारितकृष्णकृतसम्भोगवर्णनं श्रुत्वा कृष्णस्य राधा-वृन्दा-नान्दीमुखीनां हास्यञ्च वर्णितं ।

---

एकादशसर्गे हिन्दोलनलीलावर्णनं ।

तत्र श्रीराधायाः स्कन्धे श्रीकृष्णस्य सव्यहस्तार्पणशोभावर्णनं, सखीद्वयस्योभयपार्श्वतः श्रीराधाकृष्णयोर्हस्ते ताम्बूलबीटिकाप्रदानं, आश्चर्य्यत्रयवर्णनं, श्रीराधाकृष्णयोर्वर्षाहर्षवनप्रान्ते उपस्थितविद्युन्मेघकदम्बकाननकुट्टिमाहिन्दोलनानां वर्णनं, श्रीराधाकृष्णयोर्हिन्दोलनलीलां निरीक्ष्य देवीनां पुष्पविमोचनं, तदैव मेघानां वारिबिन्दुवर्णनं, वीणादियन्त्रं विना सखीनां मुखेन मधुरसङ्गीतं, श्रीकृष्णाङ्गमरकतमणिदर्पण-श्रीराधाङ्गहेममणिदर्पणयोः श्रीराधाकृष्णयोः स्वस्वप्रतिबिम्बदर्शनं, हिन्दोलनस्यातिशयवेगवृद्धेर्भीताया राधायाः श्रीकृष्णस्कन्धदेशधारणं, सखीनां सर्व्वासां हिन्दोलनारोहणं, हिन्दोलनस्योपरिस्थितसखीद्वयस्य मध्ये एकैककृष्णमूर्त्तेः कमलाकृतिहिन्दोलनायामारोहणं, ततः फलादिभोजनं, नान्दीमुखीवृन्दयोः पूर्व्ववद्दोलनं, सखीभिः सह दोलायाश्चावतरणं, ततो वनभ्रमणं वर्णितं ।

---

द्वादशसर्गे वनभ्रमणकल्पतरुतलवर्त्तिनी लीला ।

शारदीयवने प्रविश्य तत् शोभां वर्णयतः श्रीकृष्णस्य श्लेषेण श्रीराधां प्रति परिहासः, कृष्णेन कमलकुसुमे प्रशंसिते सति श्रीराधायाः रोषं निरीक्ष्य कमलस्य निन्दा, वनं पर्य्यटन् श्रीवृन्दावनागमनं, तत्रस्थ पशुपक्षिकुट्टिम-यमुनाघट्ट-तरु-लता-पुष्प-फल-कुञ्जरचनारीति-वाय्वादीनां वर्णनं, कुसुमैर्हाराङ्गदादीन् निर्म्माय श्रीराधाकृष्णयोर्मिथो भूषणनिर्म्माणं, वस्त्रर्णिनो वर्णनं, "पुरुषा निस्त्रपा"इत्युक्तवत्यां श्रीराधायां श्रीकृष्णेन तां तमालजड़ितहेमयूथी प्रदर्शिता,इत्थं नानाकौतुकं कुर्व्वन्तोस्तयोर्योगपीठान्तिके समागमनं कल्पतरोर्वर्णनञ्च, श्रीकृष्णः योगपीठमारुह्य ललितत्रिभङ्गः सन्नवस्थितः, वामपार्श्वेऽवस्थितया राधया सह कृष्णस्याष्टदलस्थितानां सखीनाञ्च वर्णनं शुकेन, श्रीराधाकृष्णयोः रूपमाधुर्य्यादीन् वर्णयतः शुकस्य वैवर्ण्यं वाक्यरुद्धताच, फलभोजनेन

तस्य सन्तर्पणं, श्रीराधाकृष्णयोर्व्वीणावादनं वंशीवादनञ्च, रत्नमन्दिरे श्रीराधाकृष्णयोः सुरतशयनोपविष्टयोः सतोः परिजनस्य वन्यकुसुमैर्नानालङ्कारादिनिर्म्माणं फलमूलादिभोजनञ्च वर्णितं ।

---

त्रयोदशसर्गे मधुपानलीला ।

तत्र हेमन्ते वनभागे प्रवेशवर्णनं,तदृतुवर्णनञ्च,श्रीराधाया हृदि धारणकाले कृष्णस्य मुरलीपतनं, ललितया वेणीमुले मुरलीगोपनं, श्रीवनदेव्या सर्व्वाभ्यः शीतवस्त्रप्रदानं, पुष्पफलव्याजेन श्रीकृष्णेन श्रीराधारूपवर्णनं,शीतसुखदवनभागे गमनं, श्रीकृष्णेन वर्णनकाले तु तदृतुं कुसुमचयने कृते सति श्रीराधादीनां कुन्दलतां प्रति परिहसनं, वसन्तसुखदवने आगमनं, तदृतुवर्णनं गिरिराजवर्णनञ्च, रासस्थल्यां विश्रामः वृन्दया मध्वानयनं, मधुपात्रे पतितश्रीराधाकृष्ण-मुखप्रतिविम्बमाधुरिमास्वादनं, मधुस्रष्टुर्विधातुः शतशः स्तुतिः, मधुपाने व्रजसुन्दरीणामुद्भ्रान्तिः, किङ्करीश्छलेन निकटमानीय मधु पाययतः श्रीकृष्णस्य रहस्यलीलावर्णनं, सखीगणेन सह सुरतसुखभोगवर्णनं ।

---

चतुर्द्दशसर्गे जलविहारलीला ।

तत्र श्रीकृष्णस्य निदाघसुखगवनागमनं,मधुमङ्गलस्य तेन सह रसिकता रसविचारश्च, श्रीराधाकुण्ड-श्यामकुण्डयोर्व्वर्णनं, कुण्डद्वयसेतुबन्धे तिष्ठता प्रेयसीगणेन श्रीराधिकातुलनया सरसीवर्णनं जलविहारयोग्यवसनपरिधानं, जलयुद्धपराजितेन श्रीकृष्णेन वलात्रमणीनां वसनभूषणादि गृहीत्वा स्मरणः, जलमण्डूकवाद्यं जलकेलीं च समाप्य तीरोत्तरणं, किङ्करीविहितवस्त्रादिसेवा, फलादिभोजनं, रतिलीला, दासीकर्त्तृकपरिचर्य्यान्ते निद्रावेशश्च वर्णितः ।

---

पञ्चदशसर्गे पाशक्रीड़ासूर्य्यपूजादिलीला च ।

तत्र श्रीकृष्णं पराजेतुं सखीनां पाशक्रीड़ामन्त्रणा, मध्यस्थीकृतसभ्यजने पाशक्रीड़ारम्भः, सखीभिः पराजितं श्रीकृष्णं तिरस्कृत्य मधुमङ्गलस्य मूकीकरणं, पुनर्हृतकौस्तुभे सखीनां प्रागल्भ्यवाक्यं, मधु-

मङ्गलस्य कौस्तुभयाच्ञा, सख्यवृन्दविचारेण कृष्णपराजयस्थिरीकरणानन्तरं कुन्दलतया कृष्णकण्ठादाकृष्य राधिकावक्षसि कौस्तुभमणेरर्पणं, कौस्तुभे स्वीयप्रतिविम्वं दृष्ट्वा कृष्णस्य मोहः, पुनरालिङ्गनरूपपणेन कृष्णे पराजिते सति वलात् पणग्रहणं, चुम्बनपणेन च पुनर्जिते कृष्णेन वलात् राधिकामुखचुम्बनं, पुनर्वेणुवीणापणेन राधिकाया जये सति वेणोरन्वेषणं, वेणुमलब्ध्वा मधुमङ्गलं प्रति जिज्ञासा, मधुमङ्गलस्य कृष्णं प्रति परिहासः, ललितामधुमङ्गलयोः कोपगर्भपरिहासवाक्यं, मुरलीहरणविषये ललितया सह कृष्णस्योत्तरप्रत्युत्तरे, मुरल्या अन्वेषणच्छलेन सखीनां परस्परं कञ्चुकनीवीवन्धाद्युन्मोचनं, जटिलायाः सूर्य्यमन्दिरागमनं, जटिलया सह राधाया उत्तरप्रत्युत्तरे, कुन्दलतया सह विप्रवेशधारिकृष्णस्यागमनं, जटिलानुमत्या विप्रवेशिकृष्णस्य सूर्य्यपूजनं, जटिलां प्रति श्रीकृष्णस्याशीर्व्वादः, राधिकायाः प्रणामकाले वेणोतः मुरलीपतनं, कृष्णमुरलीं ज्ञात्वा क्रोधाद्राधां प्रति जटिलायास्तर्जनं, विप्रवेशिकृष्णेन जिज्ञासितायां जटिलायामुभयोरुत्तरप्रत्युत्तरे, जटिलया तस्मै मुरलीप्रदानञ्च, विप्रवेशिनं श्रीकृष्णमभिवाद्य ससखीवध्वा जटिलायाः स्वालयागमनं, कृष्णस्य स्वसखिवृन्दसमीपागमनं ।

---

## षोड़शसर्गे आपराह्निकलीला ।

तत्र वहुविधैरुपायैरनुपहतश्रीराधाविरहे सति गोष्ठेश्वर्य्यनुज्ञातचन्दनकलाया उपस्थितौ तया सह सखीनामुत्तरप्रत्युत्तरे, श्रीकृष्णवार्त्तारूपनद्यां चन्दनकलया राधाया निक्षेपीकरणं, श्रीकृष्णभोजनार्थं मोदकप्रस्तुतीकरणं, षोड़शाकल्पस्य द्वादशाभरणस्य च परिधानं, श्रीकृष्णदर्शनोत्कण्ठा, ललितादेव्या श्रीराधया सह प्रासादारोहणं, गोधूलिदर्शनात् श्रीराधायाः प्रतप्तनयनयोः तापनिवृत्तिः, पूर्व्वदिगागतशीतवायुस्पर्शेनानुरागतः कृष्णाङ्गस्पर्शिवायोरनुभूतिः वंशीध्वनिं श्रुत्वा सखीभिःसह श्रीराधाया उद्यानगमनं, श्यामलायाः श्रीराधानिकटागमनं, श्रीवलदेवादीनां नन्दीश्वरप्रवेशः, यावटं गत्वा व्रजसुन्दरीं प्रति श्रीकृष्णस्य कटाक्षनिक्षेपः, श्रीकृष्णकान्त्या नीलकमलसदृशत्वापन्ने व्रजपथे व्रजसुन्दरीगणनयनमधुपस्य मधुपानं, श्यामला-राधा-

ललितानां संलापः, श्रीकृष्णदर्शनबाधायां राधाया विधिलज्जादि प्रतिधिक्कारः, मिथोदर्शनाज्ञाज्ञता, व्रजेश्वरीसमीपं तुलसीमञ्जरी-प्रेरणं, स्वमन्दिरादानीतायां राधायां विरहात् कृष्णस्फूर्त्तिः, श्रीकृष्णस्य स्वगृहगमनं ।

सप्तदशसर्गे गोदोहनादि सायन्तनलीला ।

तत्र "विधिना कृष्णसूर्य्यौ तुलायां परिमीयेते" इत्युक्त्वा देवाङ्गनानां मिथोविचारः, नयनसलिलैः सह रमणीनां पुष्पवर्षणं, सूर्य्यस्यास्ताचलगमने उत्प्रेक्षावर्णनं, तुलस्या व्रजेश्वरगृहादागत्य सभायां कृष्णस्य पितृमातृलालनादिकौतुकवृत्तान्तवर्णनं, राधि ायाः फेलामृत-भोजनं, गोदोहनार्थं गोसदनप्रविष्टे श्रीकृष्णे पावनसरस्तीरवर्त्तिप्रासाद-मारुह्य ससखीकराधिकायाः श्रीकृष्णमुखचन्द्रज्योत्स्नापानं, कृष्णं दृष्ट्वा राधिकायास्तन्मुखविन्दुवर्णनं, प्रियतमस्य दुग्धदोहलीलावर्णनं, गोदोहं समाप्य श्रीकृष्णस्य स्वगृहगमनञ्च वर्णितं ।

अष्टादशसर्गे राधाभिसारादिप्रदोषकालीनलीला ।

तत्र व्रजदेवीगणं प्रति श्रीकृष्णस्यावलोकनं, प्रदोषकालवर्णनं, व्रजेशगृहादागत्य इन्दुप्रभया व्रजराजस्य सवन्धुकृष्णस्य च भोजन-लीला-शयनलीला-वर्णनं, कृष्णस्य सुवलेन सह राधावाक्यवर्णनं, राजसभायां कृष्णस्य गमनं, जटिलादेशतः स्वभोज्ये श्रीकृष्णभुक्ता-वशिष्टं मेलयित्वा राधाया भोजनं, राधाभिसारो वंशीध्वनिश्रवणञ्च, मध्यपथे श्रीकृष्णमूर्त्तिभ्रमः, राधांप्रति श्रीकृष्णस्य परिहासवाक्यं, राधाभूषणशिञ्जितश्रवणात् कृष्णस्य तमालतरुवदवस्थानं, "तमाल-तरौ हस्तं स्थापये"ति राधिकामुक्त्वा ससखीकविशाखायाः प्रयाणं, रहःस्थितसखीनां तल्लीलादर्शनं, श्रीराधाकर्तृकं तमालतरोरालिङ्गनं, उभयस्य कन्दर्पवाणविद्धता च वर्णिता ।

ऊनविंशतिसर्गे श्रीरासलीला ।

श्रीराधया सखीगणसमीपे श्रीकृष्णस्य प्रेरणं, भूषणादिभिः

राधिकाया मञ्जरीकृतपरिचर्य्या, सखीवृन्दागमने श्रीराधाया वाक्-चातुरी, सखीसभामागत्य श्रीकृष्णेन लज्जापङ्के निमज्जीकरणं, परस्पर-स्योत्तरप्रत्युत्तरे, श्रीकृष्णामुरलीमादाय ललितत्रिभङ्गनटवरवेशं धृत्वा राधाया मुरलीवादनं, श्रीकृष्णेनवेणुं श्रुत्वा गौराङ्गीवेशधारणं,शारदीय-महारासवत् वंशीस्वरेण सखीनामागमनादिलीला, वृन्दया राधाहस्तात् मुरलीं गृहीत्वा श्रीकृष्णकरे समर्पणं, श्रीकृष्णस्य भ्रमापयनं, अहं राधा न होति ज्ञानं, स्वस्ववेशधारणं, परस्परं प्रति परस्परस्य प्रहेली-जिज्ञासा, यमुनापुलिनवर्णनं, श्रीराधाहस्तं गृहीत्वा श्रीकृष्णस्य पुलिनागमनं तत्शोभावर्णनञ्च, रासविलासे विविधगीतनृत्यवाद्य-प्रबन्धगाणादिवर्णनं, रासावसाने सखीनां वीजनादिसेवा च वर्णिता।

---

विंशसर्गे अलसनिद्रादिलीला।

तत्र यमुनायां जलविहारः, वस्त्रादिपरिधानं, भोजनशयने, दासी-गणैः पादसम्वाहनादिभिः पूजा, श्रीकृष्णः अतनुतीर्थनीरे स्नास्य-तीति ज्ञात्वा दासीगणस्य स्वस्वमन्दिरं प्रति गमनं, आत्मनो वहुत्वं प्रकटय्य गोपीभिः सह श्रीकृष्णस्य विहारः, गवाक्षद्वारेण दासीनां रहोलीलादर्शनं प्रेमवैचित्त्यवर्णनं, सम्भोगवर्णनं रतिश्रमादुभय-निद्रा।

सूचीपत्रं समाप्तं।

---

श्री गोकुलानन्दो जयति ॥

# श्रीकृष्ण भावनामृतम्।

—):०:(—

## प्रथम सर्गः।

श्रीहरिदासवर्यः
शरणम्।

श्रीकृष्ण चैतन्य घनं प्रपद्ये
सपद्यपध्वस्त-तमः-प्रपञ्चम्।
पंचेषु-कोट्यर्बुद-कान्ति-धारा
परम्पराप्यायितसर्वविश्वम् ॥ १ ॥

---

श्रीकृष्णचैतन्यचन्द्रायनमः ॥

वृन्दाटवीश्वर सभाजन राजमान, श्री विश्वनाथ गुणसूचक काव्यरत्नम्। मच्चित्तसम्पुटमलं कुरुतां तदीक्षा, सौभाग्य भाजमपि शीघ्र ममुंविधत्ताम्। अथ प्रारिप्सित ग्रन्थ समाप्ति परिपन्थि प्रत्यूह व्यूह विध्वंस पटीयसीं श्री भगवत् प्रपत्तिं, ग्रन्थकार चूड़ामणि-र्मंगलाचरणत्वेन निबध्नाति। श्रीकृष्णेति। श्रीकृष्णचैतन्य एव-घनो मेघः श्री कृष्णलीलामृत वर्षित्वात् तंप्रपद्ये। पक्षे श्रीकृष्ण-नामा य श्चैतन्य घनः चैतन्यस्य काठिन्यं सान्द्रत्वमितियावत् मूर्त्तौघन इति स्मरणात् घनशब्दस्य धर्ममात्र एव मुख्यार्थत्वात्। ब्रह्म णो हि प्रतिष्ठाह मित्यनेन श्री कृष्णस्य तथात्वे प्रमितत्वाच्च, प्रपत्तेः

सनातनं रूपमुदीयुषोः क्षितौ
हृदादधानो व्रजकाननेशयोः ।
तत्केलि-कल्पागम-संगतीलिताः
सदालिवीथोरनुरागिणीर्भजे ॥ २ ॥

फलं प्रीतिसन्दर्भादावुक्तं अननुसंहितात्यन्तिक दुःखनिवृत्ति स्तथानु संहितभगवद्रूपगुणादिमाधुर्यास्वादश्चेति विशेषणद्वयेन व्यञ्जयति सपदीति प्रपत्ति - समकालमेवेत्यर्थः । तमो मेघपक्षे अंधकार इति प्रसिद्ध मेघाद्वैलक्षण्यं तच्च चैतन्य घन इति श्लेषेणजडरूप घनस्य व्यावृत्तत्वादेव, अपरस्मिन् पक्षद्वये तमः अविद्या । कथंभूतं कन्दर्पकोटेर्यदर्बुदं तत्तुल्यकान्ति धारापरम्परेत्यादि, । अत्रकान्तिधाराया वृष्यमाणत्वात् । तस्याश्चैतन्यरूपत्वात् न जडवर्ष मेघ इत्यत्रापि वैलक्षण्यं, पक्षद्वये तद्रूप माधुर्यास्वादःसर्वभक्तेषु फलित इति ध्वनिः । यद्वा पंचेषु कोटेरपि अर्बुदंव्रणविशेषः यतस्तथाभूता कान्ति धारेति, "अर्बुदंव्रणभेदेपि" इति विश्वः विश्वपदेन विश्वैक देशत्वोधोपि सम्भवेदतः सर्वेति । अत्रपुनरुक्त वदाभासालंकारोपि बोध्यः ॥ १ ॥

रागानुगाख्यसाधनभक्तिपद्धतिरूपमिदंसमस्तग्रन्थात्मकं काव्यमिति द्योतयति । सनेति उदीयुषोः उदयं प्राप्तवतोः व्रजकाननेशयोः सनातनं नित्यरूपं पक्षे सनातनाख्यं रूपाख्यं तत्परिजनद्वयं, हृदि दधान स्तौध्यायन्नित्यर्थः सदालीनां साधु श्रेणीनां वीथी भजनमार्गान् भजे अनुसरामि वीथीः कथं भूता स्तयोः राधाकृष्णयोः केलिषुकल्पन्ते प्रमाणत्वेन समर्था भवन्ति क्लिपूसामर्थ्ये पचाद्यच् । तथाभूता ये आगमाःपरिचरण प्रकार ज्ञापक बृहत्गौतमीयतन्त्रक्रमदीपिकानारदपञ्चरात्रादिशास्त्राणि तेषां संगत्या ईलिताः प्रशस्ताः एतेन रागमार्गस्य शास्त्रविहितत्व मानीतं, पुनः कथंभूताः अनुभ्यमानो रागोयत्र भवतीति रागानुगीय साधु

तयोर्मिथः पुष्पशराजिचातुरी
धुरीणता वेदनया विवादिनोः ।
श्रांतिःस्वयं कापि निमंत्र्य तत्क्षणा
न्निद्रामुपानीय समादधे कलिम् ॥ ३ ॥
प्रतिस्वसेवावसरप्रबोधिता
सदातनाभ्यास जुषोऽथ किंकरीः ।
निद्रैव रात्र्यंत मवेत्य ता जहौ
सैव स्वयं जागरयाञ्चकार किम् ॥ ४ ॥

जनाश्रित- भजनमार्गे- साधक- देहेन अभिलाषो व्यञ्जितः । अथवा सदा आलीवीथी ललितादिसखीश्रेणीर्भजे कथम्भूताःतयोःकेलय एव कल्पागमाः कल्पवृक्षा स्तैसह राधाकृष्णायोः संगमे ईलिता स्तुताः अर्थात् ताभ्यामेवेतिज्ञेयम् । ता बिना द्वयोः संगजन्य लीलैव जनसिद्धयेदिति भावःतथाच सिद्धदेहेन सखीनां अनुगतोऽभिलाषो व्यञ्जितः पक्षे अलिवीथीभ्रमरश्रेणी भजे कथंभूताः तयोःक्रीडाष्पद कल्पवृक्षस्य संगमेन स्तुताःपुनश्च अनुकूलो रागो वसन्तादिः सएव आनन्ददत्वेन वर्त्तते यासांताः तथाच वृन्दावनीय-कल्पवृक्ष संबंधि भ्रमरंभजे इत्यनेन वृन्दावन वासे कवे रभिलाषो व्यंजितः ॥ २ ॥

परस्परकन्दर्पयुद्धचातुर्यातिशयस्यज्ञापनया हेतुना विवादिनो स्तयो राधाकृष्णायोः कलिं कलहं कापि श्रान्तिरूपा सखी निद्रां निमंत्र्य, हे निद्रे ! सखि ! तयोर्माधुर्यास्वादस्त्वयापि क्रियता मिति निमंत्रणं कृत्वा उपानीय समादधे तथाच सम्भोगोत्थ श्रान्तितएव तयोर्निद्रा आगतेति भावः ॥ ३ ॥

स्वस्वसेवावसरे या प्रबोधिता जागरण शीलता तस्याः सदातनाभ्यासजुषः किंकरीः निद्रैव कर्त्री रात्र्यंतमवेत्य जहौ ।

उत्थाय तल्पाच्चकितेक्षणाः क्षणान्
दुहानयो नागर चक्रवर्तिनोः ।
स्वापं रहः स्वापमभंगमंगना
आलक्ष्य तूष्णी मधिशय्य मासत ॥ ५ ॥

पप्रच्छुरन्योन्य मिमा मिमानया,
रसं परिहासभृतंसजृंभया ।
गिरा चिरा ज्जागर मूढ घूर्णन
स्व स्वाक्षिभृंगीतातिलीढवक्षसः ॥ ६ ॥

अतएव सैव निद्रा स्वयं ताः किंकरीः किं जागरयाञ्चकार इति स्वतः सिद्ध निद्रात्यागहेतुकेयमुत्प्रेक्षा ॥ ४ ॥

तल्पादुत्थाय किंकर्यः आदौ सेवाया अतिकालमाशंक्य चकितेक्षणाः क्षणान् उत्सवान् दुहानयोः पूरणम् कुर्वतोः नागर चक्रवर्त्तिनोः पश्चात् स्वापं शयनं अभंगं आलक्ष्य अंगनाः किंकर्यः अधिशय्यं स्व स्व शय्यायां तूष्णीं आसन् स्वापं कीदृशं रहसि स्वापं सुस्वापम् ॥ ५ ॥

तदनन्तरम् परिहासेन भृतम् रसं मिमानया सरसः एतावानेव ततोऽप्यधिकरसोऽस्ति इति तुलयन्त्या इव जृम्भा सहितया गिरा, भोः सख्यः अद्य निकुञ्जराजेन सह बिहारातिशयजन्य श्रमेण प्राप्त निद्राणां युष्माकं जागरणं वृत्तं न वेत्यादि परिहासवाक्येन इमाः किंकर्य अन्योन्यं जागरं पप्रच्छुः ताः कथंभूताः प्राप्तघूर्णनया स्वस्वाक्षिरूपभृंगीतरया लीढं आस्वादितं वक्षःस्थलं याभि स्तथाच सम्भोग चिन्हस्थितिशंकया स्व वक्षसि अर्पिताया दृष्टिभृंगी तयैव, दैवात् तत्रस्थितंनखचिन्हाकारमकरन्दम् आस्वादितं चक्रुरिति ॥ ६ ॥

निशान्तसेवोचित माल्यवीटिकादिकृत्येषु ग्रहीतचित्तास्ताः किंकरी

निशांत सेवोचित माल्यवीटिका
कृत्यात्तचित्ता अथकाचिदाहताः ।
अनंग-बद्धांग-युवद्वयो-च्छलत्
सौरभ्य सौलभ्यवती रसोज्वला ॥ ७ ॥
जानीत जालाध्वगतास्यपद्माः,
सम्रांत रालय स्वदृशःप्रहित्य ।
*कांतौ नितांतातनुलास्यचञ्चु
धिनोति सुप्तिःपरिरभ्य कीदृक् ॥ ८ ॥
इतस्ततोन्यस्त मणिप्रदीपा

प्रति काचित् किंकरीआह कथंभूताअनंगेन बद्धांगयोःराधाकृष्णयो रु च्छलत्सौरभ्यस्य सौलभ्यवती तथाच सौरभेणैव,तयो र्बंधनं दृष्ट्वा ततोभयात् पलाय्येवतद्वृत्तांतं विज्ञापिता सा ज्ञाततत्वा सती तासां मध्येआगत्य अहो ययोरर्थे वीटिकादि निर्मानं कुर्व्वन्ति तौ द्वौ बद्धौ आगत्य दृश्येतामित्युक्तवतीतिभावः ॥ ७ ॥

तस्याउक्तिमाह । हेआलयः ! ज्वालाध्वगतमुखपद्माः सत्यः सम्रांत गृहमध्ये स्वदृशः प्रहित्य युयं जानीत । किम् जानीमे स्तत्राह । नितान्तकन्दर्पनृत्येन श्रया तौ राधाकृष्णौ सुप्तिः कर्त्री परिरम्य कीदृक् धिनोति सुखयति तथाच सुप्तिरूपसभ्याया स्तादृशनृत्यदर्शन जन्य संतोषेणैव आलिंगन मिति ॥ ८ ॥

एतौ राधाकृष्णौ स्व-स्व-पीत श्याम-किरण-वृन्दैः करणैः शयनगृहमध्ये इतस्ततो न्यस्तमणिप्रदीपान् अफुल्लनीलोत्पल

* किंतौ इतिकुत्रचित्पाठः सतु असंगतः

नफुल्लनीलोत्पल चम्पकाभान् ।
विधत्त एतौ स्वमयुखवृन्दै
रनावृतै मंडनमाल्यचेलैः ॥ ९ ॥
सख्योऽनयो नैव विचक्षणा इ
त्याक्षिप्य शृंगारधुरालयसौ किम् ।
तत्कल्पिताकल्पशतं निरस्य
स्वलक्ष्मलक्ष्मै र्विदधे विभूषाम् ॥ १० ॥
द्वावेव सम्वेष्टय मिथ स्तनूद्वयो
र्यत् पीतनीलांशुकतामुपेयतुः ।

चम्पकाभान् विधत्त कुरूतः कीदृशैः भूषण माल्य वस्त्रैस्तदानीं तेषामंगे असत्वादेवानावृतै स्तथाच राधिकापृष्ठदेशस्थितानां दीपानां चम्पककलिकाप्रभत्वं, कृष्णपृष्ठदेशस्थितानांतु नीलोत्पल कलिकाप्रभत्वमितिज्ञेयं ॥ ९ ॥

अनयो राधाकृष्णयो र्ललिताद्या सख्यो न विचक्षणा इत्याक्षिप्य असौ शृंगारातिशयरूपा आलि किं ताभि ललितादिसखिभिः कृताकल्पशतं निरस्य स्वस्यचिन्हलक्ष्मैर्विभुषां विदधे, एतेन तदानीं अलंकारादिशुन्यं अथच शृंगार चिण्ह शतव्याप्तं तयोः शरीर मासीत् इत्यायातं ॥ १० ॥

सम्भोगाज्जातं वस्त्रत्यागं कंदर्पकृतत्वेनोत्प्रेक्षते । द्वयोः राधाकृष्णयो स्तनू परस्परं द्वौ राधाकृष्णौ संवेष्टय यत् यस्मात् पीतांशुकतां नीलांशुकतां उपेयतुः. राधांगवेष्टकं श्रीकृष्णस्य पाद्मांगं राधिकाया नीलांशुकत्व माप एवं श्रीकृष्णस्यापि बोध्यंतत् तस्मा दात्मभूः कंदर्प एव किं पौनरुक्त्याशंकया एतयो र्वसने दूरत

तदात्मभूरेव निरास्यदेतयोः ।
किंपौनरुक्त्या वसने विदूरतः ॥ ११ ॥
राधांगराज्यं मदनो यदा ग्रहीत्
तदैव लज्जां निजराष्ट्रपालिकां ।
शिरोक्षि वक्षःस्वनिशं न्यवासयत्
तां हा सएवाद्य निरस्यति स्म किम् ॥ १२ ॥
यत् क्वाप्यमूं नैव निभालयामः,
सेयं किमस्मा अपराध्यतिस्म ।
किंवास्मदक्ष्णां सुखभोगहेतु
मूर्त्तिः शुभादृष्टभरोऽभ्युदेति ॥ १३ ॥
स्वपालितं वस्तु तदेधयित्वा

एव निरास्यत् दुरीचकार ॥ ११ ॥

तदानीं कामोन्मादेन राधयैव त्यक्तां लज्जां मा लक्ष्य उत्प्रेक्षते । यदा मदनो वाल्यं दूरीकृत्य राधांगराज्यं अग्रहीत् तदैव लज्जा स्वरूपां निजदेशस्य पालिकां राधायाः शिरोक्षि वक्षःस्थलेषु निरंतरं निवासयत् वासं कारयामास अधुनातु हा कष्टं सएव मदनस्तां लज्जां किं निरस्यतिस्म दूरी चकार इत्यर्थः ॥ १२ ॥

उत्प्रेक्षान्तरमाह यत् यस्मात् अमूंलज्जां कुत्रापि राधांगे न-भालयामः तस्मात् सेयं लज्जा किमअस्मै कन्दर्पाय अपराध्यति , येन अपराधेन हेतुना कन्दर्पेन दूरीकृता । किम्वा अस्मदक्ष्णां सुखभोगहेतुः शुभादृष्टातिशय एव मूर्त्तः कन्दर्पस्वरुपेण लज्जा दूरी करणार्थं अभ्युदेति ॥ १३ ॥

पुनरप्युत् प्रेक्षान्तर माह लज्जा स्वपालितं राधा शरीरं

तस्मै समर्प्यान्तरधत्त किम्वा ।
पुनश्चतस्याः सुभगीभवन्त्या
यतो भविष्यत्य तुला समृद्धिः ॥ १४ ॥
सकृष्णमेघः स्थिरचञ्चलाली
वृतोति माधुर्यरसै रमूः किम् ।
आस्नापयत् स्वार्हण कृत्य वृत्ताः *
प्रत्यर्हणेनादित एव धिन्वन् ॥ १५ ॥
ताम्बुल माला विविधानुलेपै
रंगारधान्या गुरवैश्चधूपैः ।

एवयित्वा तस्मै कन्दर्पाय स्वयमेव समर्प्य अन्तरधात् नतुकन्द भयात्, यतः सुभगी भवन्त्या तस्या लज्जायाः पुनरपि अतुला समृद्धि भविष्याते तथाच जागरणोत्तरं अधिकलज्जा भवष्यति इति भावः ॥ १४ ॥

मेघ पक्षेस्थिरा अचपला चञ्चलाल्यो विद्युत् श्रेण्यस्ताभि, कृष्ण पक्षे औत् सुकय वाम्याभ्यां स्थिरा च चञ्चलाच या आली राधातया यद्वास्थिरा विद्युदीवआली राधा तया वृतः कृष्णरूपोमेघः अति माधुर्यरसैः अमूः किंकरीः किं अस्नापयत् ननु किंकर्यः किलादौ अर्हणादिभिः प्रभुं सेवंते पश्चात् प्रभुरपि प्रत्यहणेन ताः सुखयति इति सर्वत्ररीतिः अत्रतु अर्हणप्रत्यर्हणयो वैपरीत्यमित्याहस्वस्वसेवायां प्रवृत्ताः किंकरीः स कृष्णमेघ आदितः एव प्रत्यर्हणेन धिन्वन् सुखयन्सन् ॥ १५ ॥

ग्रीष्म शीतादिकालोचितैः स्वनिष्पाद्यमानैस्ताम्बुलादिभि कतिक्षणान् ताः किंकर्य्यः गमयांबभूवुः अंगार धानी ( अंगिठी ) इ

* इतत्र यत्ता इत्यपि पाठः

कालोचितैस्तैः प्रतिपाद्यमानैः
कतिक्षणां स्ता गमयांबभूवुः ॥ १६ ॥
प्रभञ्जनो रज्जयितुं निकुंज-
राजौ व्यराजिष्ट मुदा तदानीम् ।
मन्ये प्रबुद्ध्य श्लथ-दुर्वलांगो
द्रुतंप्रयातुं नतरां शशाक ॥ १७ ॥
या वृक्षवल्यो व्यकसंस्त दैव ता
श्चुम्बं स्तदामोदभरैर्दिशोदश ।
प्रसारितैः श्वासपथ-प्रवेशितै
र्भृंगावलीर्जागरयांचकार सः ॥ १८ ॥
तद्गुंजितै रंजितसुस्वरैर्भृशं
प्रबुद्ध्य वृंदाऽथविलोक्य सर्वतः ।

प्रसिद्धा ॥ १६ ॥

रात्र्यंते स्वतएव चलंतं वायुं वर्णयति। प्रभंजनो वायुः रात्र्यन्ते स, वायुः प्रबुध्य जागरित्वा, श्लथदुर्वलांग इत्यनेन तस्य मान्द्य मानीतम् ॥ १७ ॥

तत्कालोत्पन्नवायोः स्वभावत एव शैत्यमत स्तस्य सौगंध्यं वर्णयति। स, वायुः या वृक्ष वल्य स्तदा रात्र्यन्ते व्यकसन् ताश्चुम्बन् सन् अर्थात् तेनैव वायुना दशादिशो व्याप्य प्रसारितै श्वभृंगानां श्वासपथप्रवेशितै स्तासां विकसद्वृक्षवल्लीना मामोदभरैः करणै र्भृंगावली जागरयाञ्चकार ॥ १८ ॥

तेषां भ्रमराणांगुंजितैः करणैर्वृंदाप्रबुध्यपतत्रिणोन्ययुङ्क्त १९

स्वनाथयोर्ज्जागरणे पतत्रिणो
न्ययुङ्क्त कालज्ञतया रयादियम् ॥ १६ ॥
अथ प्रबुध्यैव विधूय पक्षान्
ग्रीवाः समुन्नीय चुकूजु रुच्चैः ।
यत्कुक्कुटाः पंचषवार मादौ
राधा जजागार तदाप्तबाधा ॥ २० ॥
कृष्णांगसंश्लेषविशेषबाधिन
स्तानेव मत्वेति शशाप सा रुषा ।
अरे ! परेताशुपरेतराट्पुरं
तत्रैव किं कूजत नो पदायुधाः ! ॥ २१ ॥
विश्लिष्य किंचित् प्रियवक्षसः सा
तूष्णींस्थितांस्तानुपलभ्य सद्यः।
संश्लिष्य कांतं दरनिद्रयैव

वृंदयानियुक्तानां पतत्रिणां मध्ये प्रथमतःकुक्कुटा जागरां चक्रुरित्याह अथ प्रथम तएवकुक्कुटाः पंचषवारमुच्चैश्चुकूजुःतत् तस्मात् राधिका-जजागार कथंभता प्रभातज्ञानजन्या प्राप्ता बाधा पीडा ययासा ॥२०॥

तान् कुक्कुटान् सा राधा शशाप शापमेवाह। अरे!पदायुधाः!कुक्कुटाः! यूयंपरेतराट्पुरं यमपुर परेत गच्छत तत्रैव यमपुरे किं न कूजत दुःख बहुले तस्मिन्नेवपुरे युस्माकं कूजनमुचितं नतु सुखमयवृन्दावने अतो म्रियध्वमितिभावः ॥ २१ ॥

प्रभातज्ञानोत्थशंकया प्रियवक्षसःसकाशात् किंचिद्विश्लिष्य सा राधा तदानीमेवपंचषबारान्शब्दान्कृत्वातूष्णीं स्थितान्कुक्कुठान्-

निषेव्यमाना पुनरप्यराजीत् ॥ २२ ॥

ततः पुनस्तानथटिट्टिभादी

नुत्कूजतः प्राहाविधूततंत्रा ।

हंहो ! क्षमध्वं शयितुं क्षणं मे

दत्तेति सा मोटयदंगमीषत् ॥ २३ ॥

कादंबकारंडवहंससारसाः !

कपोतशारीशुककेकिकोकिलाः ! ।

जगुः कलं केलिवनीजलस्थल

प्रचारिणां कृष्णकथामृतोपमम् ॥ २४ ॥

प्रबुद्धयकांतौ युगपद्यथारुजं

विश्लेषजामूहतुरंगमोटनात् ।

---

उपलभ्य मच्छापादेवएतेयमपुरंगता । अतोनेदानींप्रभातशंकापीति मत्वाकांतंसंश्लिष्येत्यादि ॥ २२ ॥

ततःक्षणांतरमुत्कूजतस्तान् कुक्कुटान् ! अथकुक्कटशब्दानंतरं-कूजतष्टिट्टिभादींश्चप्रति तेषांशब्देनविधूतसंत्रा राधाप्राह“मेमह्यंयूयंश यितुंक्षणंदत्त” ॥ २३ ॥

कादंबः कलहंसस्तदादयः सारसांताजलचारिणःकपोतादयः स्थलचारिणः एवंसतिक्षुद्रकेलिवने यज्जलं यच्चस्थलं तत्रतत्रप्रचा रिणएतेकृष्णकथामृतोपमं कलंजगुः ॥ २४ ॥

कांतौ राधाकृष्णौयुगपत्प्रबुद्धयगात्रमोटनाद्धेतोःयोविश्लेषस्त ज्जन्यां रुजंपीडांयथाऊहतुः प्रापतुः तथा अवयवांतरणासहविश्लेषेऽपित दानीमेवगात्रमोटनाज्जातंवक्षसोःसांद्रोपगूहनंतेनैवमुदंचऊहतुःकीह

चांपेयनीलाब्जधनुस्त्विषौ तथा
सांद्रोपगूहेण मुदं च वक्षसोः ॥ २५ ॥
द्वारं समुन्मुच्य मनागरनावं
शनैः पदन्यासविशेषमंजुला ।
निर्णीततज्जागरणाथकिंकरी-
ततिर्विशंका प्रविवेश वेश्म सा ॥ २६ ॥
तन्मंदमंजीररवैर्वैधित
त्वराभरोत्थातुमनाश्रपिप्रिया ।
पष्पंदएवातितरांप्रियस्ययत्
दोर्वल्लिमुन्मोचयितुं न साशकत् ॥ २७ ॥
वृन्देंगितज्ञः सविचक्षणः शुकः
शुकोयथाभागवतार्थकोविदः ।

शौचांपेयधनुर्नीलाब्जधनुषोस्तुल्येत्विषौययोः तथाचांगमोटनसमये-धनुराकारयोःपरस्परंवक्षसोरालिंगनंस्यादित्यर्थः ॥ २५ ॥

निर्णीतंराधाकृष्णयोर्जागरणं ययाईदृशीअतएवविशंकाकिं-करीततिःअनारवंनिःशब्दंयथास्यात्तथामनाक्द्वारमुन्मुच्यवेश्मतयोःशयनमंदिरंशनैःप्रविवेश ॥ २६ ॥

तासांकिंकरीणांमंदमंजीररवैःकरणैःवृद्धउत्थानेत्वरातिशयो यस्याएवंभूताप्रिया उत्थातुमनाअपि पस्पंद एवनतुउत्थातुंशशाक यत् यस्मात्प्रियेत्यादि ॥ २७ ॥

विचक्षणःशुकःपक्षिविशेषःअभ्यधात्प्रोवाचकीदृशःजगतांप्र भोःकृष्णस्यप्रबोधेदक्षःपक्षेदक्षनामाशुकःविचक्षणनामाशुकःकीदृशः

दक्षःप्रबोधेजगतांप्रभोराति
प्रेमास्पदत्वानुपमः समभ्यधात् ॥ २८ ॥
जयस्मराशेषविलासवैदुषी
निष्णातगोपीजनलोचनामृत ! ।
प्राणप्रियाप्रेमधुनीमतंगज !
स्वमाधुरीप्लावितलोकसंहते !॥ २९ ॥
प्रियाधरास्वादसुखेनिमज्जसि
प्रबुद्ध्यसेनेत्युचितंरसांबुधे ! ।
रिरंसुतायांविरिरंसुरेवते
किंचाधुनेयं क्षणादा क्षणांद्याति ॥ ३० ॥

दक्षपक्षे विचक्षणनाम्नाशुकेनसहवर्तमानोदक्षनामाशुकः जगत्प्रभोः श्रीकृष्णस्य प्रबोधेजागरणेसमभ्यधात् "शुकौदक्षविचक्षणावि" तिगणोद्देशात् तत्रदृष्टांतःशुकदेवोयथाभागवतार्थेकोविदस्तथाशुकोऽपि भगवतोजागरणरूपेअर्थेकोविदः पुनःशुकदेवःकीदृशःजगतांप्रबोधेज्ञानोत् पादनेदक्षःएवंप्रभोःश्रीकृष्णस्यप्रेमास्पदत्वेअनुपमःतथाशुकोपि अति प्रेमास्पदत्वेअनुपमःअर्थात्कृष्णस्येतिबोध्यम् ॥ २८ ॥

प्रथमतोदक्षआह । हेस्मराशेषविलासपांडित्येपारंगत! हे! प्राणप्रियायाःप्रेमरूपायाधुनीनदीतत्रमतंगजहस्तिस्वरूप ! ॥ २९ ॥

यतएतादृशविशेषणैर्विशिष्टस्त्वम् अतः प्रियायाअधरास्वाद सुखेनिमज्जसि न अथच प्रबुद्ध्यसेएतदुचितमेव किंतुरिरंसुतायांरमणेच्छायांसत्यां क्षणादारात्रिः श्लेषेणक्षणान्उत्सवान्दात्रीआसीत्-अधुनासेयंविरिरंसुर्विरामेच्छुःसती क्षणमुत्सवंद्यतिखंडयति ॥ ३० ॥

जहीहिनिद्रांश्लथयोपगूहनं
व्रजंप्रतिष्ठासुररंप्रभो ! भव ।
प्रातर्व्यभूवानुसरस्वचातुरीं
प्रच्छन्नकामत्वमथोररीकुरु ॥ ३१ ॥
जयव्रजानंदन ! नंदचेतः-
पयोधिपीयूष मयूख ! देव ! ।
गोष्ठेश्वरीपुण्यलताप्रसून !
प्रयाहिगेहायधिनुस्वबंधून् ॥ ३२ ॥
*शारिशुभासाथजगादसूक्ष्मधीः
शारीयथादेवनसम्मतास्थितिः ।

अधुनाविचक्षणानामाशुकःगोष्ठगमनेपरिपाटीमुपदिशतिउपगूहनंश्लथयहेप्रभोव्रजमरंशीघ्रंप्रतिष्ठासुर्भवप्रच्छन्नकामत्वंस्वीकुरुअन्यथाप्रभातेसतिव्यक्तकामत्वंभविष्यति ॥ ३१ ॥

हेव्रजानंदन ! हेनंदचेतःस्वरूपसमुद्रस्यचंद्र ! तथाचत्वयितस्यास्थितांशक्यात्वद्दर्शनार्थंनंदेआगतेसातिकागतिर्भविष्यतीतिभावः प्रसूनेतिनंदादपिगोष्ठेश्वर्याआसक्तिरधिका अतएवसाप्यधुनात्वन्मुखालोकनार्थमायास्यतीतिभावःअधुनातुगोष्ठेगत्वास्वबंधून्धिनुसुखय ॥३२॥

अथानंतरंसूक्ष्मधीनाम्नीशुभानाम्नीचशारीजगाद पक्षेशुभा कथंभूतासूक्ष्मधीःएवंसापिकथंभूता शुभा तत्रदृष्टांतःयथाशारीपाशकक्री

* शुभा साथ जगादसूक्ष्मधीः । धीरं जयश्रीः वृषभानुनन्दिनि ! ॥ सौभाग्य भेरी निनदानु भावित । त्रैलोक्य रामा परिषत् चमत्कृते ! । इति मधुरः पाठः ।

जयेश्वरि ! स्वीयविलाससौभग-

श्रीतर्षितश्रीमुखमुख्ययौवते ! ॥ ३३ ॥

शेषेऽधुनायद्रतिवल्लभास्य

राजीवराजन्मधुपानमत्ता ।

असांप्रतं तत्खलु सांप्रतं ते

प्रातस्ततोजागरयाम्यहं त्वाम् ॥ ३४ ॥

तन्माविलंवस्व भजस्व नीतिं

माऽन्हेपयात्मानमुपेहि गोष्ठम् ।

का शिक्षयेत्त्वामपि लोकरीतिं

त्वत्तो नुताःशिक्षत एव सर्वाः ॥ ३५ ॥

डोपयुक्तकाष्ठादिनिर्मितवलइतिप्रसिद्धाशारीयथादेवनैःपाशकैःसह संमतास्थितिर्यस्याःसा "अक्ष्यास्तुदेवनाःपाशकाश्चते" इत्यमरःतथापक्षि रूपशारिपक्षेदेवनेकामविलासे सम्यक्मताज्ञातास्थितिर्मर्यादाअवधि र्ययासा दिवुक्रीडायां "मर्यादाधारणास्थिति" रित्यमरःस्वीयविला ससौभाग्ययोःश्रिया समृद्ध्या तर्षितंतृषितीकृतंश्रीमुखलक्ष्मीप्रभृति मुख्ययौवतंयया ॥ ३३ ॥

रतिवल्लभस्यकृष्णस्यआस्यपद्मसंबंधिराजन्मधुपानेनमत्ता-त्वं मधुनापियत्शेषे शयनंकरोषितत्तेसांप्रतमिदानीं प्रातःकालेअ-सांप्रतमयोग्यम् ॥ ३४ ॥

लोकरीतिंत्वांकाशिक्षयेत्किंतुत्वत्तःसकाशात्ताः सर्वालोक रीतिंशिक्षते ॥ ३५ ॥

कलक्वणात्कंकणनूपुरंजवा
दत्युच्छलद्गात्रयुगच्छविच्छटम् ।
व्यस्तालकाग्रावलिवेष्टनोन्नम
त्ताटंकहारद्युतिदीपिताननम् ॥ ३६ ॥
स्रस्तांशुकान्वेषणसंभ्रमोदया
दितस्ततोन्यस्तकराब्जमंजुलम् ।
शय्योत्थितंकेलिविलासिनोस्तयो
स्त्रैलोक्यलक्ष्मीमिवसंचिकायतत् । युग्मकम् ॥ ३७

घूर्णालसात्तं श्लथसर्वगात्रं
विस्रस्तकेशं रसिकद्वयं तत् ।
भुग्नोपवेशं स्खलनेकथंचि
दन्योन्यमालंवनतां प्रपेदे ॥ ३८ ॥

केलिविलासिनोस्तयोराधाकृष्णयोस्तत्शय्योत्थानंत्रैलोक्यशोभामिवसंचिकाय एकत्रसंग्रहंचकारेति परश्लोकेनसहान्वयः शय्योत्थानंकीदृशंमधुरध्वानियुक्तेकंकणनूपुरेयत्र पुनश्चवेगादत्युच्छलद्गात्रद्वयस्यछविच्छटायत्र पुनश्चव्यस्तालकाग्राणांश्रेण्यावेष्टनेनउन्नमंतौऊर्ध्वंगच्छंतौयौकुंडलहारौतयोःकांत्यादीपितमाननंयत्रपृष्ठदेशास्थितालकेनैवहारस्यऊर्ध्वंनयनंबोध्यम् ॥ ३६ ॥

पुनःकीदृशंविहारसमयेस्रस्तस्यांशुकस्यअन्वेषणे यः संभ्रमोदयस्तस्मादितस्ततो न्यस्तेनकराब्जेनमंजुलम् ॥ ३७ ॥

ततरसिकद्वयंनिद्रावेशेनभुग्नः शय्यायामुपवेशोयस्य एवंस्खलनेकथंचिदन्योन्यमालंवनतांप्रपेदेतदानींपरस्परशरीरंपरस्परालम्बनंबभूवेत्यर्थः ॥ ३८ ॥

परस्परांसद्वयदत्तदोर्युग-
न्यस्तांगभारं नतपृष्ठशोभितम् ।
संमोटनादुन्मुखमास्यपंकज-
द्वयं परिक्रांतिमिवानयन्मिथः ॥ ३९ ॥

तदैवजृंभोत्थरदांशुजाल-
माणिक्यदीपै र्निरराजयत् किं ?- ।
सनिद्रमुन्मुद्रदृगंतलक्ष्मी-
रसज्ञयान्योन्य-विलिह्यमानां-विशेषकं ॥४०॥

पुनरपिघनघूर्णा -श्रीमुखद्वंद्वयोगा
दचटुलभुजवल्लीवेष्टनेनेष्टभासौ ।
क्षणमपिदरसुप्त्या शं भजावेत्यतस्ता

अधुनापरस्परसन्मुखतयास्थितयो रालस्यत्यागप्रकारमाह परस्परस्कंधद्वयदत्तदोर्युगे न्यस्तोअंगभारोयेन एकीभूतं रासिकद्वयम् आलस्यत्यागसमये नतपृष्ठेन शोभितं सत् गात्रमोटनाद्धेतो रूर्ध्वमुख-मास्य पंकजद्वयंपरस्परस्यपरिक्रममिवानयत्प्रापतदानीं आलस्यदूरीकरणार्थंउर्द्धगतपरस्परमुखभ्रमणमेव परस्परमुखस्य परिक्रमत्वेन उत्प्रेक्षितं ॥ ३९ ॥

तदा परिक्रमसमये एव जृंभोत्थो यो दंतस्य किरणसमूहः सएव-माणिक्यप्रदीपां तैः करणैः रासिकद्वयं किं अन्योन्यं निरराजयत् आरात्रिकमकरोदित्यर्थः एवंसनिद्रं रासिकद्वयं उन्मुद्रदृगंतशोभा एवरसज्ञा जिह्वा तया अन्योन्य विलिह्यमानंइतित्रिभिःश्लोकैरन्वयः ॥ ४० ॥

निविडघूर्णा युक्त श्री मुखयो द्वयोः परस्पर संयोगाद्धेतोः क्षण-मपीषत् सुप्त्या शं सुखं भजाव इति मनस्येवोक्त्वा तौ राधाकृष्णौ

वनृजकुसुमतल्पेस्रस्तगात्रावभूताम् ॥ ४१ ॥
विरहविकलयातच्छय्यया दूनया किं ?
कथमपिदरलब्धाश्लेषया निद्रया वा ।
उषसि न च विहातुं हंत शक्तौ खगा स्तौ
तदपि विदधु राभ्यां विप्रयुक्तौ स्वनंतः ॥४२॥

इति श्रीकृष्णभावनामृते महाकाव्ये शय्योत्थानकौतुकास्वा दनोनामप्रथमसर्गः ॥ १ ॥

---

विलासस्यसम्मर्दनकुटिलं यत् कुसुमतल्पं तत्रपुनः स्रस्तगात्रौ अभूतां । कथंभूतौ निद्रावेशेनाचंचलेन भुजवल्ली वेष्टनेन इष्टा कांतिर्ययोः ॥ ४१ ॥

भावी यो विरह स्तेनविकलया अतएवदूनया तयोः केलिशय्यया कर्या अथवाकथमपिभाग्येनरात्र्यंते राधाकृष्णाभ्यां सहईषल्लब्धाश्लेषया निद्रया कर्या किं उषसिविहातुं न शक्तौ तौ राधाकृष्णौ तदपिस्वनंतः शब्दंकुर्वंतःखगाःआभ्यां शय्यानिद्राभ्यां सह वियुक्तौविदधुश्चक्रुः तथाचैते खगाः शय्यानिद्रयोर्वैरिणएवेति भावः ॥ ४२ ॥

समाप्तश्चायंप्रथमःसर्गः ॥ १ ॥

## द्वितीयसर्गः ।

जालादथोदृक् सफरी स्तदालयो
लावण्यवन्या भृशमन्वशीलयन् ।
क्रीणंति या प्राणपरार्द्धकोटिभि
स्तयोः प्रमादोत्थरुचिच्छटाकणम् ॥ १ ॥
ऊचे विशाखा कलया लि ! कांतौ
निरंशुकावंशुकपुंजमंजू ।
विहारिणावप्यतिहारिणौ स्वै
रंगैरनंगैरलसौ लसंतौ ॥ २ ॥
अनंगदौ केलिवशादनंगदौ

---

अथ ललिताद्या आलयः दृष्टिरूपाः सफरी मत्स्यविशेषाण्-जालात् सकाशात् पक्षे जालं गवाक्षं प्राप्य लावण्य रूपा या वन्या जल समूहा स्तान् अन्वशीलयन् सखीनां लक्षणमाह या आलयः ॥ १ ॥

हे आलि ! कांतौ कलय-पश्य कीदृशौ निरंशुकौ वस्त्ररहितावपि अंशुकस्य कोमलकिरणस्य पुंजेन मंजू-मनोज्ञौ अत्रःसर्वत्र विरोधालं-कारो द्रष्टव्यः विगतश्चासौ हारश्चेति विहारो हाराभावः तद्विशिष्टौ हार रहितावित्यर्थः अतिमनोहारिणौ अंगैर्नखादिभिरनंगा अनंग-कार्य्याणिक्षतादिलक्ष्याणि तैर्लसंतौ यद्वा अनंगसूचकैरंगैः अथवा स्वांगैर्लसंतौ यतः अनंगैरलसौ ॥ २ ॥

अनंगपरस्परं कंदर्पं दत्त स्तौ केलिवशादंगरहितौ अंगदंवाजू

निरंजनौ हंत मिथो निरंजनौ ।
विस्रस्तरागाधरताभिलक्षितौ
विप्रस्तरागाधरताभिलक्षितौ ॥ ३ ॥
अथावभाषे ललितावधार्य्यतां
जयःस्मराजौ कतराश्रितोद्वयोः ।
बभूवदष्टाधरयोःकचग्रह-
व्याक्षिप्तमूर्द्धोर्नखरक्षतोरसोः ॥ ४ ॥
हृदोऽनुरागं कुचकुंकुमच्छलात्
न्यधत्त राधाच्युतपादपद्मयोः ।
यावद्रवालक्ततरालको दधौ
मूर्द्धैव सोऽस्याः पदयोस्तमुज्वलम् ॥ ५ ॥

वेदइतिप्रसिद्धं निरंजनान्वितराधिका पक्षे कालवशात् अंजनरहिता पक्षे कृष्णो निरंजन इतिगर्गकृतनामप्रसिद्धेः । मिथः परस्परं नितरां रंजयत इतितौ । विस्रस्तो विगतो रागोययोः एवं भूतौअधरौययो स्तयोर्भावस्तत्ता तयाविशिष्टौ । विकलं प्रस्तरं शय्यापि यस्मात् तथा भूतेन अगाधेन रतेन अभिरक्षितौ तद्वशतया स्थापिता वित्यर्थः ॥ ३ ॥

हे सख्यः! अत्रधार्य्यतां स्मराजौ कंदर्पयुद्धे द्वयोर्मध्ये जयःकतराश्रितोबभूवकस्यजयोवभूवेत्यर्थः जयस्यानिश्चायकं युद्धसाम्य माह दष्टेत्यादि संभोगसमये चूडावेणयो ग्रंहणेन व्याक्षिप्त मूर्द्धौः नखैःक्षते वक्षसी ययोः ॥ ४ ॥

अधुना चरणतल लग्नं राधिका कुच सम्बन्धि कुंकुमं श्री कृष्ण विषयकानुरागत्वेन वर्णयति राधा स्वहृदयस्ये चरणविषय-कानुरागं कुचकुंकुमच्छलात् कृष्णस्य पाद पद्मयो र्न्यधत्त राधिका-

इत्थंक्षणांतावदलक्षितांग्यो
नीचैः स्वरं तावनुवर्णयंत्यः ।
भाग्यंस्वमेवातिसभाजयंत्यो
ममज्जुरानंदमहोदधौ ताः ॥ ६ ॥

अथानुरक्तात्यनुमोदनांचिता
मुदातयोरैधत रूपमंजरी ।
सैवस्वयं केलिविलासिनो र्द्वयो
स्तदात्व-रम्यापचितौपटीयसी ॥ ७ ॥

तांबूलयावांजनकुंकुमद्रवैः
श्रमांबुजालैस्त्रुटितैश्चभूषणैः ।
इतस्ततोव्यस्ततयातदाद्युत

---

याश्चरण संबंधि द्रवेण आरक्तोऽलको यस्य एवंभूतः सकृष्णोऽपि अस्याराधायाः पद्यो रुज्वल मनुरागं मूर्द्धैव दधौ ॥ ५ ॥

ताभ्यां अलक्षितांग्यः सत्यः इत्थं मनेन प्रकारेण नीचैः स्वरंयथास्या त्तथातौ क्षणमनुवर्णयंत्यः सत्यः आनंदमहोदधौ ममज्जुः ॥ ६ ॥ अनुरक्तानां ललिताद्यालीनां अनुमोदनेन आस्वादनेनांचिता तयोः राधाकृष्णयोः सौंदर्य्यस्वरूपामंजरी ऐधत सा रूपमंजरी स्वयमेव केलिविलासिनो स्तत्कालीनरमणीय वेशाद्युपचितौ वेशादि परि-चर्य्यायां पटीयसी । तथा च भूषणादिकं विनैवतत् कालीनोत् पन्नात् सौंदर्य्यादेव शोभातिशयोजात इति भावः । पक्षे आलीनां भानुमत्यादीना मनुमोदनेन सम्मत्या रूपमंजरीनाम्नी किंकरी ऐधत प्रफुल्लाबभूव तयोः केलिविलासिनोरिति संबंधः त्तत्कालस्तुत दात्वंस्यादित्यमरः ॥ ७ ॥

तत् युवद्वय मेवंतयोः केलितल्पं च इतस्ततो व्यस्ततया तया

त्तत्केलितल्पं च युघद्वयंचतत् ॥ ८ ॥
पृष्ठोपधानं निदधे कयाचन,
प्यधादथान्या मृदुलांशुकेन तौ ।
पीयूषवल्व्यार्पितयास्ययोः परा
निरस्यघूर्णां विकसद्दृशौव्यधात् ॥ ६ ॥
आस्येंदुयुग्मं विकचाक्षिपंकजै
र्लीलालकव्रातमधुव्रतांचितैः ।
मिथो यदा पूजयतां तदा स्मरः
सज्यं प्रबुद्ध्यैव दधे धनु र्द्रुतम् ॥ १० ॥
संयोज्यतावेव विधू विधूय किं ?
शितेषुणैकेन विधाय कीलितौ ।

अद्युतत् दीप्तिंचकार कैः करणैस्तत्राह तांवूलादीनांद्रवैः ॥ ८ ॥

किं करीणां परिचर्यामाह कयाचन तकिया इति प्रसिद्धं पृष्ठो पधानं निदधे अन्याकोमलांशुकेन तौ प्यधात् आच्छादयामास अन्या आस्ययो राधाकृष्णयो मुखयोः अर्पितया पीयूषवल्व्या करणभूतया घूर्णां निरस्य विकाशयुक्त दृशौ अकरोत् निद्रावेशे सतिपदार्थांतर भोजनस्य कष्टदायकत्वे पीयूषवल्व्या अति कोमलत्वान्नात्र भोज नानुकूलप्रयासो ऽपेक्षितः ॥ ९ ॥

तयोरास्य-चंद्रद्वयं प्रफुल्लनेत्ररूपपंकजैः करणैः परस्परं यदा अपूजयतां तदेवकमलेनचंद्रार्चनरूपान्यायं दृष्टास्मरचक्रवर्तीप्रबुद्ध्य जागरित्वा सज्यं ज्यासहितं धनुः दधे अलसवलितौ प्रेमार्द्रार्द्रैरितिवद् व्यापारवाहुल्यात् पंकजैरित्यत्र वहुवचनम् ॥ १० ॥

तदनंतरं स स्मरःतौ मुखरूपविधू विधूय कंपयित्वा परस्परं सं-

स्यंदामृतान्योन्यभृतौतिरोचितै
र्ध्वांतोग्रपाशै रसिनोदपित्त्वणाम् ॥ ११ ॥
वहिःसखीकंकणकिंकिणीस्वनै
स्तदैवदैवादुपलब्धजागरा ।
कांतामणिस्वांतनिशांतमेत्यतौ
ह्रीरेव देवी कथमप्यमूमुचत् ॥ १२ ॥
स्त्रस्तालकान् वेष्टितहारनासा
लंकारताटंकयुगानथैताम्
स्वपाणिनोत्सारयितुं विहस्तां ॥
वीक्ष्याहकाचित्स्मयमानवक्ता ॥ १३ ॥
मिथोनिवध्यातनुसंप्रहारिणौ

---

योज्यएकेन तीक्ष्णेषुणा कीलितौ विधाय तिरश्चीनै रंधकाररूपपाशैः करणैःक्षणंअसिनोत् ववंध तेनअंधकारेस्थानीयेनकेशसमूहेनमुखचंद्रौ आच्छादितौ वभूवतुरित्यर्थः मुखचंद्रौ कीदृशौ गलितामृते नान्योन्यं पुष्टौस्यंदु प्रश्रवणे धातुः अतिशयोक्त्या अधरपानं द्योतितम् ॥११॥

कंकणादीनां स्वनैस्तदैव दैवादुपलब्धजागरा लज्जा देवीकांता मणिराधिकातस्याः स्वांतनिशांतं मनोरूपमंदिर मेत्यकथमपिकष्टेन तौअमूमुचत् तथा कंकणादिशब्देन सखीनामागमनज्ञानाज्जाता या लज्जा तयैवतयोःकंदर्पावेशस्त्याजितइति भावः ॥ १२ ॥

वेष्टिताहारादयो यैरेवंभूतान् स्त्रस्तालकान्स्वपाणिना उत्स्सार यितु उर्ध्वंचालयितुं विहस्तां व्याकुलांतां राधां वीक्ष्यस्मयमानवक्त्रा काचित् किंकरी आह ॥ १३ ॥

प्रियावपि अनुरागिणावपि युवां परस्परं हस्तरूपपाशेन निवध्य

युवांप्रियावप्यवलोक्यरागिणौ ।
अमी व्यरुध्यंतपरस्परंवला-
देकात्मभावाअपिकुंतलादयः ॥ १४ ॥
जानामियुष्मानपि साधु तूष्णीं
तत्तिष्ठतेतिप्रतिवादिनींताम् ।
उपेत्यतद्ग्रंथिविमोचनादौ
पटीयसी सा सुमुखींसिषेवे ॥ १५ ॥
काचित्-प्रसूनांवु-दरार्द्र वाससा
व्यत्यस्तरागांजनयावकादिकम् ।
मृष्ट्वा प्रतिस्वेक्षणसिद्धये तयो-
र्मुखद्वयं दर्पणतां निनाय किम् ? ॥ १६ ॥

---

अतनुर्महान्पक्षे अतनुनाकंदर्पेणसंप्रहारिणौ अवलोक्यएकस्मिन्नेवआत्मनिदेहेभावः सत्तायेषां एवंभूता अतएव परस्पर प्रीत्यापन्ना अपिअमीकुंतलादयः परस्परंव्यरुद्ध्यंताविरोधमकुर्व्वन् ॥ १४ ॥

भोःकिंकर्य्यः ! युष्मान् साधुयथास्यात्तथा अहंजानामितत्तस्मात् तूष्णीं तिष्ठतइति प्रवादिनीं सुमुखींतांराधां सा किंकरीउपेत्यनिकटं-गत्वा सिषेवे ॥ १५ ॥

तासांसेवामाह गुलावजल इति प्रसिद्धेन प्रसूनांवुना ईषदार्द्रं यद्वस्त्रं तेनव्यत्यस्तं स्वस्वस्थानत्यागेन विपर्य्यस्तीभूतं तांबूलरागां जनयावकादिकं मृष्ट्वापरस्परेक्षणसिद्धयेतयोर्मुखद्वयं किंदर्पणतां निनायप्रापयामास तथाच परस्पर मुखदर्शनार्थं किं दर्पणं मार्जितं चकारेत्यर्थः ॥ १६ ॥

तांबूलवीटीर्निदधे परास्मि-
न्नेका पटिम्ना मणिदीप-पाल्या ।
तन्मंगलारात्रिक माशुचक्रे
नीराजयंत्येव निजासु-लक्षैः ॥ १७ ॥
आदर्शमादर्शयति स्म काचित्
परांगनेपथ्यमुपाजहार ।
जहार काचित् श्रमविंदुजालं
शनैःशनैस्तावुपवीजयंती ॥ १८ ॥
आस्यांबुजं मे निखिलं मरंदं
पीत्वापि दष्टं मधुसूदनेन ।
इत्थं चिरं सस्मितमैक्षतैत-
न्नदर्पणं सन्मुखतो निरास ॥ १९ ॥

अस्मिन्मुखद्वये पटिम्ना हेतुना मणिदीपश्रेण्या तयोर्मंगलारात्रिकं चक्रे । कथंभूता स्वकीयप्राणलक्षैर्न्नीराजयंती निर्मंछयंती ॥ १७ ॥ अंगसंबंधिनेपथ्यं भूषणादिकं उपाजहार श्रीकृष्णस्य निकटे आजहार आनीतवती, श्रीकृष्णाद्दारायूथेश्वर्यावेशार्थमिति भावः । काचित्तौ उपवीजयंती सती श्रमविंदुसमूहं जहार दूरीचकार ॥ १८ ॥ मे मन्मुखकमलसंबंधि निखिलं मकरंदं पीत्वापि मधुसूदनेन आस्यकमलं दष्टं नहिभ्रमरःमकरंदेपीते सतिकमलंदशति इत्थं मनसि विभाव्य राधिका सस्मितं यथास्यात्तथा एतत् श्रीकृष्णकर्तृक-स्वाधरदंशनम् ऐक्षत अतोदर्शनानंदेन सन्मुखतो दर्पणं न निरास न दूरीचकार ॥ १९ ॥

रूपामृतं मे त्रिजगद्विलक्षणं
निःसीममाधुर्य्य मिदं च यौवनम् ॥
अद्यैव साफल्यमवाप सर्व्वथा
प्रेयानुपाभुंक्ततमां मुदा यतः ॥ २० ॥
सैवं विचिंत्य क्षणमाह कांतं
तदक्षि-पीताखिल-माधुरीका ॥
स्वांतर्मुदात्यर्थलसद्दगंत-
लक्ष्मी-विहारायतनास्य-पद्मम् ॥ २१ ॥
भोभोविलासिन्न ! वधेहि-यत्त्वया
विस्रस्तवेशाभरणास्म्यहं कृता ॥
यावन्मदाल्योऽनुसरंति नोषसि
द्रुतं समाधित्ससि तन्न किं पुनः॥ २२ ॥

ममरूपामृतादिकम् अद्यैव सर्व्वथा साफल्यं प्राप यतः प्रेयान् कृष्णः मुदा अतिशयेन उपाभुंक्त ॥ २० ॥

तस्य कृष्णस्य अक्षिभ्यां पीता अखिलामाधुरी यस्या एवंभूता सा राधा क्षणम् एवं विचिंत्य कांतमाह कथंभूतं स्वस्य राधिकाया अंतर्मुदा करणेन अत्यर्थं लसंती या दृगन्तलक्ष्मीः तस्या विहारायतनं मुखपद्मं यस्य तम् अत्र श्लोकत्रये एक एव कर्तृपदप्रयोग अतोविशेषकम् ॥२१॥

भो भोविलासिन्!श्रीकृष्ण त्वम्अवधेहि यद्यस्मात्विस्रस्तवेशा-भरणा अहं त्वया कृता अस्मि तत्तस्मात् यावन्मदाल्यः उषसि न अनु सरंति तावत्त्वं किं द्रुतं न समाधित्ससि वेशादि संस्कारेण न समाधानं कर्त्तुं मिच्छसि ॥ २२ ॥

स्वचातुरीं साधय मां प्रसाधय
प्रसादयानंगमभीष्टदैवतम् ॥
योऽस्मन्मनोमंदिरवर्त्ययं त्वया
वहिष्कृतोलक्ष्मभि रेभि रेव यत् ॥ २३ ॥

सत्यंब्रवीष्यंगजमिष्टदेवं
त्वदंगपीठे प्रकटीभवंतम् ॥
यजामि भूषांवरगंधपुष्प-
स्रक्चंदनाद्यै रिति तां स ऊचे ॥ २४ ॥

अथामुनाकंकतिकां शनैः शनै
र्विकर्षता भानुमती-करार्पिताम् ॥

---

मां प्रसाधय अलंकारादिना भूषितां कुरु तत एव स्वचातुरीं साधय एवं तवाभीष्ट दैवतंकंदर्पं प्रसाधय अपराधक्षमाद्वारा प्रसन्नंकुरु अपराधमेवाह। योऽयं कंदर्पः आवयोर्मनोरूपमंदिरवर्त्तीस्यात् स त्वया एभिर्लक्ष्मभि र्नखचिन्हैः करणैर्व्वहिष्कृतः इष्टदेवोहि सेवासमये वहिर्निष्कास्य पश्चात् गृहमध्ये स्थाप्यते तस्मात् सेवासमाप्तिसमये वहि श्चिन्हादिकं दूरीकृत्यमनोरूपमंदिर एव तस्य स्थितिरुचितेति ध्वनिः ॥ २३ ॥

श्रीकृष्ण आह सत्यमिति प्रकटीभवंतमिति अधुना पुनरपि तवांगे कामोद्भवोजातः अतएव चंदनाद्यैरित्यादिपदेन शृंगारानंतरं भावि संभोगोऽपि बोध्यः ॥ २४ ॥

अथ परस्परकथोपकथनानंतरं शनैःशनैः कंकतिकां विकर्षता अमुना श्रीकृष्णेन कचावली संस्क्रिय तेस्म च कचावली कीदृशीभानु

कचावली संस्क्रियते स्म मालती-
मालोत-वेणीरचना-पटीयसा ॥ २५ ॥
कस्तूरिका-चंदन-कुंकुम-द्रवैः
संभावितै स्ता मनु रागलेखया ॥
चकार भालांचित-चारु-चित्रकाम्
स चित्रचंचु धृत-नव्य-वर्त्तिकः ॥ २६ ॥
ताटंकयुग्मेन लवंगमंजरी-
संपादितापूर्वरुचा स चारुणी ॥
आनर्च तस्याः श्रवणे नवांजने-
नानंज कंजप्रतिमे तदाक्षिणी ॥ २७ ॥

---

मती कांतिमती । कंकतिकां करार्पितां पक्षेभानुमत्या तन्नाम्न्या सख्या कर्त्र्या करे श्रीकृष्ण-पाणौ आर्पिताम् अत्र ग्रंथे सर्वत्र किंकरीणां श्लेषेणैवोल्लेख इतिबोध्यम् अमुना कीदृशेन मालती-मालया उता ग्रथिता या वेणी तस्या रचनायाम् अतिपटीयसा अतिनिपुणेन ॥ २५ ॥

धृता चित्रसंपादिका तूलीइतिप्रसिद्धा वर्तिका येन एवंभूतः स श्रीकृष्णः भाले ललाटे अंचितं चारु चित्रकं यस्या एवं भूतांराधिकां चकार कैः अनुरागश्रेण्या सम्यग्भावितै र्वासितैः कस्तूरिकादिद्रवैः । तिलकनिर्माणे क्रमोयथा प्रथमतः कस्तूरिकायाःश्यामं मंडलं तस्य चतुर्दिक्षु केशरेणाष्टदलकमलरचना मध्येमध्ये चन्दनाविन्दुः पक्षे रागलेखया गणोद्देशदीपिकोक्त-तन्नाम्न्या-संभावितैः संस्कृतैः ॥ २६ ॥

स श्रीकृष्णः लवंगपुष्पस्य मंजर्य्या संपादिता अपूर्वा कांति र्यस्य-एवंभूतकुंडलयुग्मेन तस्या राधिकाया आरुणी श्रवणे-कर्णौ आनर्च पक्षे-

दधार हारं रुचिमंजरीलितम्
यदा तदोचे प्रियया मदोद्धुरम् ॥
या खंडिता चंदनकंचुली त्वया
वक्षोजयोस्तां न कुतश्चिकीर्षसि ॥ २८ ॥

आलेख्य-कर्मण्यतिगर्व्व-धारिणी-
स्ता स्ता विशाखाप्रभृती र्भवत्सखीः ॥
विस्मापयाम्यद्य कुचद्वये कृते
श्चित्रै र्विचित्रैरिति तां जगाद सः ॥ २९ ॥

प्रसाधनार्थ-प्रतिपादनोन्मुख-
श्रीरूपलीलारतिमंजरीमुखः ॥
स्तनद्वयं तूलिकयांकयन् हरिः ।
पंचेषु-पंचेषु-शरव्यतामगात् ॥ ३० ॥

लवंगमंजरीनाम्न्या किंकर्या एवंअंजनेन करणेन कंज प्रतिमे पद्मसदृशे तस्याअक्षिणीआनंज अंजनेनयुक्तेअक्षिणी चकारेत्यर्थः ॥ २७ ॥

यदा कृष्णस्तस्या वक्षसि हारं दधार, तदा प्रियया मदोद्धुरंयथा-स्यात्तथा ऊचे; हारं कीदृशं कांतिमंजर्य्याईलितं स्तुतं पक्षे एतन्नाम्न्या कयाचित् ईडितं प्रेरितं दत्तमित्यर्थः वाक्यमेवाह ममस्तनयो र्या चंदन कंचुलिका त्वयाखंडिता तां हारादानात् पूर्वं कथं न कर्तुमिच्छसि हारे दत्ते सति तन्निर्माणासंभवात् ॥ २८ ॥

स श्रीकृष्णः तां राधिकां जगाद वाक्यमेवाह तव कुचद्वये मया कृते र्विचित्रैः चित्रैः करणै श्चित्र कर्मणि अति गर्व्वं धारिणी र्भवत् सखीः अद्य विस्मापयामि ॥ २९ ॥

तूलिकया स्तनद्वयम् अंकयन् हरिः पंचेषोः कंदर्पस्य ये पंचशराः

पाणिश्चकंपे यदि वक्ररेखं
चित्रं विलुंपन्नुरसा मुहुः सः ॥
मन्ये स्मराग्निं धमति स्म तस्या
धृतींधनं दग्धुमना विदग्धः ॥ ३१ ॥
कामस्तमाकल्पमनल्प वैभवैः-
सद्यो विधायानियतस्थलास्थितम् ॥
विमृज्य संसृज्य विखंड्यखंडश-
स्तेनैव सोल्लासमुभावभूषयत् ॥ ३२ ॥
सख्यश्च दास्यश्च दृशांकृतार्थितां

पंचवाणा स्तेषां शरव्यतां लक्षताम् अगात् लक्षं शरव्यं चेत्यमरः । कृष्णः कीदृशः प्रसाधनस्य अर्थः प्रयोजनं संभोगस्तस्य प्रतिपादने ज्ञापने उन्मुख्यो या श्रीरूपलीलारतीनां मंजर्य्यः मुखे यस्य सः पक्षे प्रसाधनस्य अर्था वस्त्र-चंदनादीनि तत्संपादनोन्मुख्यः श्रीरूपमंजर्याद्या यस्य सः ॥ ३० ॥

कंदर्पावेशाद्यदि पाणिश्चकंपे, तदा स श्रीकृष्णःस्ववक्षसास्तनवर्तिव क्रलेखं चित्रं मुहुर्विलुंपन् राधिकायाः कंदर्पाग्निंधमतिस्म वर्द्धयतिस्म इत्यर्थः इति अहंमन्ये कृष्णः कीदृशः तस्याधृतिरूपं काष्ठंदग्धुंमनो यस्यसः ॥ ३१ ॥

इदानीं विगतधैर्य्ययोर्भङ्ग्या संभोगमाह कंदर्पः स्वस्यअनल्प-वैभवैः करणैः कृष्णेन कृतं तम् आकल्पं संभोगसमये परस्पर-संमर्द्दात् सद्यो ऽनियतस्थलस्थितं विधाय तेषांमध्ये किंचित् चित्रम् एकत्र ।विमृज्य तदेवान्यत्र संसृज्य किंतत् हारतारकादिभूषणम् खंडशोविखंड्य तेनैव एकस्याएव राधाया श्छिन्नभिन्नाकल्पेन तौ राधाकृष्णौ अभूषयत् ॥ ३२ ॥

सख्यश्च एवं संभोगसमये ततोनिःसृत्य वहिः स्थिता दास्यश्च तां

मूर्त्तौ चिरायाभिलषंत्य एव ताम् ॥
प्रभातमायातमवेत्य चुक्षुभु-
र्विधिं शपंत्यो निरुपाय-कातराः ॥ ३३ ॥
गवाक्षलग्ना मुमुदे क्षणां क्षणां
तदैव मम्लौ वलभिद्दिशं गता ॥
दृष्टिः सखीनां तरलत्वमाश्रिता
सा हृद्यभात् साधकभक्तसंहतेः ॥ ३४ ॥
तत्केलिसीमान मसीमसौहृदं
ताः सम्विदाना निलयं यदाविशन् ॥
तदैव भीरुः सहसा प्रियोरसो
विश्लिष्यतल्पादवरोहणांव्यधात् ॥ ३५ ॥

दशां कृतार्थतां मूर्त्तौ मूर्त्तिमतीं चिरकालं व्याप्य तिष्ठतुइतिअभिल षंत्यः सत्य एव आगतं प्रभातम् अवेत्य चुक्षुभुः विधिं प्रभातानिर्मातारं३३

तरलत्वं चंचलत्वं आश्रिता सखीनां दृष्टिर्यदा गवाक्षलग्ना सतीक्षणामुमुदे तदैव वलभिद्दिशं पूर्वादिशं गता सती क्षणां मम्लौ पक्षे तरलत्वं-हारमध्यगतत्वम् आश्रिता सती साधकभक्तसंहतेः हृदिअभात् तथाच साधकभक्तैःसदा सा हृदिभाव्येतिभावः ॥ ३४ ॥

तत् केलिसीमानं-अवसानं संविदाना स्ता सख्यः तयोर्निलयं यदा अविशन् तदैव भीरु राधिका सहसा अतर्कितमेव प्रियस्य वक्षःस्थलाद्विश्लिष्य तल्पादवरोहणां व्यधात् सीमारहितं सौहृदं प्रेम यत इति तत्कालेसीमानमित्यस्य विशेषणं, केलिसमाप्तिमवलोक्य दुःखातिशये नप्रेमापकृत इति भावः "सीमसीमेस्त्रियामुभे" इत्यमरः ॥ ३५ ॥

स्वपक्षपातीकृत-किंकरीगणा
भ्रूकुंचनेनोपविवेश सासने ॥
संलाप-पीयूष-पिपासयाहरि
स्तासां मृषास्वाप मुवाह तत्क्षणात् ॥ ३६ ॥
सा प्राह भोधन्यतमाः स्थ सख्यो
दिष्ट्याद्य सख्यं निरवाहि वाढम् ॥
दिष्ट्या पुनर्दर्शनदानपात्री-
कृत्यैव मां क्रेतुमिवोदयध्वे ॥ ३७ ॥
निःसार्य्य गेहाद्भवतीभिरुद्धता !
नक्तं समानीय वनं कुलांगनाम् ॥
सतीव्रतध्वंसिनि पुंसि हंत
वलात् समर्प्यांतरधायि तत्क्षणात् ॥ ३८ ॥
ररक्ष मां पुण्यततिः पुरातनी
न तामृतेऽन्यागतिरस्तिकापिमे ॥

---

भ्रूकुंचनेन स्वपक्षपातीकृता किंकरीगणा यया एवंभूता राधा तल्लग्निश्लिष्य आसने उपाविवेश पूर्व्वं समस्तविलासं दृष्ट्वतः किंकरीगणस्य सहाय्यं विना सखीप्रतिवक्तव्यस्य विकाशासंभवात् तासां सखीनां श्रीराधयासह संलापं, तत् क्षणमारभ्य मिथ्यास्वापं निद्रा मुवाह प्राप ॥ ३६ ॥

साराधिका ॥ ३७ ॥

हेउद्धताः ! नक्तं-रात्रौ-कुलांगनां-मां ॥ ३८ ॥

पुरातनी पुण्यतति मां ररक्ष तांपुण्यततिंविना यद्यस्मात् अस्यकृष्ण

यदस्य पार्श्वे ऽपि सतीत्व-विप्लुतिं
नैवान्वभूवं रजनीं नयंत्यपि ॥ ३९ ॥
गोपीसहस्रेषु रताविरामतो
वृद्धा निशा यापयतो ऽस्य जागरैः ।
अक्ष्णो र्वसत्याद्यतनीं विभावरीं
यत् सुप्तिदेव्योपकृतं ममातुलं ॥ ४० ॥
यत्ते सतीत्वं प्रथितं न वेद का
यद्ब्रह्मचर्य्यं श्रुतयो ऽस्य संजगुः ।
तदत्र निर्दूषण एव साधु वां
संगो ऽतिरंगाय सखीदृशा मभूत् ॥ ४१ ॥
स्वब्रह्मचर्य्य-व्रत-रक्षणार्थं ।

---

स्य पार्श्वे ऽपि रजनीं नयंत्यहं सतीत्वस्य विप्लुतिं ध्वंसं नैवान्वभूवं न अनुभवं कृतवती ॥ ३९ ॥

गोपीसहस्रेषु अविरतरमणाद्धेतोः पूर्व्वपूर्व्वदिवसीया वृद्धा निशा जागरैः करणै र्यापयतोऽस्यकृष्णस्य अक्ष्णो र्नेत्रयो रद्यतनीं रात्रिं व्याप्य वसंत्या सुप्तिदेव्या ममअतुलंउपकृतं तथाच पूर्व्वपूर्व्वरात्रौ जागरणाद्धेतोरस्य नेत्रद्वये आगतायाः सुप्तिदेव्या उपकारेणैव मम सतीत्वं मक्षुण्ण मितिभावः ॥ ४० ॥

सखीनांप्रत्युत्तरमाह यत् यस्मात् तव प्रथितम् सतीत्वं कानवेद एवं कृष्णो ब्रह्मचारीति-गोपालतापन्युक्त श्रुतयोऽस्यकृष्णस्यब्रह्मचर्य्यंजगुः तत् तस्माद्वां युवयो र्निर्दूषणएव संगस्सखीनां दृशां रंगा यअभूत्॥४१॥

अयंश्रीकृष्णः स्वस्यब्रह्मचर्य्यव्रतरक्षार्थं स्त्रीलिंग-शब्द-बोध्यां सु-

सुप्तिं न दर्वीमपि संस्पृशे द्रयः ॥
अनंग-संग्येव ततो भवत्या
भवत्यसौ सत्य मिति प्रतीमः ॥ ४२ ॥

इति ब्रुवाणा ललिता विशाखया
प्रोचे सखि ! ज्ञात मिदं मयाखिलं ।
धर्म्मो ऽनयोः शर्म-विशेष-सिद्धये
तनोः प्रयागे लय माप स स्वयं ।विशेषकम्॥४३॥

शर्मैव किं तत् ? कथये ऽतिचित्रया
पृष्टा-ह सा योषित-धर्म एतयोः ।
सतीत्व-व्रर्णीत्व मिहा य-मेधितो ।
व्यधा-दिमौ संप्रति संप्रयोगिनौ ॥ ४४ ॥

---

सिंदेर्वीमापि न संस्पृशेत् अतो हेतोः असौ कृष्णः भवत्या अंगसंगीन भवतीतिसत्यंवयंप्रतीमः पक्षेअस्यसुप्तिस्पर्शाभावात् संपूर्णारात्रिं व्याप्य भवत्या सह अनंगसंगी असौ भवतीतिसत्यं प्रतीमः ॥ ४२ ॥ इतिब्रुवाणांललितां प्रातिविशाखा उवाचअनयोःसाध्वीब्रह्मचर्य्यलक्षण धर्मकार्य्यत्वाद्धर्मः स्वस्यउत्कर्षविशेषसिद्धये प्रयागे तनो र्देहस्यलयंआप स्वयंदेहत्यागंकृतवानित्यर्थः पक्षेअतनोः कंदर्पस्य प्रकृष्टयागे स्वयमेवलयंआप ॥ ४३ ॥

पूर्वोक्तशर्मैवकिंतत्कथयेतिचित्रयापृष्टा साविशाखाआहएतयो र्धर्मः सतीत्वब्रह्मचर्य्यं अधितपुपोषअयमेवइहप्रयागलयेसातिएधितः वृद्धः सन् इमौसम्यक्प्रकृष्टयोगवंतौअकरोत्धर्मोहिपरिपाकद

यद्धाति वैराग्य-धुरा-धरोद्यन्-
नैर्गुण्यमुक्ता मयहारिणीयं
निरंजनोदारदृगद्य सद्यः
सत्यं तदेषा-च्युत-योग-सिद्धा ॥ ४५ ॥
पूर्णात्मभू-तत्व-सुखानुभूत्यै
स्वाधीन-माया-श्रित-योग-निद्रः ।
चकास्त्यसावप्यगुणातिमुक्त-

---

[illegible]यां शुद्धचित्तानां योगं साधयतीतिशास्त्रं पक्षे संप्रयोगोरतं सतीत्व ब्रह्मचर्ययो रेतदेवफलंपरिणतमितिध्वनिः ॥ ४४ ॥

यत् यस्मात् इयं राधा वैराग्यधुरां धरतीति सा पक्षे नीरागत्वातिशयोऽधरे यस्या स्सा एवं उद्यता वैराग्येण हेतुना मुक्ता अतएव आमयं अन्येषां अविद्यारोगं दर्शनादिना हर्तुं शीलं यस्याः पक्षेउद्यन्नैर्गुण्यं यस्य तथाभूतो मुक्तामयो हारोऽस्तियस्या एवं निरंजना उपाधिरहिता उदारं दृग्-ज्ञानं यस्याः सा, पक्षेअंजनरहिता दृष्टि र्यस्याः सा तत्तस्मात् एषा राधा सत्यमेवच्युतिरहिता योगसिद्धिर्यस्याः तथाभूता पक्षे अच्युतेन श्रीकृष्णेन सह योगः संभोग स्तेन सिद्धा ॥ ४५ ॥

पूर्णात्मभूतत्वेन यः सुखस्यानुभव स्तदर्थं योगाभ्यासेन स्वाधीना वशीकृता या माया विद्याशक्ति स्तया आश्रितयोगनिद्रोऽसौ कृष्णोऽपि तल्पे चकास्ति कीदृशः अगुणा गुणातीता या अतिमुक्त माला अत्यंतमुक्तश्रेणी तया आंचि तापूजिता श्री मोंक्षसंपद्यस्यसः अतएवअतिशयसिद्धिप्राप्तः पक्षेआत्मभूः कंदर्पं स्तत्वसुखं यथार्थ सुखं, तदनुभवार्थं स्वाधीना अतएव मायया कपटेनाश्रितः

मालांचितश्री रतिसिद्धि माप्तः ॥ ४६ ॥
अस्या स्तु पश्यालि ! हृदंवरांतरे
स्वानंद-संवित्-प्रवरेंदुलेखया ।
य दीप्यते तेन पुन र्भवत्ततं
मनोभवोत्तापशमश्च बुध्यतां ॥ ४७ ॥
तदा निरोधासह्-रोमहर्ष-
खेदांबुवर्ष-स्तिमितांगयष्टेः ।
व्यक्तं हरे रुद्बिदुरस्मितास्य-

---

स्वेन सहयोगो यस्या एवं भूता निद्रा यस्यसः कीदशःअगुणा संभोगातिशयादूगुणारहितायाअतिमुक्तमालातयाअंचिताश्रीः शोभा यस्य अतएव मालायाः सूत्रत्रोटनाद्धेतो रसौ सिद्धि प्राप्तः ॥ ४६ ॥

श्रीकृष्णापेक्षया अस्या योगसिद्धयतिशयमाह अस्या राधाया-स्तु तदपेक्षयावैलक्षण्यं पश्यत तदेवाह अस्याहृदयाकाशेयत् स्वानंदसंवित् स्वानंदानुभव स्तदेवाज्ञानरूपतमोनाशकत्वात् प्रवरेंदुलेखा, तया कर्त्र्यायद्दीप्यते तेन पुनर्भवक्षतं-मोक्षं एवंमनोजन्योत्तापशमश्च-बुध्यतां पक्षेहृदंवरांतरे हृदिस्थितवस्त्रमध्ये या स्वानंदस्यसंवित्उपलब्धिर्यस्याः एवंभूताइंदुलेखा अतिशयोक्त्यानखचिन्हं तयाकर्त्र्या-यद्दीप्यते तेन पुनर्भवक्षतं नखक्षतंएवंकंदर्पजन्योत्तापशमश्च बुद्ध्यतां तथाचनखक्षतानां वस्त्राच्छन्नत्वेपि तेषांवस्त्रस्यावकाश द्वाराप्रकटि-तया कांत्या हेतुना नखक्षतानामनुमानं जायतइतिभावः "पुनर्भवः कररुहोनखो" स्त्रीत्यमरः ॥ ४७

तासांपरिहासवाणींश्रुत्वा निरोधं नसहंते येरोमहर्षादय स्तै स्तिमितं अंगं यस्य एवंभूतस्यहरेः उद्बोधनशीलं स्मितं यत्र एवं भूतास्यपिधा

पिधानचातुर्य्य मपास्त मासीत् ॥४८॥

उत्थाय सद्यः स जगाद वक्षः
स्वं दर्शयं स्ता अतिसंभ्रमेण ।
हंहो !!! ममापि स्वसुखैकसंवि-
च्चित्रेंदुलेखा हृदि पश्यतास्ते ॥ ४९ ॥

आवृत्य चैलेन नमन्मुखं पुन
र्विभुग्नचिल्लीतट मुन्नमय्य सा ।
ब्रूते स्म किं चित् स्वकरांवुजेन त-
द्वक्षः स्पृशंती पिदधे च लक्ष्म तत् ॥५०॥

चित्रेंदुलेखे इह ते यदि स्तः
स्यातां न कस्म -ल्ललिताविशाखे ॥

---

नेकृतं यत् चातुर्य्यं तत् व्यक्तं सत् अपास्तमासीत् ॥ ४८ ॥

सश्रीकृष्णः पूर्वोक्तराधावक्षः स्थलस्थेंदुलेखादर्शनाधीनं तस्या योगातिशयमसहमानइव ताः सखी राह हंहो अत्यंतसंरंभे ब्रह्मसुख- रूपंयत् एकंमुख्यं चैतन्यं तदेवाश्चर्य्येंदुलेखाअज्ञानमोहनाशकत्वात् _ाक्षेसंभोगसुखसंवेदनी विचित्रनखरेखा मम हृद्यप्यास्ते तथाचतद्द- र्शनद्वारा राधायाः पुरुषायितत्वं सूचितं ॥ ४९ ॥

सा राधिका किंचित्ब्रूतेस्म आवृत्ये तिस्वभावोक्तिः स्वकरांवुजे- नश्रीकृष्णस्यवक्षः स्थलं स्पृशंतीसा तत् लक्ष्माचिन्हंपिदधेच ॥ ५० ॥

पूर्वश्लोकेश्रीकृष्णेनोक्तस्याचित्रेंदुलेखा पदस्यार्थांतरं प्रकल्प्यस्व- स्यलज्जासंवरणप्रकारमाह हेकृष्ण ! तेतवहृदि यदिचित्रेंदुलेखे मे स

पश्य त्वदीयान् परिगृह्य तेदुः-
स्वीयान्नखांकां स्त्रिगुणीकृतान् या ॥५१॥
त माहु राल्यः स्वपतो ऽखिलां निशां
वक्षः कया ते नखरै र्विचित्रितं ।
इयं तु साध्वी-कुलचक्रवर्तिनी
स्वे नैव पुण्येन विराजते ऽविता ॥ ५२ ॥
आहैष आं पुण्यवलैव साध्वी
भवेद् यदद्यातनु-संप्रहारे ।
जिगाय मा मप्यवलापि बाला
वलेपवत्यक्षुणा दप्युरो मे ॥ ५३ ॥

---

सख्यौस्तः तदापरमयोग्ये ललिताविशाखे कथं नस्यातां ताः चित्राद्या सख्यस्त्वदीयान् नखांकान् परिगृह्य तदपेक्षया त्रिगुणीकृतान् स्वीयों- नखांकान् ते तुभ्यं अदुः तथाचसर्वासांप्रत्युप कारस्यसाम्यात्तववैष- म्यमनुचितमितिभावः ॥ ५१ ॥

निशांव्याप्य स्वपतस्ते तववक्षःस्थलं कयानखरै र्विचित्रितं राधिकायास्तु चित्रकर्तृत्वसंभावनापिनास्तीत्याह इयं राधिका स्वपुण्ये नैव अविता सती विराजते ॥ ५२ ॥

एषकृष्णआह आं ज्ञातं इयं साध्वी स्वपुण्यवलाएव यद्यस्मादद्य- अतनु-संप्रहारे अतनुर्महान्यः । संप्रहारस्तस्मिन्, पक्षेकंदर्पयुद्धे राधावालापिअवलापि अतिशयवलिष्ठंमामपिजिगाय अतएवावलेप- वती-अहंकारवती मे मम उरस्थलंअक्षुणात् अर्थात्नखास्त्रेण ॥ ५३ ॥

कीदृक् तदेवेति तदा तदालिभिः
पृष्टः स तासा मधरान् पयोधरान् ।
रदै र्न्नखै राशु वला-द्विखंडय
न्नैवं सखी-वो व्यधिते त्यभाषत ॥५४॥
इत्थं प्रगे तं परिफुल्लपद्मिनी-
श्रेणीमुखामंदमरंदमादितं ।
विलोक्य वृंदा मधुसूदनं वने-
मुदं भियं चा नु ममज्ज वेपिता ॥ ५५ ॥
कांता उदी यु र्विकसन्मुखेंदवो
रात्रि र्गता चास्त मपास्तचंद्रिका ।
विलासभंगः क्व थ मस्तुनास्तुवा

---

हे कृष्ण! तन्नखक्षतादिकंइति तस्या राधाया आलिभिः पृष्टः स श्री कृष्णः तासांसखीनांअधरान्दंतै र्नखैश्च पयोधरान् विखंडयन्वो युष्माकंसखी राधापि एवंव्याधित चकार इत्यभाषत ॥ ५४ ॥

तं मधुसूदनं कृष्णं पक्षेभ्रमरंवनेपक्षेजले विलोक्य वृंदामुदंआनंद समुद्रंअनुलक्षीकृत्य ममज्जप्रातःकालसंभावनयावेपिता कंपितासती भियं मुदं च ममज्ज आनंदमग्ना भयमग्नाच वभूवेत्यर्थः श्रीकृष्णपक्षे पद्मिनी सुंदरीस्त्री ॥ ५५ ॥

विकसन्मुखान्ये वेंदवो यासांएवं भूता राधाद्याः कांता उदीयुः एवंअपास्तचंद्रिकायतएवंभूता रात्रि श्च अस्तंगता अतएव विलास भंगाकारणस्यविकसच्चंद्रमुखीनां उदयस्य-सत्वात् एवं विलाससुख भंगकारणस्यचंद्रिका- रहितरात्रिगमनस्यचसत्वात् विलासभंगः

क्षणं हृदैवेति परामममर्श सा ॥ ५६ ॥
तमांस्यनश्य-न्नभितो यथा यथा
तदा प्रकाशश्च यथायथैधत ॥
तथा तथा हृद्रुज मेव सान्वभूद्
व्रजस्य रीतिं श्रुतयोऽपि नो विदुः ॥ ५७ ॥
ततोवलाद्वाचयति स्म कक्खटीं
तद्भीषणं किंचन कक्खटं वचः ।
प्रात स्तयोः केलिविलासशांतये
युक्त्यंतरं हंत न जाघटीति यत् ॥ ५८ ॥
सती रिमाः कृष्ण ! कलंकपंकिलाः
करोषि नोषस्यपि यज्जिहाससि ।
फलं तदस्याचिरमेव दित्सति

---

कथं भविष्यति न वेतिसंशयाक्रांतहृदया वृंदा क्षणं परामममर्श ॥५६॥

यथायथातमांसि अभितो ऽनश्यन्नेवं अंधकार-नाश-तारतम्येन यथा यथा-प्रकाशश्च ऐधत तथा तथासा वृंदाहृद्रुजं अन्वभूत् ननु अंधकारस्वरूपस्याज्ञानस्य नाशतारतम्याद्धतोः सत्व गुणकार्यं-प्रकाशो वर्द्धते तस्माच्चहृद्रोगोनश्यतीतिश्रुतिप्रसिद्धे स्ततूकथं वृंदा हृद्रोगमन्वभूत्तत्राहआहव्रजस्येति ॥ ५७ ॥

तयोराधाकृष्णयोर्भीषणं कक्खटं कठोरं वचः कक्खटी-तन्नाम्नी वानरीं वृंदा वलाद्वाचयति स्म यत् यस्मात् केलिशांतये युक्त्यं तरं न जाघटीतिन अतिशयेन घटते ॥ ५८ ॥

हेकृष्ण ! राधाद्या इमाः सती स्त्वं कलंकपंकिलाः करोषि यतः उष

व्रजादिहैषा जटिलोपसेदुषी ॥ ५९ ॥

आकर्ण्य तामि जटिलेति वर्णा ।
त्र्यर्णी विवर्णात्व मधारि सद्यः ।
विलास-रत्नाकर-मुद्भवंती
शंकैव तासां चुलुकी-चकार ॥ ६० ॥

हा हंत सख्यः ! करवामहे किं ?
कथं निकेतं निभृतं व्रजेम ।
इत्यालपंत्य स्त्वरया स्खलत्यः
कुंजालयादंगनमीयु रेताः ॥ ६१ ॥

रात्रि र्गतात्यल्पतरा सुखप्रसूः
हा कालरात्रिः पुनरागतात्र या ।
वर्षीयसी दुःखततिप्रसू र्वला
दाशाः फलंतीः कवलीकरोति नः ॥ ६२ ॥

स्यपि न जहासि तत्तस्मात् अचिर मेवास्य फलं व्रजात् इहनिकटेउप सेदुषी उपसन्ना जटिला दित्सति दातुमिच्छति ॥ ५९ ॥

विवर्णत्वं-शंकयावैवर्ण्यं, विलासरूपसमुद्रं तासां सखीनांशंकैवचुलुकीचकार एतनशंकायाअगस्त्यत्वमारोपितं ॥ ६० ॥ ६१ ॥

सुखंप्रसूतेइतिसुखप्रसूर तएवात्यल्पतरा रात्रिर्गताकिंतुकालरात्रिस्वरूपा जटिलाआगता । कथंभूतादुःखभयस्यप्रत्सूर्मातापक्षेदुःखततिं अतिशयदुःखंप्रसूतेअतएववर्षीयसी अतिवृद्धा एवंभूतासानोऽस्माकं आशा पक्षे दिशः ॥ ६२ ॥

दास्यश्च सख्यश्च तदैव काश्चन
प्रविश्य केली-निलयं पुन स्तयोः ।
स्रग्धेफलामृतंमडना-दी-
न्यादु र्ददु श्चापि मुदा परस्परं ॥ ६३ ॥

मिथोंगसंगस्य तदापि कांतयो
र्जिह्वासुतादित्सुतयो रभूद्रणः ।
आद्या यदा प्राप मनाक् पराभवं
राधांशगः कृष्णभुजस्तदा वभौ ॥ ६४ ॥

विद्युल्लतालिंगित-वारिदागमः
क्षितावितो जंगमता-मवाप किं ? ।
इत्युल्लसंतश्चुकुवुः शिखंडिन
स्तेनापि ता भ्रांतदृशः-शशंकिरे ॥ ६५ ॥

---

अंगनात्पुनस्तयोः केलीनिलयंप्रविश्यफेलामृतंभुक्तावशिष्टं चर्वितादिकंआदु-र्जगृहुः ॥ ६३ ॥

कांतयोः राधाकृष्णयोः तदापरस्परांगसंगस्याजिह्वासुतादित्सुतयोरणोऽभूत् तथाचएकस्मिन्नेवसमयेशंकाहेतुका अंगस्पर्शस्य जिहासुता-त्यक्तुमिच्छुता,औत्सुक्यहेतुकाजिघृक्षुताइत्यर्थःआद्याशंकाहेतुकाजिहासुता, यदामनाक्पराभवंप्राप, जटिलायाः परितोदर्शनाभावात्किंचित्शंकानिवृत्तेरितिभावः तदाराधायाः स्कंधगतः सन् श्रीकृष्णस्य भुजो वभौ ॥ ६४ ॥

विद्युल्लतयालिंगितोमेघागमः आकाशस्थोऽपि क्षितौकिंजंगमतां-आप पक्षेविद्युल्लतयालिंगितोमेघतुल्योऽगमः वृक्षः स्थावरः किंक्षि-

प्रियास्य मन्वेकतरां तृषातुरां
हरित्सु सत्रास मथा परां दृशं ।
मुहुः किरंतौ व्रजतः स्म तौ व्रजं
प्रत्येकदोः-श्लेषविशेषभासिनौ ॥ ६६ ॥
राज्ञि प्रलीनेऽरुणादस्युदंडिते
स्तासां सुहृद्भि स्तिमिरैः पलायिते ।
दूरास्थित-स्थाणु-विलोकनाकुला-
श्रमंसतैता जरतीमयं जगत् ॥ ६७ ॥
उदेष्यतैवोषसि पद्म बंधुना-
प्यवाध्यतैषा वत पद्मिनीततिः ।

---

तौजंगमतांमाप "द्रुर्द्रुमागमा" इत्यमरः इतिमेघज्ञानात् उल्लसंतः शिखं-डिनश्चुकुवुः तेन मयूरशब्देनापि ताः सख्यः भ्रांतदृशः सत्यः श-शंकिरे ॥ ६५ ॥

तौ राधाकृष्णौप्रियास्यं प्रियाच प्रियश्च प्रियौ तयोरास्यमनु-आस्ये तृषातुराम् एकतरांदृशंमेवं हरित्सु-दिक्षुसत्रासंयथास्यात्तथाअपरांदृशं मुहुः किरंतौव्रजंव्रजतः कथंभूतौ प्रत्येकहस्तस्याश्लेष विशेषेणाभासिनौ दीप्तिमंतौ ॥ ६६ ॥

राज्ञि-चन्द्रेप्रलीनेसति अरुणारूपदस्युनादंडितैस्तासांराधादीनां-सुहृद्भिस्तिमिरैःपलायितेसतिदूरास्थितस्थाणुविलोकनाकुलाःदूरेस्थितो यः स्थाणुः शाखापल्लवादिरहितः शुष्कवृक्ष स्तस्यविलोकनेन-जरतीयमितिज्ञानादाकुला एता जगत्जटिलामयममंसत "राजामृगांकेक्षत्रियेनृपे" इत्यमरः ॥ ६७ ॥

उषसिउदेष्यताउदयंप्राप्स्यतासूर्येणापद्मवंधुनापिएषाराधाद्यापद्मिनीततिःअवाध्यत्तइतिस्मरन्स्मरःकिंविषीदतिस्मअतएवतयोर्दुःखदर्श

इति स्मरन् किं नु विषीदति स्म स
स्मरः शरं नो समधित्स दुन्मनाः ॥ ६८ ॥
देवा त्तदौत्सुक्य भटं विजित्य सा
शंका वलिष्ठा व्रजवर्त्मसीमनि ।
प्रेयोभुजाश्लेषनिधिं व्यपानुद-
द्बलेन मन्ये सुदृशां सवेशतः ॥ ६९ ॥
एकाध्वगामित्व मपि स्फुटं तया
तौ तर्जयंत्येव यदा न्यषिध्यत ।
तदा दृशां कातरता मिथ स्तयोः
पुरःस्थिता प्राणसखी ररोदयत् ॥ ७० ॥
पृथक् पदव्यां पद मेव धास्यतो
विधूयमानस्य युगस्य कांतयोः ।

---

नेनउन्मनासन् शरंनोसमाधित्सत्तथाचतदानीं सूर्य्योदयजटिलाद्या गमनशंकया परस्पराश्लिष्टयोरपि कंदर्पावेशोनजातइतिभावः ॥ ६८

व्रजसीमनिवलिष्ठा सा शंका निकुंजसीमनि प्राप्ताधिकारमौत्सुक्यभटंविजित्यप्रेयसः श्रीकृष्णस्यभुजाश्लेषनिधिं सुदृशांराधायाः अशाद्वेशतः बलाद्व्यपानुदद्दूरीचकार ॥ ६९ ॥

तौ राधाकृष्णौ तर्जयंत्यातया शंकया यदातयो रेकाध्वगामित्वमपिन्यषिध्यत्तदातयोर्मिथो दृशां कातरता अग्रेस्थिताः सखीररोदयत् ॥ ७० ॥

पृथक्पदव्यांपदमेवधास्यतोः कांतयोर्विधूयमानस्ययुगस्य विश्लेरिकाचरतो मुखद्वयस्य रुचयस्तदानीं प्रादुर्भवंत्यःपक्षे भवत्

भव द्वियोगप्रभयापि दभ्रया-
विधूयमानारुचयोऽभवन् त्तणात् ॥ ७१ ॥
यदा मिथः स्वांतमणिप्रदान-
पात्रीभवंता-वपि जग्लतु स्तौ ॥
तदा पुन र्योगविधौ तयोः स
प्रेमैव साज्ञात् प्रतिभू र्वभूव ॥ ७२ ॥
तया वियुक्तं निभृतं व्रजंतं-
व्रजंत मालिंग्य तरुणय रौत्सीत् ।
अपाररुक् कापि यया श्रुपूरे
तस्यो-ष्णाता धायि घियं घयंत्या ॥ ७३ ॥

---

नक्षत्ररुयेवघातयो वियोगप्रभातयादभ्रया अल्पयापि कारणभूतया विधूयमाना खंड्यमाना अभवन् नक्षत्रस्य प्रभयाह्यौ चंद्रापराभूता-वित्याश्चर्यम् ॥ ७१ ॥

तौ परस्पर मनो रूपमणि प्रदानस्य पात्री भवंतौ हर्ष कारण-स्य मणिप्रतिग्रहस्य उभयत्र सत्त्वेऽपि यदाजग्लतुः तौ ग्लानिंप्रापतु स्तदातयोः पुनर्योगविधौ प्रेमा एवसाक्षात्आभिनहतिप्रसिद्धः प्रतिभू-र्वभूव ॥ ७२ ॥

तयाराधया वियुक्त मथ च व्रजं निभृतं यथास्यात्तथा व्रजंतं ग-च्छंतं कृष्णमालिंग्यका पिअपूर्वा तरुणी युवतिः अरौत्सीत् रुद्धंचका-र कीदृशी अपाररुक् कांतिर्यस्याः सा पक्षे अपाररुक् अपारापीडासा-एव तरुणी अवला तथाच विच्छेदजन्यपीडाक्रांतः सकृष्णो गंतुंन-शशाकेत्यर्थः यया पीडयातस्य कृष्णस्य अश्रुप्रवाहे उष्णता अधायि श्रानंदाश्रूणि शीतत्वंपीडाजन्ये अश्रूणि उष्णत्वमितिप्रसिद्धिः पीड-

प्रेयोवियोगातिवलद्व्रणाव्रजैः
स्वांगं विदंत्या नख केशमावृतं ।
जगाम च प्राह च सास्खलत्पदं
विलम्बमानालि करावलम्बिनो ॥ ७४ ॥
सख्योऽजसा किं कुरुथा-समंजसं
य न्मां विपन्नां नयथ व्रजांतिकं ।
श्वश्रूनिकेतांधतमांधुरोधन-
द्रोहातुरां हंत पुनर्विधास्यथ ॥ ७५ ॥
निःसार्य्य गेहा ल्ललिते ऽधुनैव मां ।
प्रवेशयस्यप्यधुनैव तत् पुनः ॥
कृष्णांगसंगामृतसिंधुमज्जन
प्रलोभनैवाद्य वृथा कृता त्वया ॥ ७६ ॥

---

याकोहश्यातस्य धियंबुद्धिं धयंत्या सतन्मुखं इत्यन्य तरुणयपेक्षया अपूर्वत्वम् ॥ ७३ ॥

प्रेयसः कृष्णस्य वियोग स्वरूपैरतिवलद्व्रणसमूहै वृंतंनखकेश पर्य्यंतं स्वांगंविदन्ति साराधा स्खलत् पदंचरणं यत्रतद्यथा स्यात्तथा जगाम एवंस्खलत् सुपतितं पदं यथाप्या त्वथा प्राह च कथंभूता यूथे श्वश्र्वा मन्दगमनानुरोधेन या विलम्बमाना आलीतस्याः करावलंविनी ॥ ७४ ॥

हेसख्यः ! यूयं किम् असमंजसं कुरुथ यस्मात् विपद् ग्रस्तां मां व्रजांतिकंनयथश्वश्रूग्रहरूपेयोऽधतमांधूः निविडांधकार युक्तः कूपस्तत्ररोधन रूप द्रोहेण पुनर्मां आतुरांविधास्यथ करिष्यथ ॥ ७५ ॥

हे ललिते ! अधुनैव गेहान्निस्सार्य्य पुनरधुनैवमां प्रवेशयसि ७६

अस्ताचलं यन्नधुना व्यलोकि यः
स तिग्मरश्मिः सखि ! पूर्वपर्वतं ।
आरोढुमाकांक्षति किं विभावरी
खपुष्पतामद्यतनी जगाम किं ? ॥ ७७ ॥
धिङ्मेश्रुतिं धिग्रसनां दृशं च धिक्
सदातनौत्कंठ्य-भर-ज्वरातुरां ।
प्रापु र्नपातुं लवमप्यमुष्य याः
सौस्वर्य्य-सौरस्य-सुरूपतामृतं ॥ ७८ ॥
निर्वेदपद्धतिमपीपठदेवपूर्वं
योगो ऽधुनातु सरले ! भवतीं वियोगः ।

संध्यासमये अस्ताचलगतं सूर्य्यं दृष्ट्वा पूर्वमभिसारं कृतवत्या राधाया अनुरागातिशयेन रात्रिं विस्मृत्याधुना प्रातः समये उदय पर्वतगतं सूर्य्यं मवलोक्य संदेहमाह हेसखि ! अस्ताचलं यन्गच्छन् यस्तिग्मरश्मिः सूर्य्यः अधुनैव मया व्यलोकि सएवसूर्य्यः किंअधुनैव पूर्वपर्वतं आरोढुमाकांक्षति विभावरी रात्रिः ॥ ७७ ॥

औत्कंठ्यातिशयरूपज्वरेणातुरां ममश्रुतिं रसनां दृशंच धिक् यतो याः श्रुत्यादयः अमुष्य कृष्णस्य सौस्वर्य्येत्यादि ॥ ७८ ॥

ललिता प्रत्युत्तरमाह पूर्वरात्रौयोगः संभोगः त्वां निर्वेदपद्धतिं धर्मोल्लङ्घनात् वेदरहितां वीथीं अपीपठत् पाठयामास अधुनातुहे सरले ! राधे ! वियोगो विप्रलंभः निर्वेदपद्धतिं ममश्रुतिं नेत्रंधिगित्या कारकात्म धिक्कारपद्धतिं भवतीं अपीपठत् तयोर्मध्ये आद्योयोगः अस्याःनिर्वेदःपद्धते श्रीकृष्णस्यरूपाद्य मृतस्वरूपं अर्थंअदर्शयत् अन्यो

आद्योऽच्युतामृतमदर्शयदर्थमस्या
अन्योऽनुभावयति हा कटुकालकूटं ॥७६॥
इत्थं सखीगिरमपि प्रतिबोद्धु मेषा
नैवानुरागपरभागवती शशाक ।
ताभिर्वृता व्रजजनैर विलोकितैव
वेश्म प्रविश्यनिजतल्पमथाध्यशेते ॥ ८० ॥

इतिश्रीकृष्णाभावनामृते महाकाव्येप्राभातिका
चरितास्वादनोद्वितीयः सर्गः ॥ २ ॥

---

वियोगः तस्याः पद्धतेरर्थं कालकूटं विषं अदर्शयत् विप्रलंभस्य कालकूटवदेत्रपीडकत्वात् पक्षयोगोअष्टांगः निर्वेदपद्धतिं वेदवैमुख्य पद्धतिं अष्टांग योगपक्षे च्युतिरहितं मोक्षं अदर्शयत् योगभ्रंशपक्षे कालकूटं मृत्युसमूहं कालोदंडधर इत्यमरः ॥ ७९ ॥

एषाराधाइत्थं सखीगिरं बोद्धुमपि न शशाकयतः अनुरागस्य परभाग उत्कर्षः तथाचात्युत्कृष्टानुरागवतीत्यर्थः तल्पमध्येशेतइति अधिशीङ स्थासां कर्म ॥ ८० ॥

* समाप्तश्चायं भावनामृतस्य द्वितीयः सर्गः *

## तृतीयः सर्गः

——:*:——

स्नातानुलिप्तवपुषः पुपुषुः स्वभा स्त-
न्निर्माल्य-माल्य-वसनाभरणेन दास्यः ।
प्रास्य स्वकाम मनुवृत्तिरता स्तयो र्याः
श्रीरूपमंजरि-समान-गुणाभिधानाः ॥ १ ॥
ता विद्युदुद्युतिजयि-प्रपदैकरेखा
वैदग्ध्य एव किल मूर्त्तिभृत स्तथापि ।
यूथेश्वरीत्वमपि सम्यगरोचयित्वा
दास्यामृताब्धि मनु सस्नु रजस्र मस्याः ॥२॥

किंकरीणां परिचर्य्यां वर्णयितु मादौ ता एव वर्णयति द्वाभ्यां श्लोकाभ्यां स्नातानुलिप्त-वपुषो दास्यः तस्या राधाया निर्माल्य-माल्य वसनाभरणेन स्वभासः स्वकांतीः पुपुषुः,या दास्यः स्वस्यकामं कामनां प्रास्य त्यक्त्वा तयोः राधाकृष्णयो रनुवृत्तौ रता कथंभूता यथा आसांश्रियो मंजरी रूपस्य मंजरी, तथैव तत् समाना एवगुणा अभिधानानि यासां तथाचासां शोभारूपानुरूपा एवगुणाद्या इत्यर्थः पक्षे श्रीरूपमंजरी समाना गुणा अभिधानानि नामानियासां नाम साम्यं मंजरीत्वांशेन ॥ १ ॥

विद्युतां उत्कृष्ट-द्युतिं जेतुं शीलं यस्या स्तथाभूता प्रपदस्य पादाग्रस्य एकरेखापि यासां एवंभूता अथचमूर्त्ता वैदग्ध्यएव ता दास्योपि

श्वश्रू पुरांतरगतोत्तर-पार्श्ववर्त्ति
भ्राजिष्णुधाम वरशिल्पकलैकधाम ।
तातेन वत्सलतया वृषभानुनैव
निर्मापितं तदुपमापि तदेव नान्यत् ॥ ३ ॥

स्थूणा-प्रघाण-पटलांगण तोरणाली-
गोपानसी-निविग्रकोष्ठ-कपाटवेद्यः ।
राजंति यत्र मणिदीपतति-प्रदीप्त-
वैचित्र्य-निर्मित-जनेक्षण-चित्रभावाः ॥ ४ ॥

---

यद्यपियूथेश्वरीत्व एव योग्या स्तथापि यूथेश्वरीत्वं सम्यग्रुचि विषयमकृत्वा अस्या राधाया दास्यामृता ब्धौ अजस्रंसस्नुः स्नानं चत्रु ॥२॥

किंकरी वर्णयित्वा अधुना तासां सर्वोपयोगि-राधा-गृहादिकं वर्णयति,-श्वश्रू-जटिला तस्या अंतःपुरगतं अथचांतः पुरस्योत्तर पार्श्ववर्ति यत् भ्राजिष्णुधाम, राधायाः स्वतंत्रवासस्थानं, तत् वृषभानुना तातेन वत्सलतया हेतुभूतया निर्मापितं, कीदृशं श्रेष्ठशिल्पं, वैदग्ध्यस्यैकास्पदं ॥ ३ ॥

यत्र-वासस्थाने स्थूणाद्यो राजंति स्थूणा थाम इति प्रसिद्धा प्रघानः-परछाति इति, छज्जा इति प्रसिद्धा, पटलं-छाति इति प्रसिद्धं, अंगनं-आँगिना इति प्रसिद्धं, तोरणाली-वहिर्द्वार श्रेणी, गोपानसी-बकु इति प्रसिद्धा, कोष्ठः-कोठा इति प्रसिद्धः, कपाटं-कवाट इति प्रसिद्ध, एते कथंभूता मणि प्रदीप समूहेन प्रदीप्तं यद्वैचित्र्यं नानाविधा चित्रवत्त्वं, तेन निर्मितो जनानां ईक्षणस्य आश्चर्ये भावोयासां श्लेषेण चित्रभावो विचित्रात्मकता नारायणस्य भजनाद्देवसारूप्य, प्राप्तेः स्वर्गनिष्ठ अस्यतु दर्शनादेव-जडतारूप चित्रभाव प्राप्ति

यत्रेंद्रनीलमणिभू र्वलभी घनाभा
हंसालि रप्युपरि राजति राजती सा ।
ये वीक्ष्य वंधु-रिपु-भानभृतो वितत्य
संकोचयंति शिखिनः स्वशिखंड-पंक्तीः ॥५॥
तत्रोपवेश-शयना-शन भूषणादि-
वेदी र्विमृज्य परिलिप्य विशोध्य तास्ताः ।
आस्तीर्य्य रांकव मुपर्य्युपयुक्त मुक्त-
मुल्लोच मुन्नत-मुदो मिलिता ववंधुः ॥ ६ ॥
एका ममार्ज मणिकांचन-भाजनानि

---

रितिभावः अतो नारायणादपि गृहस्थित—वैचित्र्यस्योत्कर्षः सिद्धः ॥ ४ ॥

यत्र वासस्थाने इंद्रनीलमणिना उत्पन्ना यस्या एवं भूता कोष्ठादीनां सर्वोपरिदेशे राजती रजतनिर्मिता हंसश्रेणी राजति, ये वल-भी हंसश्रेण्यौ वीक्ष्य वंधु-रिपु भानभृतः शिखंडिनो-मयूराः शिखं-डस्य पुच्छस्य पंक्तीः आदौ मेघ तुल्यवलभी रूपवंधुदर्शनेन हर्षा-द्वितत्य विस्तार्य्य पश्चाच्छरदानी मेव स्वशत्रो हंसस्य दर्शनेन भयात् संकोचयंति ॥ ५ ॥

तासां किंकरीणां सेवामाह तत्र-गृहमध्ये, विशोध्येतिक्रमेण, रांकवं-मृगरोम निर्मित कोमलासनं, आस्तीर्य्य तस्य उपरिदेश उप-युक्ता मुक्ता यत्र एवं भूतं-उल्लोचं चांदोया इति प्रसिद्धं चंद्रा तपं, उन्नतमुदः ता दास्यः मिलिताः सत्यः ववंधुः तद्बंधनेऽन्यापेक्षया मिलिताः ॥ ६ ॥

समययोग्यं च पय इति ग्रीष्मे शीतलं शीते उष्ण जल मित्यर्थः,

काचित् पयः समय-योग्य मुपानिनाय ।
चित्रांशुकापिहित-रत्न-चतुष्किकाया
मालंवनीय मदधाद-परोपवर्हम् ॥ ७ ॥

पूर्वेद्युरंशुक मणीमय-भूषणानि
मृष्टानि यत्रनिहितान्यथ संपुटंतत् ।
उच्चैर्भणद्वलयराजि समुद्धटय्य
काचिज्जघर्ष विधु-कुंकुम-चंदनानि ॥ ८ ॥

अन्या व्यधत्त सुमनाः सुमनोभि रेव
चित्रैः किरीट-कटकांगद-हार-कांचीः ।
जाती-लवंग-खदिरादिभिरज्यमानाः
काचिद्ववंध सुरसाःफणिवल्लि—वीटीः ॥ ९ ॥

---

चित्रवस्त्रेणाच्छादितरत्न चत्तष्कि कायांत्तकिया इति प्रसिद्धं आलंव नीयोपवर्हं अपरा किंकरी अदधात् ॥ ७ ॥

काचित् पूर्वदिवसे मृष्टानिवस्त्र मणिमयभूषणानि निहितानि यत्र एवं भूतं तत् संपुटं उदूघटय्य झणंतीवलय श्रेणी यत्र एवं भूतं यथास्यात्तथेति उदूघटनाक्रियाविशेषणं कुंकुमादीनि जघर्ष सर्वांसौपेटिकोदूघटनं च वस्त्रालंकारादि दर्शनार्थं, तासां स्वभाव एव ॥ ८ ॥

शोभनमना अन्या चित्रैः सुमनोभिः पुष्पैः किरीटवलया दीन् व्यधत्त अंगदबाजुबंध इति प्रसिद्धः फणिवल्लिवीटीः पर्ण निर्मित वीटिकाः ॥ ९ ॥

अत्रांतरे प्रतिदिशं दधि-मंथनोत्थ-
रावै रवारित-महीसुर-वेद-घोषैः ।
हम्वा-ध्वनि व्यतिविधान मिथोऽवधायि
धेन्वालि-तर्णकघटा वलदंतरायैः । १०
वृंदिष्ठ-वंदि-जनवृंद-वितायमान-
श्रीकृष्ण-कीर्त्ति-विरुदालि-सुधातरंगैः ।
शारिशुकव्रज-कलैः कलविंक-कोकि
कोलाहलैः क्रमत एव समेधमानैः । ११

अत्रांतरे प्रातः कालरूपावसरे प्रतिदिशं दधिमंथनोत्थ शब्दै रवारितोऽनभिभूतः अतएव तादृश - मंथन - शब्दापेक्षया महान् यो महीसुरस्य ब्राह्मणस्य वेदघोष स्तै र्जाग्रतत्सु लोकनिचयेषु एवंवश्य माण - विहारादिषु च सत्मू श्यामला तत्र राधिका निकटे एत्य आस्त इति नवम श्लोकेन सहान्वयः-, वेदघोषैः कीदृशैः हम्वाध्वनेः परस्पर - कृत - शब्दं परस्परावधानं च येषां तेषां धेनुश्रेणिवत्सघटानां वलवदंतरायो यतस्तैः, धेनुवत्सयोर्दोह न समये परस्परशब्दश्रवणं अवांतर - वेद - शब्देन प्रतिबंधा दित्यर्थः ॥ १०

लोकानांजागरणे कारणांतराण्याह वृंदिष्ठोऽतिशयश्रेष्ठो यो वंदि जनसमूह स्तेन वितायमानै स्तादृश - सुधातरंगैः कलविंक श्चिरिया-इति प्रसिद्धः एतैःशब्दैः क्रमत उत्तरोत्तरक्षणे एव समेधमानैः तथा च सर्वेषां ब्राह्मणानां एकदाजागरणं न संभवति अत्तएव जागरण क्रमतएव शब्दानां वृद्धिक्रमोबोध्यः ॥ ११ ॥

जाग्रत्सु लोकनिचयेष्वथ वासरेति
कर्त्तव्य-भावनपरेष्व धिशय्य मेव ।
कृष्णेक्षण-क्षण-सतृष्णतया पुरंध्री-
वृंदेषु नंदगृह संदित मानसेषु । १२
नपुत्री-मुखाम्वुज-विलोकन-जीवितायां
तत्रोप सृत्य सहसा मुखरभिधायम् ।
वात्सल्य-रत्नपटली-भृतपेटिकायां
राधे!क्व पुत्रि!भवसीति समाह्वयंत्याम्। १३
एषास्मि किं कथयसीति तया प्रबुध्य
सद्यः सजृंभण-सघूर्ण-दृशेक्षितायम् ।
श्रीकृष्ण-पीतवसनं तदुरस्यवेक्ष्य
तस्यानवेक्षण मथाप्यभिनीतवत्याम् ॥१४॥

---

एवमधिमध्यमेवदिवस संबंधि इति कर्त्तव्यताभावनापरेषु जनेषु सत्सु एवं श्रीकृष्णस्य ईक्षणे क्षणेन जातं यत्सतृष्णत्वं तेन हेतुना पुरन्ध्री वृन्देषुनंद गृहेवद्धमानसेषुसत्सु ॥ १२ ॥

तत्र राधिकामंदिरनिकटे मुखराविश्रयांउपसृत्यागत्य हेराधे ! पुत्रि त्वं कुत्रभवसि इतिसमाह्वयंत्यां सत्याम ॥ १३ ॥

एवं एषा राधाऽहमस्मि त्वं किं कथयसि इति तया सद्यः प्रबुद्ध्य जागरित्वा जृंभाघूर्ण-सहित-दृशईक्षितायां मुखरयां सत्यां तस्या राधाया वक्षःस्थले पीतवसनं वीक्ष्यापि राधालज्जिताभविष्यतीति शंकया तस्य अनवेक्षणं अभिनीतवत्यां मुखरायां सत्यां ॥ १४ ॥

प्रातर्बभूव तदपि स्वपिषि त्व मद्य
नोद्यंतमंबरमणिं किमिहावधत्से ।
स्नात्वा तदेतमभिपूज्य किमप्यशान
हा ते तनुः प्रतिदिनं तनुता मुपैति ॥ १५ ॥
इत्यश्रु-विंदुभि रिमा मभिषिच्य पाणि-
मृष्टांगमंकनिहिता मभिलाल्य तस्याम् ।
गोपेंद्र-मंदिरमतित्वरया गतायां
कृष्णोत्तरगोत्कलिकया कलितांतरायाम् १६ ।
एकैकशोथ मिलितासु सखीषु सर्व्वा
स्वन्योन्य-हास-परिहास-परासु तासु ।
सुश्लिष्टमंडलतयैव कृतोपवेशा-
स्वारूढ-रत्न-मणि-हेम-चतुष्किकासु ॥१७॥

---

उद्यंतं अंबरमणिं सूर्य्यं किं न अवधत्सेतत्तास्मात् स्नात्वा एवं सूर्य्यं अभिपूज्य किमपि वस्तु अशान भुंक्ष्व हा कष्टं प्रतिदिनं व्याप्य तनुतां-क्षीणताम् ॥ १५ ॥

अंकनिहितां एतां राधां अश्रुविंदुभि रभिषिच्य पाणिनामृष्टं अंगमभिलाल्यच्च श्रीकृष्ण-दर्शनार्थं गोपेंद्रमंदिरं अतित्वरया गतायां तस्यां मुखरायां सत्याम् ॥ १६ ॥ १७ ॥

श्रीराधिका-मिलनमेव समस्त-हर्ष-
सस्यैकवर्षमिति यद्धृदि निश्चिकाय ।
तत्श्यामलैत्य समया समयाभिविज्ञा
श्लिष्टा तया सुषमयेव तदाऽऽस तत्र ॥१८॥

॥ नवभिः कुलकम् ॥

श्यामे ! त्वमेवमधुनैव विचिंत्यमाना
मन्नेत्रवर्त्म-गमिता विधिना यथैव ।
तद्वत् स तर्षविटपी फलयिष्यते चे
दद्यैव तर्हि गणयान्यपि सुप्रभातं ॥ १९ ॥

---

तदा प्रातः काले समयाभिज्ञा श्यामा समाया राधिका- निकटे तया राधया सुश्लिष्टा-आलिंगिता सती तत्र आसउपविवेश तत्र दृष्टांतः सुषमया इव आलिंगिता,ननुश्यमलातावत् स्वतंत्रयूथेश्वरी भवतीति कथं तस्या राधा-निकटागमनं संभवेद तस्तत्र कारणमाह यद्यस्मात् राधिका मिलन मेव समस्त हर्ष रूपसस्यस्यएकं असाधारणं वर्षा स्वरूपं समस्तसस्यानि यथा वर्षा प्राप्य प्रफुल्लीभवंति तथासमस्त हर्षा अपि राधिकामिलनं प्राप्य प्रफुल्लीभवंतीतिहृदि निश्चिकात यतत्तस्मादित्यर्दि ॥ १८ ॥

अधुना राधिका श्रीकृष्णेन सह रात्रिसंबंधिविलासं अनुरागवशाद्विस्मृत्य स्वमनोदुःखं श्यामलां श्रपायितुं कथां रच यति हे श्यामे ! त्वं अधुनैव विचिंत्यमाना यथा अनुकूलेन विधिना त्वं मन्ने प्रवर्त्म गमिता प्रापिता तथा स वक्तुमनर्हस्तर्षविटपी स्तृष्णा रूपवृक्षः फलयिष्यते चेत्तर्हि अद्येव सुप्रभातं गणयानि ॥ १९ ॥

हंतैष संतत मतीव समेधमानः-
शश्वत् सखीभिरपि सुंदरि ! सिच्यमानः ॥
नाद्यापि यत् फलमधाद्दयि! कोऽत्र हेतु-
र्हा तत् कदाऽतिरभसादवलोकयिष्ये ॥ २० ॥

राधे ! स ते न फलितो यदि तत् फलिष्य-
त्याश्चर्य्यमस्य फल मप्यलसांगि ! बुद्ध्ये ।
आस्वाद्यमान मपि सौरभमादितालि-
प्रत्याययत्य-ननुभूतमिव स्वमुच्चैः ॥ २१ ॥

पक्ष्मावली वत यदीय-रसेन शोणो-
नारंजि कंजमुखि ! तन्न तदप्य- पश्यः ॥

---

हे सुंदरि ! श्यामे ! एष तर्षविटपी निरंतरमेधमान एवं निरंतरं सखीभिः सिच्यमानश्च अद्यापि यद्यस्मात् फलं न अधात् अत्र को हेतुः; हा कष्टं,-तत् फलम् ॥ २० ॥

इत्थं राधिकायाः तादृशवाक्यमवेत्य श्यामला भंग्या श्री कृष्णेन सह संभोगव्यंजकं प्रत्युत्तरमाह हेराधे!ते तव स तर्षविटपी नफलितो यदि तदा फलिष्यति, किंतु तस्य विटपिनः फलमपि आश्चर्यमहं बुद्ध्ये, हे अलसांगि ! इति रात्रिकृतं विलासं व्यंजयति, आश्चर्यमेवाह सौरभेण मादितोऽलिर्भ्रमरः पक्षे आलिःसखी येन एवं भूतं आस्वाद्यमानमपि तत्फलं स्वं अननुभूतमिव प्रत्याययति, एतेन अनुरागस्थायिभावो ध्वनितः ॥ २१ ॥

आश्चर्यांतरमाह हे कंजमुखि! राधे! यत् फलसंबंधिशोणेन रसेन तव नेत्रस्थ पक्ष्मावलि ररांजि-रागयुक्तीकृता, तदपि तत् फलं त्वं

यत्-स्वादन-व्यतिकरादधरो व्रणित्व-
मागात्तथापि तदहो !!! नकदा प्यभुंक्थाः ॥२२॥
श्यामे ! त्वमप्यलक्षित-मन्नितांत-
स्वांतव्रणा हससि मां यदतो ब्रवीमि ॥
विद्युद्धिहंति तिमिरं निशि यद् दृशोस्तत्
सद्यः पुन र्द्विगुणयेदिति भोः ! प्रतीहि ॥ २३ ॥
राधे ! कलानिधि रयं विधिनोपनीत
स्त्वां संततामृतमयै रधिनोत् कराग्रैः ॥
यत्तत्कलाः स्वय महो !!! कुचयो र्विभर्षि
विद्युन्निभत्व परिवाद मथापि दत्से ॥ २४ ॥

---

अपश्यः एवं यत् फलस्यास्वादनव्यतिकरात् पौनः पुन्यात् तव अधरो व्रणित्वं अगात् अहो आश्चर्य्यं तत् फलं त्वं कदापि न अभुंक्-था न भुक्तवती ॥ २२ ॥

अधरनेत्रादौ चिन्हं दृष्ट्वा श्रीकृष्णेन सहांगसंगं निश्चिन्वंती श्यामलां प्रति स्वमनोदुःखं व्यंजयति हेश्यामे ! अलक्षितो मदीयनिरंतर मनोव्रणो यया एवंभूता त्वं, यद् यस्मा न्मां हससि, अतो अहं त्वां किंचि द्ब्रवीमि, निशि विद्युत् दृशो र्यत्तिमिरं हंति, सद्य एव तत्तिमिरं पुन र्द्विगुणयेत्, हेश्यामे ! एतत्तुल्यमेव तेन सहांगसंगं प्रतीहि एतदपेक्षया वर मसंग मेव सम्यक् ॥ २३ ॥

अनुरागातिशयेन राधया ज्ञातं श्रीकृष्णं श्यामला तमोनाशक पूर्णचन्द्रत्वेन वर्णयति हेराधे ! अयं न विद्युत्, किंतु समस्तकलानां निधिः पूर्णचन्द्रः, पक्षे कृष्णः विधिना उपनीतः प्रापितः सन् निरं

श्यामे ! स मे सखि ! ददौ नु कलंक मेव
सत्यं कलानिधि रसाविति वः प्रतीतः ॥
दत्ते कदापि मम दृष्टिचकोरिकायै
ज्योत्स्नाकणां यदपि तन्न पुन र्निकामम् ॥२५॥
राधे ! स्फुटं वद भवन्मुखपंकजोत्थ-
नक्तंतनेहित-सुधा-द्युधुनी विधूय ॥
तापं निमज्जयतु मां स्व मनु प्रभाते
कृत्यांतरं मम कथं तदृते सुसिद्ध्येत् ॥ २६ ॥

---

तरामृतमयैःकराग्रैः पक्षे हस्तस्याग्रैः त्वां अध्रिनोत् सुखयामास । यत्यस्मा त्तस्य कलाः स्वयमेव कुचद्वये बिभर्षि तथापि विद्युन्निभत्व-रूपं परिवादं दत्से ददसे ॥ २४ ॥

सुहृद्वाक्यस्य प्रामाण्यात्तस्य चन्द्रत्व मभ्युपगम्यवाह हेसखि! यद्यस्मात् स मेमह्यं त्वया व्यंजितं कलंक मेव ददौ यस्मात् स्वनिजं कलंकं मह्यं दत्त्वा सत्यं वो युष्माकं असौ कलानिधि रिति प्रतीतः इतिएवं प्रकारेणासौ कलानिधिः प्रतीतः ख्यातः कर्तरिक्तः किंतु कदाचित् ममउपकारकर्तृत्व मपि तस्य नास्तीत्याह यद्यपि ज्योत्स्नाकणां दत्ते तथापि न निकामं यथेष्टं तथाच इंद्रियाणां मध्ये मम नेत्रस्यापि न संपूर्णसुखदायकत्वं तस्येति भावः ॥ २५ ॥

हेराधे! अवहित्थां मा कुरु स्फुटं वद भवन्मुखपंकजोत्था या रात्रि संबंधिविलासरूपा सुधामयगंगा सा मम तापं विधूय दूरीकृत्य मां स्वमनु स्वस्मिन् निमज्जयतु अत एव तदृतं--तादृशगङ्गामज्जनं विना प्रभाते ममकृत्यांतरं कथं सिद्ध्येत् सदाचारजनानां प्रातः स्नान

श्यामे ! ऽधिकुंजनिलयं नव-नील-कांति-
धारा यदा स्नपयितुं निशि मां प्रवृत्ता ॥
तर्ह्येव पंचशर-संचय-नाट्यरंग-
भूमिं च केनच कांचन यापिताऽऽसम् ॥ २७ ॥

तेभ्य स्ततः किमपि सभ्यतया नटेभ्यो
हृष्यंत्यदां स्व-निखिलेंद्रिय-वृत्ति-मुद्राः ॥
किं वाहमप्यनट मत्र विचित्र मेतत्-
स्मर्त्तुं न संप्रति सखि प्रभवामि किंचित् ॥२८॥

---

स्यावश्यापेक्षणीयत्वात् वास्तवार्थस्तु नच विलासवार्ताश्रवणं विना मम कृत्यांतरं न रोचिष्यत एवेतिभावः ॥ २६ ॥

श्यामया प्रार्थितं विहारश्रवणं ज्ञात्वा तं विहारं वक्तुं प्रवृत्तापि अनुरागवशात् पर्य्यवसाने तस्य विस्मृतिमत्वमेव व्यवस्यापयिष्यंती राधाआह ? हे श्यामे ! अधिकुंज-निलयं कुंजगृहे नवीननीलकांतिधारा यदा मां स्नपयितुं प्रवृत्ता तदैव पंचशरसंचयस्य कंदर्प समूहस्य नाट्यसंबंधिनीं कांचन रंगभूमिं केन यापिता प्रापिता अहं आसं अहं रंगभूमिं केनापि प्रापिता बभूवेत्यर्थः केनेतिपदेन औत्सुक्येनेति सूचयति तथाच तदानीं नखाशिखपर्य्यंतं कंदर्पसमूहेन परिपूर्णा सतीव्याकुलैवाभूव मितिभावः ॥ २७ ॥

तत स्तदनंतरं किं सभ्यतया हेतुना नृत्यदर्शना त्तुष्यंती अहं तेभ्यः कंदर्पस्वरूपनटेभ्यः स्वकीयनिखिलेंद्रियवृत्तिरूपाः रूपयाइति प्रसिद्धा मुद्राः अदां, किंवा अहमपि तत्र विचित्र मनटं, तत् सर्व्वं स्मर्त्तुं न प्रभवामि अनटमिति पदेन संभोगेऽपि संदेहो ध्वनितः ॥ २८ ॥

राधे ! स-पंचशर-कोटि नटानपि स्वै
र्नाट्यै र्विलक्षयति कोऽपि विलाससिंधुः ॥
तं चाप्यनर्तयदहो !!! भवती स्मराजौ
तत् सूत्रधारपदवी मपि भो ! स्तदागात् ॥ २९ ॥
श्यामे ! ब्रवीषि यदिदं यदवोच मन्या
या श्चानुभूति-ततयः कति वा निरुक्ताः ॥
तत् सर्व मेतदपि हंत किमिंद्रजालं
स्वप्नो नु वा भ्रमभरो मनसोऽथवा मे ॥ ३० ॥
राधे ! यदास्य-सरसीरुह-गंध-एव
मंधीकरोति कुलजा-कुल मालि ! दूरात् ॥

---

हे राधे ! कोऽपि श्रीकृष्णरूप विलाससिंधुः स्वै र्नाट्यैः करणैः कंदर्प-स्वरूप-कोटिनटां-विलक्षयति, विस्मापयति अहो आश्चर्य्यं तं चापि विलाससिंधु स्मराजौ कन्दर्पयुद्धे भवती अनर्तयत् तत्तस्मात् तदा नृत्यकारयित्री रूपां सूत्रधारपदवी मपि अगात् कथं सभ्यतयेति ब्रूथ किंतु वैपरीत्याचरण मपिअशिक्षयदितिभावः ॥ २९ ॥

हे श्यामे ! त्वं यद्ब्रवीषि एवं अहमपि यदवोचं एवं त्वया मया वा अनिरूक्ता अन्याः कति वा अनुभूतिततयः संति एतत् सर्वं किं इंद्रजालं वा मम मनसः भ्रमो वा यथा अत्यंततृष्णा । आतुरस्य जनस्य स्वप्नादौ पाणकादिभोजने जाते ऽपि निद्राभंगे सति तस्य जनस्य पूर्ववत् तृष्णातुरत्वात् तृप्त्यभावाच्च तद्भोजनस्य मिथ्यात्वं कल्पते तथा ममापि तादृश-विलासस्येति भावः ॥ ३० ॥

अधुना राधया संदिग्धत्वेन उत्थापितं मनसो भ्रमरूपं तृतीय-पक्षं श्यामतना यथार्थत्वेन निश्चिणोति हेसखि ! राधे ! यस्यमुखपद्मसं

तन्मध्वतीव सुरसं सरसं पिबंत्या
श्चित्तभ्रम स्तव मदादिति नैव चित्रम् ॥३१॥
अत्रांतरे मधुरिका मिलिताथ पृष्टा
ताभि र्जगाद मधुरं शृणुतैतदाल्यः ! ॥
कस्यैचिदेव कृतये व्रजराज-वेश्म
प्राप्ताद्य कौतुकमहो यदुषस्यपश्यम् ॥ ३२ ॥
भोःकृष्ण ! कृष्ण ! नलिनेक्षण ! जागृहीति
गोष्ठेश्वरी स्नुतकुचाऽऽत्मजमाह्वयंती ॥
तल्पांतमेत्य रभसेन विलोक्य कृष्ण
मानंद-बाष्प-पृषतैरिममभ्यषिंचत् ॥ ३३ ॥
शय्योत्थितस्य दरघूर्णदृशोऽथ तस्य
जृंभा विसर्पदुरुसौरभ-मादितालेः ॥

---

वंधि गंध एव कुलजाकुलं दूरादेवांधीकरोति तस्य मुखपद्मस्य अतीव सुरसं मधु सरसं यथा स्यात्तथा पिबंत्या स्तव तादृशमधुपानजन्य मदात् चित्तभ्रमो नैव चित्रम ॥ ३१ ॥

अत्रावसारे मधुरिकानाम्नी सखी मिलिता ताभिः राधादिभिः पृष्टा सती मधुरं जगाद ॥ ३२ ॥

वास्पपृषतै-र्वास्पबिंदुभिः ॥ ३३ ॥

शय्योत्थितस्य कृष्णस्य अव्यादजोऽघ्रिमिति मंत्रमुदाहरंती व्रजराज्ञी, अखिलांगं संरक्ष्य ऊर्ध्वदृष्ट्या नारायणस्थाने किंचित्प्रार्थयते इति परश्लोकेन सहान्वयः, कथंभूतस्य तादृशमुखपद्मस्य एक

❀ संमोटनातिभरतिर्य्यगुदंचदास्य-
पक्षैकपार्श्व-चलित स्खलितालकालेः ॥ ३४ ॥
आपादशीर्षमथपाणितलाभिमर्शै
"नाव्यादजोंघ्रि"मिति मंत्रमुदाहरंती ॥
संरक्ष्य तूर्ण मखिलांग मथोर्ध्वदृष्ट्या
किंचित् सकाकुभर मर्थयते स्म राज्ञी ॥ ३५ ॥

युग्मकम् ।

देवाधिदेव ! भवतैव चिरात् सुतोऽयं
दत्तः स्ववंधुजनजीवनता मुपेतः ॥
पाल्योऽपि नाथ ! भवतैव कृपाभरेण
स्वेनैव कामपाचितिं तव वेद्मि कर्त्तुम् ॥ ३६ ॥
सा रोहिणी-भगवती-मुखरा-किलिंबाः
कृष्णोत्तणोत्कमनसः सहसा मिलंतीः ॥
दृष्ट्वा यथार्ह मभिवादन भाषणाद्यैः
संमान्य पुत्रमपि वंदयते स्म हृष्टा ॥ ३७ ॥

---

पार्श्वे चलिता अपरपार्श्वे वंधनात् स्खलिता अलकश्रेणी यस्य ॥ ३४ । ३५ ॥

अयं कृष्णः उपेतः प्राप्तः स्वेनैव कृपाभरेण पाल्यः तवकाम पचितिं पूजांकर्तुं वेद्मि अपितु नकामपीत्यर्थः ॥ ३६ ॥

सा-यशोदा,मिलंतीः रोहिण्याद्या दृष्ट्वा अभिवादनाद्यैः संमान्य श्रीकृष्णमपि वंदयतेस्म नमस्कारं कारयतिस्म ॥ ३७ ॥

---

* संमोटनाति तवेति पाठः क्वचित् ।

गांधर्विके ! शृणु यदन्यदभूद्विचित्रं
नीलांशुकं स्वतनयोरसि वीक्ष्यमाणां ॥
तामाह सैव भगवत्ययि ! गोष्ठराज्ञि !
रामांवरेण परिवर्तित मस्य वासः ॥ ३८ ॥
ताटंकगारुण-मणि-प्रतिविंव एव
गंडे विभाति तव माधव ! शोण-शोचिः ॥
इत्युक्त एव स तया निज पाणिना तं
सद्यो जघर्ष भवदाधर-रागभागम् ॥ ३९ ॥
नारोचयत् यदशनीय मधिप्रदोषं
घूर्णावशादयमतः कृशिमान मागात् ॥
तत्सांप्रतं किमपि भोजय रोहिणी-त्या-
दिष्टा तया तदुपनेतु मसौ जगाम ॥ ४० ॥

---

वीक्ष्यमाणां तां यशोदां सा भगवती पौर्णमासी आह रामस्य व-लदेवस्य गूढार्थश्च रामाया अंवरेण ॥ ३८ ॥

श्रीकृष्णस्य गंडस्थं तांवूलरागं वीक्ष्य सशंका पौर्णमासी तं कुंडलस्थरक्तमणिप्रतिविंवत्वेन वर्णयति हेमाधव ! शोणशोचिः कांतिर्यस्य एवंभूतः कुंडलगतारुणमणिप्रतिविंव एव तव गंडे विभातीति तया पौर्णमास्या उक्तः श्रीकृष्णः हेराधे ! भवदधरसंवंधिरागखंडं स्वपाणिना जघर्ष ॥ ३९ ॥

यत्यस्मात् घूर्णावशात् अधिप्रदोषं प्रदोषे अशनीयं भोजनीयं वस्तु न अरोचयत् अतः कृशिमानमगात् तस्मात् हेरोहि णीति ॥४०॥

दासोपनीत-मणि-पीठ-कृतोपवेश-।
स्तत्कारितास्य-सरसीरुहधावनादिः ॥
तत्रैव-राम-वटु-संमिलनाश्रितश्रीः ।
रेजे यथेंदु-तडिदिंदुरुचिः पयोदः ॥ ४१ ॥

मत्स्यंडिका-सुरस-मैंदव-सौरभाढ्यम्
हैयंगवीन-मथ राजतभाजनस्थम् ।
वात्सल्यमेव किमु मूर्त्तममी जनन्या
हृत्पुंडरीकगत-मैक्षिषतातिहृष्टाः ॥ ४२ ॥

राज्ञ्याथ ते प्रतिमुहुः परिवेशितेन
तेनैवतृप्तिमगमन्मधुमंगलस्तु- ।

---

कृष्णः कथंभूतःदासेन उपनीतं यत्रत्नपीठं तत्कृतोपवेशःपुनश्च तैर्दासैःकारितोमुखपद्मधावनादिर्यस्य तथाभूतःसन् तर्हिदंतधावन समये वलदेवमधुमंगलाभ्यां मिलनेन आश्रिता श्रीः शोभा यस्य तत्र दृष्टांतः इंदुविद्युद्भ्यामिद्धादीप्तारुचिर्यस्य एवं भूतोमेघो यथातथे त्यर्थः तत्र इंदुस्थानीयो वलदेवः विद्युत् स्थानीयो मधुमंगलः ॥४१॥

(मिश्रा)इति ख्यातामत्स्यंडिकातया सुरसम् अथच इंदुःकर्पूरस्तत्र ख्यात मैंदवं सौरभं तेन चाढ्यं हैयंगवीनं रजतसंवंधिपात्रस्थं अमी-कृष्णादयः पेक्षिषतनवनीतमुत्प्रेक्षंते जनन्या यशोदाया हृदयपद्म गतं वात्सल्यं किं मूर्त्तिमदेव सत् वहिर्भूतम् ॥ ४२ ॥

राज्ञ्या यशोदया प्रति मुहुः प्रतिवारं परिवेशितेन तेन हैयंगवी नेन करणेन ते रामादयः तृप्तिमगमन् मधुमंगलस्तु भोक्तुं

ऊचे ततः किमपि भोक्तुमपारयन्न
प्यस्मि क्षुधार्त्त इति सा तददादमुष्मै ॥ ४३ ॥
गा दोग्धुमुद्धुरधियोऽपि वृथोद्यमास्ते
गोपा बभूवु रथ तर्णकमंडलाश्च ।
चूषंत एव न पयः कणमात्र मास्ना -
मापीनतोऽथ यदवापुरतो विषेदुः ॥ ४४ ॥
गावस्तवाध्वनि धृताश्रुभृताक्षियुग्मा
नप्रस्रवंत्युपगतान्न लिहंति वत्सान् ।
हंवाध्वनि ध्वनित दिग्वलया विलंबम्

अपारयन्नपि अहं क्षुधार्त्तोऽस्मीति ऊचे ततस्तदनंतरं यशोदा तत्है यंगवीनममुष्मै मधुमंगलाय प्राचुर्य्येण पुनरदात् ॥ ४३ ॥

इत्थं श्रीयशोदाकृतलालनसमये केनापि गोपेनागत्य किमप्युक्तमित्याह त्रिभिः श्लोकैः केनचित् गोपेन उपेत्य निकटमागत्य सश्री कृष्ण उक्तः कथितः ततश्चासौ श्रीकृष्ण उदस्थात् उत्थितवान् असौ किंभूतः निजास्य दरहास्यसुधाभिषेकैर्मातृः श्रीयशोदाप्रभृतीः निजमुखस्य ईषद्धास्यरूपो यःसुधाभिषेकस्तैः सुखयन् किंभूतैरभिषेकैः स्वानंदं स्वसुखं कथयितुं शीलं येषां तैः पुनश्च मुखकमलं तांबूलरंजितमलं कलयन् अलंकुर्व्वन् गोदुहा उपेत्य किमुक्तमित्यपेक्षया आह ते प्रसिद्धा गोपागादोग्धुम् उद्धुरधियोऽपि निपुणबुद्धयोऽपि वृथोद्यमा बभूवुः एवं यद्यस्मात्तर्णकमंडलाश्च वत्ससमूहाश्च चूषंत एव स्थिताः नत्वासांशिशवः आपीनतः स्तनेभ्यः पयःकणमात्रमाआपुः अतोहेतो र्गोपाः सर्वे विषेदुः विषण्णा बभूवुरिति ॥ ४४ ॥

तव अध्वनि पथि धृतानि दिग्वलयानि याभिरेवं भूतास्ता

सोढुं दरापि नहि संप्रति शक्नुवंति ॥४५॥
इत्येव केन चिदुपेत्य सगोदुहोक्तो
मातुर्निजास्यदरहास्यसुधाभिषेकैः ॥
स्वानंदशंसिभिरसौ सुखयन् मुखाब्जम् ।
ताम्बूलरंजितमलं कलयन्नुदस्थात् ॥४६॥

संदानितकम् ।

दोहं समाप्य वलभद्रसहानुजस्त्वं ।
मन्नाजिरं व्रजसि चेत् कुरु मा विलंवम् ॥
निर्मञ्छनं तव भजे क्षणमात्रमेव ।
सार्द्धं विहृत्य सखिभिर्द्रुतमेहि भोक्तुम् ॥ ४७॥
श्रुत्वेति मातृगिरमाह हरिर्न मातः ।
प्रत्येषि मां यदमुमेव वदस्यथैवम् ॥
शिष्टोऽग्रणीः पुनरमीष्वहमेक एव ।
नोचेदमुष्य वशतां किमुरीकरिष्ये ॥ ४८ ॥

---

गावः संप्रति क्षणमपि तव विलंवं सोढुं न शक्नुवंति ॥ ४५ ॥ ४६ ॥

हेवलभद्र दोहं समाप्य सहानुजस्त्वं यदिमन्न क्रीडास्थानं व्रजसि तदा विलंवं माकुरु ॥ ४७ ॥

वलदेवं प्रत्युक्तं नतु स्वं प्रतीत्यवगत्य श्रीकृष्णो मातरं प्रत्याह हेमातः मांप्रति नप्रत्येषि प्रतीतिं न करोषि यद्यस्मात् अमुं वलदेव मेव वदसि अमीषु वालकेषु मध्ये अहमेकएव शिष्टोऽग्रणीश्च अहंशिष्टो न इति चेत्त्सि जानासि अमुष्य ज्येष्ठस्यापि किं वशताम् उरीकरिष्ये ४८

शिष्टो यथा त्वमसि वत्सनिजातिबाल्य ।
मारभ्य तत् खलु विदंत्यखिलाः पुरंध्र्यः ॥
याः स्वालयापचयवेदनया पुरासां ।
फूत्कर्तुमापुरिह नोकतिधेति सोचे ॥ ४९ ॥
सौदामिनीततिविभाजयिदामनीद्यु ।
द्विभ्राजिसव्यकरकोरकितारविंदः ॥
सग्राहितप्रमितकानकदोहनीको ।
मात्रा तया सखि ! रयादधिकं विरेजे ॥ ५० ॥
स्तम्बेरमव्रज विडम्बि विलम्बिपाद ।
विन्यास झंझणझणत्कृत किंकिणीकः ॥

हेवत्स बाल्यमारभ्य यथा त्वं शिष्टोऽसि तत् खलु अखिलाव्रज-पुरंध्र्यो विदंतियाः पुरंध्र्यः स्वालयापचयवेदनया स्वगृहस्थितदध्या पचयज्ञापनायापु रासां फूत्कर्तुं कतिवारात् न आपु रपितु आपुरि-ति सा यशोदा ऊचे ॥ ४९ ॥

ततश्च पुत्रस्य गोदोहविषये आनंदज्ञानेन यशोदया स्वयमेव सप्रेषितइत्याह हेसखि ! राधे रयात् वेगात् तया मात्रा ग्राहिता प्रमिता अल्पप्रमाणयुक्ता कनकस्यदोहनीयम् एवंभूतः कृष्णःअधिकं रेजे किंभूतः सौदामिनीततिर्विद्युत्श्रेणी तस्या या विभा विशिष्टा शोभा तां जेतुं शीलं यस्या एवंभूता या दामनी तस्यायाद्युत्कांतिस्तया विभ्राजीविभ्राजनशीलोयः सव्यकरः वामपाणिः सएव कोरकितम् अरविंदं यस्यसः "पशुरज्जुस्तु दामनी"त्यमरः ॥ ५० ॥

तदनंतरं तस्य तात् कालिकगमनशोभामाह श्लोकत्रयेण श्री कृष्णः रम्यपुरतो निष्क्रम्य पुरतो ऽग्रेऽभिगच्छन् सन् गोपुराग्रं बाहि

लोलालकालि-मणि-कुंडल-कांति वेणी- ।
वीचीभरस्नपितवक्त्रसुधांशुविंवः ॥ ५१ ॥
पीतोत्तरीय-चपलेलित-केलिनृत्य ।
राजद्घनांग-किरणोच्छलनो-च्छ्रितश्रीः ॥
प्रेङ्खोल-हार-परिधिश्रित कौस्तुभोद्य- ।
द्भानुः स्वनच्चरण-भूषण-चुंविदामा ॥ ५२ ॥
निष्क्रम्य रम्यपुरतः पुरतोऽभिगच्छन् ।

---

ग्रारात्पाग्रिमस्थान किंभूतःस्तम्वेरमोमत्तहस्ती तस्य व्रजः समूहः तं विडम्बितुं शीलं यस्य तथाभूतो यो विलंवी मंदपादविन्यासः पादविक्षेपः तेन झंझणझणत्कारवती किंकिणी यस्य सः पुनश्च लोला चंचला या अलकश्रेणी तस्याः एवं मणिकुंडलयोश्चयाः कांतय स्ताएव वेणी तस्या या वीची तरंगस्तस्या भरेणातिशयेन स्नपितो वक्त्रसुधांशुविंवोयस्य सः ॥ ५१ ॥

पुनः कृष्णः कीदृशः पीतोत्तरीयमेव चपला विद्युत्तस्या ईलितं प्रशस्तं केलिनृत्यं तेन राजन्मेघतुल्यो योऽगकिरणस्तस्य उच्छलनेन उच्छ्रिताऊर्ध्वमुत्थिता श्रीः शोभा यस्य पक्षे पीतोत्तरीयस्य यत् केलि नृत्यं तेन राजन् घनोनिविडोऽगकिरणनृत्यं कीदृशं चपलं चंचलम् ईलितंच"ईलितशस्त पणितपणायितेति"विशेष्यनिघ्नःपुनश्च प्रेङ्खोल श्चंचलो यो हारः सएव परिधिर्मंडलं तेन श्रितआवृतो यः कौस्तुभः सएव उद्यद्भानुर्यस्य. सः पुनश्च स्वनच्चरणं भूषणं तच्चुंवितुं शीलं यस्य तथाभूतं दाम वनमाला यस्य सः चरणस्पर्शी माला वनमालोच्यते ॥ ५२ ॥

पुनश्च दासैः प्रधारितं तांबूलपूलकं तांवूलवीटिकाम् अश्नन् किंभूतं

यच्छन् मुदं स्वजननी जन लोचनेभ्यः ॥
दासैः प्रधारितमवारितरोचि रङ्गन- ।
स्तांवूलपूलकमवाप स गोपुराग्रम् ॥ ५३ ॥
तद्वाह्यकुट्टिम-तटीमवलंवमानः- ।
का कुत्र किं कुरुत इत्यनुसंदधानः ॥
व्यापारयन्नयन-मट्टघटासु नर्म- ।
प्रेष्ठै र्मिलद्भि रभितः स रराज मित्रै ः ॥ ५४ ॥
तन्निर्मितानुपद-कर्णकथा-रसज्ञं- ।
स्यास्यांवुजे किमपियत्स्मितमुद्बभूव ।
तस्यार्थ जातमपि किं विवरीतु मीशे-
चेतोलि रेत्र तव सख्य नुसंदधातु ॥ ५५ ॥

---

ताम्वूलपूलकम् अवारितरोचिर वारितकांतिः ॥ ५३ ॥

तस्य गोपुरस्य वाह्ये वहिः प्रदेशे ( चवतरा ) इतिख्यातं कुट्टिमं अवलंवमानः अर्थात्तत्र गतः सश्रीकृष्णः दौत्यार्थेप्रेषितैः अथच तत आगत्य अभितो मिलद्भिः सुवलादिनर्मप्रेष्ठ मित्रैः सह रराज कीदृशः का व्रजसुंदरी कुत्र किं करोति इत्यनुसंदधानः पुनश्च (अटारी) समूहइतिप्रसिद्धासु अट्टघटासु तासां दर्शनार्थं नयनं व्यापारयन् ॥५४॥

तै र्मित्रैर्निर्मिता अनुपदं अनुक्षणं याकर्णकथा तस्या रसज्ञस्य श्रीकृष्णस्य आस्यपद्मे किमपि यत्स्मितमुद्बभूव तस्यार्थं जातं विवरीतुं किमहमीशेसमर्था भवामि सखि ! अवश्यमेव वक्तव्य मित्याग्रहेकृते सति तत्राह हेसखि ! राधे ! तवचेतोऽलिरत्रतस्यार्थजातम् अनुसंधाय जानातु तेनतवैवाखिलावार्त्तेति ध्वनितम् ॥ ५५ ॥

उष्णीष-वक्रिम-महा-मधुरिम्णि तस्य ।
तात्कालिके किल न कस्य मनो न्यमाङ्क्षीत् ॥
तत्रैव शेखरित-कानक-सूत्रजाल- ।
राजन्मणि-द्युतिभराः किमु वर्णनीयाः ॥५६॥
तैस्सौरभैःप्रसृमरै रणुनूपुरादि ।
ध्वानै र्वलेन वलभीमधिरोहिताभिः ॥
गोशाल-वर्त्मनि चलल्ललनावलीभि ।
र्नेत्रांवुजैः स कतिधा नहि पूज्यतेस्म ॥५७॥
तत्तद्विलास-वलिता सुषमारसाला ।
प्रेष्ठस्यसा मधुरिका परिवेश्यमाला ॥

---

तस्य कृष्णस्यतात्कालिके रंतुकथासमयोत्पन्ने उष्णीषस्य वक्रिममहामधुरिम्णि कस्य मनो न न्यमांक्षीत् न मग्नमासीत् गच्छतस्तस्यतांबूलं चर्वयतस्तत्तत्कथाः एवं हर्षावेशेन ईषद्धास्य विशिष्टस्य हस्तेन उष्णीषस्य किंचित् वक्रिमाणं कुर्वत स्तस्य तदानींतन माधुरीषु मग्नानां सर्वासामेव मोहादिना तरिषु विस्मृतिरेव जातेति ध्वनिः किंचित्तत्रैव उष्णीषे शेखरी कृतः काल कसूत्रजालः (तोररा) इति ख्यातः सुवर्ण निर्मित सूत्र समूहः तत्र राजंतः विराजमाना येमणयस्तेषां द्युति भराः किं वर्णनीयाः ५६

तैः प्रसिद्धैः प्रसरण शीलैः सौरभैः एव मनु पश्चान्नूपुरादि ध्वानैश्च वलेन (अटारी) इतिप्रसिद्धां वलभीमधि रोहिताभि र्ललना श्रेणीभिः नेत्रांवुजैः करणै गोशालवर्त्मनि चलन् सश्रीकृष्णः कति धा न पूज्यतेस्म ॥ ५७ ॥

वयस्यैः सह तत्तद्विलासेन वलिता वलवत्तरा प्रेष्ठस्य सुषमा शोभारूपा रसालामधुरिका परिवेश्यमाला सती अस्या राधाया

वैश्लेषिक ज्वरमशीशम दव्यथास्या ।
स्तेने च तं शतगुणं तृषमेधयंती ॥ ५८ ॥
हर्षान्वितस्तिमिततां श्रवसो व्यतानीत् ।
तर्षोत्थसंज्वर भरस्तु दृशो विवेश ॥
आकस्मिकी निरुपमा प्रतिवेशिसम्प ।
त्तापं तनोति सहवासभृतां सदैव ॥ ५९ ॥
प्राहानुरागपरभागवती ततः सा ।
ता एव चारुमुखि ! धन्यतमा रमण्यः ॥
याः खेलयंति सततं सुदृश स्तदीय ।
लावण्य-केलि-जलधौकलधौतगात्र्यः ॥ ६० ॥

---

वैश्लेषिकज्वरमशीशमत् शांतं चकार अथ तच्छांत्यनंतर मर्से तृषंतृष्णां दर्शनोत्कंठां वर्द्धयंती शतगुणं तंज्वरं तेने ॥ ५८ ॥

तत्रतापस्य शमनेवर्द्धने च दृष्टांतपारिपाट्या स्वादनकौशलयमाह हर्षान्वितः राधायाः श्रवसो स्तिमिततां व्यतानीत् तर्षोत्थसंज्वर भरस्तुदृशोर्नेत्रद्वये विवेश प्रविष्टवान् अहो श्रवणेंद्रियस्य स्निग्धत्वे चक्षुरिंद्रियस्यापिस्निग्धत्वं कथंनाभूत्तत्राह आकस्मिकीसहसोद्भूता एवं च निरुपमा प्रातिवेशिनां संपत्सहवासभृतामेकत्र सन्निधावेव वसतां तापं तनोतीत्युत्प्रेक्षा वोध्या ॥ ५९ ॥

अनुरागस्य परभागः परमोत्कर्षं स्तद्वती राधिका प्राह हे चारुमुखि ! मधुरिके ताएव रमण्यो धन्यतमाः याः सुदृशः तदीय लावण्यकेलिजलधौकलधौतंसुवर्णं तद्वद्गात्र्यः तेन यथा तासां रूपं तथैवभाग्यमपि फलितमित्यर्थः चारुसुंदरं तवेव मुखं येन तद्गुणान् कथयसि रमण्य इति ताएव रमंते वयंतु सदैव दुःखिन्यइति ध्वनिः ॥ ६० ॥

जन्मैव हंत किमभू न्मम गोकुलेऽस्मिं ।
स्तन्माधुरीं न यदुरीकुरुते कदापि ॥
तत् श्यामले! ऽतिचपले हृदि लेशमात्री ।
नो संभवेदिह भवे धृतिरित्यवेहि ॥ ६१ ॥
श्यामाह यामि ! ललिते ! शृणु यामि गेहम् ।
संप्रत्यमूं प्रति ममास्तु गिरां विरामः ॥
त्वं पद्मिनीं व्रजपुरंदरसद्मनी माम् ।
कृष्णेक्षणालिनि समर्पय बद्धतृष्णे ॥ ६२ ॥
प्रियविरहविहस्ता स्त्रस्तधीः सा तदानीम् ।
क्षणमपि युगकल्पं कल्पयंतीबभूव ॥

---

राधिका सदैन्यमाह अस्मिन् गोकुले मज्जन्मैव किं कथमभूत् यतस्तस्य कृष्णस्य माधुरीकर्त्री यज्जन्म कदापि न उरीकुरुते तस्त स्मात् हेश्यामले ! इहभवे जन्मनि अतिचपले मम हृदि लेशमात्री धृतिरपि न संभवेदिति त्वम् अवेहि जानीहि ॥ ६१ ॥

राधाया अनुरागस्य परमकाष्ठां दृष्ट्वा श्यामला आह हे यामि ! भगिनि! ललिते! त्वं शृणु अहं संप्रति गृहं यामि "यामीस्वसृकुलस्त्रियो" रित्यमरः अमूं राधां प्रतिममगिरां विरामोऽस्तुकिंतु त्वम् इमां पद्मिनीं राधां व्रज पुरंदरसद्मनि श्रीकृष्णस्य ईक्षणरूपे अलिनि भ्रमरे समर्प य कथंभूते वद्धातृष्णा येन तथाभूते तेन एतस्यादर्शनार्थं कृष्णस्या पि तृष्णा वृद्धा इति ध्वनिः ॥ ६२ ॥

सा राधिका तदानीं क्षणमपि युगतुल्यं कल्पयंती प्रिय विरहेण विहस्ता व्याकुला अतएव त्रस्ता धीर्यस्या एवंभूता बभूव तर्हि

यदखिलमपि कृत्यं कारिता किंकरीभिः ।
समय विहितमेको ऽभ्यास एवात्र हेतुः ॥ ६३ ॥
अथ निखिल सखीनां स्वालिभिः स्नापितानाम् ।
धृत समुचित वस्त्रालंकृतीनां ततिः सा ॥
मथित शरदुदंचच्चंद्रिका सिंधुजाताम् ।
श्रियमपि निजपादांभोज भासा विजिग्ये ॥६४॥

इतिश्रीकृष्णभावनामृते महाकाव्ये रसोद्गार
कथास्वादनो नाम तृतीयःसर्गः ॥३॥

---

किं दन्तधावन स्नानादि न चकार इति चेत्तत्राह तथापि किंकरीभिः समयोचितमखिलमेव कृत्यं कारिता तत्र अभ्यासएव एकोहेतुर्नतु देहानुसंधानादिकम् ॥ ६३ ॥

इदानीं सखीनां परिचर्यां वर्णयितुं प्रथमतस्ताःसखीरेव वर्णयति स्वालिभिः स्नापितानां ललितादि निखिलसखीनां ततिः संघीभूय शरत्कालीननिर्मलचान्द्रिकाया सिंधुः अर्थादमृतमय समुद्रस्तत्रोत्पन्नां श्रियं लक्ष्मीमपि निजपादांभोजकांत्या विजिग्ये तथाचैतादृश समुद्रस्या संभवात् तदुत्पन्नाया लक्ष्म्या अप्यसंभवात् असंभवेति तां जिग्ये ॥ ५४ ॥

समाप्तोऽयं टीकायांतृतीयः सर्गः ॥ ३ ॥

---*---

## चतुर्थः सर्गः ।

—:*:—

परिजनैरथ धावयितुं मुखम् ।
पुरटझर्झरिका परिसारितैः ॥
समुचितैरुदकैर्द्रुतमावृता ।
सुवदना सदनाग्रत आबभौ ॥ १ ॥

करतलादसकृच्चलुकीकृतम् ।
सलिलमारदताल्वनुचालितम् ॥
चलकपोलयुगोन्नति मंजुल ।
ध्वनिभृतं निभृतं क्षिपतिस्म सा ॥ २ ॥

---

परिजनै रखिलमेव कृत्यं कारयामासेति यदुक्तं तद्विवृणोति पुरटझर्झरिकया स्वर्णनिर्मितजलपात्रेण अपसारिते रथच समुचितैः शीतोष्णादावुपयुक्तै रुदकैः करणैः परिजनैर्मुखं धावयितुं द्रुतम् आवृता सुवदना राधिका सदनस्याग्रे बभौ शोभितवती द्रुतविलंवितं छंदः १

मुख धावन प्रकार माह सा राधिका करतलादसकृत् चलुकीकृतं सलिलं निभृतम् एकांतं यथास्यात्तथाक्षिपतिस्म निभृतमिति जलकणाया: सर्वत्र गमना भावार्थ मिति भावः जलं कथंभूतं दंतमारभ्य तालु पर्यंतं चालितं पुनश्च चंचलं यत् कपोल युगं गण्डद्वयं तस्य उन्नति रुच्चीभावो यस्मात् पुनश्च मंजुल ध्वनिनाभृतं पूर्णम् २

विसृमरानलकान् किरती शिर ।
स्युपरि सव्यकरांगुलिघट्टनैः ॥
अलिकगात्रदृगाद्यथ सा मित ।
द्युतिमितं तिमितं त्रिरदीधवत् ॥ ३ ॥
विटपिकां द्युतरोस्ततरोचिषम् ।
रदाहितां निहितां स्ववयस्यया ॥
मुकुलितांबुजतां भजतांजसा ।
मृदुतरेण करेण सुदृग्दधे ॥ ४ ॥
प्रतिसरोदित दोलनमस्वन ।
द्वलयमुज्ज्वल कुंडलमेतया ॥

---

अधुना मुखस्य वहिर्धावन प्रकार माह सा राधिका ललाटगंड चक्षुरादिकं वारत्रयम् अदीधवत् धावितं कृतवतीत्यर्थः साकथंभूता सव्य करस्य वामहस्तस्यांगुलि चालनैः करणैः विसृमरान् इतस्ततोगतान् अलकान् शिरस्युपरिकिरतीनिःक्षिपती दृगादि किंभूतं तिमितं स्वतः स्निग्धं पुनश्च अमिता याद्युतिस्तामितं प्राप्तम् ॥ ३ ॥

सुदृक् राधा मृदुतरेण करेण द्युतरोः कल्पवृक्षस्य दंत काष्ठरूपां विटपिकां दधे किंभूतां विटपिकां ततं विस्तृतं रोचिर्यस्यास्तां पुनश्च दंतस्यहितां करेण कथंभूतेन मुकुलितं कोरकरूपं यदंबुजं तत्स्वरूपतां भजता ॥ ४ ॥

दंतकाष्ठेन दंतमार्जन माह एतया विटपिकया रदनान् दंतान् मृजती सा राधातत् छविश्रितान् कांति विशेष युक्तान् व्यधित चकार छविं किंभूतां कणवदुच्छलितां जलादीनां कणिका यथा उच्छ

व्यधित सा मृजती रदनांश्छविम् ।
कणवदुच्छलितां ललितां श्रितान् ॥ ५ ॥
अथ दधे सुदती धनुराकृतिम् ।
मणिमयीं रसनापरिशोजिनीम् ।
मृदुलपाणि युगांगुलियुग्मगाम् ।
सहचरीकरतो ऽदरतोषतः ॥ ६ ॥
नवदलोपमितां रसनां मृज ।
त्यथ तया नतकंपितमस्तकम् ।

---

ळति तथेत्यर्थः अत एव ललितां मनोहरां मार्जन समयेऽन्यशोभां च ाह प्रतिसरोहस्तसूत्रं (पहुचीति) ख्यातंतस्य उदितं प्रकटीभूतं दोलनं यत्र तद्यथा स्यात् एवं नस्वनंति शब्दं नकुर्वन्ति वलयानियत्र तद्यथा स्यात् एवं उच्चलं चंचलं कुण्डलं यत्र तथा भूतं यथा स्यात् स्वभा वोक्ति रेव सर्वत्र ज्ञेया ॥ ५ ॥

दन्तमार्ज्जनं कृत्वा जिह्वा मार्ज्जनं कृतवती त्याह सुदती श्री राधा सहचरी करतः रसना परिशोजिनीं जिह्वा मार्ज्जनीं दधे किं भूतां धनु राकृतिं वक्रा मिति यावत् पुनश्च कोमल करद्वयस्य अंगुलिद्वय गतां कर द्वयस्य द्वाभ्या मगुलिभ्यां धृतवती त्यर्थः अदर तोषतः अत्यन्त संतोषात् ॥ ६ ॥

जिह्वामार्ज्जनीं गृहीत्वा तया जिह्वां मार्जित वतीत्याह तया परिशो जिन्या नव पल्लवो पमितां रसनां नतकंपितमस्तकं यथास्या त्तथा मृजतीराधा आबभौ शोभिता बभूव राधा कथं भूता स्ख लितैरलकैर्मुखं वृतं विदधती मार्ज्जन समये अलकाः स्खलिता भूत्वा मुखमा वृण्वन्तीत्यर्थः पुनश्चस्मितंदधती इतस्ततोऽलक

मुखमियं स्खलितैरलकैर्वृतम् ।
विदधती दधती स्मितमाबभौ ॥ ७ ॥

निरणिजद्वहिरंतरमप्यरम् ।
मुखविधोरथ धौतकरद्वया ॥
परिजनार्पितमंजुल वाससा ।
जलकणापनयं सनयं व्यधात् ॥ ८ ॥

सहचरीविधृते मणिदर्पणे ।
तदभिनंदन साक्षिणि वीक्ष्य सा ॥
स्मितसुधाभिरधावयदाननम् ।
प्रियतमक्षणलक्षणलक्षकम् ॥ ९ ॥

स्खलनत्रमलोकयंतीनां सखीनां स्मितदर्शनात् स्वयं स्मितं चकारे त्यर्थः ॥ ७ ॥

जिह्वां माज्र्जयित्वा मुखं प्रोंछितवती त्याह राधिका मुखचन्द्रस्य वहिरंतरम् अरम् अलम् अतिशयेन निरणिजत् प्रक्षालित वती त्यर्थः कथंभूता धौतं क्षालितं करद्वयं ययासा ॥ ८ ॥

स्वमुखं दृष्ट वतीत्याह सा राधा सहचरी विधृते मणि दर्पणे मुखं वीक्ष्यपुनः स्मितसुधा भिरधावयत् धौतवती त्यर्थः दर्पणे कथंभूते तासां सखीनां अभिनन्दनस्यमुख माज्र्जन समये दंतादि लग्नं ताम्बूल रागादिकं सम्यक्तया गत मित्यभिनंदनस्य साक्षिणि आननं कीदृशं प्रियतमस्य कृष्णस्य यः क्षण उत्सवस्तस्य लक्षणं कारणं मुखसुशोभादि तस्य लक्षकं ज्ञापकम् ॥९॥

परिजनैः प्रमदादवतारिते ।
समुचिताभरणप्रकरे ऽप्यभात् ॥
तदभिलक्ष्मभिरंग धृतैरियम् ।
विगतदूषणभूषणतां गतैः ॥ १० ॥
धवलमाप्लवनोचितमंशुकम् ।
परिदधत्युदगाच्चकितेक्षणा ॥
रुचिरचंद्रिकया वृततामगा ।
दचपला चपला लतिकोन्नता ॥ ११ ॥
पुनरियं मृदुलासन आसिता ।
विरुरुचे विधुवत् परिवेष्टिता ॥

---

ततश्च स्नानाद्यर्थ मुद्यमं कृतवतीत्याह परिजनैः प्रमदात् हर्षात् अंगादवरिते समुचिताभरणमूहे ऽपि इयं राधा अभात् शोभितवती समुचितं स्नान समये रक्षितु मयोग्यं कैरभात्तत्राह तेषां भूषणानाम् अंगधृतैः अभिलक्ष्मभिश्चिन्हैः लक्ष्मभिः कीदृशैः विगतं दूषणं यत्र तथाभूतं यद्भूषणं तस्यभावस्तत्ताता माप्तै रित्यनेन मणिमयमण्डनेमार्ज्जनाभावेन वैवर्ण्योविदोषस्तिष्ठति ॥ १० ॥

स्नानयोग्यं श्वेतवस्त्रं परिहितवतीत्याह आप्लवनोचितं स्नानयोग्यं परिदधती परिधानं कर्तुम् अन्यलोकदर्शनाशंकया चकितेक्षणा सती उदगात् उत्थितवतीत्यर्थः तत्र दृष्टान्तरीत्याह उन्नता उर्ध्वं स्थिता अचपला स्थिरा चपला लतिका विद्युदत्र रुचिरचन्द्रिकया आवृततां वेष्टितत्वम् अगात् प्राप्ता ॥ ११ ॥

उपविष्टायास्तस्याः पुनः शोभान्तरमाह इयं राधा कोमलासने आसिता उपविष्टा सतीविरुरुचे विशेषेण शोभितवतीत्यर्थः तत्र

परिजनैः परिधित्वमितैः सदा ।
नपचिता पचिता वतिशेपलैः ॥ १२ ॥
क पटनोदनतो रतिमंजरी ।
कृतचर प्रतिकर्मज बंधनात् ॥
सपदि वालततीर्यदमूमुच ।
द्वरतनो रतनोत्तदति त्विषम् ॥ १३ ॥
विरलितांगुलि कीर्णातमा इमाः ।
सुरभि तैलरसैरभिषिंचती ॥
करभघट्टनघर्षणा तोऽतर ।
स्तिमितता मितताम करोदियम् ॥ १४ ॥

---

उपमामाह विधुश्चन्द्रस्तद्वत् स यथा परिधानमण्डलेन वेष्टित स्तथा परिधित्वं मण्डलीभूतत्वम् इतै प्राप्तैः परिजनैर्वेष्टिता राधा इत्यर्थः परिजनैः कीदृशैः निरुपाधित्वात् न विद्यते अपचित मप चयो यस्यास्तस्यामपचितौपरिचर्य्यायामतिचतुरैः ॥ १२ ॥

किंकरीणां परिचर्यामाह रतिमंजरी वरतनोः श्रीराधायाः कस्य मस्तकस्य पटनोदनतः वस्त्रदूरीकरणात् यत् वालततीः केशान् अमूमुचत् कुतः तत्राह कृतचरं पूर्वं कृतं प्रतिकर्म वेशः तज्जन्यं यद्बन्धनं तस्मात् "आकल्पवेशो नेपथ्यं प्रतिकर्म प्रसाधन" मित्य मरः श्लेषेण रतिः प्रेमांकुरं तस्य मंजरी नवीनोत्पत्तिरेव कपटम विद्या तस्या दूरीकरणात् वालततीरज्ञानां श्रेणीः यत् अमूमुचत् तद्वरतनोश्छिन्मयशरीरस्य अतित्विषम् अतनोत् कुतः अमूमुचत् तत्राहकृतचरं पूर्वकृतं प्रतिकर्म कर्मानुरूपं यद्बन्धनं तत् ॥ १३ ॥

इयं मंजरीकरभघट्टनघर्षणातो हेतोः अंतरस्य केशश्रेण्या अभ्यन्तरस्य या स्तिमितता स्निग्धता तस्या या अमितता अपरि

अधिशिरः करकुड्मल-कल्पितै-
रथ झणाद्वलयं मृदुमर्द्दनैः ॥
अकृत तां दरमीलित-लोचना
मतनुकं तनु कम्पन माश्रिताम् ॥ १५ ॥
मुखविधुं कचसंतमस-व्रजोऽ
रुणादतो मणिकङ्कतिकास्त्रतः ॥
लघु विकृष्य निवध्य फलं तदु-
त्थितमलं तमलंभयदेव सा ॥ १६ ॥
कुच-भुजादिषु तैलनिषेचने
वसनमुद्घटयन्त्याविभः स्मितम् ॥

मितत्वं ताम् अतनोत् "करस्य करभो वहि" रित्यमरः कथंभूता सुरभितै लरसैरिमाः केशश्रेणीरभिषिंचती इमा किम्भूत्ताः ग्रंथिमोचनार्थ-व्याकीर्णाः ॥ १४ ॥

अधिशिरः सिरसि करयोः कुड्मलाभ्यां कमलकलिकावत् मुष्टीकृताभ्यां कल्पितैर्मृदुमर्दनैः झणाद्वलयं यथा स्यात्तथा इति मर्द्दनक्रियाविशेषणं, तां राधां दरमीलितलोचनाम् अकृत, कथंभूतां अतनु अनल्पं कं सुखं यस्मादेवं भूतं तनुकम्पनमाश्रिताम् ॥ १५ ॥

ततश्च कंकतिकया संस्कृत्य केशानां बंधनं कृतवतीति यथा शोभमुत्प्रेक्षयन्नाह राधाया मुखरूपविधुं कचसंतमसव्रजः केश-स्वरूपांधकारसमूहः अरुणात् रुद्धं चकार अतो हेतोः सा रति-मंजरी मणिनिर्मितकंकतिकारूपास्त्रेण लघु शीघ्रं विकृष्य विशे-षेण कृष्ट्वा निवध्य च तं कचसंतमसव्रजं तदुत्थितं विधुरोधन कर्मजनितं फलम् अलम् अतिशयेन अलंभयत् प्रापयामास ॥ १६ ॥

किंकरिकालिः किंकरीश्रेणी कुचभुजादिषु तैलनिषेचने वसनं

रहसि किङ्करिकालि रथाप्यधा-
च्चकितलोचनतां च नता ङ्ग्यसौ ॥ १७ ॥
घुसृण-सीत-कराम्वुज-रेणवः
समुदिताः स्तिमिताः कुसुमाम्वुभिः ॥
मलयजद्रव-मिश्रण मेकया
चतुरया तु रया दुपनिन्यिरे ॥ १८ ॥
द्युतिभिरुद्यत विद्युत एव तै
र्लवणिमामृत-वर्षितया घनान् ॥
अपघनानपरा उदवर्तयन्
स्वनयनै र्नय-नैपुणतोऽधयन् ॥ १९ ॥

---

उद्घटयंती सती स्मितं आविभः धृतवती तथाच कुचादिषु स्थितं वस्त्रं दूरीकृत्य तत्र तत्र नखक्षतादिदर्शनेन स्मितयुक्ता वभूवेत्यर्थः असौ राधा, तथाच रहस्यस्थाने कोऽपि वा पश्यतीति भययुक्ता वभूवे-त्यर्थः, नतांगीति किंकरीणां स्मितदर्शनेन लज्जा जातेति ध्वनिः १७

अथ उद्वर्तनसामग्री समाधानमाह चतुरया एकया किंकर्य्या घुसृणशीतकराम्बुजरेणवः मलयजद्रव मिश्रणम् उपनिन्यिरे प्रापु रित्यर्थः तथाच कर्पूरपद्मराग चूर्णानि चन्दनद्रवयुक्तानि कृता नीत्यर्थः दुहादित्वात् कर्मद्वयंरेणवः कथंभूताः समुदिता एकत्र मि-लिताः पुनश्च (गुलाव) इतिप्रसिद्ध कुसुमाम्बुभिः स्तिमिताः ॥१८॥

उद्वर्तनप्रक्रियामाह अपराः किंकर्य्यः तैः कुसुमांवुभिः स्ति-मितै रेणुभिः अपघनान् शरीरावयवान् उदवर्तयन् कथंभूतान् द्युतिभिरुदयं प्राप्ता या विद्युतस्तत्तुल्यान् पुनश्च लावण्यरूपा-मृतवर्षितया मेघतुल्यान् य एव मेघा स्तएव विद्युत इत्यर्थ-

सुरभितामलकी-द्रव-लेपनै
र्मृदुल-पाणि-तलालघु-घर्षणैः ॥
व्यधित काचन तच्चिकुरां स्तदा
रुचिर-मार्जन-मार्जन-मेदुरान् ॥ २० ॥
अथ पुरः स्फटिकाप्लव-वेदिकाम्
वृतिमती मभितः परिवाहिनीम् ॥
इभगति विंशती कुरुते स्म ताम्
स्व सुषमाञ्चन काञ्चन-कान्तिकाम् ॥ २१ ॥

---

विरोधः । एवं घनानेव अपघनानिति शब्दविरोधश्च । मेघैः सह सादृश्यांतरमाह स्वनयनै रिति नय-नैपुण्येन स्वनयनै रधयन् उद्वर्तनं कुर्वत्य एव स्वयं चक्षुषा रूपामृतानि अपघनतः पणु रित्यर्थः नीतिनैपुण्यं च सर्वा उद्वर्तनक्रिया सम्यक्जाता न वेति संशयनिरासार्थं सम्यक् निभालनरूपम् अध्ययञ्चित्यनेन नय-नानां चातकत्वं द्योतितम् ॥ १९ ॥

केशसंमार्ज्जनमाह काचित् किंकरी तस्या राधाया श्चिकुरान् रुचिरमार्ज्जनेन या मा शोभा तस्या अर्जनं येषु तथा भूता श्च ते मेदुराः स्निग्धाश्च तान् व्यधित चकार, कैः प्रकारैस्तत्राह सुगन्धद्रव्यान्तरेण आमलकीसुरभयतीति कर्मणि क्तः सुरभिता या आमलकी तस्या द्रवलेपनैः एवं कोमल कर तल वहुतर घर्षणैश्च ॥ २० ॥

स्नानार्थं वेद्यारोहणमाह इभगतिः श्रीराधिका तां स्फटिकाप्लववेदिकां विशती प्रविशती स्वस्या शोभाया अञ्चनेन प्रापणेन कांचनस्य सुवर्णस्येव कांतिर्यस्याः एवंभूतां कुरुते स्म

उपरि तच्छिरसोऽम्बुभिरेकया
घटमुखाल्लघु धारतयार्पितैः ॥
करतल-द्वयतो ममृजे मुहुः
कचततिः परया परया मुदा ॥ २२ ॥

घनरसोक्षणतो दरकुञ्चित-
सृमर-लम्बित-नीलपताकिकः ॥
द्युतिभरं पुरटध्वज एव त
त्तनुमिषादतनो दतनो नु किम् ॥ २३ ॥

---

आसनादुत्थाय स्नानसमये शिरसि जलदानार्थं तस्याः सकाशात् किंकरीणां किंचिदुच्चप्रदेशो ऽपेक्षितो ऽतस्तदर्थं वेदिकां विशिनष्टि वृतिमतीं वेदिकायाश्चतुर्दिक्षु किंचिदुच्चभित्ति स्वरूपावरणयुक्तां पुनश्च अभितश्चतुर्दिक्षु जलनिर्गमार्थं प्रणालिका इति प्रसिद्धपरिवाहयुक्ताम् ॥ २१ ॥

जलेन गात्राभिषेकमाह एकया किंकर्या घटमुखाल्लघुधारतया तस्या राधायाः शिरसः उपरि अर्पितैर्जलैः परया किंकर्या कचततिः केशश्रेणी करतलद्वयतः ममृजे परया मुदा परमानन्देन ॥ २२ ॥

जलाभिषेकसमये शोभाविशेषमुत्प्रेक्षते तस्या राधाया स्तनुच्छलेन अतनोः कंदर्पस्य सुवर्णनिर्मितो योध्वजः स एव नु भोः ! किं द्युतिभरं कांतिसमूहम् अतनोत् शरीरस्वरूपध्वजं कीदृशं घनरसस्य जलस्य उक्षणतः उक्षसेचने जलसेचनात् दर ईषत् कुंचितः पुनश्च सृमरा प्रसरणशीला लम्बिता केशरूपा नीलपताकिका यस्य सः ॥ २३ ॥

कृतमृजेष्वखिलावयवेषु ताम्
समुचिताम्वुभिरुन्नत-सौरभैः ॥
स्नपयितुं मुहुरेव तदालिभिः
प्रववृते ववृते च जयस्वनः ॥ २४ ॥
हरिमणिमयतां चिकुरोर्ध्वगम्
वदन सन्निहितं वहुरत्नताम् ॥
करतलोपरि वैद्रुमतां कुच
द्वयमहो यदहो नव-हैमताम् ॥ २५ ॥

ततश्चांगमार्जनार्थमवांतरस्नानानंतरमहास्नपनसमये सखीनां व्यवहारमाह कृता मृजा मार्जनं येषाम् एवं भूतेषु निखिलावयवेषु सत्सु तदा उन्नतसौरभै रम्वुभिः स्नपयितुम् आलिभिः प्रववृते सखीभिः प्रवृत्तमित्यर्थः एवं स्नानसमये जयशब्दश्च प्रववृते प्रवृत्तोऽभूदित्यर्थः ॥ २४ ॥

स्नानसमये शोभाविशेषं चाह, स्फटिकनिर्मितजलभाजनम् एकमपि विविधरूपकं विविधाकारं श्लेषेण हरिमणित्वादिना विविधा रूपकालंकारा यत्र तथाभूतं सत् श्रिया अतनोरनल्पस्य सभाजनस्य उत्कृष्टस्य भाजनत्वम् आस्पदत्वं श्लेषेण तनोः राधिकादेहस्य स्तुति व्यंजकत्त्वं ययौ प्राप, धन्योऽयं देहः यस्य सान्निध्यात् अल्पमपीदं हरिमण्यादिमयत्वेन वहुमूल्यं वभूव इतिपरश्लोकेन सहान्वयः। स्फटिकनिर्मितजलपात्रस्य नानाविधाकारत्वमेवाह तादृशं भाजनं चिकुरोर्ध्वगं सत् हरिमणिमयतां भजत् इन्द्रनीलमणि कृतमिव जातमित्यर्थः यत् पुनश्च कुचद्वयमहो सत् नवहैमतां भजत् कुचद्वयस्य महः कांतिं याति प्राप्नोति तथाभूतं सत् नवीन सुवर्णकृतमिव जातमित्त्यर्थः अहो आश्चर्यम् ॥ २५ ॥

जघनवाससि पुष्करपिण्डताम्
भजदिव स्फटिकोदकभाजनम् ॥
विविधरूपक मेकमपि श्रिया
तनु-सभाजन-भाजनतां ययौ ॥ २६ ॥

युग्मकम् ।

स्थिरतडिल्लतिका धृतमौक्तिका-
न्युदचिनोत् पृषदम्बुमृजा-मिषात् ।
वरतनोः शरदभ्र-निभांशुकैः
करधृतैः प्रमदात् प्रमदावलिः ॥ २७ ॥
निरुदकीकृतयें ऽशुक-वेष्टनम्
कचतति र्गमितापि कयाप्यभात् ॥

पुनश्च जघननितम्वादिनिकटे सृतं सत् पुष्करपिंडतां जल पिंडमिव जातमित्यर्थः स्फटिकवस्त्रयोः श्वेतत्वेन जलपिंडाकारमिव प्रत्ययात् ॥ २६ ॥

स्नानानंतरं गात्रप्रोंछन शोभामाह प्रमदावलिः स्त्रीसमूहः वरतनोः श्रीराधायाः पृषदंवु-मृजा-मिषात् विंदुजलमार्जनछलेन स्थिरीभूता या विद्युल्लतिका तया धृतानि मौक्तिकानि उदचिनोत् उत्थाप्यनीतवतीत्यर्थः प्रमदादानंदतः केन प्रकारेण तत्राह शरत् कालीनश्वेताभ्रतुल्यैरंशुकैः ॥ २७ ॥

केशस्य जलदूरीकरणमाह निरुदकीकृतये जलदूरीकरणाय कयापि किंकर्य्या कचततिः केशसमूहः अंशुकवेष्टनं गमिता वस्त्रेण वेष्टिता इत्यर्थः तथापि अभात् शोभितवतीत्यर्थः तत्र उत्

सुरनदी-स्तृतयापि किमुत्त्विषो
रविजया विजयाय वितेनिरे ॥ २८ ॥
अथ तया निरपीड्यत सा लघु
भ्रमिवशा दप उद्गिरती मुहुः ॥
ग्रसनतः किमुचन्द्रिकयाऽरुद-
द्घनतमो-विसरो विष-रोचिषा ॥ २९ ॥
परिजहौ रुचिरांशुक-वेष्टिता-
धरतनुः सुदृगा-प्लवनाम्बरम् ॥
ममगुणाः सुरभि स्तनुमानसा
वितिरसा तिरसा-दिद माददे ॥ ३० ॥

---

प्रेक्षामाह रविजया यमुनया सुरनद्या गंगया स्तृतया आच्छादितया सत्या ऽपि विजयाय गंगांजेतुं त्विषः कांतीः किं वितेनिरे ॥२८॥

निष्पीडन शोभामाह तया किंकर्य्या सा कचततिः लघु अल्पमेव निरपीड्यत सा कथंभूता भ्रमिवशादप उद्गिरती तत्रोत् प्रेक्षामाह विषरोचिषा मृणालवत् श्वेतकांतिमत्या चन्द्रिकया ग्रसनाद्धेतोः घनतमो विसरः निविडांधकारसमूहः किम् अरुदत् विषरोचिषेत्याविमृष्टविधेयांशदोषो यमकानुरोधेन सोढव्यः ॥२९॥

वस्त्रांतरं परिधाय पूर्वं परिहितवस्त्रं त्यक्तवतीत्याह सुदृक् श्रीराधा रुचिरांशुकेन वेष्टिता अधरतनुः अधः शरीरं यस्या एवं भूता सती अर्थात् शोभितवस्त्रम् अधः शरीरे परिधाय आप्लवनांबरं स्नानीयवस्त्रं परिजहौ तस्य सौगंध्यमाह रसापृथ्वी इदं आप्लवनांबरम् अतिरसादादे अनुराग विशेषेण गृहीतवती त्यर्थः

अधिवितर्दि-तलं ललनामणि
श्चकितदृक् दर-कुश्चित-विग्रहा ॥
व्यकिरदङ्गुलि चम्पक कोरकैः
शिरसिजान् मुख-सन्मुख-संनतान् ॥ ३१ ॥
करयुगा-कलितान्त-तटद्वया
म्वरवराहति-निर्धुत-कुन्तला ॥
घनरसत्रसरेणुमयं नभो
व्यधित साधित सार रुच श्वताः ॥ ३२ ॥

अतिरसस्तस्याः कुतो जात स्तत्राह असौ सुरभिः सौगंध्यरूपो मम गुणास्तनुमान् इदानीं ममभाग्येन मूर्त्तिमान् जात इति मननात् श्रीराधांगस्पर्शात् एवं नानाविध सुगंध तैलस्पर्शाच्च वस्त्रस्य तथा सौगंध्यं जातं यथा गंधगुणा पृथ्वी अपि परमा दरेण गृहीतवती वस्तुतस्तु अति रसेन अति जलेन सिक्तं तद्वस्त्रं भूमिमपि सुगंधी चकार ॥ ३० ॥

अधिवितर्दितलं वेदिकायां स्थित्वा ललनामणिः श्रीराधा अंगुलि चंपककोरकैः मुखस्य सन्मुखे नतान् नम्रीकृतान् शिरसिजान् केशान् "स्याद्वितर्दिस्तु वेदिके" त्यमरः कथंभूता चकितदृक् सभयनयना तेन कोपि वा पश्यतीति शंकाकुलेति भावः अतएव दरकुंचितविग्रहा ॥ ३१ ॥

पुनः केशानां जलकणमात्रस्यापि राहित्यमाह करेति सा श्री राधा नभआकाशं घनरसो जलं तस्य त्रसरेणवः ऽत्यन्तसूक्ष्मकणाः तन्मयं कृतवतीत्यर्थः सा किंभूता करद्वयेन कलितम् अंततटद्वयं यस्य तथाभूतं यदंवरं वस्त्रं तस्य या आहतिः आघातस्तया निर्द्धूताः कुंतला यया सा किंच साराधाताः प्रसिद्धाः साररुचः सारभूताः

स्थिर-तडिद्व्रतति र्निज-शाखयो
र्विमल-चंद्रिकया कृत-सख्ययोः ॥
युगमुदस्य मुहुः प्रजहार किम्
घनतमो नतमो-जसि तून्नतम् ॥ ३३ ॥

रुचिर-कुंचन-संवृत मूर्द्ध्वत
स्ततमधः प्रपदावधिलंवि सा ॥
परिदधे ऽरुण-सूत्र-सितान्तरम्
प्रवर-मम्वर-मंचित-चित्रवत् ॥ ३४ ॥

कनकविन्दुमती नवशाटिका

---

शोभां अधितवती तादृशकेशाघातसमये तस्याः अतिसुंदरकांतयः सर्वत्र व्याप्ता इति स्वभावोक्तिः ॥ ३२ ॥

श्रीराधायाः केशाघातमुत्प्रेक्षते स्थिरविद्युल्लतिका कर्त्री विमल चंद्रिकया सह कृतसख्ययोः निजशाखयोर्युगं उदस्य उत्थाप्य घनी भूतकेशस्वरूपम् अन्धकारं कर्म किं प्रजहार, कथंभूतं नतं नम्रीभूतं किंतु ओजासि उन्नतम् उच्चीभूतम् अतेन प्रहारैस्तत्परिभवाभावश्च सूचितः दृष्टं चैतद्भगवद्भक्तेषु अन्यकृत तिरस्कारे ऽपि समत्वात्तेजो वृद्धिर्जायते ॥ ३३ ॥

सा राधा (लहंगा) इति प्रसिद्धं प्रवरमम्वरं परिदधे किंभूतम् ऊर्ध्वंत उपरि भागे रुचिरकुंचनेन संवृतं पुनश्च प्रपदावधि पादाग्रपर्यंतं लम्वि पुन ( डोरी ) इति ख्यातेन अरुणसूत्रेण सितं बद्धम् अंतरं यस्य तत् तेनांतः प्रविष्टैनैव सूत्रेण बद्धमिति यावत् पुनश्च अंचितं पूजितं प्रशस्तं यच्चित्रम् तद्युक्तं ॥ ३४ ॥

तस्य परिहितवस्त्रस्य उपरि (डांडिया) इतिप्रसिद्धा नवशाटिका दिद्युते शुशुभे कथंभूता सुवर्णरसमयवस्तुना निर्मिता ये विंदवः विंदु

घनरुचि स्तदुपर्य्यति दिद्युते ॥
यदभिवेष्टनमेव मुकुन्द दृ-
ङ्गिरनुरोधनरोधन मुच्यते ॥ ३५ ॥
अगुरु-धूम कुलं गुरुकेशभाक्
तदवशेष रसं लिहदुद्ययौ ॥
स्वरतिऋद्धिभवे न्नहि कस्य वा
समहता महतामनुसेवया ॥ ३६ ॥
विधुमुखीं भृशमुच्छलितैर्वृताम्
द्युतिभटैः पुरटासनमाश्रिताम् ।

मथ चित्राणि तैर्युक्ता पुनश्च मेघस्येव रुचिर्यस्याः सा श्रीकृष्ण कर्तृ-कदर्शन-जन्य-लज्जया यस्याः शाटिकायाः सम्यक् तया वेष्टनं कृष्णस्य दृष्टे निरनुरोधेन स्वातंत्र्येण रोधनम् उच्यते तथाच यद्वेष्टनदर्शन मात्रेणैव कृष्णस्य नेत्रं रुद्धं भवतीत्यर्थः ॥ ३५ ॥

पुनः केशस्य विशेषणमाह अगुरुकृतधूमसमूहः तेषां केशानाम अवशिष्टतया स्थितो यो रसो जलं तत् लिहत् सत् स्वः स्वर्गपर्यंतम उद्ययौ कीदृशं धूमकुलं गुरुर्दीर्घो यः केशस्तं भजते श्लेषेण अगुरुं गुरुराहितं यद्धूमकुलं मलिनं कुलं गुरुस्वरूपं केशम् ईश्वरं भजत् सत् अवशेषरसं लिहत् आस्वादितं कुर्वत् अत्यन्तं ऋद्धिः संपत्तिर्यत्र तादृशं स्वःवैकुंठमपि उद्ययौ,तत्रार्थान्तरन्यासमाह महताम् अनुसेवया कस्य नीचस्यापि जनस्य समहता सोत्सवत्वं नहि भवेत् ॥ ३६ ॥

केशसंस्कारार्थं सुदेवी समागतेत्याह सुदेवी सुमुखीं श्रीराधां परिचरंती परिचरितुम् उपगम्य निकटमागत्यमुदम् आनंदम् अधात् धृतवती कथंभूतां भृशमुच्छलिता द्युतिरूपा भटाः सेनाः तैश्चतुर्दिक्षु

परिचरत्युपगम्य सुदेव्यधात्
सकलया कलया महिता मुदम् ॥ ३७ ॥
अधिशिरोऽधि समर्पित-संकुच-
द्विकसदुन्मुख-सव्य-करोदरे ॥
इतर-पाणिग-कङ्कतिका ऽग्रतो
दरविकृष्य विकृष्य कचान्यधात् ॥ ३८ ॥
कनक-जाल-विकीर्ण-यमानुजा-
सलिलपूरवरो विततो ऽपि किम् ॥
मुकुलित-स्फुटिताब्जमुखे पतन्
कवलितो वलितोदयवत्यभूत् ॥ ३९ ॥

---

वृतां सुदेवी कथंभूता सकलया सर्वया कलया वैदग्ध्या महिता पूजिता ॥ ३७ ॥

केशसंस्कारमाह अधिशिरोऽधि कंधरायां समर्पितो यः संकुचन् अथ च विकसन् एवमुन्मुख उत्तानतया स्थितो यो वामकरःस्तस्य उदर-मध्ये दक्षिणपाणिगतकंकतिकाग्रेण करणेन अदरविकृष्य विकृष्य अतिशयाकर्षणं कृत्वा कचान्यधात् तथाच श्रीराधायाः कंधरायां उत्तानतया स्थिते वामहस्तमध्ये कचां यदा कंकतिका ग्रेण आनयति तदा करः प्रसारितः स्यात् अन्यदा कुञ्चितः स्यादित्यर्थं ॥ ३८ ॥

केशान् संस्कुर्वत्याः 'सुदेव्या वामकरे धृतं राधायाः केश समूहम् उत्प्रेक्षते कनकरचितजालरूपया कंकतिकया विकीर्णआ कृष्टो यो यमुनाजल प्रवाहवरः विततः विस्तृयतोऽपि मुकुलितस्फु

सुभग-कङ्कतिका-कलिताऽलिका
दुपरितः प्रभयैधत रेखिका ॥
ललितपुच्छयुगा समया शिर
स्तनुतमा नुतमार्गनिभा-तनोः ॥ ४० ॥

सपदि मूर्त्तिमती किमु माधुरी-
सुरनदी हरिहृत्करिकेलये ॥
परिजनाक्षितरि स्त्रिपथोदया
स्मरदमीवहति वहतिस्म सा ॥ ४१ ॥

---

टिताब्जमुखे पतन्सन् कवलितो ग्रस्तोऽभूत् कथंभूते अब्जमुखे वलिता वलवत्ता तस्या उदययुक्ते अत एव महाप्रवाहमपि ग्रासीकरोतीति ॥ ३९ ॥

केशेषु रचनाविशेषमाह सुभगया कंकतिकया कलिता कृता (शीँथी) ति ख्याता रेखिका प्रभया अलिकात् ललाटादुपरि ऐधत किंभूता समयाशिरः शिरो मध्ये ललितं सुन्दरं पुच्छ द्वय यस्याः पुनः कथंभूता तनुतमा सूक्ष्मा पुनश्च नुतः स्तव विषयीकृतोयः कंदर्पस्य मार्ग स्तत्तुल्या नुतइतिअर्थात् कंदर्पस्येति बोध्यम् ॥ ४० ॥

रेखिकायाउत्प्रेक्षामाह श्रीकृष्णस्य हृदयहस्तिनः केलये माधुरी सुरनदी मूर्तिमती सपदि शीघ्रं किमु वहति स्म प्रवाहरूपेण चलि तवतीत्यर्थः कथंभूता परिजनानां चक्षुरेव तरिर्नौका यत्र सा पुन श्च त्रयाणां पथाम् उदयो यस्याः एतेन गंगा साधर्म्यमुक्तं पुनश्च स्मरतां जनानाम् अमीवस्य पापस्य हतिर्नाशोयतः ॥ ४१ ॥

ललितया ऽथ पुरःस्थितया शिरो
मणि रिहोपरि साधुतया ऽर्पितः ॥
विरुरुचे कचसंतमसावला-
विन इवोदयितो दयितो यथा ॥ ४२ ॥
तमभितः स्पृशती नवमौक्तिका
वलि रभादधिरेख मपि स्थिता
उडुततीरविमाप विहाय किम् ?
हिमरुचिं परितो ऽपरितोषतः ॥ ४३ ॥
विनिहितालकचुम्बितमौक्तिका
तनुधनुःसदृशी न ललाटिका ।

---

केशेषु वेषमाह पुरःस्थितया ललितया शिरस उपरि (शीषफूल) इति प्रसिद्धः शिरोमणिः साधुतया अर्पितः सन् विरुरुचे तत्र दृष्टांतः केशरूपांधकारश्रेण्याम् इनः उदयकालीनो रक्तसूर्य्य इव, ननु सूर्य्यो यथा अंधकारं नाशयति तथा अयमपि केशरूपांधकारं कथं न नाशयति तत्राहदयितोयथा तथा, अंधकारश्रेण्याः प्रियत्वात् अस्य च प्रिया त्वादद्भुतसूर्य्य इत्यर्थः ॥ ४२ ॥

शिरोमणेश्चतुर्दिक्षु रचना विशेषमाह तं शिरोमणिम् अभितः स्पृशतीनवमौक्तिकश्रेणी अधिरेखं रेखायामपि स्थिता सती अभात् तत्र उत्प्रेक्षामाह उडुतति नक्षत्रश्रेणी अपरितोषात् हिमरुचिं चंद्रं विहाय किम् अभितः रविसूर्य्यम् आप शीताद्यार्त्तिदूरीकरणायेति भावः ॥ ४३ ॥

ललाटस्थिता भरणांतरमाह ललाटे विनिहिता अथचालक चुंबिता मौक्तिका मुक्ता यत्र तथाभूता या ललाटिका ललाटोर्ध्वे

सचल-शैवल-वुद्बुद-पाल्यसौ
मुख-सुधा-सरसःसरसच्छवेः ॥ ४४ ॥
मिलित तत्तदुपान्तिमसूत्रव
त्यथ सुदेव्युत-पुष्पविचित्रिता ॥
कचततिः सुदृशो वरवेणयभूत्
मधुरमा प्रसृतं प्रसृतं यया ॥ ४५ ॥
विधुरगान्मुखतां तपसा वम

स्थितभूषणां पत्रपश्याख्यं न, तर्हि किमित्यपेक्षायामाह असौ ललाटिका मुखरूपसुधासरोवरस्य चंचलशैवालसहिता या बुद्बुदपाली जलविंवश्रेणी तद्रूपात्रवेति ननु सरोवरमध्योत्पन्नानां शैवालादीनां कथंललाटरूपतटवृत्तित्वं संभवति तत्र आह सरसेति सरसः कथंभूतस्य रससहिता च्छविः तरंगरूपा कांतिर्यस्य अत्र छविपदस्य तरंगे आरोपः तथा च छविरूपतरंगनैव तेषां तटवृत्तित्वं बोध्यम् अलकस्थानीयः शैवालः एकारवानपि शैवलशब्दोस्ति "सकलशेवल शेवलमालिक"इतियमकदर्शनादिति अमरटीका ॥४४॥

वेणीरचनामाह मिलितानां तेषां शिरोमणिलग्नमुक्तामाला ललाटिकादीनां ये ऽन्तिमभागास्तेषां निकटवर्तिसूत्राणि तद्वती सुदृशो राधायाः कचततिः वरवेणी अभूत् अंते भवो ऽतिमश्च रमदेशस्तस्य निकटवर्ततेअनेन मुक्तारहितानि सूत्रस्य सर्व्वावयवान्येव वेणीमध्ये प्रविष्टानीति ज्ञेयं कथंभूता सुदेव्या ग्रथितैः पुष्पैर्विचित्रिता यया वेणया आप्रसृति जंघाः तत्पर्य्यंतं मधुरं यथा स्यात्तथा प्रसृतं व्याप्तम् ॥ ४५ ॥

वेणीशोभामुत्प्रेक्षामाह विधुश्चंद्रः तपसा करणेन निजांकलंककलां किम् ऊर्ध्वतो वमन् सन् राधाया मुखताम् अगात् प्राप्तवान्

न्निज-कलङ्क-कलांकि-मिहोर्द्धतः ॥
इय-मपीलित-वेणि-रभूद्गता
चरणलम्विततां विततां शुभिः ॥ ४६ ॥
विविध-रोचि-रयोजि-तदग्रतः
कनक-हीरक-मौक्तिक-चित्रिता ॥
मृदुल-पट्ट-लस-च्चमरीतति
र्व्विकच सारस-सार-सभा सभा ॥ ४७ ॥
हरि-मनोरथ-कल्पलतोर्ध्वतो
य मवरोह मधत्त तदग्रतः ॥

---

नवकेशरूपा सा कलंक-कला राधायाः शिरसि कथं स्थापिता तत्राह इयमपि कलंककला चरणलंवितत्वं गता सती ईलितास्तवयोग्या वेणिरभूदिति चरणे पतिता सात्वेनाङ्गीकृतेतिभावः कलंककलावेणि वेणिः कथंभूता अंशुभिः किरणैविंतता विस्तृता अतएव किरणद्वारा चरणपर्य्यंतमपि तस्यागमनं संभवेत् ॥ ४६ ॥

पुनर्वेणी भूषामाह सुदेव्या तस्या वेण्या अग्रे मृदुलपट्टलसच्च मरीततिः आयोजि कोमलपट्टसूत्रसंबंधिनी अथच लसती शोभा-यमाना चमरी श्रेणि तथाच ( कोंधनी ) तिख्यातं पट्टसूत्रम् वेण्य-ग्रे दत्तमित्यर्थः कथंभूता विकच सारसस्य प्रफुल्लपद्मस्य या सार सभा श्रेष्ठसदस्तस्य समानाभाः कांतिर्यस्याः ॥ ४७ ॥

पुनर्वेणीमुत्प्रेक्षते राधारूपायाहरिमनोरथ कल्पलतासानामल इति ( जटा ) इति च ख्यातं यं वेणीरूपम् अवरोहं ऊर्ध्वतो ऽधत्त तस्य अवरोहस्याग्रे मदनःवररुचामरचामरं किं असिनोत् वरा श्रेष्ठा रुचा कांति र्यस्य तत् अमरचामरं, रुचा टावंतोऽपि दिशा

निर्जित मिन्द्रपुरान्मदनो ऽसिनो-
द्वररुचा मरचामर मेव किम् ॥ ४८ ॥
किमु सुदेव्ययि ! देव्यसि वन्धदा
दृढमवध्यत वालतति र्यतः ॥
द्रुतमिमां हरिरेव विमोक्षति
स्वरति-लक्षणातः क्षणातः क्षणात् ॥ ४९ ॥
इदमभाषत सव्यकरं दध-
त्यधिशिरो ललितास्य मुदस्य सा ॥
तिलकयन्त्यलिकं धृतवर्तिके
तरकरा रकराजिमृगीदृशः ॥ ५० ॥

---

वाचा इतिवत् वटभिन्न वक्षस्थावरोहे जाते तद्दर्शनजनितया तत्तले निधिस्थिति शंकया यथा अन्यो राना तद्रक्षणायस्वत्व-ज्ञापकं चामरं वध्नाति तथैव कंदर्पराजोऽपि चकार। इंद्रपुरादिति चामरस्यसौंदर्य्यमुक्तम् ॥ ४८ ॥

सुदेवीमपदिश्य ललिता सपरिहासमाह अयि सुदेवि ! त्वं वन्धदा देवी महामाया असि यतः वालततिः अबुधश्रेणीपक्षे केशश्रेणी दृढं अवध्यत स्वस्मिन् रतिः प्रेमा पक्षे सम्भोगास्तस्य लक्षणात् यक्ष यति ज्ञायतीतिव्युत् पत्त्या अनुभावादित्यर्थः क्षणात: उत्सवतः क्षणात् क्षणमात्रेण मोक्षति ॥ ४९ ॥

इदं पूर्वोक्तं ललिता सुदेवाम् अभाषत अधुना ललाटं च ललितया तिलकित मित्याह सा ललिता मृगीदृशः राधाया आस्यं मुखं उदस्य उत्थाप्य अलकं तिलकयंती सती अभाषते

मद-युता-गुरव-द्रव-मण्डला-
न्तर-लस-त्तनु-नागज-पङ्कजम् ॥
व्यलिखदैन्दवचन्दनविन्दुयुङ्
मधुर-चित्रक-चित्रक माशु सा ॥ ५१ ॥
अपहृतां विजितात् किमुमापतेः
शशिकला मलिकं व्यधितात्मभूः ॥
इह पुनः कलिताङ्ग विशेषकम्
शुचिरसं चिरसंभृत मादधे ॥ ५२ ॥

त्यन्वयः कथंभूता तिलकदानार्थं अधिशिरः शिरसि वामकरं दधती पुनश्चभूता ( तूलीति ) प्रसिद्धावर्त्तिका इतरकरे यया अलिकं कथंभूतम् अरकेण अलकेन राजितुं शीलं यस्य तत् ॥ ५० ॥

तिलकरचना विशेषमाह सा ललिता मधुरं चित्रं यत्र तथा भूतं तिलकं व्यलिखत् तिलकं कीदृशं मदो मृगमदस्तेन युक्तो य आगुरवद्रवः अगुरुसम्भूतो रसः ( चोवा ) इति प्रसिद्धस्तेन कृतं यन्मण्डलं तस्य अंतरे मध्ये लसत् शोभितं यत्तनु सूक्ष्मं नागजेन सिंदूरेण कृतं पंकजं पद्मं यत्र पुनश्च इंदुः कर्पूरः ऐंदवश्चासौ चन्दनविंदुश्चेति कर्मधारयः कर्पूर संवलितचंदनस्य विन्दुयुक् ॥ ५१ ॥

ललाटस्य तिलकस्य च शोभामेकदा आह आत्मभूः कंदर्पःश्लेषेण ब्रह्मेवसृष्टा विजितात् उमापतेः महादेवात् सकाशा दपहृतां चन्द्रकलामेव अलिकं ललाटं व्यधित चकार उमायाः पतित्वमेवतस्य कामविजितत्त्वं सूचयति पुनरिह अलिके चिरसंभृतं चिरकालं व्याप्य धृतं शृंगाररसं आदधे कीदृशं धृतांग

पुरट पट्टवरेऽलकमातृका
क्षरवृतं स्मरयन्त्रमिदं बभौ ॥
किमुरुवर्णमनुश्रितसौभगम्
प्रियतमादरमोदरकार्मणम् ॥ ५३ ॥
सरसमानगथैन्दववार्तिका
कलितया ऽञ्जनरेखिकया ऽक्षिणी ॥
सपदि पक्ष्मनिकुञ्चनमाधुरीम्
रसनया सनया लिहतां कथम् ॥ ५४ ॥

विशेषकं मूर्त्तं शृंगाररसमित्यर्थः गृहीतानिर्वेदगर्वाद्याहासाद्याश्च अङ्गविशेशायेनेतिश्वेतरक्त बिंदुरेखादिसंगतः कलितानिरचितानि विंद्वादीन्यंगानि यस्य तादृशं विशेषकं तिलकं शुचि शुद्धो रसो यत्रतदिति त्रयएवार्थाः प्रस्तुताः ॥ ५२ ॥

तिलकमेव पुनरुत्प्रेक्षते ललाटरूपसुवर्णपट्टवरे अलकरूप मातृकाक्षरेणावृतं कंदर्पस्य यंत्रं किं बभौ कथंभूतं उरवो वर्णा अक्षराणि यत्र तेन मनुना मंत्रेण आश्रितं सौभगं यस्य तिलकप क्षे वहुश्वेतरक्तादिवर्णमितिच्छेदः पुनश्च प्रियतमस्य अदरः अनल्पं मोदं हर्षं राति ददाति यत् कार्मणं वशीकारकवस्तु विशेषस्तत् स्वरूपम् ॥ ५३ ॥

अथ तिलकानंतरं ललिता अंजनरेखिकया राधाया अक्षिणी आनक् अंजनयुक्ते कृतवतीत्यर्थः अंजूम्रक्षणे लङ् अंजनरेखिकया कथंभूतया इंदुः कर्पूरस्तत्र भवा या वर्त्तिका (तुलीति) ख्याता तया कृतयासपदि अंजनदानक्षणे या पक्ष्मकुंचनस्य माधुरी तां सनया नीतिमंतोऽपि जना रसनया जिह्वया कथं लिहतां जिह्वया कथं वर्णयं त्वित्यर्थः ॥ ५४ ॥

किरणमालिनि न प्रभुतेति तत्
प्रियतमे नलिने यदिमे तमः ॥
स्वमहसा वृणुतैव तदप्यहो
रुचिरता चिरताऽवलतैतयोः ॥ ५५ ॥
सतृषतावगमादय मर्पितः
सपदि कृष्णरुचिद्रव एव वाम् ॥
इति जगाद दृशौ कुटिल भ्रुवः
स्मितमुखी ललिता ललिताक्षरम् ॥ ५६ ॥
सफरिके ! रुचिराञ्जनरञ्जिते

---

अंजनयुक्तयो र्नेत्रयोः शोभामुत्प्रेक्षते किरणमालिनि सूर्य्ये प्रभुता नास्ति इति मत्वा तस्य सूर्य्यस्य परमप्रिये नलिनेपद्मद्वयं तमो ऽन्धकारः स्वमहसा स्वकांत्याआवृणुत इव अहो आश्चर्य्यं तदपि तथापि एतयोर्नलिनयो रुचिरता कांतिमत्ता तस्या श्चिरता वहुकालव्यापित्वं अवलत वलिष्ठा वभूवेत्यर्थः ॥ ५५ ॥

ननु भो ललिते! अंगानां मध्ये श्रेष्ठाभ्यामावाभ्यां कथं रत्नादिकं विहाय अंजनं दत्तं तत्राह वां युवयोः कृष्णरुचिद्रवे तृष्णा युक्तावगमात् कृष्णरुचिद्रवो मया, अर्पितः कृष्णरुचिः कांतिर्यस्य तथाभूतो द्रवः अंजनमिति यावत् पक्षे कृष्णसर्व्वान्वियश्याम कांतिरेव द्रवः इति कुटिलभ्रुवो राधाया दृशौ प्रतिस्मितमुखी ललिता ललितं सुंदरम् अक्षरं यत्र तद्यथा स्यात्तथा जगाद कुटिल भ्रुव इति श्लिष्टार्थ स्मरणेन तस्या ईर्ष्या ध्वन्यते ॥ ५६ ॥

पुनर्ललितैवाह अयि सफरिके! कृष्णघनोद्गमे भविष्यति सति युवां नृत्यगतिं मदात् दर्पात् शीघ्रं तनुतं कथंभूतां भाववैदग्ध्या

अयि भविष्यति कृष्णघनोद्गमे ॥
सपदि नृत्यगतिं तनुतं मदा-
न्मधुर-भाव-कला-वक-लाघवाम् ॥ ५७ ॥

इति तया हसिता हसितांशुमु-
ख्यजनि या मम दृङ् न हि लासिका ॥
भव-दपाङ्ग-नट-प्रवरा-दन-
ध्ययन-शालितयाऽऽलि ! तयाऽत्र किम् ॥५८॥

विविधरत्नयुजाऽर्च्यत नासिका
शिखरमाशु तया वरमुक्तया ॥
उरसि साभरणोडुरिवेन्दुना
स्वरमणोरमणीयतया दधे ॥ ५९ ॥

---

अवकं रक्षकं लाघवं यस्यां मदादिति गुरुजनादिभयापेक्षाऽपि तदा नीं युवाभ्यां नकर्त्तव्येति ध्वनिः ॥ ५७ ॥

इति तया ललितया हसिता सितांशुमुखी राधा तां प्रति आह या ममदृक् सा लासिका नर्तकी नहि अंजनि न जातेत्यर्थः भवदपांगनटप्रवरात् अध्ययनशालित्वाभावेन हेतुना तस्मात् हेआलि! तया मूर्खदृष्टया अत्र किम् अत्र तस्याः श्लाघया न किमपि प्रयोजन मित्यर्थः ॥ ५८ ॥

भूषणेननासिका भूषितेत्याह तया ललितया विविधरत्न युजा वरमुक्तया नासिका शिखरमर्च्यत शुभ्रपुष्पेण पूजितवत् शोभि तं कृतमित्यर्थः तत्र दृष्टांतेन मुखशोभामाह इंदुना चंद्रेण स्वर

द्युतिनृपः सतदाऽऽभरणा-च्छलात्
पुरट-पङ्कज-पट्ट-वरासनः ॥
निखिल-दुर्वशदृङ्नगरे हरे
रधिचकार सदा रसदा स्पदे ॥ ६० ॥
लवणिम-व्रतते र्नववीजमित्य-
वचिचीषुतया त्विविलासिनोः ॥
मुहुरिहैव भवेत्किमघद्विषा
प्रहितयोर्हितयो रतिलोलता ॥ ६१ ॥
विचकिलोज्ज्वल-वर्तुल-कोरक-
स्मर-शर-स्तिल-पुष्पनिषङ्गतः ॥

मणी उडुरिववक्षसि दधे उडुः कथंभूता आभरणसहिता अत एव तस्या रमणीयतया हेतुना हृदिधृता इत्यर्थः चन्द्रविशेषणत्वे रमणीयातीति तया लांपट्येन हेतुनेत्यर्थः ॥ ५९ ॥

मुक्ताभरणमिषात्सद्युतीनां राजा एव अखिलानां दुर्वशे हरेर्दृष्टि रूपनगरेअधिचकार अधिकारं कृतवान् द्युतिनृपः कथंभूतः सुखस्वरूपस्वर्ण निर्मितकमलरूपपट्टं (राजपाट) इति ख्यातं तदेवासनं यस्य सः तादृशनगरे कथंभूते सुखदास्पदे ॥६०॥

नासाभरणस्या कर्षकताविशेषमाह लावण्यरूपलतायाः इदं नवीनवीजमिति मत्वा अवचिचीषुतया अवचेतु मिच्छया कृष्णेन प्रहितयोस्तस्याक्षिरूपविलासिनोः इहैव नासाभरणएव लोलता सतृष्णता किं मुहुर्भवेत् ॥ ६१ ॥

पुनर्नासाभरणमेव मुत्प्रेक्षते नासास्थानीयं यत्तिलपुष्पं तदेव निषंगः ( तूण ) इति प्रसिद्धस्तस्मात् मुक्तास्थानीयविचकिलोज्ज्वल

प्रसृत एव मुकुन्दधृतेः परि-
प्लवकरो ऽवकरोज्झित ऐष्ट किम् ॥ ६२ ॥
मधुरिमामृतयुग्वडिशं त्वम-
स्ययि ! विभूषण ! दृकूशफरं हरेः ॥
झटिति कर्ष मदादिति तत्तया
निजगदे जगदेधित सौभगम् ॥ ६३ ॥
ग्रसति यस्त्वनुरागसमुद्रभूः
कुलभुवां धृतिधीमतिसंपुटान् ॥

---

वर्तुलकोरकस्वरूपः कन्दर्पशरः प्रसृत एव निर्गतः सन्नेव किमैष्ट तथाच तृणा न्निर्गतः सन्नेव किं परमैश्वर्य्यं कृतवानित्यर्थः किमैश्वर्य्यमिति चेत्तत्राह यतः मुकुन्दधृतेः परिप्लवः वैकल्यं चांचल्यम्वा तं करोतीति "परिप्लवश्चाकुले स्याच्चंचले च पराभव" इति मेदिनी विचकिलो (रायवेल) इतिप्रसिद्धस्तत्रापि वर्तुलइति पदेन ( मोतिया रायवेल ) इति कोरकः कलिका अवकरो दोषस्तेन उज्झितः तथा च पुष्पगतम्लानत्वादि दोषरहित इत्यर्थः ॥ ६२ ॥

पुनर्नासाभूषणमपदिश्य परिहासमाह अयि नासाभूषण ! त्वं माधुर्य्यरूपामृतेन युक्तं वडिशं मसि अतएव मदात् दर्पात् हरेर्दृष्टिरूपं सफरं झटिति कर्ष आकर्षणं कुरु इति तया ललितया तद्भूषणम् प्रतिनिजगदे कीदृशं जगति एधितं वर्द्धितं सौभगं यस्य ॥ ६३ ॥

ललितायाः परिहासोक्तिं लक्ष्यीकृत्य विशाखाप्युपहसितवतीत्याह यः हरेर्दृष्टिरूपशफरः कुलभुवां कुलवतीनां धृतिमयबुद्धिसंपुटान् ग्रसति स खलु सास्पदं भूषणस्याश्रयसहितम् अदःत

वडिशमप्यभिकर्षतु वा स सा-
स्पदमदो दमदो भुवि तस्य कः ॥ ६४ ॥
इति सखीयुग-वागमृतंपिव-
न्त्यपिनटद्भ्रुकुटिः स्फुटमाह सा ॥
अयि ! कृषेः स युवां च परस्परम्
भवथ कर्मतया मतया स्थिताः ॥ ६५ ॥

॥ विशेषकम् ॥

उपरि चक्रिकयोः सशलाकयो
र्युगमधोमणिकुण्डलयोर्द्वयम् ॥
श्रवणयोरवतंसितकुन्दयो
र्न्यधित शोधितशोचि रिवांशुकैः ॥ ६६ ॥

---

वडिशमपि अभि सर्वतो भावेन आकर्षतु तथाच त्वया यदुक्तं तस्य वैपरीत्यं वा भवेदित्यर्थः अहो एवंवैपरीत्यं कथं संभवेत्तत्राह भुवि तस्य दमदः दमनकर्ता को भवेत् अनुरागरूपो यः समुद्रः स एव भूरुद्भवस्थानं यस्य ॥ ६४ ॥

साराधिका अयिहे सख्यौ ! सकृष्णः युवां च कृषधातोः कर्मतया परस्परं स्थिता यूयं भवथ कथंभूतया तस्य युवयोश्च सम्मतया ६५

कर्णभूषणं वर्णयति अवतंसितकुंदयोः श्रवणयोरुपरिदेशेचक्रिकाशलाकयोर्युगम् एवं तयोरधोदेशे कुंडलयोर्द्वयं न्यधात् उत्प्रेक्षामाह अंशुकैर्वस्त्रैः शोधितं छानितं शोचिः कांतिरिव ॥ ६६ ॥

किमतनु-द्रुम-पल्लव-तल्लजा-
वविभृतां विभृतान् द्युतिशीधुभिः ॥
मणिमयस्तवकान् स्तवकार्य्यंघ-
द्विषदलिप्रमद प्रमदप्रदान् ॥ ६७ ॥

मकरिके लिखती मृदुगण्डयो
र्मकरकेतनमाह्वयदेव सा ॥
य मधरारुणपल्लव मर्पयन्
रसमये समये हरिरर्च्चयेत् ॥ ६८ ॥

श्रवणहीरकणे प्रतिविम्बिते
नवकपोलसुधा सरसोरिमे ॥
चटुललाजधिया विवृतानने
किमुदिते मुदिते भवतुर्जडे ॥ ६९ ॥

---

अत्रोत्प्रेक्षामाह कंदर्पद्रुमस्य श्रेष्ठपल्लवौ किं द्युतिरूपशीधुभिर्विशेषेणभृतान् पूर्णान् पुष्टान् वा मणिमयस्तवाकान् अविभृतां भूतेलङ्तान्कथंभूतान् स्तवकान् स्तवकारि यो ऽघद्विषन्कृष्णः स एव भ्रमर स्तस्य प्रमदप्रमदप्रदान् प्रमदः प्रकृष्टमत्तता प्रकृष्टहर्षश्च ॥६७॥

सा ललिता गंडयोः कंदर्पस्यासनरूपे मकरिके लिखती सती मकरकेतनं कंदर्पम् आह्वयत् यं कन्दर्पं रसमयेसमये रहस्यकाले ॥६८॥ ललितयालिखितयोर्मकर्य्यो मुखमुत्प्रेक्षते श्रवणसंबंधिकुंडलस्थहीरकणे नवीनकपोलसुधासरोवरद्वये प्रतिबिंबिते सति प्रतिबिंबं दृष्ट्वा स्वभक्षाणां(खील)इतिप्रसिद्धानां चंचललाजानां धिया इमे मकरिके

मकरयोर्वर-कुण्डलताभृतो
रघहर-श्रुतिसेवि युगं तयोः ॥
मकरिके ! स्वयमेव पतिष्यतम्
रसकला सकला सफलाऽस्तु वाम् ॥७०॥
इति सखीगदिताऽऽह सुहृङ्मम
त्वचपले सरसे मृदुले इमे ॥
नहि तयोः सदृशौ सखि ! मा तनु
त्वमिह तत्सहसा सहसा गिरः ॥ ७१ ॥

---

किं विवृतानने प्रसारितानने सत्यौ बभूवतुः कथंभूते उदिते जनादुद्गते ननु स्वभक्ष्यं दृष्ट्वा कथं न खादतस्तत्राह मुदिते आनंदयुक्ते अतएव जडे तस्मात् स्वभक्ष्यं दृष्ट्वा आनंदजाड्यादेव भोक्तुं न समर्थे इत्यर्थः किंतु जीवंत्यौ एव एते इतिध्वनिः ॥ ६९ ॥

पुनर्मकरिकाव्यपदेशेन राधिकां परिहसति हेमकरिके!तयोर्मकरयोर्युगं स्वयमेवपतिष्यतं तयोर्द्वयं युवां पतिमिच्छतं कथमिति चेत् वां युवयोःरसकला सकला रसवैदग्धी सफला भवतु कथंभूतयोर्वरकुंडलताभृतोर्विलक्षण कुण्डल स्वरूपयोःतयोर्युगं किंभूतम् अघं पापं हरति या श्रुतिर्वेदस्तां सेवितुं शीलं यस्य तत् श्लेषेण अघहरः श्रीकृष्ण स्तस्य कर्णसेवि श्रीकृष्णस्य कर्णस्थ मकरद्वयपतिकरणेन श्रीराधां प्रत्येव परमः परिहासो ध्वनितः ॥ ७० ॥

मकरिकाव्यपदेशेन परिहासं श्रुत्वा श्रीराधिका आह सुहृक् राधा इति एवं प्रकारेण सख्या ललितया गदिता सती आह हेसखि ! इमे मकरिके अचपले सरसे मृदुले कोमले तत एव चपलशुष्ककठोरयोः सदृशौ नहि तत्तस्मात् हेसखि ? सहसा हठात् हास्यसहि

निज-भुजाङ्गदकुण्डलिकोरसि
प्रणयि शायय कुण्डलयो र्युगम् ॥
कठिनयोः कठिने ननु लोलता-
प्युपरमेत् परमेभ्यतया तयोः ॥ ७२ ॥

विशेषकम् ॥

चिवुक-मध्यमभून्मदविन्दुयुक्
स्वकर-संहृत-बान्धवमेव किम् ॥
तिमिरडिम्भक मङ्कतटे स्वयम्
सदयतोदयतो विधुरग्रहीत् ॥ ७३ ॥

---

तागिरः वचनानि इह मम मकरिकयो र्विषययोः त्वं मा तनु माकुरु ॥ ७१ ॥

राधिका ललितां परिहसंती पुनराह हे सखि ? निजभुजयोः (बाजुबंध)इति प्रसिद्धांगदरूपकुण्डलिकयोः सर्पस्त्रियोरुरसि वक्षःस्थले श्रीकृष्णस्य कुण्डलरूपसर्पयोर्युगं शायय कथंभूतं प्रणयि प्रीतिकरणशीलं कुण्डलयोः कथंभूतयोः कठिनयोः कुंडलिकोरसि कथंभूते कठिने अतएव तयोः साम्यात् ननु शायीयतुं कथं कथयसीति चेत् परस्पर योग्यसंगात् दोषविशेषः गुणविशेषः स्यादित्याह तयोः कुंडलयोः परमेभ्यतया स्त्रीरत्नप्राप्य परमाढ्यतया लोलता चंचलता उपरमेत् निवृत्ता भवेत् "इभ्य आढ्यो धनी स्वामी" त्यमरः ॥ ७२ ॥

इदानीं चिवुके रचनाविशेषमाह चिवुकमध्यं कस्तूरिविंदुयुक् विंदुसहितचिवुकमुत्प्रेक्षते विधुश्चन्द्रः सदयत्वस्य उदयत्वस्य हेतोःअंधकारस्य डिम्भं शिशुं स्वयमेव किम अंकतटे स्वक्रोडांते अग्रहीत् ननु विधोः स्वनाशस्य अंधकारस्य पुत्रे कथमीदृशी दया उदितेत्यत

मधुरिमाब्धिभवास्य सुधानिधौ
यदिह कृष्णरुचिः पृषतोऽङ्कितः ॥
तदवगम्य स कृष्ण इमं निजम्
सरसयन् रसयन् रमयेन्मुहुः ॥ ७४ ॥
कनक-केतकपत्र पुटीकला
पिशुनकोणयुगा नवविम्वभृत् ॥
व्यरचि याऽत्मभुवाऽत्र किमाभया
ऽतिशयितः शयितस्तनयोऽलिनः ॥७५॥

---

आह स्वकरोति डिम्भकं कीदृशं स्वकरैः स्वहस्तैरेव संहृतो नाशिती १ धिवो यस्य श्लेषेण स्वस्य करैः किरणैः ॥ ७३ ॥

पुनश्चिवुकविंदुमपादिश्य ललितोक्तिमाह इह माधुर्य्यसमुद्रोत्पन्ने मुखरुहसुधानिधौ चंद्रे यद्यस्मात् कृष्णवर्णा रुचिर्यस्य एवं भूतः पृषतोविंदुरंकितः तत्तत एव स कृष्णः स्वकीय(छापइति मोहर) इति च प्रसिद्धं विन्दुंदृष्ट्वा इमं मुखरूपंसुधानिधिं निजं अवगम्य सरसयन् रस युक्तं कुर्वन् एवं रसयन् स्वयंच रसानुभवं कुर्वन् सन् मुहुः रमयेत् चंद्रपक्षे पृषतो हरिणस्तद्रूपं चिन्हम् ॥ ७४ ॥

पुनश्चिवुकं तत्रस्थविंदुं चोत्प्रेक्षते आत्मभुवा कंदर्पेण पक्षे विधात्रा या स्वर्णकेतकी पत्रेण पुटी व्यरचि विरचिता अत्र पुट्यां किम् अलिनो भ्रमरस्य तनयः शयितः पुटीद्रोणीतिख्याता सा कथं भूता कलावैदग्धी तां पिशुनयति सूचयति कोणयुगं यस्याः तेन द्रोणीचतुष्कोणैव भवति इयं द्विकोणेति विशेषः पुनः कथंभूता अधररूपं नवीनविंवफलं विभर्तीति तनयः कथंभूतः आभया कांत्या अतिशयितः अत्यंतकांतियुक्तइत्यर्थः ॥ ७५ ॥

सित-करा-गुरु-चन्दन-कुङ्कुमै
स्तनुतर-च्छद-पल्लव-वल्लयः ॥
वरतनोः स्तनयो रथ चित्रया
रुचिरचित्रतयाऽत्र तथाङ्किताः ॥ ७६ ॥
मदनचक्रवरौ विनिमज्य किम्
कलितशैवलकौ सहसोत्थितौ ॥
रससरस्युरुखेलयिता ययो
र्व्वकरिपुः करिपुष्करदोर्भवेत् ॥ ७७ ॥
सपदि चम्पक-वल्लिकयैकतः
परत ऐन्दवलेखिकया भुजौ ॥
मणिमयाङ्गदिनौ रचितौ यथा
सितविधूतविधू बिसतल्लजौ ॥ ७८ ॥

---

वरतनोः राधायाः स्तनयोरुपरिकर्पूरागुरुचंदनकुंकुमैः करणैः अतिसूक्ष्मतरपत्रपल्लवलताः तया प्रसिद्धया चित्रया अंकिताः रुचिरचित्रतयेति परमशोभितं चित्रं कृतामित्यर्थः ॥ ७६ ॥
चित्रितस्तनावुत्प्रेक्षते कंदर्पराजस्य चक्रवाकौ रससरसिविनिमज्य किं कलितशैवलकौ शैवालयुक्तौ संतौ सहसा उत्थितौ ययोः स्तनरूपचक्रवाकयोः कर्मभूतयोः वकारिपुः कृष्णः उरुखेलयिता भवेत् अत्र तृच्प्रत्यययोगे कर्मणि षष्ठी कथंभूतः करेहस्तिनः पुष्करौ शुण्डाविव दोषौ हस्तौ यस्य ॥ ७७ ॥

चंपकलतिकया एकत एकहस्ते इंदुलेखया अन्यतः अन्यहस्ते एवं क्रमेण राधाया भुजौमणिमयांगदयुक्तौ रचितौ तत्र दृष्टांतः सि-

अनुमिमे स्वभृते सुदृशे ददा-
स्यतुलमङ्गमिहाङ्गद ! कस्यचित् ॥
इतरथा ऽनृतमस्यथवा द्यसी-
त्यनुसदो नु सदोषतयोच्यसे ॥ ७९ ॥
हरिदृशं गतमेतदनङ्गदम्
सखि ! तदङ्गदमप्यचिराद्भवेत् ॥
अतिविचित्रतया परमार्थधृक्
भवति नो ऽवतिनो किमुदारताम् ॥ ८० ॥

---

तौ वक्त्रौ विधूतौ खंडितौ विधू चंद्रौ यत्र तथाभूतौ विसतल्लजौ मृणालश्रेष्ठौ यथा ॥ ७८ ॥

अंगदद्वयं व्यपदिश्य राधिकां परिहसति हेअंगद! स्वभृते स्वधारिकायै सुदृशे राधिकायै कस्य चित् अतुलम् अंगं ददासि इति तवनाम्नो ऽवयव व्युत्पत्तिहेतुना अहम् अनुमिमे नुभोः न ददासि चेत् अनु सदः प्रतिसभायां त्वं सदोषतया उच्यसे जनैस्त्वंदोषयुक्त उच्यस इत्यर्थः दोषमेवाह इतरथेति तवांगदत्वाभावेन त्वमनृतमसि दोषांतरमाह अथवा अंगंद्दासीति व्युत्पत्तिं विहाय अंगं द्यसिखंडयसीति दोषविशिष्टत्वेन त्वम् उच्यसे ॥ ७९ ॥

चंपकलताया व्यपदेश हसितम् अवलोक्य इन्दुलेखा आह हे सखि ! चंपकलते तदंगदं हरिदृशं गतं सत्तस्य कृष्णस्य अंगदमपि अनंगदं भवेत् अतिविचित्रतया हेतुना तस्मात् एतदंगदं नोऽस्माकं परमार्थधृक् परमार्थरूपवस्तुतापूरकं भवति अतएव उदारतां किं न अवति तेन श्रीकृष्णदर्शनमात्रेण अनंगं कंदर्पं ददाति ततश्च तस्य अंगं ददाति तेन च संभोगोभवति अनेन

इति सखीद्वय-नर्मदरस्मिता
नतदृगाह किमङ्गदवार्तया ॥
यदिह वो ऽङ्गचये ऽङ्गदता हरेः
स्फुटमनङ्गदता गदताप्यभूत् ॥ ८१ ॥

निदधतुर्व्वलभिन्मणि-कल्पिताः
सवयसौ मणिमञ्जुलचूलिकाः ॥
कनक-चित्रित-रेखिकयाश्रिता
अधिकलावि कलाविकलाः समाः ॥ ८२ ॥

नख-मराल-सुतैरपसारिता-
प्युपरिगैरतिलालसयैव किम् ॥

---

अस्माकं परमार्थरूपं तद्दर्शनं दोग्धि पूरयतीति इदमेव महत्त्व मित्युच्यतां नचानृतमिति नवाखण्डकमिति कथनीयमिति ध्वनिः ८०

लज्जया नतदृक् राधिका आह अंगदस्य मदेकास्मिन्नंगे स्थितस्य वार्तया अलं यद्यस्मात् युस्माकं सर्वेषु अंगेषु हरेरेव अंगदत्वम् अनङ्गदत्वम् अगदत्वं चेति त्रिरूपत्वमितिस्फुटम् अभूत् अगदम् औषधं तेन कन्दर्परूपगदनिवर्तकः संभोगोऽपि जात इति ध्वनिः ॥ ८१ ॥

मणिवंधोपरि स्थिताः ( चूडी ) इतिख्याताः चूलिका वर्णयति सवयसौ चंपकलतेंदुलेखे कलाविर्मणिबन्धः तत्र इन्द्रनीलमणि-कल्पिताः सूक्ष्ममनोज्ञचूलिकाः निदधतुः कथंभूताः कलेन मधुरास्फुटेन स्वनेन अविकला उत्तमाः समा एकरूपाः चूडा चूला इति भाषावृत्तिः ॥ ८२ ॥

चूलिका उत्प्रेक्षते हस्तारविंदस्य उपरिगतैर्नखरूपमरालसुतै हंसपुत्रैः अपसारिता भ्रमरावलिः किं कमले लालसया हस्त

कमल-कण्ठमुपाश्रयता-सितो-
त्पलदलभ्रमरा भ्रमरावलिः ॥ ८३ ॥
वलय-कङ्कण-दम्भत एव सा
प्रियवपुर्वसन-द्युतिमालिका: ॥
स्वमणिवन्धगता अकरोदियम्
जपकृतां प्रकृतिः प्रकृतिस्तुता ॥ ८४ ॥
हरि-चकोरक-बन्धन-हेतवे
मदन-शाकुनिका-सितपाशताम् ।

---

रूपकमलस्य कण्ठंनिकटदेशम् उपाश्रयत कथंभूता नीलोत्पलान्ये वैतानि इतिभ्रमं मरालसुतेभ्यो राति ददाति अन्यथा मरालसुतै स्ततोऽपि सा अपसार्य्येतैवेति भावः ॥ ८३ ॥

कंकणादिशोभामुत्प्रेक्षते सा राधिका वलयकंकणच्छलात् प्रियस्य कृष्णस्य शरीरवस्त्रद्युतीनां मालिकाश्रेणी पक्षे तादृश द्युति रेव जपमाला च स्वमणिवंधे गता अकरोत् जपकृतां जपकरण शीलानामियं प्रकृतिरयं स्वभावः इयं किं भूता प्रकृष्टैरेव कृतिभिः विज्ञैः स्तुता तेन यथा जपशीलैर्माला परमासक्त्या मणिवंधे स्थाप्यते तथैव कृष्णस्य देहवसनकांतिरनया धृता नतुवलयकंकण द्यपता इत्यपन्हुतिः ॥ ८४ ॥

इदानीं ( पंहुचीति ) ख्यातं हस्तसूत्रमुत्प्रेक्षते असौ प्रतिसरः हस्तसूत्रं श्रीकृष्णरूपचकोरस्य बंधनार्थं मदनः कन्दर्पः सएव शाकुनिकः पक्षिहिंसकव्याधविशेषस्तस्य असितपाशताम् अगात् श्याम-रज्जुरभूदित्यर्थः असौ किंभूतः अतिसरोचिः अतिक्रांतसकांतिकः अमृतरूपा काचित् राधिका रूपा लता तस्याः पल्लवस्य मूले-

अमृत-वल्लरिपल्लव-मूलगः
प्रतिसरोऽतिसरोचिरसावगात् ॥ ८५ ॥
करदलेषु धृता बभुरुर्मिका
स्त्रयमृते वरमत्र तु दक्षिणाम् ॥
किमु नखेन्दुभि रब्जयुगे श्रिते
नववले ववले ऽप्युडुमण्डली ॥ ८६ ॥
उपरि पर्य्युतमञ्जुलमौक्तिकम्
मृदुतमं कुचयोरपिधायकम् ॥

---

स्थितः तेन व्याधेन चकोरबन्धनार्थं यथा पल्लवमूले जालरज्जुः स्थाप्यते तथैवेत्यर्थः ॥ ८५ ॥

करयोर्दलेषु अंगुलीषु धृता उर्मिका अंगुलीयकानि बभुः अत्र करदलेषु मध्ये दक्षिणां दक्षिणहस्तस्थं त्रयं श्रेष्ठम् ऋते दक्षिणहस्तस्थांगुष्ठतर्ज्जनीमध्यमं विनेत्यर्थः अत्र उत्प्रेक्षामाह नखरूपैर्विंदुभिः किं हस्तद्वयरूपाब्जयुगे आश्रिते ननु चंद्रस्तावत् कमलविपक्षो भवति अतो विपक्षरूपं कमलं कथमाश्रितं तत्राह अब्ज युगे कथंभूते नववले नखापेक्षया श्रीराधया दत्तं सौभगरूपं नवं वलं ययोः तथाभूते एते तेन कमलानां विलक्षणाश्रयलाभाद्वल वैलक्ष्यणयेनैव चन्द्रा अपि भयेन आश्रिता बभूवुः तत् दृष्ट्वा तेषां स्त्रीरूपा नक्षत्र मण्डली अपि ववले करदलानि वेष्टितवतीत्यर्थः अंगुलीयकस्थानीया उडुमण्डली बोध्या अतिशयोक्त्यलंकारात्॥८६॥

कांचुलीति प्रसिद्धा कंचुलिका परिधानमाह विशाखया कुचयोः अपिधायकं आच्छादकं अरुणाक चुकं निहितं अर्पितं कीदृशं उपरि परिस्यतानि ग्रथितानि मंजुलमौक्तिकानि यत्र पुनश्च

अरुणकञ्चुकमाशु विशाखया
विनिहितं निहितं हरिणीदृशे ॥ ८७ ॥
हरिवशीकृतिकौतुकिनां वरः
किमयमन्तरतो बहिरुद्गतः ॥
हृदवनावनुरागभटोऽतनो-
न्निजवलं जवलङ्घितधर्मभूः ॥ ८८ ॥
मणिसरैः सललन्तिककण्ठतः
समुचित क्रमलम्बिभिरुज्वलैः ॥
अभिमतैः सुदृशोऽपि तयार्पितैः
कुचविभा च विभागश एधिता ॥ ८९ ॥

---

मृदुलतम मतिकोमलं पुनश्च हरिणीदृशे राधायै नितरामति शयेन हित मत्र हितयोगे चतुर्थी ॥ ८७ ॥

उत्प्रेक्षया अरुणकंचुलीशोभामाह हरेः सिंहस्य पक्षे कृष्णस्य वशीकरणरूपकौतुकम् अस्ति येषां तेषां मध्ये श्रेष्ठोऽनुरागरूपो भटः किम् अन्तरतः अन्तःकरणात् कंचुलिकाछलेन बहिरुद्गतः सन् हृद-वनौ हृदयरूपस्थले निजवलम् अतनोत् कथंभूतः जवेनवेगेन लंघिता धर्ममर्य्यादा येन अनुरागस्य अयमेव स्वभाव इतिभावः ॥ ८८ ॥

ततो हारधारणमाह तया विशाखयार्पितैर्मणिसरैः हारैः करणैः कुचयोर्विशिष्टा भा शोभा एधिता वृद्धिं प्राप्ता कथंभूतैः ललंतिका कण्ठभूषणं तत्सहितात् कण्ठस्थानात् क्रमशः लम्ब मानैः "ग्रैवेयकं कण्ठभूषा लम्बनं स्याल्ललंतिका" इत्यमरः पुनः कथंभूतैः सुदृशो राधायाः अपिकारात् परिधापयित्र्याः सख्याश्च अभिमतैः

कनककम्बुविनिःसृतया ऽतनुः
सुरनदी-सलिला-मलधारया ॥
अभिषिषेच शिवप्रतिमाद्वयम्
किमघसंहति-संहतिहेतवे ॥ ९० ॥

हृदयविष्णुपदे पदकं ध्रुवम्
मुकुरवद्धरिधामधुराधरम् ॥
न्यधित सा भुवि यस्य महार्घ्यता
सदृशतोपरमा परमा भवेत् ॥ ९१

विभागशाद्रति यथा यथा हाराः क्रमशो लम्बमाना नानावर्णमयाश्च तथा तथा कुचयोः शोभेति ज्ञेयम् ॥ ८९ ॥

हारैः कुचशोभामुत्प्रेक्षते अतनुः कन्दर्पः कण्ठस्वरूपस्वर्णनिर्मित शंखाद्विनिःसृतया हार स्वरूप गंगासलिल श्यामलधारया किंस्तन स्वरूपशिवप्रतिमाद्वयम् अभिषिषेच अभिषेके कारणमाह अघसंहतिः अपराधसमूहस्तस्य नाशहेतवे कंदर्पेण पूर्वकृतस्य महादेवस्थाने अपराधस्य नाशार्थमित्यर्थः ॥ ९० ॥

इदानीं पदकधारणमाह सा विशाखा हृदयरूपविष्णुपदे विष्णोः श्रीकृष्णस्य पदे आस्पदे ध्रुवं निश्चितं पदकं न्यधित कथंभूतं मुकुरवद्दर्पणमिव स्वच्छ मतस्तस्मिन् प्रतिबिम्बितस्य हरेः श्रीकृष्णस्य धामधुरा कान्त्यतिशयस्तां ध्रियत इति भुवि पृथिव्यां यस्य पदकस्य महार्घ्यता दुर्लभता परमा भवेत् महार्घ्यता कथंभूता सदृशतायाः सादृश्यस्य उपरामो यस्यां निरुपमेत्यर्थः श्लेषेण ध्रुवं नक्षत्ररूपं किञ्च विष्णुपदे आकाशे यथा ध्रुवो ध्रुवस्य स्थानं तत्र विष्णुस्वरूपमपि यथा अतिशयेन तिष्ठति

जघनमूर्द्धनि तुङ्गिमविद्यया
ततमनह्यत सारसनं रसात् ॥
महकृता महता मदनेन किम्
निजगृहे जगृहे मणितोरणम् ॥ ६२ ॥
त्रिवलि-वीचि-समुच्छलन-च्छवि-
च्छुरित-नाभि-सरोवर-रोधसि ॥
स्मर-मदान्मधुरस्खलितैष्ट किम्
सरस-सारस-सारतरावलिः ॥ ६३ ॥
न्यधित रङ्गरती मणिनूपुरे

---

तथा तत्रापि श्रीकृष्णस्वरूपं तिष्ठतीति अत्रपक्षे महार्घ्यता महापूज्यता "मूल्ये पूजाविधावर्घ्य" इत्यमरः ॥ ९१ ॥

इदानीं क्षुद्रघंटिकाधारणमाह तुंगिमा विद्यायां यस्यास्तया तुंगविद्यया जघनोपरि रसात् रागात् ततं विस्तृतं सारसनं क्षुद्रघंटिकाम् अनह्यत बबंध तत्रोत्प्रेक्षामाह महकृता उत्सवकृता मदनेन किं निजगृहे मणितोरणं वन्दनमाला जगृहे स्वीचक्रे वदर्थोतिफलितार्थः कथंभूतेन महता विभूतिमता महाजनेनैव नित्यंमहोत्सवः क्रियते इतिध्वनिः ॥ ९२ ॥

क्षुद्रघंटिकाध्वनिमुत्प्रेक्षते सरसा ये सारसाः तन्नामपक्षिणस्तेषां सारतरा परमश्रेष्ठा या श्रेणी सा मधुरस्खलितं यत्र तथा भूता सती कंदर्पमदाद्धेतोः किं मैष्ट ऐश्वर्यं चकार कुत इत्यत आह त्रिवलिरेव वीचिस्तरङ्गस्तत्र समुच्छलिता या छविः कान्तिस्तया छुरितं युक्तं यन्नाभिसरोवरं तस्य रोधसि तटे ॥ ९३ ॥

अथ चरणयोस्तदङ्गुलिषु च भूषणधारणमाह रुचिरं हंसकं

रुचिरहंसक-लाङ्घ्रिसरोजयोः ॥
अथ तदङ्गुलिषु प्रवरोर्मिका
ध्वनियुता-नियुतार्घ्यमणीलिताः ॥ ९४ ॥
मधुरिमैव दधाद्विविधाभिधाः
स्वसफलीकृतये पदयोर्ल्लुठन् ॥
रणरणोत्यपरानपि तद्गुणान्
सुकृतिनः कृतिनः किमतुष्टुवत् ॥ ९५ ॥
नख-सिखा-ङ्घ्रितलाद्युरु-शोणिमा
प्यहह यावकरञ्जिततामगात् ॥

पादकटकं लातःधत्तोये अङ्घ्रिसरोजे तत्र रंगदेवी मणिमयनूपुरे न्यधित अर्पितवती तेन पादकटकद्वयं दत्त्वा नूपुरद्वय दत्तवतीत्यर्थः श्लेषेण हंसानां कलो मधुरास्फुटध्वनिरिव ध्वनिर्यत्र तत्र इत्य नेन नूपुरधारणेन पादद्वये हंसध्वनिरिवध्वनिर्भवतीति अथ नूपुरधारणानंतरं चरणांगुलिषु ( पंशुरीति विछिया ) इति च ख्याता प्रवरोर्मिका न्यधित कथभूता ध्वनियुता शब्द कुर्वाणा पुनः किंभूता नियुतसंख्यं धनं अर्घ्यो मूल्यं येषां तैर्मणिभि रीलिताः स्तुताः ॥ ९४ ॥

अधुना चरणभूषणध्वनिमुत्प्रेक्षते त्रिजगद्वर्तिमधुरिमा एव स्वं सफलीकर्तुं पदयोर्लुठन् चरणभूषणमंगुलिभूषणमित्यादि विविधा भिधादधत् सन् रणरण कथय कथय इत्युक्त्वा परानपि सुकृतिनांज नानूतयोः पदयोर्गुणान् अतुष्टुयत् स्तावयामास जनान् किंभूतान् कृतिनः परमविवेकिनः ॥ ९५ ॥

इदानीं चरणयोर्यावकेन रंजनमाह उरुः शोणिमा यत्र तथा भूतमपि नखाग्रपदतलादि अहह आश्चर्यं यावकरंजितता ययौ

भवति किं दरदीपजरोचिषा
दिनकृतो न कृतो मनुजैर्महः ॥ ९६ ॥
स्वदयितं नलिनं पदतां नयन्
यदरुणोऽप्यभजत्तदलक्तताम् ॥
परमहंसकयोरवधूतयो
स्तदभवन्नटनं नटनन्दितम् ॥ ९७ ॥
अहमयोग्य इति त्वयि मा शुच

---

ननु महाविदग्धाभिः सखीभिः कथमेवं कृतं तत्राह किंचिन्मात्र दीपशिखाकान्त्या दिनकृतः सूर्यस्य महः पूजा किंमनुष्यैर्न कृतः॥९६॥

पुनश्चरणारुण्यमेव वर्णयन्नाह यद् यस्मादरुणः सूर्यः स्वदयितं प्रियं कमलं राधायाः पदतां नयनपदं कुर्वन् सन् स्वयं तयोः पदयो रलक्तताम् अभजत् अलक्तमिवाभूदित्यर्थः "मिहिरारुण पूषण" इत्यमरः तत्तस्मात् परमहंसद्वयस्य नटनं नृत्यमभवत् तेन यस्य सूर्यस्य मण्डलं भित्वा आवां ब्रह्मसायुज्यं प्राप् स्यावस्तेन विश्वचूडामणिना स्वप्रियसाहित्येनैवास्मदाश्रितचरण कमलयोः सायुज्यं प्राप्तम् अतो मोक्षसुखादप्यधिकमेतच्चरणा श्रयणं भविष्यतीति नेदं मोक्षस्य साधनरूपं किंतु परमपुरुषार्थ रूप मेवेति मनसि कृत्वा नृत्यं कृतमिति भावः नटनं कीदृशं नटैरपि अभिनन्दनविषयीकृतं परमहंसयोः ज्ञानिनोः किंभूतयोः अवधूतयोः ज्ञानिन एव अवधूता भवंतीति श्लेषेण हंसकयोः पादकटकयोः कथंभूतयोः अवधूतयोः कंपितयोः ॥ ९७ ॥

पुनर्यावकस्य सौभाग्यं वर्णयति अयि यावक ! अहं चरणयोः सौंदर्योत्पादने अयोग्य इति मनसि कृत्वा मा शुचः कथं निषेधसीति चेदाह तव सौभगं सौभाग्यम् अधिकं भविता कथ

स्त्वमनुराग्यसि यावक ! सौभगम् ॥
हरिललाटतलालकरञ्जनात्
शुभवतो भवतो भविता ऽधिकम् ॥ ९८ ॥

इति सखीवचसा परुषेव ताम्
विधुरधीरपि सा कुटिलेक्षणा ॥
भृशमतर्जदभूत्प्रबलोजसो-
त्कलिकयाऽलिकथा यदुपासिता ॥ ९९ ॥

निजगुणां परमूर्द्धनि यत्क्षिय
न्त्युपहसस्ययि ! तत्त्वयि युज्यते ॥
त्वमपि किं प्रमदे ! न हसिष्यसे
यदि जनुःसमया स मयाप्यत ॥ १०० ॥

---

मितिचेदाह श्रीकृष्णस्य ललाटतटं त्वम् अरुणां करिष्यसीति हेतोः अतएव भवतः किंभूतस्य शुभवतःमंगलयुक्तस्य ॥ ९८ ॥

इत्यनेन प्रकारेण सखी वचसा श्रीराधा विधुरधीः स्थायिभावोद्गमेन व्याकुलबुद्धिरपि परुषा किंचित्कर्कशवचना इव तांसखीं भृशमतर्जत् तर्जनंकृतवती कथं तर्जितवती तत्राह यद्यस्मात् प्रबलौजसा अतिशय बलवत्या उत्कलिकया आलिकया उत्कण्ठया सख्या उपासिता सेविता तेन बलवत्याः सेवापि बलवती भवति तत एव तया सेवया वशी भूता सा अन्यस्याः सख्याः रसकथामपि कथं सहतामिति ध्वनिः ॥ ९९ ॥

श्रीराधिकाह अयि सखि ? ललिते स्वचरणयावकेन श्री श्रीकृष्णस्यालकरंजनस्वरूपं स्वगुणां परमूर्द्धनिनिक्षिपंती सति यत् त्वम् उपहससि तत् उपहसनं त्वयि युज्यते हेप्रमदे ? जनुः समया

यमनुलेपमदाद्रसमञ्जरी
मलयजेन्दुमदादिजमादरात् ॥
स तनुसाहजिकातुलसौरभा
वनिभृतो निभृतोऽजनिकिङ्करः ॥ १०१ ॥

प्रवरमुक्तमुरोऽन्वतिमुक्तक-
स्रजमदादथ केलिसरोरुहम् ॥
करसरोरुहि यत्तुलसी रसा-
दुरुभयोरुभयोस्तदभूद्द्विता ॥ १०२ ॥

---

एतज्जन्ममध्ये मया यदि सगुणः प्राप्यते तदात्वमपि मया किं न हसिष्यसे युज्यते इति यतस्त्वं प्रमदा प्रकृष्टोमदस्तव वर्तते तत एव त्वम् उपहससि ननु उपहास्यामहो यदि कार्यसिन यतः जन्म मध्ये सदृशोऽपि न इति ध्वनिः यदि भाग्यतः सकदाचित्दृश्यते तदात्वया सह संभोगं कारयित्वा त्वामप्येवम् उपहासिष्यामीत्यनुध्वनिः॥१००॥

ततश्चन्दनाद्यनुलेपनमाह रसमंजरी यं चन्दनकर्पूरमृगमदादिज-न्यम् आलेपमदात्स आलेपः राधिकाया देहस्य साहजिकं यत् सौगन्ध्यं तदेव अवनिभृत् राजा तस्य किं करो दासः अजनि अभूत स किंभूतः नतरां भृतः अङ्गसौरभेण स्वीकृत्य धृतः नतु स्वयं तत्र स्थातुं योग्य इत्यर्थः ॥ १०१ ॥

माल्यादिधारणमाह प्रवरामुक्ता यत्रएवंभूते उरो ऽनुउरसि तथाविलक्षणामुक्ता युक्त वक्षः स्थले रसात् आनन्दात्तुलसी अतिमुक्तकस्रजं माधवीपुष्पमाल्यम् अदात् करसरोरुहि करकमले केलिसरोरुहं लीलाकमलम् अदात् तत्ततो हेतोः उभयोः प्रवरमुक्तावक्षः करसरोरुहोर्द्विताअभूत् द्वित्वंवभूवतयोः कथंभूतयोः उरुर्महती भा-कांतिर्ययोः द्वितेतिप्रवरमुक्तकवक्षःस्थलस्य मुक्तमुक्तेति शब्दमा-

विनिहितो लघु रङ्गणमालया
मणिमयोमुकुरः सुदृशो ऽग्रतः ॥
तनुमहोलिडिवागमयद्विताम्
द्युतिधुरा भरणाभरणावलीम् ॥ १०३ ॥
स्वमधुराङ्गतति द्युतिवीक्षणोन्नत-
चमत्कृतिचुम्बितधीर्हृदा ॥
अभिदधे वृषभानुसुता निज-
प्रियतमायत-मानसवीचिवित् ॥ १०४ ॥

त्रेणाकरकमलस्येतिकमलकमलशब्देन एवं करकमलली्लाकमलेति अर्थेन च बोध्यम् ॥ १०२ ॥

ततश्च दर्पणं दृष्टवतीत्याह रंगणमालया मणिमयो दर्पणः सुदृशो राधाया अग्रे लघु द्रुतमेव विनिहितः सदर्पणः तनुमहो लिडिव देहकान्ति लेढि आस्वादयतीति तथाभूत इव द्युतिधुरां कांत्यातिशयं विभर्ति या तास आभरणश्रेणीं द्विताम् अगमयत्स्वरूप द्वयं चकारेत्यर्थः यद्वा अहो आश्चर्य्ये तनु लिडिव लिट्लकारो यथा अभ्यासस्योभयेषामिति सूत्रेण वर्णावलीं द्विस्वरूपां करोति तथा साभरणीतनुं द्विस्वरूपां चकारेत्यर्थः ॥ १०३ ॥

दर्पणदर्शनेन श्रीराधाया अपि चमत्कारो जात इत्याह वृषभानुसुता राधा स्वकीयाया मधुरांगश्रेणी तस्या द्युतीनां वीक्षणेनउन्नता या चमत्कृतिश्चमत्कारःतया चुंविताबुद्धिर्यस्या एवंभूता सती हृदा मनसा अभिदधे स्वगतमेव कथितवतीत्यर्थः कथंभूता निजप्रियस्य श्रीकृष्णस्य आयता दीर्घा या मानसवीचिर्मनस्तरंग स्तां वेत्ति जानातितथाचनिजरूपदर्शनेन चमत्कारं प्राप्यतस्यकृष्णा स्यमनस्तरंगस्पृष्ट्वा किमपि कथितवतीत्यर्थः ॥ १०४ ॥

अननुभूतचरः कुत आगतो
मधुरिमोदधिरेष वपुष्यभूत् ॥
कथमिमं स धयन्मधुसूदनो
रसमहो समहो धृतिमाश्रयेत् ॥ १०५ ॥

रुचिकणीममृजां मम यः कदा
प्यनुभवन् प्रविशेत्प्रमदाम्बुधौ ॥
प्रियतमः स इमां सुषमां यदा
नुभविता भविता किमु स क्षणः ॥ १०६ ॥

किमधुना तदनीक्षणदुर्भगो
ऽप्युदयते छविराशिरसौ बहिः ॥

---

राधा स्वगतमेवाह अननुभूतचरः पूर्वं कदापि यो मया नानुभूतः समधुरिमोदधिः मम वपुषि कुतः आगतोऽभूत् इमं मधुरिम समुद्ररूपं रसं धयन् पिबन्स मधुसूदनः पक्षे भ्रमरः कथं धृतिम् आश्रयेत्स किंभूतः समहः मह उत्सवस्तेन सह वर्तमानः ॥ १०५ ॥

पुनः सैवाह अमृजां मम रुचिकणीम् अमार्जितां किंचिन्मात्र कांतिम् अनुभवन् यः प्रमदाम्बुधौ आनन्दसमुद्रे प्रविशेत्स प्रियतमः इमां सुषमां यदा अनुभविता तादृशः क्षणः किं मम भविता इति दैन्यम् ॥ १०६ ॥

पुनः सैवाह असौ छविराशिः कान्तिसमूहः तस्य श्रीकृष्णस्यानीक्षणेन दुर्भगोऽपि बहिः कथम् उदयते त्वं कथं शोकं करोऽपीति चेदाह योऽर्थवरो विलक्षणः पदार्थो व्यर्थो भवति तम्

भवति यो विफलोऽर्थवशोऽपि कोऽ
धिमहि तं महितं नहि शोचति ॥ १०७ ॥
इति धृतिच्युतिनीवृति साऽऽसितो
रु सहसा सहसा सहसास्यया ॥
प्रियदिदृक्षुतयाऽऽलिकया श्रित
प्रसभया सभया सभयाप्यभूत् ॥ १०८ ॥
अत्रान्तरे व्रजपुराधिपयाऽनपाय
वात्सल्य-कल्पलतयाऽतिरयान्निदिष्टा ॥

---

अर्थवरम् अधिमहि मह्यां को जनो नहि शोचति तं किंभूतं महितं पूजितम् ॥ १०७ ॥

तादृशं कथयंती श्रीराधा आकुलैवाभूदित्याह इति एवं कथयंती सा राधा प्रियदिदृक्षुतया आलिकया श्रीकृष्णदर्शनेच्छारूपया सख्या कर्त्र्या सा राधा धृतिच्युतिरेव नीवृज्जनपदस्तस्मिन् अर्थात् अधैर्यरूपराज्ये आसिता उपवेशिता अथवा सिता बन्धनं प्राप्ता अभूदित्यर्थः सहसा अतर्कितं यथा स्यात्तथा "अतर्किते तु सहसे"त्यमरः तया कथंभूतया उरु महदेव सहो बलं यस्यास्तया पुनः कथंभूतया हसेन सह वर्त्तमानं सहसम् आस्यं मुखं यस्यास्तया प्रफुल्लितयेत्यर्थः पुनश्च श्रितः प्रसभो हठः यया हठेनैवउपवेशितेति योजनीयं तेनाहं कृतवती ततोधैर्य्यमेव करवाणि इत्यादि यन्मनसि करोऽषि तदभिमानमहमनायासे नैव त्याजयामीति हर्षवत्या इतिध्वनिः अतएव सभया भा दीप्तिस्तया सह वर्त्तमानया राधा कथंभूता भयसहितापि ॥ १०८ ॥

अत्रांतरे अत्रावसरे व्रजपुराधिपया यशोदया अतिरयात् अतिवेगात् स्वपुरमानेतुं निदिष्टा कुंदवल्ली एतस्या राधाया अक्षिरूप

आगत्य कुन्दलतिकान्तिकमेतदक्षि
भृङ्गप्रमोदकृतये कृतिनी व्यराजीत् ॥१०९॥
अन्योऽन्यदर्शन समुद्गमनास्मिताढ्य-
शस्तानुयोग-रभसोन्नति-शीधुवृष्टिः ॥
सद्यो बभूव यत एव तदा तदालि
वृन्दं ननन्द समसौहृद-हृद्यरोचिः ॥११०॥

इतिश्रीकृष्णाभावनामृते महाकाव्ये अलंकार
शोभास्वादनो नाम
चतुर्थः सर्गः

---

भ्रमरस्य प्रमोदकृतये आनन्दनिमित्तं तस्या अन्तिकं निकटमेव व्यराजीत् ॥ १०९ ॥

कुन्दवल्ल्या मागतायां परस्परदर्शने सति किमभूदित्यपेक्षाया माह तदा तस्मिन् समये अन्यो न्यंऽयद्दर्शनं तेन यत्समुद्गमनम् अभ्युत्थानं च स्मिताढ्यशस्तानुयोगः स्मितयुक्तकुशलप्रश्नश्च ताभ्यां या रभसोन्नतिः सुखोत्कर्षः सैव शीधुरसवृष्टिः अमृतवर्षः सद्यो बभूव यतः शीधुवृष्टित एव तस्या आलिवृंदं किं भूतं समानि सौहृदानि हृद्यानि रोचींषि कांतयश्च यस्य तत् हृद्यानि सर्वेषां हृदयसुखकराणि ॥ ११० ॥

समाप्तश्चायं चतुर्थः सर्गः ॥ ४ ॥

—:*:—

## पंचमः सर्गः ।

—::*::—

व्रजपुरपरमेश्वरी प्रसादम्
मयि सखि ! वक्ति तवोदयो ह्यकस्मात् ॥
न शिशिररुचिना विनैव पूर्वाम्
दिशमधिरात्रि समेति कापि लक्ष्मीः ॥ १ ॥

तदहमनुमिमे निदेशदम्भात्
किमपि कृपामृतमेव सा व्यतारीत् ॥
यदिदमनुपलभ्य यन्ममात्मा
स्वमपि सखेदमवैत्यनात्मनीनम् ॥ २ ॥

---

अस्मिन् सर्गे पुष्पिताग्रा छन्दो ज्ञेयम् अभ्युत्थानमिलनोपवेशानंतरं श्रीकुन्दवल्ली राधिकामाह हे सखि ? कुन्दवल्लि ? अकस्मात्तवोदयः मयि व्रजपुरपरमेश्वरी प्रसादं वक्ति कथमिति चेत्ताह अधिरात्रि रात्रिमध्ये शिशिररुचिना चन्द्रेण विना कापि लक्ष्मीः शोभा पूर्वांदिशं न समेति न प्राप्नोति तथाच रात्रिसम्बन्धिन्या पूर्वदिग्वर्तिशोभया यथा चन्द्रानुमानं तथैवेति भावः ॥ १ ॥

पुनः श्रीराधा आह तत्तस्मादहमनुमिमे श्रीयशोदा निदेशदंभात् आज्ञाच्छलेन किमपि कृपामृतं व्यतारीत् मह्यं दत्तवतीत्यर्थः यत् यस्मात् यत्कृपामृतम् अनुपलभ्य ममात्मा स्वम् आत्मानमपि

अजनि रसवती विधापनार्था
रसवति ! ते गतिरित्यवैमि नूनम् ॥
अथ किमितरथा जवादयासीः
प्रथममितो नुनयन्त्यमूं मदार्य्याम् ॥ ३ ॥

इति सुहृगुदितामृतं पिबन्ती
स्मितसुभगं निजगाद कुन्दवल्ली ॥
तदयि सखि ! विधेहि तत्र यात्रा
मकृतविलम्बमितः सहालिवृन्दा ॥ ४ ॥

---

अनात्मनीनं न आत्मने हितम् अवैति आत्मानमपि आत्मन एवाहितकरं जानातीत्यर्थः किं भूतं सखेदं खेदो दुःखं तेन सह वर्त्तमानं तेन तथा खेदे जाते यत एतद्देहे स्वस्य अनवस्थानमेव हितमिति विचारितवाना स्मेति ध्वनिः ॥ २ ॥

हे रसवति ? कुंदवल्लि ? तव गतिर्गमनं रसवती विधापनार्था अजनि इति अवैमि पाकक्रियाकरणार्थैव तवात्रागमनमभूदिति जानामि इतरथा प्रथमं मदार्य्यां मम श्वश्रूम् अनुनयती अनुनेतुं किं कथं इतः सकाशात् तत्र अयासीर्गता जवाद्वेगात् यदि कार्य्यांतरार्थं मम निकटमागमिष्यस्त्वं तदा वृद्धानिकटं गमनं विनैवात्रागता अभविष्यस्तस्मान्मन्नयनार्थमागतासीति ध्वनिः ॥ ३ ॥

कुंदवल्ली इत्यनेन प्रकारेण सुहृद् श्रीराधा तस्या उदित मेवामृतं तत् पिबंती सती स्मितसुभगं यथास्यात्तथा निजगाद अयि सखि राधे ? तत्तस्मात् इतः स्थानात् अकृतविलम्बं यथा स्यात्तथा आलिवृन्द सहिता सती त्वं तत्र यात्रां विधेहि कुरु ॥ ४ ॥

किमिह गुरुजनावलेरनुज्ञा
ग्रहणा-विधावणुमात्रमस्ति कष्टम् ॥
यदतुल-धन-धेनु-धान्य-वर्षै
रकृत वशां स्वयमेव तां व्रजेशा ॥ ५ ॥
निरुपधि परमप्रियोऽसुकोटे
रपि निखिलस्य जनस्य गोष्ठभाजः ॥
व्रजपतितनयः समीहते यत्
परमिह विप्रतिपत्तिरस्ति कस्य ॥ ६ ॥
सखि ! किमपि न वेद तत्सवित्री
तदतुलरोचकवस्तुसंजिघृक्षुः ॥

---

गुरुजनभयं करोऽषि चेववधीयतामिति पुनः कुन्दवल्ली आह इह गुरुजनश्रेणीनाम् अनुज्ञाविधौ अणुमात्रमपि अत्यल्पमपि किं कष्टमस्ति अपितु नैवेत्यर्थः यत् यस्मादतुलधनादि वर्षैः तां गुरुजनावलीं व्रजेशावशाम् अकृत वशीभूतां चकार ॥ ५ ॥

विशेषतः श्रीकृष्णविषये सर्वएव व्रजवासिजनो स्निग्ध एव किं पुनस्तव गुरुजन इत्याह व्रजपति तनयः श्रीकृष्णः यत् समीहते यद्वस्तु वांछति तत्र विषये कस्य विप्रपत्तिर्व्वचसापि निषेध कारणम् अस्ति न कस्यापीत्यर्थः कृष्णः कथं भूतः निखिलस्य गोष्ठभाजो व्रजवासिजनस्य असुकोटेः प्राणानां कोटितोऽपि निरुपधिपरमप्रियः उपाधिं विना स्वभावतएवातिप्रियः ॥ ६ ॥

पुनः कुंदवल्ल्येवाह हेसखि ? राधे तस्मै श्रीकृष्णाय अतुलं रोचकं यद्वस्तु तस्य ग्रहणेच्छुः तत्सवित्री तस्य कृष्णस्य माता

उचितमनुचितं स्वलाभहानी
निजपर-भाव-भिदा यशोऽयशो वा ॥ ७ ॥
पचसि यदपि यश्च तस्य भोक्ता
सच तिरयत्यमृतं सदैव दिव्यम् ॥
इति निखिलपुरेष्वति प्रसिद्धि
स्तव खखि ! कं न चमत्करोति वाढम् ॥८॥
यदवधि कलयांबभूव सा त्वाम्
मुनिवरदत्तवरां वराम्बुजाक्षि ! ॥
तदवधि तव पाणिसंस्कृतान्ना
शनविरतिं क्वचनान्हि नास्य चक्रे ॥ ९ ॥

---

किमपि न वेद न जानाति किं न जानातीत्यपेक्षायामाह उचित मित्यादि तेन अनुचितमपि कृत्वा श्रीकृष्णाय रोचकं वस्तु गृह्णातीत्यर्थः तेन निषिद्धाचरणमपि कृत्वा तव गमनं तत्र कारयिष्यत्येवेति ध्वनिः निजपरयोर्भावभिदा अभिप्राय भेदः ॥ ७ ॥

यदपि यत् किमपि त्वं पचसि तत् दिव्यं स्वर्गसंभूतममृत मपि तिरयति तुच्छीकरोति एवं यश्च तस्य त्वत्कृतपक्ववस्तुनो भोक्ता सोऽपि अमृतं तिरयति इति निखिलनगरेष्वति प्रसिद्धिः कं जनं वाढमतिशयेन न चमत्करोति तच्छ्रवणेन कस्य चमत्कारो न सम्भवतीत्यर्थः ॥ ८ ॥

हे श्रेष्ठांबुजाक्षि ? यदवधि मुनिवरदत्तवरां मुनिवरोदुर्व्वासा तेन दत्तो वरो यस्यै तथा भूतां त्वां सा यशोदा कलयांबभूव श्रुतवती तदवधि तव पाणिपक्वान्नभोजनस्य विरतिं श्रीकृष्णस्य क्वचन कस्मिन्नपि दिने न कृतवती ॥ ९ ॥

जयति यदतिघोरदैत्ययूथम्
मृदुलतनुः स्वपराबुभूषुमेषः ॥
त्वदमल-करपक्व-भक्तभुक्ते
रपरमियं मनुते न हेतुमत्र ॥ १० ॥

शृणु परमयि ! तत्त्वमत्र राधे !
यदवगतं सहसान्तरं मयास्याः ॥
प्रतिदिनमवलोकनं विना ते
शशिमुखि ! खिद्यति सा यथा स्वसूनोः ॥ ११ ॥

सुतनुरभिदधेऽवधेहि विज्ञे !
सखि ! तदिदं न वदस्ययुक्तमित्थम् ॥
अपितु कुलवतीति वादभाजाम्
स्फुटमपराङ्गणगामिते त्ययुक्ततम् ॥ १२ ॥

---

कोमलतनुरेषः श्रीकृष्णः यत् अतिघोरं दैत्यं जयति तत्र इयं यशोदा त्वत्करपक्वान्नभोजनात् भिन्नं कारणं न मन्यते दैत्ययूथं किंभूतं स्वं कृष्णं पराभवितुमिच्छुं भक्तम् अन्नं तस्य भुक्ति र्भोजनम् ॥ १० ॥

हेराधे ? परमपि तत्त्वं श्रुतिनिगूढार्थं कथयामि शृणु अस्या यशोदाया आन्तरम् आन्तरीणं यत्तत्त्वं मया सहसा अवगतं तदेव किमित्यपेक्षायामाह हेचन्द्रमुखि ? ते तवेत्यादि ॥ ११ ॥

कुन्दवल्ल्युक्तं श्रुत्वांतर्मुदितापि वहिरमन्यमानेव राधा आह श्रीराधा अभिदधे किंतदित्यपेक्षायामाह हेसखि ? कुन्दवल्लि हे विज्ञ ? इत्थम् अनेन प्रकारेण यदिदं तत् अयुक्तं न अपितु कुल

सच कुलललनास्वलम्पटत्वं
क्षणमपि नैव दधाति देवर स्ते ॥
इति नहि नहि तत्र मे यियासे-
त्यथ सुदृशं पुनराह कुंदवल्ली ॥ १३ ॥
सतु मम सखि ! देवरोवरोरु !
स्फुरति रुचेव तथा यथाभ्यधास्त्वं- ॥
त्वयि तु चिरमलंपटीभविष्य
त्ययि ! मयि विश्वसिहि प्रकाममेहि ॥१४॥
समुचितमिदमेव कृष्णसन्नां
तिकमपि वेत्स्यपरांगनं यदेतत् ॥

---

वतीति-वादभाजां इयं कुलवती इयं साध्वी इति ख्यातिमतीनां अपरस्यांगनगामिता इत्ययुक्तं ॥ १२ ॥

अलंपटत्वं नैव दधाति प्रतिक्षणं कुलांगनासु लंपटतां करोति इत्यर्थः नहिनहीति द्वौ नञौ प्रकृतार्थं गमयतः इत्युक्ते सति पुनः कुंद वल्ली सुदृशं राधां आह ॥ १३ ॥

हे वरोरू ! सखि ! राधे ! सतु मम देवरः यथा त्वं अभ्यधाः कथितवती तथा कान्त्या एव लंपटत्वं स्फुरति नतु कार्य्येण, त्वयि पुनः सतु अलंपटीभविष्यति लम्पटतां न करिष्यति अयि ! राधे ! मयि विश्वसिहि अतः प्रकामं यथेष्टं त्वं एहि आगच्छ श्लेषे न रुचा त्वाद्विषियक-रोचकतया आशक्तेऽति यावत् । अलंअतिशयेन पटीभविष्यति त्वयि वस्त्रवत्लग्नोभविष्यतीत्यर्थः ॥ १४ ॥

अयि ! राधे ! यत एतत् कृष्णस्य सन्नांतिकं गृहनिकटमपि अपरस्यांगनं वेत्सि जानासि इदमेव समुचितं अयं कृष्णोपि

अयमपि पुरु वेपते वलोक्य

य्ययि ! भवतीमपरांगणांविजानन् ॥ १५ ॥

अथपुनरपिसाहसाहसा त्वं

विरम न यामि हठं न याहि विज्ञे ? ॥

कुलवरतनु-धर्म-संजिहासा-

ध्वनिकिमुदत्तपदा मदाद्भवेयं ॥ १६ ॥

ननु सखि ! तदर्थ मर्थनंद्रा

गभिनषितं तव सेतूस्यति प्रकामं !

भवतीमवलोक्य अपरांगनां जानन् पुरु वेपते बहुश कम्पते श्लेषेण न परांगनं किंतु स्वीयांगनमेव वेत्सि एवं कृष्णोपि त्वां न परस्यांगना किंतु स्वीयांगनामेव जानाति तवदर्शनादेव तस्य कम्पप्रस्वेदादयो भवन्तीति त्वय्येव माशक्तिरिति ध्वनिः ॥ १५ ॥

कुंदवल्लीवचनचातुरी मवगत्य सा राधा पुनरपि आह हे विज्ञे ! त्वं साहसाद्विरम एवं साहसं मा कुरु, अहं न यामि पुनः स्त्वं हठं माकुरु कथमेवं भदसि चेत्तत्राह कुलवरतनुधर्मसंजिहासाध्वनि किं मदाद्गर्वादहं दत्तपादा भवेयं कुलांगनाया यो धर्म्यस्तस्य सम्यक्त्यागेच्छा पथे दत्तपदा यथा अहं न भवामीत्यर्थः श्लेषेण सा प्रसिद्धा त्वं हसात् हास्याद्विरम कोपिश्रुत्वा किमपि अनुमास्यति अहंतु नयामीति त्वया सार्द्धं न गच्छाम्येव त्वंतु मद्गमनार्थं हठंकुरु हेविज्ञे ! मद्वचनविशेषार्थं जाना स्येवेति ध्वनिः यद्वाहं न हठं नयामि प्राप्नोमि नीजपाप्रणे हेविज्ञे ! याहि उहां गतावित्यस्य रूपेण । श्लेषात् कुलवती धर्मसंगेच्छापथे किंदत्तपदा अहं स्यां नैवेत्यर्थः सगर्वोमयिनास्त्येवेति ध्वनिः ॥ १६ ॥

विदिताकुता कुंदवल्लीआह हेसखि ! तदर्थ कुलधर्मरक्षार्थं प्रार्थनां

व्रज कुरु न विलंबमत्र यत्ते ?
मुनिवर एव वभूव सोऽनुकूलः ॥ १७ ॥
इति विहसितभाजि तत्र तस्या
मवदत सा सहसोपसृत्य वृद्धा ॥
त्वमसि मम सदा प्रतीत-पात्री
त्वयि ! सति ! कुंदलते पिंता त्वयीयं ॥१८॥
अनुचितमिदमेव यत् सतीनां
पदमपि भर्तृगृहात् क्वचापि यानं ॥
किमुतपुनरतीवलंपटत्व-
प्रथनवतो वकविद्विषः समीपे ॥ १९ ॥

---

नतनु, किंतु तादृशधर्मरक्षणे तवाभिलषितं सेत्स्यति यातोमुनिवरो दुर्वासाः सएवानुकूलः तस्मात्तस्य कृपया तवामंगलं न भावीति वोध्यं, पक्षे तवाभिलषितं द्राक् शीघ्रं प्रकामं यथा स्यात्तथा सेत्स्यति सिद्धं भविष्यति तदर्थं कुलधर्मध्वंसे अभिलाषसिद्ध्यर्थं अर्थनं प्रार्थनं न तनु-न विस्तारय तस्माद्व्रज-चल अत्र विलंवं न कुरु तव तत्र गमनेनैव मनोरथः सेत्स्यत्तीति त्वं कथयसि तत्र को हेतुरिति चेदाह मुनि दुर्वासा तस्य वरएवानुकूलः श्लेषेण मुनिश्रेष्ठेनैव छलेन तवद्यूत्यं कृतमिति ध्वनिः ॥ १७ ॥

तत्र समये इति अनेन प्रकारेण तस्यां कुंदवल्यां विहसितभाजि विशिष्टहास्यं कृतवत्यां सत्यां वृद्धा जटिला उपसृत्य अवदत् इयंराधा ॥ १८ ॥

जटिला पुनराह पदं व्यापान्यत्र यानं गमनं अत्यन्तलम्पटत्वेन प्रथा-ख्याति र्यस्य तस्य कृष्णस्य समीपे अत्यनुचितमित्यर्थः ॥१९॥

तदपि यदिहगंतुमेव राधे !
निपुनधियापि मया निदिस्यसे त्वं ॥
तदपि निखिलावेदिपौर्णमासी-
वचनातते रविलंध्यतैव हेतुः ॥ २० ॥
व्रजपतिगृहनी-गिरं च्चिराभ्य-
र्थन-विनयानुनयानुवद्धमूलां ॥
कति निरसितुमत्र शक्नुमस्त-
त्तवभगवान् हरिरेव रक्षितास्तु ॥ २१ ॥
अवति जगदिदं स्वधर्मपाली
किमिह सतीः स जहाति लोकनाथः ॥
इति किल भवतीं तदीयपाणौ
सुमुखि ! समर्प्य निराकुला भवेयं ॥ २२ ॥

---

जटिलावधूं प्रत्याह तदपि तथापि निपुनधिया मया यद्ध-स्मात् त्वं निदिस्यते तत्तस्मादयि ! राधे ! निखिलवेदिपौर्ण-मास्याः ॥ २० ॥

व्रजपतिगृहनी गिरं कतिवारमन्यथा कर्तुं शक्नुमः गिरं किंभूतां चिरकालं व्याप्य यत् अभ्यर्थनं याञ्चा एवं विनयस्त थैवानुनय स्तै दृढीभूतं मूलं यस्यास्तां तत्तस्माद्धरि नारायणास्त्वां रक्षिष्यतीति प्रार्थयामासेति ॥ २१ ॥

स लोकनाथः परमेश्वरः इदं जगत् अवति रक्षति अतएव स्वधर्मान् पालयन्तीति स्वधर्मपालीः सतीः स किं जहाति

इति-गुरु-जरती-गिरा समुद्यत्
स्मित-लव-संवृति-पेशलाः सखी स्वाः ॥
विकसदसित नेत्रकोण-भंग्या
किमपि निगद्य वभूव सापि तुष्णीं ॥२३॥
अनभिमति मतीव तत् पुरः सा
मुहु रभिनीतवती तया नुनीता ॥
हृदि विधि मनुकूलमानमन्ती
चलितवती ललितादिभिः सखीभिः ॥ २४

पा त्यजति नैवेत्यर्थः इति हेतोः हेसुमुखि ! तस्य परमेश्वरस्य पाणौ भवंतीं त्वां समर्प्य अव्यकुला भवेयं ॥ २२ ॥

जटिलाया वचनस्यार्थांतर मवगत्य सख्यः सस्मिता इत्याह गुरुजरती-जटिला तस्या-गिरा-वाक्येन सम्यक् उद्गच्छन्त्यः स्मित लव इषद्धास्यालपमात्रांश स्तस्य सम्वरणे पेशला चतुराः स्वाःस्वीयाः सखीः सा राधा विकसदसित नेत्रभंग्या किमपि निगद्य तुष्णींव भूव, विकसत् प्रफुल्ल-असित श्यामश्च योनयणकोणस्तस्य भंग्या कटाक्षमात्रेण हेसख्यः ! युस्माकं मनोरथः पूर्णं इति कांचित् कथयित्येत्यर्थः हरिरित्यादिना नारायणाभिप्रायेण तया उक्तं श्रीकृष्णाभिप्रायेण सख्यो हसितवत्य इति ज्ञेयं ॥ २३ ॥

तस्या जटिलायाः पुरोऽग्रे अत्यन्तानाभिमातिं स्वस्य गमने असन्मतिं मुहुरभिनीतवती राधा पश्चात्तया रजत्या अनुनीता विनयवत्या कथिता सती सखीभिः सह चलितवती कथंभूताः अनुकूलविधिं हृदि आनमन्ती अनुकूलं मत्वा नमस्कुर्वती ॥ २४ ॥

अथ निजभवनाद्विनिर्यती सा
तनु-वसनाभरणा-च्छवि-च्छटाभिः ॥
व्यधित मणि-विचित्र-शातकौंभीं
पुर-विशिखां सुरभीकृताखिलाशा ॥ २५ ॥
जन-निवह-गतागति-प्रवृत्तौ
दरविमुखी सरणेः श्रितेकपार्श्वा ॥
अवनतदृगवाचकास्यपद्मो
परिपरिगुंठनमाधुरी प्रपदे ॥ २६ ॥
क्वचनच पथि निर्जने कदाचित्
स्फुटमितरेतर-वाग्विलास रंगैः ॥

गृहान्निर्गमनकाले श्रीराधायाः शोभामाह ' निजभवनाद्विनिर्गच्छन्ती सा राधा वसनाभरणछविभिः करणैः पुरस्य विशिख गलीति प्रसिद्धां मणिविचित्रशातकौंभीं मणिघटितसुवर्णमयीं व्यधित चकार वसनाभरणानां नानाविधकांत्या नानामणि प्रतीति देहकांत्या स्वर्णप्रतीति रिति बोध्यं कथंभूता । सुरभीकृता अखिलाशा सर्वदिक् यया सा ॥ २५ ॥

गमनकाले चलनक्रममाह जनसमुहस्य गतागतिप्रवृत्तौ सत्या अर्थात् जनसमुहस्य यदिगमनागमने भवतस्तदा ईषद्विमुखी एवं सरणेः मार्गस्य श्रित एकपार्श्वो यया एवं भूता राधा अवनता-नम्रीकृताहक् यतस्तादृशी एव न वाचकं कृतमौनंचयदास्य पद्मं तस्य उपरि घूंअट इति ख्यातस्य अवगुण्ठनस्य माधुरी प्रपेदे चकारेत्यर्थः ॥ २६ ॥

इतरेतर वाग्विलाशरंगैः करणैर्यदि चलति तक्षा कुतः स्थानात्

यदिचलति तदा कुतः क यामी
त्यपि नहिवेदनगोचरीकरोति ॥ २७ ॥

सखि ! निजपुरतो विदूरमागा
व्रजपतिसद्म समीपवर्त्ति वृत्तं ।
तदयि ! नयनचातकाभिलाषः
फलति तवाश्विति संप्रति प्रतीहि ॥ २८ ॥

इति निगदितमात्रतः स्वसख्या
सपदि सवेपथुजाड्यविप्लुतांगीं ।
प्रसभवभिदधारचेतयंती
किमपि जगाद च तां तदैव कौंदी ॥ २९ ॥

युग्मकम् ।

सुमुखि ! किमधुनैव विक्लवाभू
र्नयन-पथा-मिलितेपि कृष्णचंद्रे ॥

---

कुत्रयामीत्यपि नहि वेदनगोचरी करोति न जानातीत्यर्थः ॥ २७ ॥

पथि सखीनां कौतुकोक्तिमाह व्रजपतिगृहं समीपवर्ति जानं मयि ! सखि ! राधे ! तत्तस्मात्तव नयन-रूप-चातकस्य कोपि अभिलाष आशु फलति इति सम्प्रति त्वं प्रतीहि ॥ २८ ॥

सखी-वाक्येन श्रीकृष्णस्य स्फुर्तं हेतो राधायाः सात्विक भावमाह तादृशदशापन्नां राधिकां चेतयन्ती कुंदवल्ली दधार एवं तदैव किमपि जगाद ॥ २९ ॥

हेसखि ! राधे ! नयन-पथस्य अमिलिते कृष्णचन्द्रे सति किम-धुनैव विक्लवा अभूः तस्मात्तवाखिलं सतीत्वं मया अवगामं

अवगममखिलं सतीत्वमाप्तं
तव सवयः सद एव यत् प्रमाणं ॥ ३० ॥
धृतिमिह हृदि धर्तुमीशिषे नो
यदपि तदप्यवले ! क्षणं दधीथाः ।
गिरि युगभरधारणाय यत्त
गिरिधर एव मयाद्य योजनीयः ॥ ३१ ॥
गिरि धरदिश एव शंकया या
जनि विधुराद्य सखी महासतीयं ।
परिवदसि बलादिमा मविज्ञे !
तदपि निजाक्षियसि हा पुनस्तमस्यां ॥३२ ।

प्राप्तं मया ज्ञात मित्यर्थः ननु मम किं वेजात्यं त्वया दृष्टं तत्राह यद् यस्मात्तव सवयसां सखीनां सद-सभा एव प्रमाणं ॥ ३० ॥

कुन्दवल्ली पुनः परिहसति इह हृदि धृतिं धर्तुं धैर्यं कर्तुं यद्यपि न ईशेषेनसमर्था भवसि हेअवले ! राधे ! श्लेषेण धैर्य्य धारणासामर्थे ! तथापि दधीथा क्षणं धैर्य्यं कुरु ननु वक्षस्थल पर्वतद्वयस्य भारेण व्याकुलास्मि तत्रैव पुनर्महाभारां धृतिं धर्त्तुं किमादिशसीति तत्राह ते तव गिरियुगभारस्य धारणाय गिरिधरः कृष्णः तस्य गोवर्धनधारणे अभ्यासस्तावद्वर्तत एव अतः क्लिष्टायास्तवेष कारं करिष्यत्येवेति भावः ॥ ३१ ॥

ललिताउत्तरमाह हेअविज्ञे ! कुंदवल्लि या मम सखी गिरिधर दिशः सकाशात् शंकया विधुरा उद्विग्ना अजनि अभूत् यत इयं महासती ततोपि बलात् इमां सखीं परिवदसि परिवादं ददासि

त्वयि मुहुरियमर्पितार्य्यया य
त्तदुचित मेव विधित्ससेऽद्य भद्रं ।
स्त्वमिव सखि ! परं जनं न विद्मी
त्युदितवती ललिता पुनस्तयोचे ॥ ३३ ॥
अलमलमनया गिरा विदूरे
कलय पुरः पुरतोरणोपकण्ठे ।
स्फटिक-घटित-रत्न-चित्रितास्था-
न्यभिनव-कुट्टिमगं हृदेककाम्यं ॥ ३४ ॥
सरसमुषसि दुग्ध-नैचिकीकः
सहसवयाः कृत-मल्ल-रङ्ग-केलिः ।

---

अतस्त्वमतीवाविज्ञातदर्पतं गिरिधरं अस्यां विषयेंनिदेक्ष्यसि अस्याः परिचर्य्यार्थं तं नियुक्तं करिष्यसि हा इत्यतीव दुःखं ॥ ३२ ॥

यद्वस्माद्दार्य्यायं जटिलया । तत्तत एव उचितमेव विधित्ससे अद्य कर्त्तुमिच्छसि भद्रं ललिता इति उदितवती पुनस्तया कुंदवल्या उचे ललितां प्रति कथितमित्यर्थः ॥ ३३ ॥

हे ललिते ? किंतु अविदूरे समीपे पुरोऽग्रे कलय पश्य कुत्रकिं पश्यामि तत्राह पुरस्यतोरणांवहिद्वारत स्वं उपकंठे निकटे हृदेक-काम्यं कश्चित् पुरुषं पश्य किंभूतं स्फटिकघटितरत्नेनचित्रिताया-आर्थाइ प्रसिद्धा आस्थानी तस्यां यत् अभिनवं चवृतराइतिप्रसिद्धं कुट्टिमंतत्रगतं तत्रस्थं ॥ ३४ ॥

एषः श्रीकृष्णो भाति पश्य एषकिम्भूत उषसि प्रातःकाले सर सं सहर्षंयथास्यात्तथादुग्धा नैचिक्योदुग्धातिशयवत्यो गावोयेन स पुनश्चसत्रयोभिर्बालकैः सह वर्तमानः सन् कृतमल्लक्रीडः पुनश्च अत्रगताज्ञाताभवद्दालया राधायाआगमनवार्तातयाक्षुभितं हृदयस्य-

अवगत-भवदालि-यान-वार्त्ता
क्षुभितहृदागत एष भाति पश्य ॥ ३५ ॥
व्रजपुर-ललना-कुलोन्मदिष्णु-
करण-पटु-छवि-मण्डलोपगूढः ।
मधुरिमधुरयैव किं त्रिभङ्गी-
कृततनु रुच्चल-दाम-मादितालिः ॥ ३६ ॥
श्रित-मृदुतर-गण्ड-कुण्डलाध्या-
पनपर-ताण्डव-पण्डिताक्षियुग्मः ।
पवन-धुत-पटाङ्ग-गौर-नील-
द्युतिलहरी-स्तिमितीकृताखिलाशः ॥ ३७॥

एष आगतः तस्माद्गोदोहनमल्लक्रीडानंतरमेतदर्थमेवात्रागत्यास्थित इत्यर्थः ॥ ३५ ॥

पुन कुंदवल्ली श्रीकृष्णं विशिनष्टि स किम्भूतः व्रजपुरललना-समूहानां उन्मदिष्णूकरणेपटुसमर्थं यच्छविमण्डलं कांतिसमुहस्तेन उपगूढस्तद्युक्तइत्यर्थः, पुनश्च मधुरिमधुरया माधुर्य्यातिशयेनैव त्रिभंगीकृता तनुर्यस्य पूनश्च उच्चलं चंचलं यद्दामवनमालातेन उन्मत्तीकृताभ्रमरा येन ॥ ३६ ॥

पुनः कथम्भूतः श्रितौमृदुतरौ गण्डौ याभ्यां तादृशे ये कुंडले तयोर्यत् अध्यापनं तत् परं अथ च ताण्डवपण्डितं अक्षियुग्मं यस्य नृत्यशास्त्रेपण्डितं यस्य अक्षिद्वयं कुंडलद्वयं पाठयतीत्यर्थः पुनश्च पवनेन धुतःकम्पितः यः पटः अंगचेतयोर्यानीलगौरद्युतयस्तासां यालहरीतयास्तिमितीकृता स्निग्धीकृता अखिलाआशादिशायस्य सः गौरनीलद्युतीत्यनेन प्रयागः सूच्यते तत्पक्षे गौरः श्वेतः गौरोऽरुणोसितेपीतेइत्यमरः ॥ ३७ ॥

प्रियसख-भुजशीर्षिण राजदुद्यत्-
करिकर-निन्दक-धाम-वामवाहुः ।
निज-रुचि-विजिताब्ज-घूर्णनैक-
व्यसन वशेतरपाणिरेष ईष्टे ॥ ३८ ॥
इति गिरमथ रूपमाधुरीं तां
यदि चषकीकृत-कर्ण-नेत्र-युग्मा ।
अपिवद् दरमोहत स्तदा तत्
प्रसृमर सौरभ-माश्ववोघयत्तां ॥ ३९ ॥
पुलक-निवह-कम्पसम्पदश्रु-
स्रुतिकलिलापि धृतिं दधत्य वादीत् ।

पुनश्च प्रियसखस्य सुवलस्य भुजशीर्षिण स्कंधे राजत् अथच उदयं प्राप्नुवद्धस्तिशुण्डस्य निंदकं धाम कांतिर्यस्य तथाभूतो वामवाहुर्यस्य सः पुनश्च निजरुचिभिर्निजकांतिभिर्विजितं यदब्जं लीलाकमलं तस्य घूर्णनरूपं यत् एकं व्यसनं अध्यवसायस्तस्य वश इतरपाणि दक्षिणकरो यस्य स एव श्रीकृष्ण ऐष्टेकामिनीजनवशीकरणे ऐश्वर्य्यं करोति तथाच सुवलस्कंधे वामहस्तं दत्वा दक्षिणपाणिना लीलाकमलं घूर्णयतीत्यर्थः ॥ ३८ ॥

कुंदवल्या इति गिरं एवं तां कृष्णस्य रूपमाधुरीं श्रीराधिका अपिवत् कथंभूता चषकीकृतं पाणपात्रीकृतं कर्णयुग्मं नेत्रयुग्मंच यथा एवम्भूता। तत्पानाच्च अदरमोहो जात स्तस्मान्मोहात्तदा तस्य कृष्णस्य प्रसृमरसौरभं प्रसरणशीलं सौगन्ध्यं तां श्रीराधां अवोधयत् वहिर्वोधयामास ॥ ३९ ॥

पुलकनिवहः रोमांचसमुहः कंपसंपत् कंपसमुहः अश्रुस्रवणं ताभिः कलिला व्याप्तापि राधा धृतिं दधती सती अवदत् हे सखि!

सखि ! किमपरमस्ति वर्त्म पादौ
न मम पुरश्चलतो ऽस्य किं करोमि ॥ ४० ॥
गुरुपरवशतैव दोषदुरो
करणपटु स्तव किं भिया ह्रिया वा ।
सपदि सवयसेति वोध्यमाना
लघु लघु गन्तुमियेस सा तदग्रे ॥ ४१ ॥
किमिदमिति परस्परावलोको-
च्छलितमहामधुरिम्नि यत्तयो स्ताः ।
स्व मतुलतरसि न्यमज्जयन्ना
लयइति वर्णयितुं न गीरपीष्टे ॥ ४२ ॥

किंअपरं वर्त्मं अस्ति अस्य कृष्णस्य पुरोऽग्रे मम पादौ न चलतः किं करोमि तस्माद्धर्मांतरमास्ति चेद्वद ॥ ४० ॥

ततश्च ललिता आह हे सखि ? गुरुपरवशता एव दोषदूरीकरणे पटुः तव ह्रिया भिया वा किं प्रयोजनंइति सपदि तत्क्षणं सवयसा ललितया प्रवोध्यमाना सा राधा लघु लघु यथास्यात्तथा तस्य श्रीकृष्णस्याग्रे गतुं इयेष इच्छां कृतवती इषु इच्छायां धातुः ॥ ४१ ॥

ततश्च परस्परावलोकजन्यहर्षमवलोक्य सखीनामपि उत्पन्नं हर्षं वर्णयितुं वाग्देव्यपि न समर्थेत्याह इदं किमिति सचमत्कारो यः परस्परावलोकस्तेन उच्छलितो य स्तयोराधाकृष्णायां महामधुरिमा तस्मिन् आलयः सख्यः स्वं अमज्जयन् आत्मानं निमग्नं कृतवत्यः इति गीः सरस्वत्यपि वर्णयितु न इष्टे न समर्था भवति मधुरिम्नि कथं भूते अतुल तरो वेगो यस्य तस्मिन् ॥ ४२ ॥

अघदमनचकोरचन्द्रिका स्ताः
शशिवदनाऽपि पपौ मुहुः पिपासुः ।
गिरिधरमुदिरोपरीह चात
क्यतनुरसं प्रववर्ष सेति चित्रं ॥ ४३ ॥
अथ निजनिजमूर्द्धि सव्यहस्तो-
न्नमन-कला-कलितावगुण्ठना स्ताः ।
अवनतनयना-ञ्चली-विलीढ-
प्रिय-चरणाब्ज-सुधा ययु स्तदग्रात् ॥ ४४ ॥
हरिरपि परिवृत्य तन्नितम्ब-
द्युति-निहितेक्षणपङ्कजो ऽवतस्थे ।

---

अघदमनः श्रीकृष्णः स एव चकोरः अद्भुतचकोरत्वात्तस्य या चंद्रिका ज्योत्स्ना स्ता श्चंद्रवदना राधा पिपासुःसती पपौ एवं गिरिधर एव मुदिरो मेघ स्तस्य उपरि सा राधिका रूपा चातकी अतनुरसं पक्षे कंदर्परसं वर्षति अतीव चित्रं चंद्रस्य चंद्रिकां चकोरः पिवतीतिः प्रसिद्धिः मेघश्चातक्याउपरि रसं जलं वर्षतीति प्रसिद्धिश्च अत्र तद्वैपरीत्यादाश्चर्य्यमित्यर्थः ॥ ४३ ॥

सावधानाः सत्यः सर्वा एव ययुरित्याह निजनिजमूर्द्धि वामहस्तस्य उन्नमनवैदग्ध्या कलितं घूङ्गट इति प्रसिद्धं अवगुंठनं याभिस्ता राधादयः अवनता नम्रीकृता या नयनाञ्चली नयनकोणास्तया विलीढा आस्वादनविषयींकृता प्रियस्य श्रीकृष्णस्य चरणसुधा याभि एवं भूताः सत्यस्तस्य श्रीकृष्णस्य अग्रात् ययुः ॥ ४४ ॥

वरतनुतातिः सुन्दरीसमूहोपि तद्गोपुरं वहिर्द्वारं अतीत्य अव-

वरतनुतति रप्यतीत्य तन्द्रो
पुर मवगुण्ठन मीष दस्यति स्म ॥ ४५ ॥
सखि ! भवदवलोकजातहर्षं
सपदि स चम्पकमालया वटु स्तं ।
सुखिनमकृत यत्तदिङ्गितज्ञा
भवसि न वेत्युदिताह सा स्वसख्या ॥ ४६ ॥
त्वमसि खलु यथा तथान्वमासी
र्निजसदृशी र्यतसे परा विधित्सुः ।
इति दरविकसत्स्मिता भ्रमद्भ्रू
स्त्वरितमवाप महापुरान्तरं सा ॥ ४७ ॥

---

गुण्ठनं ईषत् अस्यतिस्मदूरीचकारइत्यर्थः स्वभावोक्तिरियं ॥ ४५ ॥

अधुना तुंगविद्या राधिकां परिहसति हेसखि भवदालोकनेन जातहर्षं तं श्रीकृष्णं वटु र्मधुमंगलश्चम्पकपुष्पस्य मालया यत् सुखिनं अकृत तस्य इंगितज्ञा त्वं भवसि नवा तेन यत्सूचितं तद्बुद्धंनवेत्यर्थः इति स्वसख्या तुंगविद्यया उदिता सा राधा आह ॥४६॥

हेसखि तुंगविद्ये यथा त्वंअसि तथैव अन्वमासीः अनुमानं कृतवती परा अपि निजसदृशी र्विधित्सुः कर्तुमिच्छुस्त्वं यतसे यत्नं करोषीति कथयंती सा राधा महापुरांतरं अवाप प्राप्तवती मुख्यपुरांतरं प्रविष्टवतीत्यर्थःकथं भूता बहिः प्रकटीभवत् ईषद्धास्यं यस्याः पुनश्च भ्रमंती भ्रूर्यस्याः तेन सखीं प्रति बहिरसूया प्रकटीकृता ॥ ४७ ॥

स्फटि-कघटित-कुड्य मीड्य-भर्म्मो-
ज्वलपटलं पविकीलवत्कवाटं ।
मणिमय-ललना-धृत प्रदीप
व्रतति नगद्विजराजि राजितद्वाः ॥ ४८ ॥
द्युमणिकिरण-दीप्त-रत्न-कुम्भ-
ध्वज-नटकेकि-वृताग्रपौरटाट्टं ।
सुरवर-पुर-निन्दि यत्र शन्दं
विलसति मन्दिरवृन्द मिन्दिराढ्यं ॥ ४९ ॥

महापुरांतरं वर्णयति श्लोकद्वयेन। यत्र पुरे मंदिरवृंदं विलसतीति द्वितीयेन सहान्वयः कथं भूतं स्फटिकमणिभिर्घटितं रचितं कुड्यं भित्तिर्यस्य भर्मः सुवर्णं ईड्यसुवर्णेन उज्वलानि छात इति प्रसिद्धानि पटलानि यत्र। पुनश्च पविर्व्वज्रं तेन रचितं यत्कीलं तद्युक्तं कवाटं यत्रतत्। पुनश्च मणिमय्यो रत्नैरचिता या ललनास्ताभिर्धृता ये प्रदीपाश्च व्रततयोलताश्च नगावृक्षाश्च द्विजाः पक्षिणश्च रत्नरचिता स्तेषां या राजयः श्रेणय स्ताभिः राजितं द्वाद्वारं यत्रतत् ॥ ४८ ॥

पुनः कथभूतं सूर्य्यं किरणेन प्रदीप्तोयोरत्नमयः कुम्भस्तदुपरिध्वज स्तदुपरि नटन् यः कृत्रिममयूरस्तेन वृतोऽग्रभागो यस्या स्तथाभूता वाँगला घर इति प्रसिद्धा स्वर्णनिर्म्मिता अट्टालिका यत्र। पुनश्च सुरवरपुरनिन्दि। पुनश्च शं सुखं ददातीति। पुनश्च इन्दिरा शोभा सम्पत्तिस्तया आढ्यं ॥ ४९ ॥

युग्मकं ।

धनदककुभि राम-वासधाम
व्रजपति-कोषगृहं दिशि प्रतीच्यां ।
हरि-हरिति हरि स्तदिष्टदेवो
मणिभवने परिपूज्यते द्विजेन्द्रैः ॥ ५० ॥

शयनसदन मस्ति दक्षिणाशा-
मनु-हरिनील-वलद्वलभ्यघारेः ।
अपि निखिलविदिक्षु तत्तदन्तः-
पुरसरसीतटनिष्कुटाः स्फुरन्ति ॥ ५१ ॥

अथ समुपसेदुषी सखीभि
र्हरिजननी निजवेश्म भासयन्ती ।

अभ्यन्तर पुरेषु गृहविशेषानाह । धनदेत्यादि । धनदककुभि उत्तरस्यां दिशि रामस्य श्रीवलदेवस्य निवासगृहं । प्रतीच्यां दिशि पश्चिमायां दिशि हरिहरिति पूर्व्वस्यां दिशि । मणिभवने रत्नमन्दिरे । तस्य श्रीनन्दस्य इष्टदेवो हरिर्नारायणो द्विजश्रेष्ठैः परिपूज्यते ॥ ५० ॥

तत्र श्रीकृष्णस्य मन्दिरमाह । दक्षिणां दक्षिणदिश मनु लक्षीकृत्य अघारेः श्रीकृष्णस्य शयनमन्दिर मस्ति । किम्भूतं हरिनीलैः इन्द्रनील-मणिभिर्व्वलन्ती वलभी सर्व्वोर्द्धस्थं गृहं यत्र तत् । निखिलविदिक्षु चतुष्कोणेष्वपि तस्य तस्य श्रीवलदेवप्रमृतेः यानि अन्तःपुराणि तेषुयाः सरस्यः सरोवराणि तेषां तटेषुनिष्कुटा गृहारामा उपवनानि शोभन्ते इत्यर्थः ॥ ५१ ॥

अथानन्तरं हरिजननी यशोदा मुदिता सती सखीभिः समुपसे-

अमनुत भुवनत्रयैकलक्ष्मी-
मुदितवतीं मुदिता ऽर्कमित्रपुत्रीं ॥ ५२ ॥
सविनयमथ सा पदो र्नमन्तीं
द्रुतमुपगुह्य शिरस्यजिघ्रदेतां ।
नयनपृषतवृष्टिमात्रपूर्णा
प्रमदसुधासरिदाप्लुतां च चक्रे ॥ ५३ ॥
शशिमुखि शरदां-शतं जयैवं
सुखय मनो नयने ममेत्युदित्वा ।
अनयत सुमनोहरा स्तदालीः
शमतुलवत्सलतालतानताः सा ॥ ५४ ॥

---

दुषीं निकटमागतां अर्कमित्रस्य वृषभानोः पुत्रीं राधां उदितवतीं भुवनत्रयैक लक्ष्मीं त्रिभुवनस्यासाधारण शोभां अमनुत ॥ ५२ ॥

सा यशोदा एतां राधां शिरसि अजिघ्रत् । एवं यशोदाया नयनयो र्ये पृषताबिन्दव स्तेषां वृष्टिमात्रेण पूर्णायाः प्रमदसूधासरितः यशोदाकर्त्तृकलालनेनोत्पन्नस्य राधिकाहृदयस्थपूर्णानन्दामृतस्य नद्य स्ताभिराप्लुतां च चक्रे । अत्र मस्तकस्थनेत्रजलवृष्टे र्हृदयगतानन्दनदीपूरकत्वेनासङ्गत्यलङ्कारोबोध्यः ॥ ५३ ॥

हे शशिमुखि ! राधे शरदां शतं वर्षशतं व्याप्य जययुक्ता भव एवं प्रकारेण मम मनोनयने सुखय, इति उदित्वा सा यशोदा तस्या आलीः आलिङ्गनाशीर्व्वादादिना शं सुखं अनयत प्रापयामास । सा कथम्भूता अतुलवात्सल्यस्य लतास्वरुपा अतएव तस्याः सखीरपि सुमनोहराः तादृशलतायाः वात्सल्यरुपं पुष्पं हरन्ति गृह्णन्तीत्यर्थः । पक्षे शोभनमनोहराः पुनः कथम्भूताः नताः पदयोः प्रणताः ॥ ५४ ॥

मधुरमृदुलमोदकादि किञ्चित्
सम मुपवेश्य सखीजनैर्वलात्तां ।
द्रुत हृदय धनिष्ठया शयित्वा
भृश मुपलाल्य निनाय पाकशालां ॥ ५५ ॥

सरसिजमुखि ! कीर्तिदैककीर्त्ते
पचनकलाचतुरा कृतासि धात्रा ।
तदयि रसवतीं प्रविश्य पाकं
कुरुललितादिसखीकृतेतिकृत्यं ॥ ५६ ॥

त्व मिह किल रमैव भाससे यत्
किरसि पुरे मम दृष्टि मेतयैव ।
भवति विविधसम्पदातिपूर्णा
न्यखिलगृहाणि सदाश्विति प्रतीहि ॥ ५७ ॥

तदिह विविधतेमनोपयोगि
श्रुतमथ दृष्ट मवैषि यद् यदग्र्यं ।

वात्सल्येन द्रुतहृत् यशोदा सखीजनैः सहितां राधां वलादुपवेश्य धनिष्ठया द्वारा आशयित्वा भोजयित्वा ॥ ५५ ॥

पाक इत्यादि ललितेत्यादि ललितादिसखीभिः कृतं इतिकृत्यं तात्कालिकोचित व्यापारोयत्र तं ॥ ५६ ॥

रमैव लक्ष्मीरेवत्वं भाससे अतएव यद्दृष्टिं किरसि एतयादृष्ट्यैव । हे भवति राधे ! तथा च रन्धनार्थं तत्र यद्वस्तु अपेक्षितं तत्सर्व्वं मम गेहे वर्त्तते विचार्य्य नीयता मितिभावः ॥ ५७ ॥

तदखिलमवलोक्य वस्तुजातं
सपदि गृहाण धनिष्ठयैव तेभ्यः ॥ ५८ ॥
सरसमिति निदिश्य यातवत्यां
तनयसमानयनाप्लवादिहेतोः ।
प्रतिनियतकृतौ सखीषु लग्ना
स्वनुचरिकास्वपि सेवनोद्यतासु ॥ ५९ ॥
करपद मवनिज्य पाककृत्या
ननुगुणमण्डनमुक्तकण्ठपाणिः ।
हलधरजननीं प्रणम्य राधा
सुरभिमहानस मावभौ विशन्ती ॥ ६० ॥

युग्मकं ।

पचनचतुरतारतासि जाते !
पचमनसा तव भाति यद्यथा तत् ।
अपच मह मियन्त मेवकालं
तवगुरुभार मपाचिकीर्षु रेव ॥ ६१ ॥

---

तेभ्यो गृहेभ्यः सकाशात् धनिष्ठयासह ॥ ५८ ॥

सरसं यथास्यात्तथा इति निदिश्य प्रतिनियतकृतौ स्वस्व कार्ये ललितादिसखीषु लग्नासु एवं किङ्करीषु वीजनादिव्यापारे उद्यतासु सतीसु सा आवभौ इत्यन्वयः ॥ ५९ ॥

अवनिज्य प्रक्षाल्य । पाकिकृत्यस्यानुगुणमण्डनेन हारोर्मिका दिनामुक्ताः कण्ठपाण्यादयो यस्याः ॥ ६० ॥

रोहिणी आह । हे जाते पुत्रि राधे तव गुरुभारमपाचिकीर्षु रहं

अवनतमुखपङ्कजा तया सा
द्रुत मुपगुह्य सुतेव लाल्यमाना ।
सितवसनशमास्तृतां चतुष्की
मनुसुतपवेशिता वलेन ॥ ६२ ॥

अगुरुसरलदेवदारु ज्वलन
परिश्रितचुल्लिकाचयाग्रे ।
निहितविविधपात्रराजिराज
द्बहुविधतेमनसाधुसाधनार्थं ॥ ६३ ॥

ज्वलनकलनपात्रधारणोन्न
त्यवनतिमूर्च्छनदर्विचालनाद्यैः ।
त्रिवलिकुचभुजांसकम्पचेलो
च्चलनवशा दुदपादि य स्त दाऽस्याः ॥ ६४ ॥

---

एतावन्तं कालं अपचं इतःपरं तवमनसि यद्यत्भाति तत्पच ॥ ६१ ॥

चतुष्कीमनु चतुष्क्यां सुतनुः राधा वलात्कारेण उपवशिता ॥६२॥

एतेषां दारूणां काष्ठानां ज्वलनैः परिश्रितस्य चुल्लिका समूहस्य अग्रे निहितपात्रश्रेण्यां राजत्त मनस्य व्यञ्जनस्य साधुसाधनार्थं निष्पादनार्थं । ज्वलनदर्शनं पात्रधारणं एवं पात्रस्य उन्नतिः स्वनतिश्च । मूर्च्छनं छोक इति प्रसिद्धं एतैः करणैः त्रिवल्यादीनां उच्चलनवशात्यो मधुरिमभर उदपादि तं मधुरिमभरं अच्युतः श्रीकृष्णः पिवन् सन् एवं उदञ्चितं कन्दर्पमदं निघ्नन् विदरितुं वटुं मधुमङ्गलं प्रति किमपि

मधुरिमभर मच्युतः स्वसौध
स्फुरितगवाक्षधृतेक्षणः पिबं स्तं ।
मदनमद मुदञ्चितं विवृण्वन्
किमपि जगाद पटु र्व्वटुं मिषेण ॥ ६५ ॥

सन्दानितकं ।

सुमधुरतरकण्ठध्वानमात्मप्रियायाः
श्रुतिचषकयुगान्तर्वेशयित्वैकतानं ।
पचनविधिषु चेत स्तच्चकर्षैव तेभ्य
स्तदपिनकिमपाक्षीत् साधु साभ्यस्तविद्या ॥ ६६
सरभसमितिकृत्यव्यापृतिं व्यञ्जयन्ती
स्तत इत उपयान्तीः स्वाः गिरः श्रोतुकामाः ।

जगाद् इति तृतीयश्लोकेन सहान्वयः । कथम्भूतः स्वसौधे स्वगृहे यः स्फुरितो गवाक्षसमूह स्तत्र धृतं ईक्षणं येन ॥ ६३ ॥ ६४ ॥ ६५ ॥

पचनविधिषु एकतानं एकान्तासक्तं यच्चेतः तत्तेभ्यः पचनविधिभ्यः सकाशात् चकर्ष आकर्षं कृतवान् तथापि साधुकिं न अपाक्षीत् यतःसा राधा पाकविषये अभ्यस्तविद्या ॥ ६६ ॥

स श्रीकृष्णः स्वकीया गिरः श्रोतुकामा ललिताद्यास्तत्सखीः भाविराधिकासङ्गरूपस्वाभिलषितं अवेदयत् विज्ञापयामास । कथम्भूताः सरभसं सहर्षं यथास्यात्तथा इति कृत्यव्यापारं व्यञ्जयन्तीः किञ्चिद्दृया-

लघु लघु निजंदिश्य प्यत्तिकोणां त्तिपन्तीः
स्व मभिलषित मद्धा वेद यत्तत् सखीः सः ॥६७॥

इति श्रीकृष्णभावनामृते महाकाव्ये
प्रेयोगेहगमनानुमोदनो नामः
पञ्चमः सर्गः ।

पार मिषेणैव श्रीकृष्णसन्निधौ भ्रमन्ती रित्यर्थः । निजदिशि श्रीकृष्ण-दिशि ॥ ६७ ॥

समासोयं पञ्चमः सर्गः ।

——०:•:०——

## षष्ठ सर्गः ।

धाराधरवपु र्नारायणो ऽस्मान् स प्रसीदतु ।
इत्येवाध्यापयत् किञ्चित् स नव्यं शुकशावकं ॥१॥
तत्रापि धाराधारेति धारयन्नपठम्मुहुः ।
लालयन् दाडिमीवीजान्याशयन्नन्तरान्तरा ॥ २ ॥
वटुमाह भवान् क्वागात् प्रातः संप्रति लक्षितः ।
सखे न खेला मद्राक्षी र्मल्लरङ्गाजिरे ऽद्य नः ॥ ३ ॥
प्रसर्पसर्पोत्सर्पादिकौशलं कौ शलन्तु के ।
यदकारि मयाधारि दारूपर्य्य ङ्गरिङ्गणं ॥ ४ ॥

स्वप्रेयसी दर्शनेन जातस्यचित्तक्षोभस्य शान्त्यर्थ मुपायान्तराभावा त्तस्या नाम कीर्त्तनमेव किञ्चिन्मिषेण कर्त्तुमारभते धारेति । धाराधरो-मेघः ॥ १ ॥

एकदा समस्ताक्षरधारणे असमर्थं नवीनशुकवालकं पुनः खण्डशः पाठयति तत्रापीति । धाराधरेत्यव्यवहितोच्चारणे कृते राधाराधेति नामकीर्त्तनं स्यादितिज्ञेयं ॥ २ ॥

सम्प्रति लक्षितोभवान् प्रातःकाले कुत्रागात् ॥ ३ ॥

मल्लस्थलीय खेलामेव विवृणोति । प्रसर्पादीनां खेलाप्रभेदानां यत्कौशलं अकारि तत् कौ पृथिव्यां के शलन्तु जानन्तु । शलहुल पत्मगतौ शलेर्गत्यर्थस्यज्ञानार्थत्वात् । दारूपर्य्यङ्गरिङ्गनं मल्लकाष्ठस्याग्र देशपर्य्यन्तं देहस्य गमनं मया अधारि । तथाचमयाकृता मालकाष्ठ धारण मिति तां प्रसिद्धां खेलां केजानन्त्वित्यर्थः ॥ ४ ॥

चित्रव्यायामवैविध्यं मित्रवृन्दाभिनन्दितं ।
तेन प्रत्येक मातेन एकेनाजि विराजिनी ॥ ५ ॥
उत्थापनावपाताद्यै जंङ्घाजानूरुवेष्टनैः ।
प्रगराडचराडास्फोटै स्त द्वाहूवाहव्य योधयं ॥ ६ ॥
वटु राह पटु याति मादृशो न दृशोः पदं ।
अद्राक्ष्यो यदधीति च्चे त्वां सा व्यस्मापयिष्यत ॥७॥
किं मध्यगोष्ठा भो ज्योतिः कुत स्त द्वागुरे गुरोः ।
फलं किं तस्य सार्व्वज्ञ्यं ब्रूहि तन्मे मनोगतं ॥८॥
ब्रवीमि सर्व्व मेत त्ते त्वरा देवा त्र को विधिः ।
अधुनातनलग्नानुसारेण गणनैवहि ॥ ६ ॥

दण्डवत् पतितस्य देहस्य क्रियाविशेषरूपश्चित्रव्यायामस्तस्य वैविध्यं। एवं मित्रवृन्दाभिनन्दितं च यथास्यात्तथा। तेनमित्रवृन्देन सहप्रत्येकं एकेन मया आजिर्युद्धं आतेने ॥ ५ ॥

कूर्म्माकारतया पृथिव्यां स्थितस्य उत्थापनं। एवं उत्थितस्याव-पातनाद्यैः करणैः प्रगण्डो बाहु स्तत्रये चाण्डस्फोटास्तैश्च तत्मित्र वृन्दं बाहूबाहवि यथस्यात्तथा अहं अयोधयं युद्धं कारयामास। बाहुभ्यां बाहुभ्या मिदं युद्धं वृत्तमिति बाहूबाहवि ॥ ६ ॥

मादृशः पटुः दृशोः पदं नयाति। मम यत् अधीतिं चेत् यदित्वं अद्राक्ष्यः तदासा अधीतिरध्ययनंत्वांविस्मयं अकारयिष्यत ॥ ७ ॥

श्रीकृष्ण आह। ज्यौतिःशास्त्रं अधीतं चेत् मम मनोगतं ब्रूहि ॥८॥

श्रीकृष्ण आह। कोऽत्रविधिः प्रकारोवद। प्रकार मेवाह। अधु-नेति ॥ ९ ॥

इत्युक्त्वाङ्गुलि-पर्वात्तगणनोऽथाङ्कितावनिः ।
मुहु र्विभाव्य खं पश्यन् कम्पयन् शीर्ष माह तं ॥१०॥
एको ऽद्रि रस्ति तस्या ग्रे रम्या काचि दुपत्यका ।
तस्यां सरोद्वयं लग्नं तत्र हंसी मुपागतां ॥ ११ ॥
दिदृक्षसि त्वं खेलार्थं सा स्वयूथेन पालिता ।
नादत्ते त्वत्कर-ग्राहं त्वं च तत्रातिसाग्रहः ॥ १२ ॥
विविधं मिष मादत्से तत्र सा न प्रमाद्यति ।
इत्येव मुज्वलज्योतिर्विदा ज्ञापि मया सखे!॥१३॥

सन्दानितकं ।

कृष्णः प्राह महाविज्ञ ! ज्ञात मेव मनोगतं ।
लभ्येत वा न वा हंसी सा द्वैतदपि गणयतां ॥ १४ ॥
क्षणं स तुष्णींभूयाख्यदीक्षितं तत्र कारणं ।
शाखां काञ्चि द्विवर्णाग्रा माश्रित्यैकत्र तिष्ठता ॥१५॥

---

अङ्गुलिपर्व्वणि आत्ता गृहीता गणना येन । तथा गणनार्थं अङ्किता अवनिर्येनसः । तं श्रीकृष्णं ॥ १० ॥

अद्रिरत्र गोवर्द्धनः । तस्य उपत्यका निकट वर्त्तिनी भूमिः तस्यां सरोवरद्वयं राधाकुण्ड कृष्णकुण्ड च । हंसीं राधिकास्थानीयां ॥११॥

साहंसी ॥ १२ ॥

न प्रमाद्यति तत्र सावधाना भवतीत्यर्थः । उज्वलज्योतिर्विदा मया इत्येवं अज्ञापि । पक्षे उज्वलः शृङ्गारः ॥ १३ ॥ १४ ॥

तत्र प्राप्तौ कारणं मया ईक्षितं इति । आख्यत् कारण मेवाह द्वैवर्ण युक्ता वृक्षस्य काञ्चित् शाखां आश्रित्य अधस्तस्य तले एकत्र तिष्ठता

तत् पक्षपातवैचित्रीं पश्यतालक्षितं त्वया ।
सास्याल्लभ्यासुखेनैवं हंसी वंशीहृतांतरा ॥ १६ ॥

युग्मकं ।

निर्द्धारितमिदं देहि शीघ्रं मे पारितोषिकं ।
यावान् श्रमस्तवेतस्यैव गणने ग्रहचालने ॥ १७ ॥
ततः करकवीजैस्तत्करौ स समपूरयत् ।
तान्यश्नन्नब्रवीत् कृष्णं वटुः पीनावटुः पटुः ॥ १८ ॥
भो वयस्य ! वयस्यत्रसवयस्यापिमय्यहो ।
समकारि समः संप्रत्यादरोभवताकुतः ॥ १६ ॥

---

अथच तस्या हंस्याः पाँख इति प्रसिद्धस्य पक्षस्य पातवैचित्रीं पश्यता त्वया अलक्षितं यथास्यात्तथा सा हंसी लभ्या किन्तु वंश्याहृतं अन्तः-करणं यस्या एवं भूतासती । मुरली श्रवणात् पशुपक्षिणामपि मनोहरण प्रसिद्धेः । पक्षे विंशति वर्णोऽग्रे यस्या एवं भूतां शाखां अर्थात् विशाखां आश्रित्य एकस्मिन् स्थले तिष्ठता अथच तस्या विशाखायाः पक्षपातस्य साहाय्यस्य वैचित्रीं पश्यता त्वया । यद्यपि वंश्याहृतान्तरा तथापि विशाखायाः साहाय्यं यत्किञ्चित् वाम्य-दूरीकरणार्थ मिति बोध्यं ॥ १५ ॥ १६ ॥ १७ ॥

तस्य मधुमङ्गलस्य करौ दाड़िमीबीजैः करणैः स श्रीकृष्णः । वटुः कीदृशः पीनोऽवटुः स्कन्धदेशोयस्य ॥ १८ ॥

भोवयस्य कृष्ण अत्र वयसि पक्षिणि एवं सवयसि मय्यपि दाड़िमी बीज दानेन संप्रति समः आदरः कथं त्वया अकारि ॥ १९ ॥

एष यन्नामपठति त्वं तत् प्रापकवेदभाक् ।
युवयो र्द्विजयो स्तस्मादादरोऽर्हति तुल्यतां ॥ २० ॥
किञ्च विद्वांस्त्व मेकं तत् करकं च गृहाण मे ।
इति तद्वृत्तमादाया हृष्यत् स प्राह चाशिषः ॥२१॥
मह्यं विप्राय यददास्तमेकं करकं ततः ।
भावि तेद्य करप्राप्तमभीष्टं करकद्वयं ॥ २२ ॥
प्रियाद्विजालीः सन्तर्प्य सखे ! स्व-लपनामृतैः ।
भोजय स्वस्ति तेऽद्याह्नि भाविनी सुख-सङ्गतिः ॥२३॥
वत्स ! किं कुरुषे कृष्ण ! माविलम्वस्व साम्प्रतं ।
स्नाहि निर्व्यूढमन्नादि भुङ्क्ष्व मा शीतलीकुरु ॥२४॥

---

श्रीकृष्ण आह । एष शुकः यस्य नारायणस्य नाम पठति त्वन्तु तत्प्रापकवेदशास्त्रभाक् पक्षे यस्या नाम राधा राधा इति पठतित्वं तत्प्रापकज्ञानं भजसे ॥ २० ॥

तत्तस्मात् अधिकं एकं करकं गृहाण । आशिषः आशीर्व्वादं ॥ २१ ॥ २२ ॥

हे सखे ! प्रियाद्विजालीः पक्षि-ब्राह्मण-श्रेणी स्वस्य लपनामृतै र्व्वचनामृतैः करणैः सन्तर्प्य भोजय । ते तव स्वस्ति मङ्गलं अस्तु किन्तु अद्य अह्नि तव सुखसङ्गति भाविनी भविष्यति । पक्षे प्रियायाद्विजालीः दन्त-श्रेणीः स्वकीयलपनस्य मुखस्यामृतैः सन्तर्प्य भो सखे ! त्वं जय । अद्य अह्नि भाविन्या प्रियया अह सुखेन सङ्गतिः सुष्ठु अस्ति । आननं लपनं सुखमित्यमरः ॥ २३ ॥ २४ ॥

इति प्रोच्य व्रजेश्वर्य्या नियुक्तैस्तत्र किंकरैः ।
अभ्यङ्गोद्वर्तन-स्नान-मार्जनाद्यैरसेवि सः ॥ २५ ॥

युग्मकं ।

तत्र तत्रातिदक्षाणामपि प्रेम्नैव साकुला ।
अविचक्षणतामाविश्चक्रे तेषां कदाचन ॥ २६ ॥
ततश्च तत्तत् सर्वं सा शिक्षयन्त्येव तान् स्वयं ।
निषिध्यतोऽपि पुत्रस्य चक्रे स्नेहद्रुतान्तरा ॥ २७ ॥
पौगण्डस्पृगिवाद्यापि स्तन्यं विस्मर्त्तुमक्षमः ।
सुतोऽयमेता ह्यादृष्टजनूंषोऽत्यन्तवालिका ॥ २८ ॥
इति शुद्धाशया तत्र तत्र ताः किङ्करीरपि ।
निदिश्य कर्हिचिद्याति व्यग्रा सा वहुकर्मसु ॥ २९ ॥

---

स श्रीकृष्णः असेवि ॥ २५ ॥

किङ्कराणामविचक्षणतां सा यशोदा आविश्चक्रे कथितवतीत्यर्थः ॥ २६ ॥

तान् किङ्करान् शिक्षयन्ती सा निषिध्यतोपि पुत्रस्य तत्तत्सर्व्वं चक्रे ॥ २७ ॥

इति भावनया शुद्धाशया सा कर्हिचिद्दिवसे तत्र तैलाभ्यङ्गादि कर्म्मणि ताः किङ्करीः निदिश्य । भावनामेवाह । पौगण्डस्पृगपि अयं सुतः बालक एव यतः अद्यापि स्तन्य ऽविस्मर्त्तुमक्षमः । एवं एताः किङ्कर्य्यः अत्यन्तबालिकाः यतो ह्योदृष्टा उत्पत्ति र्यासां तथा भूताः ॥२८॥२९॥

युग्मकं ।

पच्यमानेऽथ पक्तव्ये पक्वेऽन्नव्यञ्जनादिके ।
शृते पयसि दध्यादि-विकारे मोदकादिके ॥ ३० ॥
अनुसंहितपुत्रातिरोचकद्रव्य-संग्रहे ।
एकं मनोऽस्याः सर्वत्र चरन्नश्रान्तिमभ्यगात् ॥ ३१ ॥

युग्मकं ।

स्नातः परिहितानर्घ्यतडितपीताम्वर-द्वयः ।
मुहुर्मार्जितधूपोत्थ धूम-शोभितकुन्तलः ॥ ३२ ॥
कङ्कतीशोधित प्रोतजातीक चिकुरावलिः ।
वेल्लितालकवल्लयालवाल-जूटागशम्भुकः ॥ ३३ ॥
मुखेन्दु-राजताख्यायि काश्मीरतिलकालिकः ।
गण्डेन्दु-सख्यतरलकुण्डलद्युमणिद्वयः ॥ ३४ ॥

आवर्त्तितदुग्धे । दध्यादिविकारे शिखरिण्यादौ । पूर्व्वं पूर्व्वं दिने अनुसंहिता निर्द्धारिता यत्र पुत्रस्यातिरोचकता तद्द्रव्यसंग्रहे । एवञ्च दुग्ध प्रभृति तत्तद्द्रव्यसंग्रहे अस्या यशोदाया एकं मनश्चरन्नपि श्रान्तिं न अभ्यगात् ॥ ३० ॥ ३१ ॥

वस्त्रादिनामुहुर्म्मार्जितः पश्चात् अगुरुधुमोत्थ धूमेन शोभितः कुन्तलो यस्य ॥ ३२ ॥

आदौ कङ्कत्या शोधितः पश्चात् प्रोतं ग्रथितं जातिपुष्पं यत्र तथा भूता चिकुर श्रेणीयस्य सः । वेल्लिता कम्पिता या अलकलता साएव थामरा इति प्रसिद्ध आलवालो यस्य एवम्भूतो जूटा स्वरूपोऽगशम्भुर्निश्चल महादेवो यस्य । महादेवस्य चतुर्दिक्षु आलवालस्य प्रसिद्धेः ॥ ३३ ॥

मुखचन्द्रस्य राजत्वाख्यायि राजत्व कथन शीलं केशर तिलकं अलिके यस्य । गण्डेन्दुना सहसख्यार्थं तरलश्चञ्चलः । द्युमणिः सूर्य्यः ॥ ३४ ॥

चलद्दोःस्थिर केयूरद्युति-चाकचिक्यचापलः ।
स्थिरोरश्चलहारालिस्थैर्य्ययुङ् माधुरीधुरः॥ ३५ ॥
कोटीन्दु सूर्य्यविजयि कौस्तुभार्चितकण्ठभृः ।
कुन्ददामातिसौभाग्य वाञ्छार्तीकृतयौवतः ॥ ३६ ॥
भूषार्चिरर्चिताश्चर्य्यवर्य्य जागुड़चार्चिकः ।
विचित्र किङ्किणीनाद-वासितप्रेयसीश्रुतिः॥ ३७ ॥
रत्नोर्मिकाकङ्कणादि-भास्वत्फुल्लकराम्वुजः ।
मञ्जुशिञ्जानमञ्जीरमदिरेड्यपदाम्वुजः ॥ ३८ ॥
वस्त्रास्तृतं रत्नपीठ मध्यास्य मणिकुट्टिमे ।
नारायणं स्मरामीति कृष्णो नेत्रे न्यमीलयत् ॥३९

चञ्चलहस्तस्थित स्थिरकेयूर सम्बन्धि द्युति चाकचिक्यस्य चापलं यत्र । स्थिरवक्षसि चञ्चलहार श्रेण्याः स्थैर्य्ययुक्त माधुर्य्यातिशयोयत्र ॥ ३५ ॥
कुन्ददाम्नोऽतिसौभाग्यस्य वाञ्छया आर्त्तीकृतो युवतिसमूहो येन॥३६॥
भूषणानां अर्चिषा कान्त्या अर्चितस्य आश्चर्य्यवर्य्य जागुड़स्य आश्चर्य्यं श्रेष्ठ कुङ्कुमस्य खोर इति प्रसिद्धश्चार्च्चिको यस्य। किङ्किणीनादस्य वासिता वासस्थानीकृता प्रेयसीनां श्रुतिर्येन। अथवा किङ्किणीनादेन वासिता प्रेयसो श्रुतिर्येन ॥ ३७ ॥
उर्म्मिका कङ्कणादीनां भाः कान्ती तद्युक्तफुल्ल कराम्बुजं यस्य। मनोज्ञ शिञ्जानंयस्य एवम्भूतो यो नूपुरस्वरूपो मदिरः खञ्जनस्तेनईड्यं पदाम्बुजं यस्यसः॥ ३८ ॥
पित्राकृत नारायण स्मरणस्यानुकरणं करोमीति बालकरीतिमाह । नारायणमिति ॥ ३९ ॥

अष्टभिः कुलकं ।

ध्यानप्राप्तप्रियाबिम्बाधर-पानमुदैधितः ।
रोमाञ्चिताङ्ग स्तन्नामाङ्कितं मन्त्रं जजाप सः ॥४०॥
अथैत्य कमलः प्राह युवराज ! व्रजेशया ।
आहूयसे भोजनार्थं मुहुस्तत्रावधीयतां ॥ ४१ ॥
उत्थाय बटुना कृष्णः प्रविष्टोऽदनवेदिकां ।
निर्णिक्ताङ्घ्रियुगः पीठमध्यास्त वसनावृतं ॥ ४२ ॥
श्रीदामबलदेवाद्याः सव्यदक्षिणतोऽवसन् ।
प्रेष्ठान् सखीनृते यस्मान्न भोजनसुखं सुखं ॥ ४३ ॥
यशोदाहूतयाऽन्नादि रोहिणया परिवेशितं ।
आदंस्ते राधया तत्तत् पाणौ ग्राहितया क्रमात् ॥ ४४
कृष्णः सतृष्णो नैवात्र बलः कवलमात्रभुक् ।
श्रीदामा नाम मन्दाशी सुबलोऽसु बलोज्झितः ॥४५

स श्रीकृष्णः राधिकाया नामाङ्कितं मन्त्रं जजाप ॥ ४० ॥
कमलो दासः व्रजेशया यशोदयामुहुराहूयसे ॥ ४१ ॥
बटुनासह । क्षालिताङ्घ्रि युगः ॥ ४२ ॥
यस्मात् प्रेष्ठान् सखीन् विना भोजन-सुखं न सुखं भवति ॥ ४३ ॥
ते कृष्णादयः आदन् भोजनं चक्रुः ॥ ४४ ॥
केवलमहमेक एव अस्यान्नव्यञ्जनस्य पात्रमिति बटुरवददिति चतुर्थ श्लोकेनान्वयः । अन्येषां अन्नव्यञ्जनस्य भोजनपात्रत्वं निराकरोति कृष्ण इति । अत्र न सतृष्णः अपित्वन्यत्रैवेति परिहासो व्यङ्ग्यः । प्राण-बलेन उज्झितः दुर्बलइत्यर्थः ॥ ४५ ॥

क्वैषां भक्ष्यैकतानत्व-राहित्यमाविदग्धता ।
क्वैतदन्नं सुधानिन्दि स्वयं लक्ष्मैव साधितं ॥ ४६ ॥
काव्यं विफलतां किं न याति सत्कविनिर्म्मितं ? ।
यत्र गोष्ठ्यां तदास्वादलोलुपत्वं न वर्त्तते ॥४७॥
चतुर्व्वर्गफलं मूर्त्तमेतदन्नं चतुर्व्विधं ।
अहं केवल मेकोऽस्य पात्रमित्यवदद्वटुः ॥ ४८ ॥

कलापकं ।

श्रीदामोवाच पिण्डीभिः पिचिण्डं पूरय द्रुतं ।
यदेव तव सर्व्वस्वं यदर्थं वटुनामधाः ॥ ४९ ॥
वटुराख्यदरे मूर्ख ! गोपस्त्वं किं नु वेतुस्यसि ।
रसास्वादं स्वधर्म्मार्थं गा रोद्धुमटवीमट ॥ ५० ॥
पश्यैषोहमनूचानो विप्रो यै र्म्मन्मुखे हुतं ।
तैरिष्टः सर्वयज्ञैर्नं भगवानेव केवलं ॥ ५१ ॥

एषां भक्ष्यैकतानत्वराहित्यमेवाविदग्धता सा वा क्व । लक्ष्म्या साधितं एतदन्नं वा क्व । अत्यन्तासम्भावनायांक्वद्वयं ॥ ४६ ॥

अत्रदृष्टान्तमाह । सत्कविनिर्म्मितं काव्यं किं विफलतां न याति ? ॥ ४७ ॥

एतच्चतुर्व्विधमन्नं चतुर्व्वर्गस्यमूर्त्तं फलं ॥ ४८ ॥

पिण्डीभिर्ग्रासैः । पिचिण्डं उदरं । तथा च वाक्प्रयोगे सति उदरपूरणे बिलम्बोभावीतिभावः ॥ ४९ ॥

भोः ! त्वं किं रसास्वादं वेत्स्यसि प्राप्स्यसि अपि तु स्वधर्म्मेति॥५०॥

अनूचानोविप्रोऽहं ये जनैर्म्मन्मुखे हुतं तैः सर्व्वयज्ञेन भगवान् केवलं इष्टः । गुरोः सकाशात्साङ्गवेदाध्यायो अनूचानः ॥ ५१ ॥

श्रीदामोचे श्रुतिस्मृत्यो र्वर्त्मापि शतजन्मसु ।
त्वया परिचितं नैव विप्रत्वे सूत्रमेव ते ॥ ५२ ॥
कृष्णः प्राह वटो रस्ति रसशास्त्रे ऽनुशीलनं ।
व्यञ्जनानेकतात्पर्य्यलक्षणाभिज्ञता यतः ॥ ५३ ॥
वटुराह षड़ेवात्र रसा न त्वष्ट भन्मते ।
षोढैव न्याय्य आस्वादो यत् षड़ेवेन्द्रियाणि नः ॥ ५४
पश्य सौरूप्य-सौरभ्य-माधुर्य्य-मृदुतादिभिः ।
भुक्तौ सौस्वर्य्य-हर्षाद्यैः षट् स्वादान् षड़्भिरिन्द्रियैः ५५
रसा ह्यष्टाविति प्राहु र्ये ते ऽपि व्यञ्जनाश्रिताः ।
व्यञ्जनाभिज्ञतालेशो ऽप्येषां किन्तु न वर्त्तते ॥ ५६ ॥

पूर्व्वं पूर्व्वं शतजन्मसु श्रुतिस्मृत्यो र्वर्त्म अपि त्वया नैव परिचितं ॥ ५२ ॥

यतः व्यञ्जनावृत्ति-तात्पर्य्यलक्षणानां अभिज्ञता अस्यास्ति । व्यञ्जना वृत्तिर्व्यंञ्जन वृत्तिश्चभवति पक्षेसुपादिव्यञ्जनानां तात्पर्य्यं तत्परता तस्य लक्षणस्य चाभिज्ञता यतः ॥ ५३ ॥

अधुना शृङ्गाराद्यष्टानां रसत्वं निराकृत्य मधुराम्लादि षण्णां रसत्वं मधुमङ्गलो व्यवस्थापयति । तस्मात्षड्विधरसानां षोढा एवास्वादो न्याय्यः यद्यस्मात् नोऽस्माकं रसास्वादकाः षडेवेन्द्रियाणि । मधुमङ्गलस्य मते वहिरिन्द्रियजन्य एव रसानां आस्वादः अतएव रसास्वादस्याष्टविधत्वा भावात् रसोपि नाष्टविधः ॥ ५४ ॥

षडिन्द्रियजन्यास्वादान् विशिष्य वर्णयति । भुक्तौ भोजन समये षड्भिरिन्द्रियैः षट् स्वादान् पश्य । अतएव दीर्घशस्कुलीभोजन समये एकदैव षडिन्द्रियजन्य ज्ञानमिति सिद्धान्तः ॥ ५५ ॥

ते पण्डिताअपि व्यञ्जनाश्रिताः व्यञ्जनावृत्याश्रयणं विनाऽरसस्यासिद्धेः । सुपादीनामेव व्यञ्जनत्वमभिप्रेत्याह । व्यञ्जनेति । एषां पण्डितानां ॥ ५६ ॥

विहाय शाक सूपादीन् विहाय स्ते धयन्ति यत् ।
तक्षीरं प्रकटं हित्वा धावन्त्येव मरीचिकां ॥ ५७ ॥
कारणं रसनिष्पत्तौ चर्व्वणेनेति तज्जगुः ।
चर्व्वन्तु परिचोष्यन्ति न पितु र्जन्मकोटिभिः ॥५८॥
रामः प्राह रसास्वादे केऽनुभावा भवन्मते ।
के वा सञ्चारिणः को वा स्थायी स स्वाद्यते कथं ॥५६
वटुरूचे यदप्राप्त्या पूर्व्वमेवाश्रु मे भवेत् ।
प्राप्त्या तु व्यञ्जनस्यास्य पुलकास्यप्रसन्नते ॥ ६० ॥
वर्णस्य स्निग्धतातृप्तया वैवर्ण्यं तच्च पश्यमे ।
भुञ्जान एव यद्वच्मि स्वरो मे तेन भिद्यते ॥ ६१ ॥

यद्यस्मात् ते पण्डिताः सुपादीन् विहाय विहायः आकाशं तथाचा-मुर्त्ताकाशस्वरूपं अमुर्त्तं शृङ्गारादिरसं धयन्ति आस्वादयन्ति ॥ ५७ ॥

तत्तस्मात् चर्व्वणाद्रसनिष्पत्तिरिति तेषां सिद्धान्तात्! व्यञ्जनस्यैव चर्व्यत्वं न तु रसस्य अमूर्त्तत्वादित्यभिप्रायेणाह कारणमिति ॥ ५८ ॥

भवन्मतसिद्धरसास्वादे। स रसः कथं केन प्रकारेणास्वाद्यते ॥ ५९ ॥

तत्र प्रथमतोऽष्टसात्त्विकान्यवाह । येषां व्यञ्जनादीनां अप्राप्त्या रसास्वादपूर्व्वमेव मे मम अश्रु भवेत् । मन्मते अश्रुरूपानुभावो-रसास्वादपूर्व्वमेवजायते । अस्य व्यञ्जनस्य प्राप्त्या तु पुलक-मुखप्रफुल्लते भवतः ॥ ६० ॥

तृप्त्या हेतुना वर्णस्य स्निग्धता जाता अतो वैवर्ण्यं तच्च मे शरीरे पश्य । स्वरभङ्गमाह भुञ्जानेति । भोजनसमये यद्यस्मादहं वच्मि तेन हेतुनामे स्वरो भिद्यते ॥ ६१ ॥

स्तम्भो मे भूरि मिष्टान्न भोजनाशक्ति दुःखजः ।
प्रस्वेदः प्रकटो ऽन्ते तु प्रलयो बहुभक्षणात् ॥ ६२ ॥
आलस्य चिन्ता स्वापाद्याः स्पष्टाःसञ्चारिणोऽन्न नः ।
स्वाद्यत्वेनैक एवापि स्थायी तु विविधाभिधः ॥ ६३ ॥
शाकाःसुकृतपाकाप्ताः सूपो भूपोपलब्धिदः ।
भृष्टा दृष्टाः क्व वा केन केनाप्येतेऽतिदुर्लभाः ॥ ६४ ॥
पर्पटा किममी श्वेतकर्पटा इति वेद कः ।
भाजी राजीववत्फुल्ल नेत्रयो हर्षवर्षिणी ॥ ६५ ॥
वटका नटकान् कर्त्तु मस्मान् रक्तिं दधत्यमी ।
अम्लानि म्लानिदायीनि सुधाया अपि सर्वथा ॥ ६६ ॥
पायसोऽपायसोद्विग्नचेतसश्चिन्त्य एव मे ।
मनसा पनसाम्राादिष्विष्यते स्वलयोमुहुः ॥ ६७ ॥

---

बहुभक्षणाद् भोजनान्ते प्रलयोभविष्यति ॥ ६२ ॥

चिन्तात्रसमग्रभोजने । स्वाद्यत्वेन एकोपि स्थायी विविध संज्ञको भवति ॥ ६३ ॥

विविध संज्ञामेवाह । सुकृतस्य पुण्यस्य पाकेन प्राप्ताः अर्हराजेषु-पलब्धिदोभवति । भृष्टाः पदार्थाः केन क्व वा दृष्टाः । एते व्यञ्जनादयः । केनापि विधात्रापि अतिदुर्लभाः ॥ ६४ ॥

पांपड इति प्रसिद्धाः पर्पटाः कर्पटाः वस्त्राणि को वेद । पद्मवत् फुल्लनेत्रयो हर्षवर्षणी भाजी । तरकारीति प्रसिद्धस्य व्यञ्जनोपयोगि-वस्तुनः पक्वदशायां भाजादिभत्यस्येन भाजीतिरूपमिति ॥ ६५-६६ ॥

पायसस्य अपायेन विघ्न सम्बन्धेन सोद्विग्नचेतसो मे मम पायस श्चिन्त्यः । पनसाम्रादिषुमनः स्वस्य लयमिच्छति ॥ ६७ ॥

रसाला किं रसालामो रसालानमथापि वा ।
रसालाभेन यस्यामज्जनु मज्जति धिक्कृतौ ॥ ६८ ॥
सन्धानमनुसन्धानं स्वस्मिन् मच्चेतसोऽतनोत् ।
दुर्लभा श्चन्द्रविम्वाभा रोटिकाः कोटिकाञ्चनैः ॥६९
आज्याभ्यक्तानि भक्तानि मन्ये कांचणवारिणा ।
स्नपितानीव सौरभ्यं येषां सौलभ्यमभ्यगात् ॥७०॥
गोदन्तकृत्तघासादि घ्रायिण्यां गोपसंसदि ।
कृतपुण्यस्य मे भूरिभोगभाजः प्रसङ्गतः ॥ ७१ ॥
युग्मकं ।
वने विप्रा स्तपस्यन्ति पत्र-मूल-फलाशनाः ।
वटो स्ते नाधिकारोऽस्ति भोगे याहि तप श्चर ॥७२॥

---

रसाला पानकभेदः सा रसस्य आरामः रलयोरैक्यात् । अथवा रसरूपहस्तिनः आलानं वन्धनस्तम्भः । यस्या रसालाया रसस्यालाभेमज्जन्म धिक्कृतिसमुद्रे मज्जति ॥ ६८ ॥

सांधना इति प्रसिद्धं सन्धानं-कर्तृ स्वस्मिन्मच्चेतसोऽनुसन्धानमतनोत् । कोटिकाञ्चनैरपि दुर्लभाः ॥ ६९ ॥

भक्तानि अन्नानि । येषां सौरभ्यं गोपसंसदि सौलभ्यं । अभ्यगादिति परश्लोकेन सहान्वयः । संसदि कथम्भूतायां गोदन्तछिन्नघासादिघ्रायिन्यां । अनेन परिहासः कृतः । एवम्भूतानां गोपानां एतादृशान्नस्य सौरभ्यप्राप्तौ कारणमाह । भूरिभोगभाजः कृतपुण्यस्य च मम प्रसङ्गतः सङ्गात् ॥ ७०–७१ ॥

श्रीदामाप्याह । वने इति ॥ ७२ ॥

सत्यं भो ! यैः पुरातप्तं पत्र मूल फलादिभिः ।
परिणम्य जनुष्यत्र व्यञ्जनत्वेन तै र्मम ॥ ७३ ॥
भौमस्वर्गजुषः साधु प्रत्यक्षीभूयतेऽन्वहं ।
इतिजानीत भोगोऽय मतप्ततपसः कुतः ॥७४॥
युग्मकं ।
मत्तपःपवनस्पृष्टा अचीचरत गा वने ।
तदापीत्यधुनाभूत यूयंमद्भोगभागिनः ॥ ७५ ॥
इतिजातिस्मरोऽवोच मेषां पूर्वजनोः कथाम् ।
तस्मात्तद्दक्षिणात्वेन मह्यं दापय पायसं ॥ ७६ ॥
सत्यं जातिस्मरायास्मै ब्रह्मण्यश्रमकारिणे ।
तपस्विनेऽतिविज्ञाय प्रचुरं देहि पायसं ॥ ७७ ॥
इत्युक्ता सा व्रजेश्वर्य्या रोहिणी स्मयमानया ।
यावद्ददाति तावत्तां निषिध्यन् सुवलो ऽब्रववीत् ॥७८

---

तैः पत्रमूलफलादिभिः अत्रजन्मनि व्यञ्जनत्वेन परिणम्य भौम स्वर्गजुो मम प्रत्यहं प्रत्यक्षीभूयते इति परश्लोकेनान्वयः ॥ ७३-७४ ॥

तदा पूर्व्वजन्मनि मदीयतपसः पवनस्पृष्टाः सन्तःपुयं वने गा अचीचरत । अधुनापि मद्भाग्येनैव यूयं मद्भागभागिनोऽभूत ॥ ७५ ॥

एषां पूर्व्वं जन्मकथा मह मवोच मिति हेतोः अहं जातिस्मरः ॥७६॥

मधुमङ्गलस्य वचो निशम्य यशोदापि सकौतुकमाह सत्य-मिति ॥ ७७ ॥

इतिस्मयमानया व्रजेश्वर्य्या उक्ता सा रोहिणी पायसं यावद्ददाति ॥७८॥

युग्मकं ।

एवं चेत् प्रथमं प्राप्तुमर्हन्त्येते वलीमुखाः ।
वाग्व्ययश्रमिणो ऽत्रापि जनुष्येते तपस्विनः ॥७९॥
शीतोष्णा वातसहनाः पत्र पुष्प फलाशनाः ।
जातिस्मराः कथं न स्युः को ऽमीषां वेत्ति विज्ञतां ॥८०॥
कृष्णः प्राह सखे ! विप्रा ब्रह्मोपासनतत्पराः ।
कीशाः कुक्षिम्भरा एषां ह्येषां महदन्तरं ॥ ८१ ॥
अस्य कीशस्य चावैमि न किमप्यन्तरं हरे ।
नरत्वं वानरत्वं वा ऽनयो भेदे न कारणं ॥ ८२ ॥
किञ्च ख्यापयता तेन लोके ऽपूर्व्वां स्वविज्ञतां ।
बृहत्वाद्बृंहनत्वाच्च स्वकुक्षिं ब्रह्म मन्यते ॥ ८३ ॥

एवंचेद् वलीमुखा वानरा एव प्रथमं प्राप्तुमर्हन्ति । प्रथम प्राप्तौ कारणमाह वाग्व्ययेति ॥ ७९ ॥

तपस्वित्वमेवाह शीतोष्णेति । एते जातिस्मराः कथं न स्युः यतः अमीषां विज्ञतां को वेत्ति । एषां शब्दजन्यबोधानुदयात् यातिस्मरणाभाव निश्चयो नास्ति ॥ ८० ॥

हे सखे सुवल ! कीशावानराः ॥ ८१ ॥

सुवलआह । अस्य मधुमङ्गलस्य वानरस्य च किमपि अन्तरं न जानामि । किन्तु स्वभावतोऽभिन्नयोरनयोः नरत्वं वानरत्वं वा भेदेकारणं न भवति । वस्तुतस्तु वा विकल्पे नरत्वमिति वुत्पत्या वानरस्यापि नरत्वं वर्त्तते ॥ ८२ ॥

लोके अपूर्व्वां स्वविज्ञतां ख्यापयतानेन मधुमङ्गलेन ब्रह्मपदस्याप्यनुपपत्ति लभ्यात् बृहत्वाद् बृंहणत्वाच्च स्वकुक्षिरेव ब्रह्ममन्यते । तत्र कुक्षौ एतादृश धर्म्मद्वयस्य सत्वात् ॥ ८३ ॥

अत स्त्रिषवणां तस्य ध्यायता पूर्त्तिसाधनं ।
स एवोपास्यते ऽनेन नैष्ठिक ब्रह्मचारिणा ॥ ८४ ॥

युग्मकं ।

कदाचिद्भूरि पक्वान्नग्रसनावेशसंभ्रमैः ।
कीशायितं स्यात् पाणिभ्यां भुञ्जानस्यास्य लाघवैः ८५
इत्युक्त्वाजीहसत् सर्व्वान् सुवल स्तान वटुः स तु ।
हसन् भुञ्जान एवोच्चैःकाशैः शोणमुखोऽभवत ॥ ८६

पञ्चभिः कुलकं ।

गोष्ठेशाह वटो ! तिष्ठ त्वगां मा भुङ्क्ष्व मा हस ।
स्थैर्य्यमाप्नुहि मा जल्प मैनं हासयतार्भकाः ! ॥ ८७
कृष्णः प्राह सखे ! कुक्षि स्य दुर्भरतामगात् ।
प्रत्यूहो हास काशाभ्या मदने हन्त ते कृतः ॥ ८८

---

त्रिषवनं त्रिकालं तस्य उदरस्य पूर्त्ति साधनं । स ए उदरएव ॥ ८४

कदाचित् समये भूरिपक्वान्नग्रसनावेशसंभ्रमैः करणै र्यानि लाघवानि तैः पाणिद्वयाभ्यां भुञ्जानस्यास्य कीशायितं कीशवदाचरितं स्यात् । वानरस्यापि उत्कण्ठासमये हस्तद्वयेनैव भोजनस्य प्रसिद्धेः ॥ ८५ ॥

तान् वलदेवादीन् सर्व्वान् स तु वटुः भुञ्जान एव उच्चैर्हसन् अतएव हास समयेपि भोजनं त्यक्तुमसमर्थस्य तस्य काशैः करणैः शोणमुखोऽभवत् । भोजन समये हासस्य काशप्रदत्वात् ॥ ८६ ॥

हे अर्भकाः मधुमङ्गलं मा हासयत ॥ ८७ ॥

अदने हास काशाभ्यां प्रत्यूहो विघ्नः कृतः ॥ ८८ ॥

मातः शिखरिणीं देहीत्युक्त्वा तां स भृशं पिवन् ।
धारा मपातय च्चारुचिवुका ज्जठरान्तगां ॥ ८६ ॥
श्रीदामाह वटोरस्य मुखश्रीः कृष्ण ! वर्ण्यतां ।
पूर्य्यते नाभिसरसी पतन्त्या धारया यतः ॥ ६० ॥
कृष्णो ऽब्रवीद्यतः कुक्षेः क्षीराम्भोधे र्हसेन्दुना ।
मुहुरुच्छलनाद्वक्त्रशिखराद्वीचिरुद्गता ॥ ६१ ॥
अभूत् शिखरिणी धारा पुनन्त्य स्याङ्गमण्डलीं ।
दुष्पूरमपि दुष्पारं तमेव प्राविशत् पुनः ॥ ६२ ॥
एवं हास-प्रहासाप्तमोदाः कृष्णावलादयः ।
सुतृप्ता अपि मातृभ्या मभूवन् भूरिभोजिताः ॥ ६३ ॥
अशान साधुना कृष्ण ! मात ! मे क्षुन्न्यवर्त्तत ।
शिरसः शपथो भुङ्क्ष्व पञ्चषान् कवलानपि ॥ ६४ ॥

---

मधुमङ्गल आह । तां शिखरिणीं स मधुमङ्गलः पिवन् सन् अत्युत्कण्ठया पानाद्ध तो श्चिवुकाज्जठरान्तगां धारां अपातयत् ॥ ८९–९० ॥

मधुमङ्गलस्य क्षीरसमुद्र स्वरूपस्य कुक्षे र्हसेन्दुना हास्यरूपचन्द्रेण हेतुना मुहुरुच्छलनात् तत एव वक्त्राग्रादुद्गता वीचिस्तरङ्गः शिखरिणी-धारा अभुत् सा एवाङ्गमण्डलीं पुनन्ती दुष्पूरं अथच दुष्पारं तं कुक्षि समुद्रमेव नाभिद्वारा पुनः प्राविशत् ॥ ९१–९२ ॥

सुतृप्ताअपि मातृभ्यां पुन र्भूरिभोजिताः अभूवन् ॥ ९३ ॥

मातुरुपरोधजन्यं पुनर्भोजनप्रकारमाह । यशोदाआह । हे कृष्ण साधुना सम्यक्तया अशानभुङ्क्ष्व । कृष्णआह । मे क्षुत् न्यवर्त्तत ॥९४॥

अथ तान् भुक्तवत्यस्मिन् प्राह वत्स! कथं भवान्।
एतै र्न्यूनतया स्थास्यदयास्यत् क्षामतां भृशं॥९५॥
इदं ते रोचकं भुङ्क्ष्व मानः! शक्ति र्न मे ऽस्त्यतः।
रोहिणि! स्वयमेवैहि मद्वाचं नैष मन्यते ॥ ९६ ॥
वत्स! नाश्नासि चेदेतान्यपचं तेमनानि किं ?।
वृषभानुसुता किं वा ऽऽहूता पाके विचक्षणा ? ॥९७॥
अनश्नन्मातरं मां च तां चापि त्वं दुनोषि तत्।
इत्युक्तो ऽन्नव्यञ्जनादि किञ्चित्किञ्चिदभुक्त सः॥९८॥

युग्मकं।

कृष्ण! कस्ते स्वभावो यत् क्षुधा वस्थातुमीहसे?।
हा कदा वा कथं वा ते वल-पुष्टी भविष्यतः ॥९९॥
एवं मात्राथ रोहिण्या सर्व्वे रामादयोऽपि ते।
स्नेहेन भोजिताः प्रापुरपूर्व्वामतुलां मुदं ॥ १०० ॥
भोजनावाप्तसौहित्य-जनितं श्रीभराञ्चितं।
जालन्यस्तेक्षणा राधा प्रेयसो रूपमापपौ ॥ १०१ ॥

---

स्वभावोक्तिमाह। उपरोधवशात् अस्मिन् श्रीकृष्णे भुक्तवतिसति तं प्रति यशोदाआह। हे वत्स! कथं भवान् एतैः कवलै र्न्यूनतया अस्थास्यत्। अतएव क्षामतां भृशं अयास्यत् ॥ ९५ ॥

हे रोहिणि स्वयमेव एहि आगच्छ ॥ ९६-९७-९८-९९-१०० ॥

जालरन्ध्रे न्यस्तेक्षणा राधाप्रेयसः श्रीकृष्णस्य रूपमापपौ। रूपं कीदृशं भोजनेन प्राप्तं यत् सौहित्वं तृप्ति स्तेन जनितो यः श्रीभरः शोभातिशय स्तेन अञ्चितं ॥ १०१ ॥

तेऽथ दास-करोपात्तभृङ्गरीना-लनोदितैः ।
नीरैः क्षालितहस्तास्या उत्तस्थुः स्वस्वपीठतः ॥१०२॥
क्रान्त्वा शतपदं स्वस्वतल्पमध्यास्य वीजिताः ।
दासैः सुषुपुरव्यग्रं ताम्बूलमुपभोजिताः ॥ १०३ ॥
रसवत्या विनिष्क्रान्तां निर्णिक्तकरपङ्कजां ।
राधां पर्य्यचरन् दास्यो विविक्ते व्यजनादिभिः॥१०४॥
कवोष्णाव्यञ्जनान्नादि रोहिण्या परिवेशितं ।
धनिष्ठां ग्राहयित्वाह राधामेत्य व्रजश्वरी ॥१०५॥
वत्से! गान्धर्व्वि! ललिते! विशाखे! चम्पवल्लिके! ।
निःसङ्कोच मिहाश्नीत धिनुताद्य ममात्तिर्गा॥१०६॥
पुत्रि! किं लज्जसे भोक्तुं कीर्त्तिदेवास्मि ते प्रसूः ।
हस खेलाऽऽस्स्व शेष्वात्र निलये सवयोवृता ॥१०७॥

---

नोरैः क्षालितानि हस्तमुखानि येषां ते उत्तस्थूः ॥ १०२ ॥

दासैर्वीजिताः अथच ताम्बूल मुपभोजिताश्च ते ॥ १०३ ॥

क्षालित कर पङ्कजां ॥ १०४ ॥

रोहिणया परिवेशितं ईषदुष्ण व्यञ्जनान्नादि धनिष्ठां ग्राहयित्वा व्रजेश्वरी एत्य निकटे गत्वा राधामाह ॥ १०५ ॥

धिनुत सुखयत ॥ १०६ ॥

आस्स्व उपवेशं कुरुष्व । शेष्व शयनं कुरुस्व पक्षे सवयसा कृष्णे नेति सरस्वती कृतोऽर्थः ॥ १०७ ॥

तत्वागमृत संसिक्त मनस्कार सखीस्मितैः ।
ईषन्मन्दाक्ष मन्दाक्ष मन्तर्मोदा ऽऽद राधिका॥१०८॥
प्रेष्ठ-फेलामृतं स्वादैः परिचित्य मुदा ऽऽप्लुता ।
धनिष्ठायां किरन्त्यक्षि-कोणं तामधिनोदियं ॥१०९॥
भोजयित्वाथ तां रत्न भूषा-वस्त्रानुलेपनैः ।
लालयित्वा व्रजेश्वर्य्यां गतायां तुङ्गविद्यया ॥ ११० ॥
किञ्चिदूचे विशाखायाः कर्णे तत् सान्वमन्यत ।
राधाप्यनुमिमीते स्म तद् द्वयोः स्मितवीक्षया ॥१११

युग्मकं ।

सख्यौ ! यद्युवयोः कर्णाकर्णि सस्मित मीक्ष्यते ।
मुग्धायाः कुलवध्वा मे तन्नात्र श्रेयसी स्थितिः॥११२

तस्या व्रजश्वर्य्याः । सत्रयोक्ता इति वाक्यरूपामृतैः संसिक्तो मनस्कारो मनस्कामना यासां तासां सखीनां स्मितैः ईषन्मन्दाक्षेण ईष-ल्लज्जया मन्दाक्षं किञ्चिन्मुद्रिताक्षं यथास्यात्तथा अन्तर्मोदा राधा आद-बुभुजे । चित्ताभोगो मनस्कारइत्वमरः । मन्दाक्षं ह्री स्त्रपा व्रीडा लज्जे त्य-मरः ॥ १०८ ॥

प्रेष्ठस्य फेलामृतं भुक्तावशिष्टं स्वादैः परिचित्य मुदाप्लुता राधा धनिष्ठायां अक्षिकोणं क्षिपन्ती सती तां धनिष्ठां अधिनोत् । मयाकृतं रहस्यं कर्म्म राधया ज्ञातमिति बुद्ध्वैव धनिष्ठायाः सुखोत्पत्ते रिति-भावः ॥ १०९ ॥

गतायां सत्यां तुङ्गविद्यया यत् ऊचे तत् विशाखा अन्वमन्यत । द्वयोः स्मितवीक्षया राधापि तत् अनुमिमीते ॥ ११०-१११ ॥

हे सख्यौ युवयोः कर्णाकर्णि सस्मितं मया ईक्ष्यते अतः मुग्धाया इत्यादि ॥ ११२ ॥

इत्युत्थाय स्वगेहाय यान्त्या वव्रे विशाखया ।
प्रोचे शङ्कामिषेणेष्टस्पृहा किं सखि ! सूच्यते ? ॥११३॥

हस खेला ऽऽस्स्व सवयोवृतेत्याह व्रजेश्वरी ।
भुक्त्वा क्षणमविश्रम्य यान्ती तां खेदयिष्यसि ॥११४॥

निष्क्रम्यतां सखि ! मया सह साधु पक्ष-
द्वारेण सत्वरमिमाः खलु कूटचर्य्याः ।
त्वद्बन्धुजीवसुमनो नयनस्पृहापि
पूर्णा भविष्यतितरां निरपायमेव ॥ ११५ ॥

न ज्ञास्यते व्रजपुराधिपया वृथा त्वं
किं शङ्कसे स्वगृहमेह्यनयैव वीथ्या ।

---

वव्रे आवरणंचक्रे । हे सखि ! इष्ट विषये किं स्पृहा सूच्यते । अन्यथा आवयोः कर्णाकर्णिदर्शनात् अनुपस्थित शङ्कायाः कथमुत्पत्ति-रित्यर्थः ॥ ११३ ॥

व्रजेश्वरी इति आह अतः भुक्त्वा क्षणं अविश्रम्य यान्तीत्वं तां व्रजे-श्वरीं खेदयिष्यसि तस्मात् सवयःशब्दस्य गूढार्थाचरणं कुर्व्विति-भावः ॥ ११४ ॥

इति चतुराधनिष्ठा गिरिः व्रजराजस्य वाट्याः पश्चाद्वर्त्ति नन्दीश्वर-पर्व्वतः तस्य गुहायां सुखमयगृहं तां राधां निन्य इति परश्लोकेन सहान्वयः । सद्म कीदृशं कृष्णकान्त्या रुचिरं । पक्षे कृष्णस्य कान्त्या । धनिष्ठाया वाक्यमेवाह । निष्क्रम्यतामिति । खिड़की इति प्रसिद्धेन पक्षद्वारेण । इमाः सख्यः खलुकूटचर्य्या भवन्ति । अत एता विहाय मया सह निष्क्रम्यतां । त्वदीय सूर्यप्रियस्य वन्धुजीवस्य बाँधुली इति प्रसि-

इत्यादराद्गिरिगुहासुखसद्म निन्ये
तां कृष्णकान्ति-रुचिरं चतुरा धनिष्ठा ॥११६॥

इति श्रीभावनामृते महाकाव्ये भोजनकौतुकानु-
मोदनोनाम षष्ठःसर्गः ।

द्धस्य सुमनसः पुष्पस्य आनयनस्पृहा पक्षे त्वद्बन्धोः कृष्णस्य जीवात्मा शोभनं मनश्च एतेषां स्पृहापि ॥ ११५-११६ ॥

समाप्तश्चायं षष्ठः सर्गः ॥

## सप्तमः सर्गः ।

तिलकाभरणादिधारणैः
प्रतिवध्नास्यथ किं सवित्रि ! मे ।
अधुनाप्यशकं यतो गृहा
न्नहि निर्गन्तुमहं करोमि किं ॥ १ ॥
निखिला मम मित्रमण्डली
मिलितैवाभवदत्र सङ्गवे ।
प्रणयाम्बुनिधिः सखा स मे
वनमेष्यन् पथि मां प्रतीक्षते ॥ २ ॥
कथमुद्विजसे त्वमप्यरं
व्रज रक्षामणि मेव ते ऽधुना ।

---

अधुना स्व स्व गृहस्थितानां सखीनां श्रीकृष्णस्य निकट गमनार्थं मुत्कण्ठामाह । हे सवित्रि ! मातः ! मे मम तिलकादिधारणैः किं प्रतिवध्नासि ? श्रीकृष्णस्य निकट गमने प्रतिवन्धं करोषि । यतः अधुनापीति ॥ १ ॥

सङ्गवे प्रातःकालानन्तरं सप्तमघटिकायां । स श्रीकृष्णः वनं एष्यन् वनं गन्तुं पथि मां प्रतीक्षते । यतः प्रणयाम्बुधिः ॥ २ ॥

तस्य माता आह । हे तनय ! कथमुद्विजसे ? त्वमपि अरं शीघ्रं व्रज ।

मणिबन्धमनु प्रशान्तिकं
तनयैषास्मि निबध्नती करे ॥ ३ ॥

न गवां ध्वनिरध्वनि श्रुतो
न च सम्प्रत्यपि सङ्गवोद्गमः ।
निरगुः सुहृदो न धामत
स्तव तारल्यमधा स्त्व मेव किं ? ॥ ४ ॥

मणि काञ्चन भूषणाश्रिता-
जननी-मार्जितचर्च्चिताहृता ।
अतिरङ्गमिवानलङ्कृतं
हसिता त्वां सखिपालिरेव ते ॥ ५ ॥

इति मातृ-कृतोपलालना
द्यपि ते बन्धन मित्यमंसत ।
विशिखारुत-मात्रशङ्कित
स्वसखान्त्यागम-विक्लवेक्षणाः ॥ ६ ॥

---

किन्तु तत्र अस्मिन् करे मणिबन्धमनु मणिबन्धे प्रशान्तिकं रक्षामणिं अधुनैवाहं निबध्नती अस्मिन्नात्र विलम्बलेशोऽपि ॥ ३ ॥

पुनराह । तव सुहृदः अन्ये सखायः स्वधामतो न निर्गमनंचक्रुः किन्तु त्वमेव तारल्यं अधाः ? ॥ ४ ॥

ते सखि पालिरेव त्वां हसिता सखिपालिः कथम्भूता मणिकाञ्चनेत्यादि ॥ ५ ॥

इति मातृकृतोपलालनादि ते बालकाः बन्धनमेवामंसत । कथंभूताः विशिखा गलीति प्रसिद्धा तत्र रुत-मात्रेन आशङ्कितो यः स्व सखान्त्यागमस्तेन विक्लवेक्षणाः ॥ ६ ॥

वसुदाम-सूदाम-किङ्किणी
सुवलाद्याः समिता इतस्ततः ।
पुरमानशिरे हरेरिमे
सुखसिन्धोः पुलिनं यथोर्म्मयः ॥ ७ ॥

अथ कश्चनगोप आगतो
ऽवददुच्चैः शृणुतेदमर्भकाः ! ।
स गवां भवनेष्ववस्थितो
व्रजराजो यदिहादिदेश वः ॥ ८ ॥

स्वपितु क्षणमच्युतः सुखं
न भवद्भिः प्रसभं प्रवोध्यतां ।
अधुनाद्य मयैव मोचिता
धवलावली च विलम्ब्य काल्यतां ॥ ९ ॥

इति ते श्रुतवन्त एव गो-
सदनान्येव मुदा प्रतस्थिरे ।

इमे वसुदामादयः इतस्ततः समिताः प्राप्ताः सन्तः हरेः पुरं आनाशिरे व्याप्तं चक्रुः । तत्र नन्दपुरस्य सुखसिन्धुत्वेन हरेः पुरस्य पुलिनत्वेन च उत्प्रेक्षमाह । सुखेति ॥ ७ ॥

कश्चन गोपः नन्दनिकटादागत्य बालकान् प्रति अवदत् । गवां-भवनेस्थितः स व्रजराजः वो युष्मान् प्रति यत् आदिदेश तत् शृणु ॥८॥

अच्युतः श्रीकृष्णः क्षणं सुखं स्वपितु भवद्भिः प्रसभं हठात् न प्रवोध्यतां। युस्माभिं विलम्वं कृत्वा धवलावली काल्यतां चाल्यतां ॥९॥

कतिचित् रहस्य वृत्तान्तज्ञाः सुवलादयः निभृतं यथास्यात्तथा प्रेष्ठ सखस्य श्रीकृष्णस्यान्तःपुरगा अभवन् ॥ १० ॥

कतिचित् सुबलादयो ऽभवन्
निभृतं प्रेष्ठसखावरोधगाः ॥ १० ॥

दधते ऽपचितिं हरेर्नचा-
पचितिं प्रेमणि ये ऽनुयायिनः ।
उपसेदुरिमे व्रजेश्वरीं
प्रथमं रक्तक पत्रकादयः ॥ ११ ॥

अथ कश्चिदधात्तयार्पितां
तनयामोदक मोदकावलीं ।
अतिवत्सलतालतावलत्
फलपालीमिव काञ्चिदञ्चितां ॥ १२ ॥

मणिचित्रितदारु-पेटिका
न्तरगामंसतटे वहन्नसौ ।

---

अधुना दासानां तत्कालीन चेष्टामाह । येऽनुयायिनो रक्तकादयः हरेरपचितिं परिचर्य्यां दधते अथच प्रेमणि अपचितिं अपचयं न दधते इमे दासाः प्रथमं व्रजेश्वरीमुपसेदुः ॥ ११ ॥

कश्चिद्दासः तया व्रजेश्वर्य्या । तनयस्य श्रीकृष्णस्य आमोदजनक-मोदकश्रेणीं अधात् । अत्र उत्प्रेक्षामाह । यशोदास्वरूप वात्सल्य लतायाः काञ्चित् अञ्चितां पूजितां प्रेष्ठामिति पर्य्यवसितां वलवत् फलश्रेणीमिव । अत्र मोदकस्थानीयं फलं ॥ १२ ॥

असौ दासः तादृश पेटिका-मध्यगतां तां मोदकावलीं स्कन्धतटे वहन् सन् शतकोटि प्राणतोपि आदरात् अवधानीयतमां अमंस्त ॥१३॥

शत कोट्यसुतोप्यथादरा
दवधानीयतमा ममंस्त तां ॥ १३ ॥
स्तिमितारुणा चेलकञ्चुका
वृतचन्द्रोपल चित्रझर्झरीं ।
शशि-वासित नीर-पूरिता
मपरो बिभ्रदद्भ्रमावभौ ॥ १४ ॥
सितमानस-वृत्तिमेव ता
मनुराग-पिहितां द्रवत्तरां ।
वहिरेष जनान् किमीक्षय
न्नतुलं सौभगरत्न माददे ॥ १५ ॥
स्फटिकोत्तमसम्पूटं परो
वहदन्तः फणिवल्लिवीटिकं ।

---

अपरोदासः कर्पूरवासित जलपूरितां अथच तादृश चन्द्रकान्त मणि निर्म्मित चित्र झर्झरीं बिभ्रत् सन् अदभ्रं अनल्पं यथास्यात्तथा आवभौ ॥ १४ ॥

सितझर्झरीं सितमानसवृत्तित्वेनोत्प्रेक्षते । एषदासः रक्तवस्त्राच्छादित श्वेतझार्झरीछलेन अन्तःस्थितानुरागेण पिहितां तां शुद्ध मानसवृत्ति मेव वहिर्जनान् किं ईक्षयन्सन् अतुलं सौभाग्यरत्नमाददे । द्रवत्तरां अनुरागवशाद्द्रवीभूतां । दार्ष्टान्तिकेऽपि तिमितवस्त्रस्य जलक्षरणाद्द्रवत्त्वम् ॥ १५ ॥

परोदासः अन्तःफणिवल्लिवीटिकं तादृशं सम्पुटं अधिकक्षं कक्षतले अवहत् । स्व मनसः अधिष्ठातृदैवतं चन्द्रविम्वं किं दधार? सम्पुटे

अधिकत्तमयं दधार किं
शशि-बिम्वं स्वमनोऽधिदैवतं ॥ १६ ॥
वसनाभरणाद्यनेकधा
दध एकः परिधेयमीशितुः ।
द्युमतामपि मोहनाय यत्
सुदृशां कार्म्मणतां प्रपत्स्यते ॥ १७ ॥
क्षणतः क्षणधुक्क्षणप्रभा-
निभकान्ता निविड़ोपगूहनात् ।
सहसा निरगाद्बहि र्हरिः
कलयन्मित्रकलाप-जल्पितं ॥ १८ ॥
पिदधन्नवजागुड़ांशुकं
सहचर्य्या स तयैव धारितं ।

---

मनसः सर्व्वदाप्रधानत्वद्योतनाय अधिष्ठातृ दैवतत्वेन चन्द्र उत्-प्रक्षितः ॥ १६ ॥

एकोदासः ईशितुः श्रीकृष्णस्य परिधेयं अनेकधा वसनाभरणादि दधार । यत् वसनादि द्युमतां सुदृशां मोहनाय टोना इति प्रसिद्धां कार्म्मणतां प्रपत्स्यते ॥ १७ ॥

हरिः मित्रसमूहस्य जल्पितं शृण्वन् क्षणधुक्क्षणप्रभायाः उत्सव पुरकविद्युत्प्रभासदृश्याः कान्ताया निविड़ोपगूहनात् क्षणतः क्षण-मात्रेण निरगात् सहसा अतर्कितं यथास्यात् तथा ॥ १८ ॥

तयासहचर्य्याराधयाधारितं पीताम्बरं सश्रीकृष्णः पिदधत् । उत्-प्रेक्षामाह चञ्चलया विद्युता कर्त्री त्यक्तुमक्षमश्चलन्मुदिरः किं बलात्

किमु चञ्चलया चलन् वला-
न्मुदिरोऽवेष्ट्यत ? हातुमक्षमः ॥ १९ ॥
सखिभि र्हसितः सितद्युति
द्युतिनिन्दिस्मितपुष्पवर्षिभिः ।
रचिताङ्ग-विभूषण क्रियः
समियायाथ महापुरान्तरं ॥ २० ॥
द्युमणि-द्रुतदण्डनोद्यत
प्रसरत् शस्तगभस्तिकौस्तुभः ।
शिखिचन्द्रकमण्डलस्फुरत्
सुरचापोज्वलमौलि-मण्डितः ॥ २१ ॥
चलमौक्तिक-दाम-धामभि
स्तिरयन् वालवलाकिकावलीः ।

---

अवेष्ट्यत । अर्थात्तयैव अत्र पीताम्बरच्छलेन राधयैवावेष्ट्यत इति-भाव: ॥ १९ ॥

सश्रीकृष्णः सम्भोगादिचिह्नं दृष्ट्वा प्रियनर्म्मसखिभिर्हसितः सन् यशोदाप्रभृतीनां महापुरान्तरं समियाय । कथम्भूतैः चन्द्रद्युतिनिन्दि-स्मितपुष्पवर्षिभिः । कृष्णः कथम्भूतः सखिभिः सम्भोगादिचिह्नं दूरी-कृत्य रचिताङ्गविभूषणक्रिया यस्य ॥ २० ॥

वेषप्रकारमाह कृष्णकीदृशः द्युमणेः सूर्य्यस्यशीघ्रदण्डनेउद्यताः प्रसरन्तः प्रशस्तगभस्तयः किरणा यस्य एवम्भूतः कौस्तुभो यस्यसः । पुनश्च मयूरचन्द्रिकामण्डलेन स्फुरता अथच इन्द्रधनुषःसकाशादपि-उज्वलेन मौलिना मुकुटेन मण्डितः ॥ २१ ॥

पुनश्च चञ्चलमुक्तामालाया स्तेजोभिःकरणैः [illegible]सन्निहितवालकबक-

अलिपालि समीलितोल्लस
द्वनमालोदयदिद्धसौरभः ॥ २२ ॥
जननीजननीवृतं द्रुतं
रचयन् हर्षपयः परिप्लुतं ।
व्रज-तापशतापनोदनः
पुरतो यन् पुरतोरणादभूत् ॥ २३ ॥
अथ साम्बिकया किलिम्वया
स्वसृभि र्यातृभिरप्युदश्रुभिः ।
सह सा सहसा व्रजेश्वरी
निरगात्तामनु राधिकालिभिः ॥ २४ ॥
वनमेति मुकुन्द इत्ययं
ध्वनिरेकः स्फुटमुच्चचार यः ।

श्रेणीः तिरयन् तिरस्कारंकुर्व्वन् । पुनश्च भ्रमरश्रेण्या समीलिता संस्तुताया लसद्वनमाला तस्या उदयेन इद्धः प्रवृद्धः सौरभो यत्र । पक्षे तादृशवनश्रेण्या उदयेन इद्धः सौरभ गोसमूहोयस्मात् श्रीकृष्णस्वरूप मेघात् ॥ २२ ॥

जननीजन एव नीवृत् जनपदः तथाच नेत्रस्तनयोर्हर्षपयसा परिप्लुतं तं जननीस्वरूपदेशं द्रुतं विक्लिन्नं पक्षे शीघ्रंरचयन् व्रजस्थानां तापशतापनोदनः कृष्णमेघः पुरतोरणात् सिंहद्वारात् पुरतोऽग्रे यन् गच्छन् अभूत् ॥ २३ ॥

अथ सा यशोदा अम्बिकासहित किलिम्बादिभिः सह निरगात् तां यशोदां ॥ २४ ॥

मुकुन्दोवनमेति यः एकोध्वनिःस्फुटं उच्चचार स एव व्रजवासिनां

विविधध्वनिसूर्भवन्नभात्
श्रुतिपालीः स पुरौकसां विशन् ॥ २५ ॥
अविलम्वमतः सखे व्रजन्
विपिनाध्वाभिमुखी र्विधेहि गाः ।
तनवाम नियुद्ध कौतुकं
हरिणाद्य क्षितिभृत्तटाजिरे ॥ २६ ॥
वटवः पटलैः शुभाशिषां
पृषतैः शान्ति-ऋचाभिमन्त्रितैः ।
अभिषिञ्चत दर्भपाणयो
हरिमग्रेऽभजताशु निर्वृतं ॥ २७ ॥

श्रुतिपालीः प्रविशन् तदनन्तरं विविधध्वनि प्रसूर्भवन् सन् भाति। ध्वनिरत्र पुरुषोच्चारितात् मुकुन्दो वनं एतिशब्दात् स्त्रीणां मुकुन्दो वनमेतीत्याकारकशब्द उत्पन्नस्तज्जन्यःशुकादीनां शब्दः एवं क्रमेण नानाविध शब्दं पक्षे व्यङ्गञ्च सूते ॥ २५ ॥

मुकुन्दो वनमेतीति शब्दस्य काव्यप्रकाशधृतगतोऽस्तुमर्क इतिशब्दस्येवाधिकारिभेदेन विविधध्वन्यर्थानाह। तत्रादौ सखीनामभिप्रेतं तादृश शब्दस्य ध्वन्यर्थमाह। अविलम्वमिति। हे सखे! अविलम्वं व्रजन् सन् त्वं विपिनाभिमुखी गाँ विदेहि कुरु। हे सखे! अद्य हरिणा सह गोवर्द्धनतटाजिरे नियुद्धकौतुकं वयं तनवाम ॥ २६ ॥

अधुना ब्राह्मणानामभिप्रेतं तादृशशब्दस्य ध्वन्यर्थमाह वटवःयुयं शुभाशिषां पटलैरेवं शान्तिऋचाभिमन्त्रितैः पृषतैर्विन्दुभिश्चकरणैः हरिंअभिषिञ्चत ॥ २७ ॥

नय वल्लव ! मां बलादितो
निजनप्तुर्मुखपङ्कजामृतैः ।
शिशिरीकरवाणि लोचने
यदृते जीवितुमेव नोत्सहे ॥ २८ ॥

रचयानिमिषं विशारदे !
जरतीवञ्चक मञ्चकं मुदां ।
निभृतेन पथा भजे वने
प्रियसङ्केतित कुञ्जमन्दिरं ॥ २९ ॥

सखि ! किं करवै रवैरवै-
धिततर्षा हरिगोपुरोदितैः ।
वलभीमधिरोढुमप्यहं
न दधे ऽस्पन्दवपुः समर्थतां ॥ ३० ॥

---

पितामहस्य पर्य्यन्यस्याभिप्रेतमाह । हे वल्लवगोप ! यत्नेत्रशिशिरीकरणं विना जीवितुमेव नोत्सहे ॥ २८ ॥

प्रियागणानामभिप्रेतमाह । हे विशारदे ! आलि ! जरतीवञ्चकं अथच मुदामञ्चकं प्रापकं मिषं छलं रचय । अहंनिभृतेनपथावनमध्ये-प्रियसङ्केतितकुञ्जमन्दिरंभजे ॥ २९ ॥

हरेर्गोपुरादुदितैरवैः शब्दैःकरणैरवैधितावर्द्धितातृष्णायस्याः एवंभूताहं हे सखि ! किंकरवै किन्तु कृष्णंद्रष्टुं आटालीइतिप्रतिद्धां वलभी अधिरोढुं समर्थतांनदधे । यतोहंअस्पन्दवपुः जाड्योद्-यात् ॥ ३० ॥

अलकैरलमत्र संस्कृतै
र्मदुरो ऽप्यस्तुतमामनावृतं ।
सकृदप्यवलोक्य माधवं
सखि ! जीवेयमितो विमुञ्च मां ॥ ३१ ॥
अयि भावि यदस्तु तत् पतिः
कुरुतां दण्डमसह्यमद्य मे ।
स्वगुरोरपि पश्यतो व्रजा
म्यधुनायं समयोऽनयत् स्थिरः ॥ ३२ ॥
अयि दुर्म्मुखि ! रारटाषि किं ?
किमिहैकैव निरेमि ते गृहात् ।
कलयात्र रुणद्धि का वधू
रधुना स्वस्व-पुराद्विनिर्यतीः ॥ ३३ ॥

---

हे सखि ! संस्कृतैरलकैरलं व्यर्थं एवमनावृतमेव ममवक्षःस्थलमस्तु तस्मान्मांमुञ्च ॥ ३१ ॥

अन्याआह । अयि सखि ! मम अदृष्टे भावि यदस्तु तत् असह्यं दण्डं ममपतिः अद्यकुरुतां तस्मात् पश्यतः स्वगुरोः पश्यन्तं स्वगुरुं अनादृत्य अधुना अहं व्रजामि । यत्यस्मात् श्रीकृष्णस्यायंगमनसमयोनस्थिरः ॥३२॥

अन्याश्वश्रूं प्रत्याह । तेतवगृहात् किं एकैवाहं निरेमि निर्गच्छामि । काश्वश्रूःस्वस्वपुरान्निर्गच्छन्तीः वधूरधुना रुणद्धि अपितुनकापि इति स्वनेत्रेण कलय पश्य ॥ ३३ ॥

अथ गो-भवनाद्वनाय गा
वनजाक्षः सखिभिः स चारयन् ।
प्रससार मसारसारभाः
परितोऽग्रे हरितो विलक्षयन् ॥ ३४ ॥

भवता विरहेण तावता
पितरौ तापितरौ तदात्वजैः ।
पृषतै र्नयनाम्भसां रसा
मनुयान्तौ भृशमभ्यषिञ्चतां ॥ ३५ ॥

तनयानवलोकभाविता
स्मृति विस्मारित दैहिक क्रिये ।
प्रतिमे इवमातरौ तदा
क्षणमस्पन्दतनू अतिष्ठतां ॥ ३६ ॥

---

अथानन्तरं वनजाक्षः जलजाक्षः कृष्णः सखिभिःसह गो-सदनात् वनाय गाश्चारयन् प्रससार जगाम । मसारःइन्द्रनीलमणिः कृष्णस्य-विशेषणं दिशो वा विशेषणम् तत्पक्षे श्रीकृष्णस्याङ्गकान्त्यैव श्यामवर्णाः । किं कुर्व्वन् अग्रे परितश्चतुर्दिक्षु हरितो दिश विलक्षयन् दर्शयन् पक्षे दिशः दिग्वासिजनान् विस्मापयन् विलक्षोविस्मयान्विते ॥ ३४ ॥

तावता अल्पकालमात्रस्थातव्येन अथच भवता वर्त्तमानकालीनेन । विरहेण हेतुना तापितरौ अतिशयतापिनोपितरौ अनु कृष्णस्य पश्चात् यान्तौ तदात्वजैस्तत्कालोत्पन्नै र्नयनाम्भसां पृषतैर्विन्दुभिः रसां पृथ्वीं भृशं अभ्यषिञ्चतां ॥ ३५ ॥

तनयस्य कृष्णस्यानवलोको भाविता भविष्यति इतिस्मृत्या विस्मा-

निदधे परिरम्भ दम्भतः
स्वसुते किं स्वहृदेव गोपराट् ।
द्रुतमेव तदा यदाततं
स्वमचैतन्यमतन्यतामुना ॥ ३७ ॥

सुकुमारकुमार ! चारयन्
सुरभीर्याहि वनाय यासि चेत् ।
अनुयाम वयञ्च वञ्चय
न दृश स्त्वं स्फुटमञ्च किञ्च नः ॥ ३८ ॥

तनय ! प्रणयन्नयं नय
स्वसमीपात् क्वचनान्यतो न नः ।

---

रिता वैहिकक्रिया याम्यां एवम्भूते मातरौ रोहिणीयशोदे प्रतिमे इव ॥ ३६ ॥

गोपराट् व्रजराजः परिरम्भदम्भतः आलिङ्गनछलात् किं स्वसुते कृष्णे स्वहृत् मनः निदधे । यत् यस्मात् अमुना व्रजराजेन तदापरिरम्भणानन्तर क्षणएव स्वं स्वीयं आततं विस्तृतं अचैतन्यं अतन्यत विस्तारयामास । तथाच भाविविरहजन्यात्यन्तचैतन्यशून्यादेव उत्प्रेक्षेयमितिज्ञेयं ॥ ३७ ॥

हे सुकुमार पुत्र ! चेत् यदि हठंकृत्वा सुरभीश्चारयन् वनाय यासि तदायाहि किन्तु वयञ्च अनु तत्पश्चात् याम किञ्च नोऽस्माकं दृशो वञ्चयन् त्वं स्फुटं न अञ्च न गच्छ ॥ ३८ ॥

हे तनय ! नयं नीतिप्रणयन् कुर्व्वन् स्वसमीपादन्यत्र कुत्रापिनोऽस्मान् न नय । एवं तववियोगानल-ज्वालाहेतुकां असदादिसुहृद्व्यथां

न सहस्व सुहृद्व्यथां हृदि
स्ववियोगानल-हेतिहेतुकां ॥ ३९ ॥
पुरभूषण! दूषणं त्विदं
नगरी सेयमिमे गृहाश्च ते ।
त्वयि निर्गत एव नोऽबला
न्निगिलन्तीव वृथा स्थितायुषः ॥ ४० ॥
प्रहरा अपि भाविनस्त्रयः
प्रहरिष्यन्त्यपयातुमक्षमाः ।
न च शीघ्रमिहैष्यसि त्वमि
त्यत इत्थं करवाम किं वयं ॥ ४१ ॥
अरुणाब्ज-दलश्रेणी क्व ते
सुकुमारे विमले पदोस्तले ।

---

स्वहृदि न सहस्व । तथाचासद्धादि दुःखस्मरणात्तवपश्चात्तापोभविष्यत्यतोऽस्मान् स्वसङ्गे नय इतिभावः ॥ ३९ ॥

हे पुरभूषण कृष्ण ! इदं दूषणंतुभविष्यति । किंतत् तत्राह । ते तव सेयंनगरी इमेगृहाश्च त्वयि निर्गतेसति नोऽस्मान् वलात् गिलन्तीव । ननुनिगिलने कृतेसति युष्माकं जीवनं कथंस्थास्यति तत्राह अस्मान वृथायुषः । वृथायुरेव जीवनस्थितौकारणमितिभावः ॥ ४० ॥

अपयातुमक्षमास्त्रयः प्रहराअपि अस्मान् प्रहरिष्यन्ति त्वं च शीघ्रं न एष्यसि अतः किं करवाम ॥ ४१ ॥

अरुणकमलदलतुल्या श्रीः शोभा ययोरेवम्भूते सुकुमारे तवपदो-

तृण-कण्टक-शर्कराङ्किता
क्व नु सा काननभूमिरेषि यां ॥ ४२ ॥
मृगनाभि-रसोक्षिता क्व ते
नवनीत-प्रतिमेव हा तनुः ।
क्वनु सूर्य्यकरा इमे प्रति-
क्षणवर्द्धिष्णुतमा विषोल्वणाः ॥ ४३ ॥
असवो यदमी स्फुटन्ति नो
जनयित्र्या स्तव सौभगोज्झिता ।
अतिनिष्ठुरता पदे परां
वत साम्राज्य धुरामतो दधुः ॥ ४४ ॥
धवलाः परिपान्तु वल्लवाः
स्वयमेव व्रजराज एतु वा ।

---

स्तले या क्व एवं यां भूमिं त्वं एषि गच्छसि सा तृणकण्टकाद्यङ्किता भूमिर्या क्व ॥ ४२ ॥

हा खेदे कस्तुरीरसेन युक्त नवनीत-प्रतिमातुल्या तव तनुर्वा क्व एवं प्रति क्षणवर्द्धिष्णुतमा अथच विषतुल्योल्वणाः सूर्य्यकिरणाः वा क्व ॥४३॥

ममप्राणाधिक् जीवन्ति इति प्रतिक्षण न्यक्काराद्धेतोः सौभगेनोज्झिताः तव जनन्या असवः प्राणा यद्यस्मात् न स्फुटन्ति अतोहेतोऽतिनिष्ठुरतापदे स्थाने साम्राज्यातिशयं ते प्राणा दधुः अत्यन्त निष्ठुरा बभुवुरित्यर्थः ॥ ४४ ॥

मम वनगमनंविना गोचारणं कथं भविष्यति तत्राह । वल्लवा गोपा-स्तत्रधवलाः परिपान्तु । यदि गृहस्वामिनांगमनं विनाअधर्म्मभावीत्युच्यते

स्वहठं न जहासि हा शिशो !
कथमत्र श्वसितु स्वबन्धुता ॥ ४५ ॥
स्तिमिताङ्ग ! सुमङ्गलामृतै
रजनिष्ठाः किमु वल्लवान्वये ।
तृणचारिगणानुगामिता
परिभूतिं मृदुलो यदन्वभूः ॥ ४६ ॥
इति गद्गदवर्णमर्णवो
विनयानां जननीजनोदितं ।
अवगम्य विरम्य यानतः
स न तस्थौ न तदा तदग्रतः ॥ ४७ ॥
कुलकं ।
अथ निर्यदपि स्व जीवितं
स्थिरतां प्राप्तमिव प्रबुध्य सा ।

तदाव्रजराजएवगच्छतु । बन्धुता बन्धुसमूहः कथंश्वसितु प्राणधारणं-करोतु ॥ ४५ ॥

वात्सल्यस्यपरमकाष्ठामाह । शोभन मङ्गलरूपामृतैःकरणैः हेस्तिमि-ताङ्ग कृष्ण त्वं किं कथं वल्लवान्वये गोपगृहे अजनिष्ठाः यद्यस्मात् तृणचारिगणानां गवां अनुगामितारूपपराभवं एतादृशमृदुलोपित्वं-अन्वभूः । तस्मात्त्वराजगृह एव जन्म उचितं भवतीत्यर्थः ॥ ४६ ॥

इति अनेन प्रकारेण जननीजनानां उदितं गद्गदवर्णं विनयानामर्णवः स श्रीकृष्णः अवगम्य वनयानतोविरम्य च तासां अग्रे न तस्थौ न अपि तु तस्थावित्यर्थः ॥ ४७ ॥

निर्गच्छदपि स्वजीवनं यथास्थिरतां प्राप्तं तथैव कृष्णं प्रबुध्य सा

तनयं स्नपितं निजाश्रुभि
श्चिरमाश्लिक्षदिमं व्रजेश्वरी ॥ ४८ ॥

द्रुतमात्मज-शर्म्मकर्म्मठा
मुदिता वत्सलतैव सम्विदं ।
स्फुटमापिपदेव तां बला
द्विनिरस्यैव ततां विचित्तताम् ॥ ४९ ॥

अभिरक्ष्य नृसिंह-नामभिः
सुत-गात्राण्यतिमात्रविक्लवा ।
बलभद्रसुभद्रवर्द्धन-
प्रमुखान् साभिदधे पुरःस्थितान् ॥ ५० ॥

भवतामनुजः सखासवो
ऽप्ययमेवेति सदा न वेद्मि किं ? ।
तदपि प्रतिवासरं प्रभूः
किमृते जीवति पिष्टपेषणां ॥ ५१ ॥

---

व्रजेश्वरी निजाश्रुभिःस्नपितं तनयं चिरकालं व्याप्य आश्लिक्षत् आलिङ्गनंचकार ॥ ४८ ॥

आलिङ्गनानन्दजन्यविचित्ततायाः निवृत्तिकारणमाह । आत्मजस्य शर्म्म कर्म्मठां रक्षाबन्धनादिमङ्गलकर्म्मणिकुशलां व्रजेश्वरीं तत्काले उदित वात्सल्यमेव सम्बिदं ज्ञानं द्रुतमापिपत् प्रापयामास । किं कृत्वा ततां विस्तृतां विचित्ततां बलात् विनिरस्य ॥ ४९ ॥

अत्यन्तविक्लवा सा यशोदा सुभद्रादीन् अभिदधे ॥ ५० ॥

भवतां युष्माकं अयं कृष्णः अनुजः सखा आसवः प्राणाश्चइति किं

मृदुलोऽपि चलाग्रणीः सुधी
रपि नागात् परिणामदर्शितां ।
अवलोप्यतिसाहसी हरि
स्तदिमं साध्ववताभितः स्थिताः ॥ ५२ ॥

न पितु र्न पितृव्यसंहते
र्न च मातुर्वशतां तथैत्यसौ ।
भवतां तु यथैत्यतोऽर्थना
मम नानर्थकतां प्रपत्स्यते ॥ ५३ ॥

यदि कंस नृशंसकिङ्करा
सुर विस्फूर्जितमीक्षितं भवेत् ।
द्रुतमेव तदा पलाय्य गा
अपि हित्वा निखिलाः समेत नः ॥ ५४ ॥

---

अहं न वेद्मि तथापि प्रतिवासरं प्रतिदिनं वनगमनसमये प्रसूर्माता पिष्टपेषणं विना किं जीवति ॥ ५१ ॥

अयं हरिर्मृदुलोऽपि चञ्चलाग्रणीः सुधीरपि परिणामदर्शितां न अगात् अतएव युयं अभित श्चतुर्दिक्षु स्थिताःसन्तःइमं साधु अवत रक्षत ॥ ५२ ॥

असौ कृष्णः पित्रादीनां तथा वशतां न एति यथाभवतां अतो मम प्रार्थना न अनर्थकतां प्रपत्स्यते ॥ ५३ ॥

यदि कंसस्य क्रुरकिङ्करासुराणां विस्फूर्जितं आटोपईक्षितं भवेत् तदा द्रुतमेवपलाय्यगाअपिहित्वा निखिलायुयं ग्राममध्ये आगत्यास्मान् समेतप्राप्नुत ॥ ५४ ॥

सुबलोज्ज्वलकोकिलादयो
न नियुद्धं प्रसभं शुभंयवः ।
तनुतात्म-सखेन खेलनै
र्न किमन्यैर्भुवि भूयते नृणां ॥ ५५ ॥
शृणुतापचितौ विचक्षणा
अपि भो रक्तक पत्रकादयः ।
कथयामि निसर्गमेतयोः
सुतयोर्म्मतमवैतुमर्हथ ॥ ५६ ॥
विधुरावपि हा क्षुधा न तां
न पिपासामपि कण्ठशोषिणीं ।
स्वतनूमपि नावगच्छतः
खलु खेलार्पितमानसाविमौ ॥ ५७ ॥

हे सुबलादयः शुभंयवः यूयं आत्मसखेन श्रीकृष्णेन सह नियुद्धं बाहु युद्धं न तनुत । अहं शुभयोर्युस् । ननु बालका वयं खेलां विना स्थातुं न प्रभवामस्तत्राह । नृणां किं अन्यैःखेलनै र्नभूयते ! किं बाहुयुद्धं विना अन्यखेलनं नास्तीत्यर्थः ॥ ५५ ॥

अपचितौ परिचर्य्यायां विचक्षणा रक्तकादयो दासाः युयं एतयोर्निसर्गं स्वभावं कथयामि शृणुत । तं स्वभावं युयं अवैतुं ज्ञातुं अर्हथ ॥ ५६ ॥

स्वभावमेवाह क्षुधा क्षुधया विधुरौ दुःखितावपि इमौ तां क्षुधां नावगच्छतः यतः खेलार्थितमानसौ ॥ ५७ ॥

सरणिस्तरणि-प्रभाज्वलत्
सिकता सूनुरटाव्यते ऽद्य यां ।
जनके कनकेष्टकालये
वसतीत्येतदवेक्षते प्रसूः ॥ ५८ ॥

अनयाप्यविपद्यमानया
गृहकृत्यं विदधानया मया ।
जननीत्यभिधा धृता गत
त्रपया तां स्तुवते ऽप्यमी जनाः ॥ ५९ ॥

कुलिशायितता तता ततो
भवतो बन्धुतया निजार्जिता ।
कुसुमायितहृत्त्वमाश्रयं
स्तदपीमां स्वगुणैरमूमुदः ॥ ६० ॥

अधुना यशोदा व्रजराजमाक्षिपति । यां सरणिं पन्थानं सूनुरटाट्यते पुनःपुनर्गच्छति सा सरणिरद्य सूर्य्यप्रभया उज्ज्वलत्सिकता बालुका यत्र तथाभूता । अथ जनके पितरि स्वर्णेष्टकानिर्मित शीतलगृहे वसति सति । एतदेव प्रसू माता अवेक्षते ॥ ५८ ॥

स्वमाक्षिपति अविपद्यमानया नन्दस्य दुर्नातिदर्शनेपि अम्रियमानया अथच गृहकृत्यं विधानया कुर्व्वत्या मया कथं जननी इतिसंज्ञा धृता । अन्यजनानपि आक्षिपति एतादृशीं जननीमपि अमी जनाःस्तुवते ॥५९॥

श्रीकृष्णमाह । ततो भवद्वनगमनदर्शनाद्धेतोः तव बन्धुतया बन्धुसमूहेन तता विस्तृता कुलिशायितता वज्रायितता स्वस्य अर्जिता तदपि त्वं तु कुसुमायितहृदयत्वं आश्रयन् सन् इमां बन्धुतां स्वगुणैरमूमुदः ॥ ६० ॥

इति मातृवचः स च श्रुति
प्रथितोत्तंसमिवारचय्य तां ।
स्मितचन्द्रमसो रसोक्षणै
रनुतप्तां समधुक्षयन्मनाक् ॥ ६१ ॥

यमुनोपवनोपकण्ठगाः
कलयन्तः सुखमेव हन्त गाः ।
विलसाम सुगन्धशीतले
निविडच्छायतरुव्रजान्तरे ॥ ६२ ॥

न च कालनहेतुकः श्रमः
स ममैष्यत्यपि सम्भविष्णुतां ।
घटनादिषु यद्गवां नवां
मुरलीमेव विशारदामघां ॥ ६३ ॥

---

स च कृष्णः इतिमातृवचः श्रुतौ प्रथितोत्तंसमिव उत्कृष्टत्वेन ख्यातकर्णभूषणमिव आरचय्य तां अनुतप्तां मातरं स्मितचन्द्रस्य रससेचनैः मनाक् समधुक्षयत् प्राप्तजीवनां चकार ॥ ६१ ॥

अधुना कृष्णःस्वस्य गोचारणेश्रमाभावं साधयितुं प्रत्युत तस्य सुखमयत्वं प्रतिपादयितुंच मातरं प्रत्याह । यमुनोपवनोपकण्ठगताःगाः सुखं कलयन्तः पश्यन्तः तरुसमूहान्तरे विलसाम ॥ ६२ ॥

न च गवां कालनहेतुकः श्रमः सम्भविष्णुतां एष्यति न च तादृश श्रमो भविष्यतीत्यर्थः । यत् यस्मात् गवां घटनादिषु विशारदां नवीनां मुरलीमेवाहं अधां ॥ ६३ ॥

चमरीचयलूम-मार्जिता
परिषिक्ता मकरन्द-विन्दुभिः ।
तरुषण्डनिरातपाभितः
प्रचरन्नाभिमृगातिवासिता ॥ ६४ ॥

मृदुलामलतूलिकेव या
ऽनुपदं साधु पदानुभूयते ।
न तु मातरवेक्षिता त्वया
प्रसभं या सरणिर्विनिन्द्यते ॥ ६५ ॥

युग्मकं ।

विविधद्युति पुष्पवल्लिभि
र्वलितैर्म्मन्दसमीर-वेल्लितैः ।
परितः प्रसरज्झरैररं
शिशिरैः सौरभ-सौभगोदयैः ॥ ६६ ॥

---

हे मातः ! प्रसभं हठात् या सरणिर्विनिन्द्यते सा त्वया न अवेक्षिता इति परश्लोकस्थेनान्वयः । कथम्भूतासरणिः चमरीसमूहस्य पुच्छेन मार्जिता । पुनश्च मकरन्दविन्दुभिः परिषिक्ता । नाभिमृगःकस्तूरी ॥६४॥

या सरणिः मृदुलनिर्मलतुलिका इव ममपदा अनुपदं प्रतिक्षणं अनुभूयते ॥ ६५ ॥

गोवर्द्धनतट-कुञ्जकन्दरैर्ममचेतोऽनुपदं प्रतिक्षणं विकृष्यत इति परश्लोकेनान्वयः । कथं भूतैः विविधकान्तिविशिष्टपुष्पवल्लिभि र्वलितैः । पुनश्च मन्दपवनेनवेल्लितैः कम्पितैः । तत्रस्थलतायाः कम्पनादेव कन्दरस्य कम्पनत्वं । पुनश्च परित इति । अतएव अरं अति·

पिकगायक केकिनर्त्तकै

र्भ्रमदिन्दिन्दिरवृन्दवन्दिभिः ।

क्षितिभृत्तट कुञ्जकन्दरै

र्ममचेतो ऽनुपदं विकृष्यते ॥ ६७ ॥

युग्मकं ।

मणिमन्दिरवृन्द शन्दता

मनयद्यच्छविरेव मन्दतां ।

सवयश्चयभूषितः शये

सुखमत्राप्यतिखिद्यसे कुतः ॥ ६८ ॥

इति किञ्च नतदृगञ्चलं

चलितं संसदलक्षितं रहः ।

---

शयेन शिशिरैः । सौरभेन सौभाग्यस्य उदयो यत्र । पिक एव गायकः मयूर एव नर्त्तको यत्र । भ्रमद्भ्रमरसमूह एव वन्दीयत्र ॥ ६६ ॥ ६७ ॥

यस्यतादृश कन्दरस्य छविः तत्रमणिमन्दिरसमूहस्य शन्दता सुखदत्वं मन्दता मनयत् । सवयसां समूहेन पुष्पादिना भूषितोहं अत्र कन्दरायां सुखशये इति मातरं प्रत्युक्तं । राधा प्रभृतिं प्रतितु तादृश कन्दरे प्रेयसीनां समूहेन भूषितः सन् शये । इति हेतोः हे जननि: कथं खिद्यसे ॥ ६८ ॥

सवयश्चय भूषित इत्युक्तवतः कृष्णस्य संसदां सभास्थजनानां अलक्षितं चलितं दृगञ्चलं कर्त्तृ । रहः एकान्ते । रमणीमणिः राधिका तस्या दृशोस्तटी एव नदी तां द्रुतं शीघ्रं आ[illegible]यत् । तादृशनटीं कथ-

रमणीमणि-हृकूतटी नटीं
द्रुतमाश्लिष्यददति द्रुतां द्रुतं ॥ ६९ ॥
इतरेतरवृत्त वेदना
चतुरे चारु यदाहतुः स्म ते ।
तत एव युवद्वयासवः
स्थिरतामेतुमधुः सूसाहसं ॥ ७० ॥
वटुराह किमम्ब! दूनतां
तनुषे स्वां शृणु तत्वमत्र यत् ।
अधिकाननमस्ति यत् सुखं
न च तस्याणुरपीह वः पुरे ॥ ७१ ॥
कदली-पनसाम्र-दाड़िम
प्रभृतीन्याशु निपात्य वृक्षतः ।

---

स्भूतां आलिङ्गनादेव अतिशयेन द्रुतां द्रुती भूतां । कृष्णस्य हृगञ्चलं द्रुत द्रुती भूत ॥ ६९ ॥

इतरेतरवृत्तस्य परस्परं नेत्रद्वारा अभिसारप्रार्थना । एवं तत्र सम्मति रूप वृत्तान्तस्य या वेदना ज्ञापना तत्र चतुरे ते राधाकृष्णयोर्हगञ्चले यत्ताहृशावृत्तान्तं आहतुःस्म । ततएव युवद्वयस्य राधाकृष्णयोः असवः प्राणाः स्थिरतां प्राप्तं अधुनातु साहसमात्रं अधुः पश्चात् स्थास्यति न वेति को वेद ॥ ७० ॥

मधुमङ्गल आह । हे अम्ब ! स्वां दूनतां कथं तनुषे ? अत्रतत्वं शृणु । अधिकाननं कानने यत् सुखं अस्ति तस्य सुखस्य अणुरपि वो युष्माकं पुरे न च ॥ ७१ ॥

वनस्थ सुखमेवाह । कदल्यादि फलानि वृक्षतो निपात्यास्माभिर

परिपक्वतया सुसौरभा
ण्यशनीयानि तदैव नः सुखम ॥ ७२ ॥
फल-पल्लव-पुष्प-संग्रह
स्पृहया कल्पलताततेरयं ।
वनमेति सखा न सा भव
द्भवने साधुतयास्य पूर्य्यते ॥ ७३ ॥
इत्थं वन्धुकुलातुलाधिदलनो हम्वानिनादै र्गवा
माहूतो ऽति वुभुक्षयापि तमृते नैकं पदं गच्छतां ।
तेषा तादृशता प्रदर्श्य पितरौ यत्नान्निवर्त्याच्युत
श्चक्राब्जादिपदाङ्कितो वनभुवं कान्तां मुदा
मण्डयत् ॥ ७४ ॥

शनीयानि । वृक्षतः पातनादेवनोऽस्माकं सुखं न तुगृहे स्थित्या पक्वस्य । तस्य निस्वादात् ॥ ७२ ॥

अयं सखा कल्पलताततेः फलादीनां संग्रहेच्छया वनं एति । अस्य कृष्णस्य सा स्पृहा भवद्भवने न पूर्य्यते । अतिशयोक्त्या कल्पलता राधाद्या । फल पल्लव पुष्पाणि स्तनाधरहास्यानीति वोध्यं ॥ ७३ ॥

इत्थं अनेन प्रकारेण वनगमन सुख कथनेन वन्धुवर्गाणां अतुल मनोव्यथा दलनः अच्युतः अतिवुभुक्षयापि तं श्रीकृष्णं विना एकपद मपि न गच्छतां गवां हम्वानिनादैराहूतः सन् तेषां गवां तादृशतां मां विना एकपद मपि न, गमनाभिमुखतां प्रदर्श्य पितरौ यत्नान्निवर्त्य चक्राब्जादि पद चिह्नेन वनभूमिस्वरूपां कान्तां मुदा अमण्डयत् ॥ ७४ ॥

मद्विच्छेदरुजोऽनुभावकमहो चेतः प्रियाणामत
स्तन्नीत्वा निजसङ्ग एव विपिनं यामीतियाते हरौ ।
कोनः स्याद्विषयोऽन्य इत्यनुययुस्तेषां दृशोवेश्म तु
स्वस्ववर्ष्मभिरेव संस्कृतिवशान्मुक्तोपमास्ते
ऽविशन् ॥ ७५ ॥

इति श्रीभावनामृते महाकाव्ये काननप्रयाणानु-
मोदनो नाम सप्तमः सर्गः ।

---

अधुना वनं गच्छतः श्रीकृष्णस्य सङ्गिनां पित्रादीनां मन उत्प्रेक्षते । प्रियाणां समस्तप्रियवर्गाणाश्चेत एव मद्विच्छेदजन्यपीडाया अनुभावकं । अतस्तन्मनः निज संगे एवनीत्वा वनंयामीति विचार्य्यमनसः ग्रहणंकृत्वा हरौजाते सति तेषां प्रियवर्गाणां दृशोपि श्रीकृष्णादन्यः कोनोऽस्माकं विषयस्यादिति विचार्य्य अनुश्रीकृष्णस्य पश्चात् ययुः । ननु तेषां मन आदीन्द्रिये श्रीकृष्णेन हृते सति कथं गृहगमणादिव्यापारनिर्व्वाहस्तत्राह । स्वस्वं वेश्म गृहं तु वर्ष्मभिःशरीरैः संस्कारवशादविशन् । मुक्तोपमा इतिजीवन्मुक्ता । यथा संस्कारवशात् देहव्यापारंकुर्व्वन्ति तथेत्यर्थः ॥ ७५ ॥

समाप्तोयं सप्तमः सर्गः ॥

---

# अष्टमः सर्गः ।

रामणीयक निधौ विधौ वनं
हा प्रविष्टवति संकलय्य गाः ।
गोष्ठकैरवगतातिवेदना
या न सा भवति गोचरो गिरः ॥ १ ॥
नैव चारयितु मीशते स्म गा
स्तं विना निजनिजा व्रजावलाः ।
स्वापयन्त्य इव ता विचित्तता
स्वां सखीमिव चिराय शिश्रियुः ॥ २ ॥
सैव काप्यखिलगोपशुभ्रवा
मेकिकैव विपदालितां यती ।

रामणीयकनिधौ विधौ श्रीकृष्णे गाः संकलय्य वनं प्रविष्टवति सति गोष्ठस्य कैः प्राणिभि र्या अतिवेदना अवगता सा गिरो गोचरो न भवति । पक्षे तादृशविधौ चन्द्रे गाः किरणान् प्रातःकाले सङ्कलय्य वनं जलं प्रविष्टवतिसति गोष्ठकैरवैः गिरिजलेषु स्थितैः कुमुदादिभि र्या अति वेदना अवगता ॥ १ ॥

व्रजावला निजनिजाःगाः इन्द्रियाणि तं कृष्णं विनाचारयितुं नैव ईशतेस्म । अतएव सर्व्वाव्रजावलाः ताः गाः स्वापयन्त्य इव विचित्ततां मूर्च्छां स्वां सखीमिव चिरकालं व्याप्य शिश्रियुः आश्रयंकृतवत्यः ॥२॥

अति अनिर्व्वचनीयासा विचित्तता एकिका एव निखिलगोप

संज्वरं शमयितुं गृहे गृहे
व्यानशे सपदि योगिनीव ताः ॥ ३ ॥
श्लिष्यसि प्रियसखीममङ्गले !
किं त्वमित्यसकृदालि-तर्जनात् ।
किं भियेव परितत्यजे तया
मूर्च्छयाशु वृषभानुनन्दिनी ॥ ४ ॥
चेतनाहि गुरुकष्ट-केतना
भ्यन्तरं यदपि तामवीविशत् ।
आलयस्तदपि तां द्विषन्तिन
प्रेमवस्तु वद कैर्निरुच्यतां ॥ ५ ॥
प्रेषिता ललितया तदालयः
पेशला जनतयाप्यलाल्लिता ।

---

सुभ्रुवां विपदालितां विपत्कालीनसखितां यती प्राप्नुवती सती तासां श्रीकृष्णविरहजन्यसंज्वरं शमयितुं ताः गोपीः गृहे गृहे व्यानशे । तदानीं सर्व्वासां मूर्च्छा वभूवेति पर्य्यवसितार्थः । यथा योगिनी कामचारित्वात् एकदैव सर्व्वत्र व्याप्नोति ॥ ३ ॥

तासां मध्ये ललितादिसखीभिः प्रवोधिता वृषभानुनन्दिनी तया मूर्च्छया तत्यजे । तदानीं ललितादिकर्त्तृक प्रवोधनं मूर्च्छादूरकारकतर्जनत्वेन उत्प्रेक्षते । हे अमङ्गले ! मूर्च्छे मम प्रियसखीं राधां त्वं किं आश्लिष्यसि ? स्वस्य भद्रमिच्छसि चेत् दूरे गच्छ इतिअसकृत्सखी तर्जनात्भिया किं तत्यजे ॥ ४ ॥

ननु विरहज्वर शमनकारिकां मूर्च्छां कथं प्रेमवत्यो ललितादयो दूरीचक्रुरिति पूर्व्वपक्षे प्रेम्णोऽविचिन्त्यत्वमेव समाधानं । तदेवाह । चेतना

भूभृदन्तिक मुपेत्य सौरभं
भेजुरुन्नतमुदो वनस्रजः ॥ ६ ॥
शाद्वले ऽतिशिशिरे सरस्तटे
गाः प्रवेश्य सखिभिर्विहृत्य सः ।
प्रास्य चान्नमपि तैर्धनिष्ठया
नीतमाप स वटू रहो हरिः ॥ ७ ॥
तत्र वीक्ष्य मुदितासु तासु तं
प्राह काचन खनिर्गुणश्रियां ।
रूपमञ्जरिरपारसौभगा
पृष्टयौवतमणि-प्रवृत्तिकं ॥ ८ ॥

---

यद्यपि अतिशयकष्टरूप गृहस्याभ्यन्तरं तां राधां अवीविशत् तदापि आलयस्तां चेतनां न द्विषन्ति किन्तु उपकारिणीं मूर्च्छां द्विषन्ति अतः प्रेमवस्तु कैर्जनैर्निरुच्यतामिति वद ॥ ५ ॥

तदा ललितया प्रेषिताः पेशलाश्चतुरा आलयः जनसमूहेनाप्यनक्षिताः सत्यःभूभृदन्तिकं गोवर्द्धनस्य निकटं उपेत्य कृष्णस्य वनमालायाः सौरभं भेजुः अतएव ता उन्नतमुदःबभूवुः ॥ ६ ॥

सकृष्णःशाद्वले कोमलतृणे स हरिद्वर्णे अथच शीतले मानस सरस्तटे गाः प्रवेश्य एवं विहृत्य विहारं कृत्वा अन्नं प्रास्यच मधुमंगलेन सह रहः एकान्तंमाप ॥ ७ ॥

तत्र एकान्ते तं श्रीकृष्णं वीक्ष्य मुदितासु तासु सखीषु सतीषु तासां मध्ये गुणश्रियां खनिरथच अपारसौभगा काचन रूपमञ्जरीकृष्णमाह कृष्णं कीदृशं पृष्टा यौवतमणेःराधायाः प्रवृत्तिवृत्तान्तं येन तं ॥ ८ ॥

नागरेन्द्र भवता यदा पदा
लिङ्गिता विपिनभूर्दधे श्रियं ।
स्पर्द्धयेव तव गोष्ठभूस्तया
लिङ्ग्यत स्व-सुषमां ददानया ॥ ९ ॥

त्वं हरे ! हरिमणीमयीं व्यधाः
क्ष्मामिमां निजसर्व्वतार्पणैः ।
साप्यधास्यत विवर्णतां न चे
त्ताञ्च काञ्चनमयीं व्यधास्यत ॥ १० ॥

गोरजश्छुरित मास्य मीक्षयं
स्त्वं वनौकस इमानरोदयः ।
हन्त गोरजसि चेष्टमानया
स्वालयः किल तयापि रोदिताः ॥ ११ ॥

---

श्रीकृष्णेन पृष्टं राधिकाया वृत्तान्तं रूपमञ्जरी अन्यापदेशेनाह । हे नागरेन्द्र ! भवता चरणेनालिङ्गिता सती विपिनभूः श्रियं शोभां दधे । तच्छ्रुत्वा तया राधया तव स्पर्द्धया इव त्वच्चरण चिह्नेन प्राप्तशोभाया वनभुवः सकाशात् गोष्ठभुवोऽधिकां स्वकीयसुषमां ददानया तया सा-गोष्ठभूः सर्व्वाङ्गेन आलिङ्ग्यत । धन्यर्थः स्पष्टएव ॥ ९ ॥

हे हरे त्वं निज सवर्णतार्पणैः इमां क्ष्मां हरिमणीमयींव्यधाः । स्पर्द्धया सा राधापि तव पराजयेऽसहिष्णुना अनुकुलेन विधात्रा कृतां विवर्णतां चेत् यदि न अधास्यत तदा तां क्ष्माञ्च काञ्चनमयीं व्यधास्यत धन्यर्थः स्पष्टः ॥ १० ॥

त्वं गोरजश्छुरितं मुखं ईक्षयन् सन् इमान वनौकसः अरोदयः । स्पर्द्धया तया राधयापि गोरजसि चेष्टमानया सख्या स्वालयःरोदिताः ।

किन्त्वनीतिरियमीक्षणाम्बुजे
सन्ततामबुजनके तया कृते ।
ते तु पौत्रमुचितं प्रचक्रतुः
कर्दमो ऽम्बुजभवोद्भवो यतः ॥ १२ ॥
माल्य-केश-वसनादयः समु-
च्छृङ्खलत्व मतिसाधवो ऽप्यधुः ।
भूभुजा विरहितेऽपि नीवृति
स्यात् क्व कस्यचन वा नियम्यता ॥ १३ ॥
यत्तवाङ्घ्रिवनजद्वयं वनोत्-
सङ्ग एव विहरत् प्रमोदते ।

---

राधापक्षे गोः पृथिव्याःरजसि । त्वं तुप्राणिमात्रं अरोदयः सा तु स्वसखी-रेवारोदयत् अतएव तव साम्यं न प्राप्ता इतिभावः । स्वन्यर्थः स्पष्टः ॥११॥

— किन्तु राधया इयं अनीतिःकृता । अनीतिमेवाह । तया राधया ईक्षणाम्बुजे निरन्तराम्बुजनके कृते । अम्बुजन्यस्य अम्बुजनकत्वमेवा-नीतिः । ते तु ईक्षणाम्बुजे तु कर्दमरूपं उचितं पौत्रं प्रचक्रतुः । ननु कर्दमस्याम्बुज पौत्रत्वे सत्येव औचित्यं तदेव कुतस्तत्र शास्त्ररीत्या पौत्रत्वं घटयति कर्दमइति । यतः अम्बुजभवो ब्रह्मातदुद्भवःकर्दमः । लोकरीत्या तु नेत्रस्वरूपाम्बुजाज्जातानि जलानि तेभ्यः पृथिव्यां कर्दमो-जायत एवेत्यर्थः ॥ १२ ॥

राधाया माल्यादयः अतिसाधवोपि उच्छृङ्खलत्वं अधुः । तत्र कारणमाह । भूभुजा राज्ञा विरहितेऽपि क्व नीवृति कुत्र देशे कस्य वा नियम्यता स्यात । प्रकृते राजा कृष्णः देशः राधाया अङ्गं ॥ १३ ॥

राधिका तव विरहेण न पीड़िता किन्तु अत्यन्त कोमलचरणस्य तव वनभ्रमणजन्यदुःखेनैव पीड़ितेति प्रेम्णः परमकाष्ठां भङ्ग्या आह ।

तत्र विश्वसिति सा न निःश्वसि-
त्युष्णमेव बहुधापि बोधिता ॥ १४ ॥
नैव तत्र कटुशर्कराङ्कुरे
त्यर्द्धवागपि सखी-मुखोद्गता ।
श्रोत्र-सीमपतितैव तां परि-
क्रोशयन्त्यथ जवादमूर्च्छयत् ॥ १५ ॥
हन्त ते प्रियतमः समागतो
वीक्ष्यतामिति सखीमृषोक्तिभिः ।
त्वद्वन-स्रगतिसौरभैश्च सा
प्राप्य बोधमति संभ्रमं दधौ ॥ १६ ॥

यद्यस्मात्तवांघ्रिरूपवनजद्वयं वनोत्सङ्ग एव विहरत् सत् प्रमोदते । नहि वनजन्यस्य दुःखं पितुर्वनस्य उत्सङ्गे कदापि जायते प्रत्युत प्रमोद एव इति बहुधा बोधितापि सा राधा तत्र असद्वाक्ये न विश्वसिति किन्तु मनोगतदुःखादत्युष्णमेव निस्वसिति । प्रकृते वनं जलं तस्माज्जात-मब्जिकमलद्वयमित्यर्थः । अत्र शब्दश्लेषमाश्रित्यैवोक्तं ॥ १४ ॥

तस्याः पीड़ाशान्त्यर्थं कया सख्या उक्ता। तत्र नैव कटु शर्कराङ्कुरेत्य-र्द्धवागपि राधायाः श्रोत्रसीमनि पतिता एव तां राधां परिक्रोशयन्ती सती जवात् वेगात् अमूर्च्छयत् । तादृशशब्दश्रवणादेव तव चरणं शर्करादिना विद्धमिति बुद्ध्वैव सा मूर्च्छां प्राप्ता । अत्यनुरागवशात् शर्करादिना न विद्धमिति तस्या मनसि नायात मितिभावः ॥ १५ ॥

मूर्च्छाया अनन्तरं । हे राधे ! ते तव प्रियतमः श्रीकृष्णः समागतः उत्थाप्य वीक्ष्यतां इति सखीमृषोक्तिभिरेवं मूर्च्छाभङ्गार्थमेवास्माभिः रक्षितायास्तव वनमालायाः नासिकासंलग्नायाः सौरभैश्च सा राधा-बोधं प्राप्य तवागमनजन्यलज्जया अति सम्भ्रमं दधौ ॥ १६ ॥

आलि ! नेत्रमदिरैकनर्त्तकः
स क्व ते सखि ! गृहे ऽस्ति निह्नुतः ।
किं प्रतारयसि नैव साक्षि य
द्वक्ति तं किल तदङ्गसौरभं ॥ १७ ॥
इत्यलम्भि सुखमेतया मनाक्
तन्न सोढुमशकन्मनोभवः ।
एकदैव शरपञ्चकस्य य
ल्लक्षतामनयदेव तां बलात् ॥ १८ ॥
स्विद्यति स्म पतति स्म वेपते
स्माश्रुभिः स्वमभिषिञ्चती गृहं ।
सा प्रविश्य न भवन्मुखेन्दुना
प्राप शीतलयितुं स्वलोचने ॥ १९ ॥

---

मूर्च्छाभङ्गानन्तरं राधिकाआह। हे आलि ! ते तव नेत्ररूप खञ्जनस्य नर्त्तकः स कृष्णः क्व। हे सखि राधे ! गृहमध्ये निह्नुतोऽस्ति। राधा आह किं मां प्रतारयसि ? राधे नैव प्रतारयामि यद्यस्मात् तस्य कृष्णस्य साक्षिस्वरूपं अङ्गसौरभमेव तं कृष्णं वक्ति। तस्या मूर्च्छाभङ्गसमये सखीभिः संगोप्य स्थापितायां वनमालाया मध्ये कृष्णाङ्ग सौरभं वर्त्तत एव राधाया अपि कृष्णाङ्ग सौरभप्राप्त्या तस्या गमन प्रत्ययोजातः ॥१७॥

इति गन्धहेतुना गृहमध्ये निह्नुत्य स्थितत्वेन ज्ञानात् एतया राधया मनाक् सुखं अलम्भि। तत्सुखं कन्दर्पः न सोढुं अशकत् यद्यस्मात् एतां राधां पञ्चशरस्य लक्षतां बलात् अनयत् पक्षे लक्ष संख्या विशिष्टतां। निरङ्कार लक्षशब्दोपि वैयाकरणवाचकः ॥ १८ ॥

हा सखी-जनवचो ऽनृतंमन
स्त्वं मुदा ऽमृतममं वृथा कृथाः ।
संज्वरो द्विगुणितो यतो द्यति
त्वामितीयमपतत् पुनः क्षितौ ॥ २० ॥

त्वां धिगस्तु रहितं स्व-बन्धुना
जीवितेत्यलघुगर्हयाप्यहो ।
नो मनागपि तदाप लाघवं
प्रत्युतातिगुरुभारतामगात् ॥ २१ ॥

हन्त कान्तविरहेऽपि किं महत्
सौकुमार्यं मुदियाय सुभ्रुवः ।
अङ्गकानि यदसु-प्रभञ्जन-
स्पन्दनं च न हि सोढुमीशते ॥ २२ ॥

---

त्वदागमनज्ञानेन उत्पन्न कन्दर्प मालायास्तस्या दशामाह । स्विद्यतीति ॥ १९ ॥

गृह मध्ये श्रीकृष्णमदृष्ट्वा राधिका आह । हा खेदे हे मनस्त्वम नृतं सखीजनवचः मुदा आनन्देन अमृतसमं वृथा कृथाः यतः द्विगुणितः संज्वरः त्वां द्यति खण्डयतीत्युक्त्वा इयं राधा पुनः क्षितौ अपतत् ॥ २० ॥

अधुना निन्दति हे जीवित स्वबन्धुना कृष्णेन रहितं त्वां धिगस्तु इति अलघुगर्हया अधिकनिन्दयापि अहो अत्याश्चर्य्यंमनागपि तत् जीवितं न लाघवं आप । प्रत्युत अति गुरुभारतामगात् । तेन राधाया स्त्वां विना जीवनधारणमेवातिभारोऽभूदिति व्यङ्गार्थ्योबोध्यः ॥२१॥

हन्त खेदे सुभ्रुवो राधायाः कान्तविरहेऽपि किं महत् सौकुमार्य्यं उदियाय उदितमभूत् यद्यस्मात् तस्या अङ्गकानि असुप्रभञ्जनस्य प्राण

इत्यवेत्य मधुसूदनः प्रियो-
दन्तमन्तरुदघूर्णतातुरः ।
बाष्प-पूर्णनयने निरुध्य वा
गक्षिपत् प्रियसखास्यमण्डले ॥ २३ ॥

तामुवाच वटुरानय द्रुतं
राधिकां कनकपद्मिनीं वनं ।
अन्यथा किमवनं भवेद्गतिः
सैव हन्त मधुसूदनस्य यत् ॥ २४ ॥

माधवोऽथ निज-माल्यमर्पयं
स्तां व्यजिज्ञपदिदं च किञ्चन ।

वायोरपि स्पन्दनं सोढुं न ईशते किं पुनर्व्यंजनादिवायोः । अङ्गकेति क्षीणताव्यञ्जकः कः । अतएव सौकुमार्य्यस्यावधिरुक्तः भङ्ग्या तु त्वद्विरहेण तस्याः प्राणवायुरपि गत इत्यर्थो ध्वनितः ॥ २२ ॥

प्रियाया वृत्तान्तमवेत्य अन्तरुद्घूर्णत आतुरः कृष्णः शोकेन रुद्धवाक्सन् वाष्पपूर्णं नयने मधुमङ्गलस्य मुखे अक्षिपत् । मम वचना सामर्थ्यात् प्रत्युत्तरं त्वयैवोच्यतामितिभावः ॥ २३ ॥

श्लेषेण वनं जलं पद्मिनीं आनय । तथाच श्रीकृष्णरूप जलं विना अन्यत्र स्थापितायाः पद्मिन्याः दुःखे भवतीनामनवधान मेव कारण मितिभावः । ध्वनिना तादृशार्थमुक्त्वा अभिधया श्रीकृष्णस्यासक्तिमाह । अन्यथेति । अन्यथा पद्मिनीं विना मधुसूदनस्य किं अवनं रक्षणं भवेत् ? यतस्तस्य सैव गतिः ॥ २४ ॥

माल्यं अर्पयन् सन् तां रूपमञ्जरीं इदं किञ्चनमजिज्ञपत् ज्ञापयामास । ज्ञापनमेवाह । मम एषा उद्धृता स्वकण्ठादुत्तीर्णा चम्पकमाला प्रेयस्या हृद्गितास्तु पक्षे प्रेयसी राधिकैव चम्पकस्रक्रूपा मम हृदिगताअस्तु ।

प्रेयसी-हृदि गतास्तु चम्पक-
स्रङ् ममाद्य सखि ! सेयमुद्गता ॥ २५ ॥
वृत्तमाख्यदखिलं समेत्य सा
राधिकामथ तया वरस्रजः ।
श्लेषणाप्तरमणाङ्गसौरभैः
स्वीयजीवितमकारि जीवितं ॥ २६ ॥
प्रेयसि स्वविरहोग्र वृश्चिक
व्रातदंशविधुरे श्रुते पुनः ।
तद्विषज्वलन जर्जरं तदै
वान्वभावि निजमर्म्म शर्म्मभित् ॥ २७ ॥
सूर्य्य पूजन मिषेण वञ्चनं
वाञ्छति प्रियसखीगणे गुरोः ।

---

उद्गता उत्कर्षेणात्र प्राप्ता आसीत्(?) । तथाच मयादत्तां चम्पकमालां तस्या हृदिनिधाय राधिका स्वरूपां चम्पकमालां आनीय मम हृदि देहीतिभावः ॥ २५ ॥

तदनन्तरं सारूपमञ्जरी राधिकां समेत्य समागम्य निखिलं वृत्तान्तं आख्यत् । अथ तया राधया वरस्रजः श्लेषणेन प्राप्त रमणाङ्ग सौरभैः करणैः मृतप्रायं स्वीय जीवितं जीवितं जीवन विशिष्टं अकारि ॥ २६ ॥

राधया स्वविरहरूपोग्र वृश्चिकसमूह दंशनेन विधुरे दुःखिते प्रेयसि श्रीकृष्णे श्रुते सति तस्य कृष्णस्य स्वविरह-रूप वृश्चिक दंशन जन्य विष ज्वलनेन जर्जरं निज मर्म्म तदैवान्वभावि । अतएव निज मर्म्म कथम्भूतं शर्म्मभित् वनमाला गन्ध जन्य सुखंभिनत्तीति ॥ २७ ॥

सूर्य्य पूजन मिषेण गुरोर्व्वञ्चनं सखीजने वाञ्छति सति भाग्यवशात्

शैव गर्ग तनया गिराचिरा
दे्त्य तत्र जटिलादिदेश ताः ॥ २८ ॥
अर्च्चनाय विपिने सहस्रगो
रर्व्वुदायुत गवाप्तिहेतवे ।
यात शातमिदमद्य तन्यतां
भास्वता नयन दैवतेन वः ॥ २९ ॥
सानुकूल विधिनाधिनाशिना
साधिताभि मतसिद्धिरालिभिः ।
प्रेष्ठरोचित मनेकधोचित
द्रव्यजातमचिरात् समग्रहीत् ॥ ३० ॥

सैव गुरुर्जटिला एव गर्गतनया गार्गी तस्या गिरा अचिरादेव तत्र सखी सामग्रे एत्यताः तखीः सूर्य्यपूजायै आदिदेश ॥ २८ ॥

अयुतगवाप्तिहेतवे सहस्रगोः सूर्य्यस्यार्च्चनाय युयं विपिने यात सरस्वत्यातु सहस्रसंख्यका गावो विद्यन्ते यस्य तस्य कृष्णस्यार्च्चनाय । अयुतसंख्यकानां गवां सुखानां श्रीकृष्णकान्तीनां वा प्राप्तिहेतवे इत्यर्थः कृतः । नयनाधिदैवतेन भास्वता सूर्य्येण वो युष्माकं शातं सुखं अद्य तन्यतां । पक्षे भास्वता कान्तिमता कृष्णेन स तु तासां नयनाधिदैवश्च भवत्येव ॥ २९ ॥

आधिनाशिना अनुकूलविधिना साधिताभिमतसिद्धिः सा राधा आलिभिः सह प्रेष्ठस्य रोचितं अथचानकधा उचितं द्रव्यसमूहं समग्रहीत् ॥ ३० ॥

मोदकान्यमृतगर्व्व सन्तते
नोदकान्यकृत राधिका स्वयं ।
वल्लभानि रमणस्य नो भवे
ल्लभा निधिपति प्रभोरपि ॥ ३१ ॥

धूपदीप वरवस्त्र भूषणा
द्यंशुमालियजने ऽस्त्यपेक्षितं ।
तत् समाहृति निवन्धनस्तया
यः कृतः कतिपय क्षणाश्रयः ॥ ३२ ॥

तं विलम्व मवलम्वनोज्झितः
सोढुमुत् कलिकयाऽतितीव्रया ।
केशवोनचुलुकी कृतातुल
स्थैर्य्य धैर्य्य जलधि स्तदाशकत् ॥ ३३ ॥

---

अमृतस्य गर्व्वसन्ततेर्नोदकानि खण्डकानि मोदकानि श्रीकृष्णार्थं राधिका स्वयमकृत । कथम्भूतानि रमणस्य कृष्णस्य वल्लभानि प्रियाणि । येषां मोदकानां लभा प्राप्तिः निधिपतिः कुवेरस्तस्य प्रभोः महादेवस्यापि नो भवेत् ॥ ३१ ॥

अंशुमालिनः सूर्य्यस्य यजने यत् धूपादि अपेक्षितं तस्य समाहृति निवन्धनस्तया राधया कतिपयक्षणाश्रयः कृतः तं विलम्वं अवलम्वनेन उज्झितः अर्थान्निरवलम्वः श्रीकृष्णः अतितीव्रया उत्कण्ठया सोढुं न अशकदिति परश्लोकेन सहान्वयः ॥ ३२ ॥

यतः स कृष्णः उत्कण्ठया चुलुकीकृतोऽतुलस्थैर्य्यधैर्य्यरूप समुद्रो यस्य तथाभूतः ॥ ३३ ॥

प्राहिणोन्मुरलिकां स्व दूतिका-
मच्युतः श्रुतियुगे विधृत्यया ।
प्रेयसीं निजकलेन लम्भयेत्
कण्ठमस्य कनकस्रजं यथा ॥ ३४ ॥

यैव सम्भ्रमतरङ्गिणी महा
वर्त्तमन्वकिरदेवतां तदा ।
देवतां किमुजवादवीविशत्
काञ्चनापनुदतीं भियोह्रियः ॥ ३५ ॥

कुत्र वा स्म पततो ऽङ्घ्रिपङ्कजे
पाणिपल्लवयुगं किमाददे ।
किंचनापि न विवेद सा यतः
स्नापिताश्रुसलिलैरकम्पत ॥ ३६ ॥

---

अच्युतः स्वदूतिकां मुरलीं प्राहिणोत् । या मुरली निजकरेण । पक्षे निज कलएव करस्तेन श्रुतियुगे विधृत्य कनकस्रजरूपां प्रेयसीं अस्य कृष्णस्य कण्ठे लम्भयेत् । कनकस्रक् यथा जडतया परवशा तथा इयमपीति भावः ॥ ३४ ॥

मुरली दूती सम्भ्रमरूपतरङ्गिन्या नद्या महावर्त्तमनु महावर्त्ते तदा तां राधां अकिरदेव । उत्प्रेक्षामाह । मुरली दूती ह्रियो भियश्च लज्जा भयांश्च अपनुदतीं दूरीकुर्वतीं काञ्चन देवतां किं तस्या मनोमध्ये जवात् अवीविशत् ॥ ३५ ॥

मुरलीश्रवणात्तस्या दशामाह । कुत्रवांघ्रिपङ्कजे पततःस्म एवं पाणियुगलं किं आददे यतो मुरलीश्रवणात् सा राधा किञ्चन न विवेद । अश्रुसलिलैः स्नपिता सती अकम्पत ॥ ३६ ॥

कानना भिसरणोचितांशुका
कल्पवेषपरिधापनोन्मुखीः ।
सा सखीरपि विलम्वशङ्कया
क्षिप्य वेषमकृत स्वयं तनोः ॥ ३७ ॥

गोस्तनाख्यमणिहारवेष्टनै
र्द्राङ्नितम्बमकरोदलङ्कृतं ।
कण्ठमन्वधित किङ्किणीं स्रजं
मूर्द्ध्नि वेणिशिखरे ललाटिकां ॥ ३८ ॥

लोचने मृगमदद्रवाञ्जिते
भालमञ्जनविशेषकाञ्चितं ।
हन्त यावकरसेन निर्ममे
स्थासकं तनुमनूत्थितत्वरा ॥ ३९ ॥

काननाभिसरणोचित वस्त्रादिपरिधापनोन्मुखीः सखीरपि सा राधा विलम्बशङ्कया आक्षिप्य स्वयमेव तनोर्वेषमकृत ॥ ३७ ॥

किङ्किणीबुद्ध्या गोस्तनाख्यमणिहारवेष्टनैर्द्राक् नितम्बं अलंकृतमकरोत् । गुच्छगुच्छार्द्धं गोस्तनाइत्यमरः । कण्ठमनु कण्ठे हार बुद्ध्या किङ्किणीमधित । मूर्द्ध्नि स्रजमधित । वेण्यग्रे ललाटिकामधित ॥ ३८ ॥

अञ्जनबुद्ध्या मृगमदद्रवेण लोचने । भालं मृगमदबुद्ध्या अञ्जन विशेषकेण अञ्जननिर्म्मित तिलकेन अञ्चितं । तमुमनु तनौ । उत्थितत्वरा सा राधा स्थासकं खोर इति प्रसिद्धं निर्म्ममे ॥ ३९ ॥

नीलमञ्जुलनिचोलसंवृता
माधुरीव निरगात् पुराद्बहिः ।
कौमुदीव घनतां गताक्षितौ
किंघनेन निहितात्मनोऽन्तरे ॥ ४० ॥

आलिभिः सह पुरोपकानन-
प्रान्तवर्त्म-निहिताङ्घ्रिपल्लवा ।
ह्रीक्षपा-क्षयवशादवगुण्ठनो
न्मुक्तमास्यकमलं दधे स्फुटं ॥ ४१ ॥

गीर्विनोदमपि वेणुरीहते
साम्प्रतं सकल शास्त्रवित् स्वयं ।

---

नीलवस्त्रेणावृतां राधां उत्प्रेक्षते । कौमुदी ज्योत्स्ना किं क्षितौ घनतां निविडतां पक्षे मेघतां गता । मेघवाचकोपि घनशब्दः अतः शब्दश्लेषमाश्रित्य उत्प्रेक्षान्तरमाह । सा घनेनैव वस्त्ररूपमेघेनैव कर्त्रा किं आत्मनोऽन्तरे मध्ये निहिता ॥ ४० ॥

सखीभिः सह पुरस्य उपकाननप्रान्तवर्त्मनिहिताङ्घ्रिपल्लवा राधिका ह्रीक्षपाक्षयवशात् लज्जारूपरात्रिक्षयवशात् घोँघट इति प्रसिद्धेन अवगुण्ठनेन मुक्तं आस्य कमलं स्फूटं व्यक्तं दधे । अवस्याकार लोपः । कमल पक्षे रात्रिक्षयात् अवगुण्ठनं कमलकलिकाया मुद्रितत्वं तेन मुक्तं अतएव प्रस्फुटितं कमलं ॥ ४१ ॥

पुराद्वहिर्निःसरणेन लज्जापगमात् । तासां परस्पर वाग्विला-समाह । अयि सखि वेणुः पण्डित जनवत् साम्प्रतं गीर्विनोदमीहते । पण्डित साधर्म्यमाह । यतः सकलशास्त्रवित् । वेणुपक्षे स वेणुः कलस्य

मूकतां पटुतरापि यत् पिक
श्रेणिरेति तदियं सुसभ्यता ॥ ४२ ॥
वेणुनाह्वयति गा हरौ तृणो
द्भेदतोद्रुम मरन्दवृष्टितः ।
भूरपि प्रवर रोमहर्षभाक्
स्वेदिनी च सहसा रसादभूत् ॥ ४३ ॥
कीर-कोकि-पिक-संहतेरपि
स्तम्भमाप रभसात् सरस्वती ।
आप आपुरपि निम्नगाश्रिता
यज्जडत्वमिह का विचित्रता ॥ ४४ ॥

---

शास्त्रंवेत्ति। एवं पटुतरापि पिकश्रेणी यत् मूकतां एति तत् इयं सुसभ्यता स्वतोऽधिकस्य निकटे मूकत्वमेव सभ्यत्वं ॥ ४२ ॥

हे गावः समागच्छत इति वेणुना गा हरौ आह्वयति सति पृथिवी प्रभृतिनाना पदार्थबोधकस्य गोशब्दस्य स्वस्मिन्तात्पर्य्यभ्रमेण जातं यत् श्रीकृष्ण कर्त्तृकाह्वानं तेन पृथिव्यादीनामानन्दोत्थभावं वर्णयति बहुभिः श्लोकैः। तृणोद्भेदतोभूरपि रोमहर्षभाक् एवं द्रुममरन्द वृष्टितः स्वेदिनी च अभूत् । रसात् आनन्दात् ॥ ४३ ॥

गोशब्दस्य वाक्यपरत्वं जलपरत्वञ्चाशङ्क्याह । कीरादि संहतेरपि सरस्वती वाणीरभसात् हर्षात् स्तम्भंआप । निम्नगाश्रिता आपो जलानि यज्जडत्वमापुः तत्र का विचित्रता । यतः सरस्वत्या अपि तात्पर्य्यभ्रमेण एताहशी दशाचेत् निम्नगाया स्तस्या जाड्ये किमाश्चर्य्यं ॥ ४४ ॥

उन्मिषद्घन मुदश्रुधारिणी
द्यौरपि स्वमति सौभगास्पदं ।
साध्वमंस्त हिममन्दमारुतै
र्वीजयत्यपि दिगालिरीलिता ॥ ४५ ॥

शब्द एष न हि कण्ठवृत्तिकः
स्व प्रयोक्तुरपियो विनेच्छया ।
स्वार्थमात्रपर एव सम्भ्रमं
गा नयेदतितरां यतोऽखिलाः ॥ ४६ ॥

यात्वभूदभिधया प्रति स्वम
प्युद्गत श्रुतिरवाप्तसंमदा ।

स्वर्गदिक् परत्वाभिप्रायेणाह । उन्मिषद्घनात् उदयं प्राप्नुवन्मघात् मन्दवर्षारूपहर्षाश्रुधारिणी द्यौः स्वमति सौभग्यास्पदं साधु अमंस्त पक्षे उदयन्मेघमिति स्वस्य विशेषणं । उदश्रुधारिणीति स्वतन्त्रं । मन्दमारुतैः श्रीकृष्णं वीजयतीति दिक्श्रेणी ईलिता वेणुना स्तुता अर्थात् आहूता सती स्वं तादृशं अमंस्त । स्वर्गेषु पशुवाग्वज्रदिङ्नेत्र घृणिभूजल इतिनानार्थः ॥ ४५ ॥

एषः शब्दः वेणुध्वनिः नहिकण्ठवृत्तिकः । यः शब्दः प्रयोक्तुः श्रीकृष्णस्य इच्छयाविनापि स्वार्थमात्रपर एवयतः अखिला गाः पृथिव्यादीः सम्भ्रमं नयेत् । पक्षे एष गोशब्दः न विद्यते व्यञ्जनादिरूपा कण्ठवृत्तिर्यस्य तथाभूतः स्वप्रयोक्तुरिच्छया विनापि तात्पर्य्यभ्रमात् पृथिव्यादि स्वार्थ सामान्यपर एवयतोऽखिलागाः पृथिव्यादीः सम्यक्भ्रमं मामेवा ह्वयति मामेवाह्वयतीत्यादि लक्षणं नयेत् । आलङ्कारिकमते नानार्थ शब्दस्य एकत्र शक्तिः अन्यार्थस्तु व्यञ्जनयैव बोध्यते ॥ ४६ ॥

या तु गवांततिः अभिधया नाम्ना पक्षे शक्त्या प्रोक्तुरभिप्रेतया हेतुना

हन्त हम्ब इति सापभाषयै
वोत्तरं प्रतिददौ गवां ततिः ॥ ४७ ॥

वेणुना स्वरगणाः कृताः सह
ग्रामजातिभिरनेन मूर्छिताः ।
मूर्छिता यदभवन् स्वरङ्गना
एनमत्र तदुपालभेत कः ॥ ४८ ॥

पर्व्वतोऽपलवरा अपि द्रवं
पर्व्वतोऽतिशयतः प्रपेदिरे ।
सर्व्वतोप्यधिककक्खटाः कथं
सर्वतोऽपि दधिरे ऽधिकां रतिं ॥ ४९ ॥

प्रति स्वं उद्गतकर्णाअभूत् । सा हम्ब इति अपभाषयैव प्रत्युत्तरं ददौ अतएव भिन्नोपक्रमार्थस्तुकारः ॥ ४७ ॥

अनेन वेणुना गानप्रभेदरूपाभिः ग्रामजातिभिःसह स्वरगणा मूर्च्छिताः कृताः । अत्र यद्यस्मात् विन्द्वागमभ्रमात् स्वरङ्गना मूर्च्छिता अभवन् तत्तस्मात् एनं श्रीकृष्णं अत्र विषये क उपालभेत अनुयोगं दातुं शक्नोति । शकिलिङ् चेतिलिङ् ॥ ४८ ॥

पर्व्वतस्य उपलवराः प्रस्तरश्रेष्ठाः अतिशयतः पर्व्वतः अतिशयोत्सवात् द्रवं प्रपेदे । सर्व्वं वस्तुतोऽपि अधिक कक्खटाः कठोरा उपलवराः कथं सर्व्वतो महादेवादपि अधिकां रतिं दधिरे । सर्व्ववस्तुतोपि एतेषां द्रवातिशयात् । गौरीव सर्व्वान्तः प्रधानभूतेति वासवदत्तायांद्रत्योपि सर्व्वं शब्दः महादेव वाचकः ॥ ४९ ॥

स्वं स्वमास्पदमुपाश्रिता यतः
साम्प्रतं खग-मृगाः पिपासवः ।
प्राप्यवारि परिसारि हारि ते
सम्भ्रमात् पपुरपूर्व्वकौतुकाः ॥ ५० ॥
कृष्णसार इति नाम-सार्थकं
स्वं दधावयमहो दयोदधिः ।
द्वेष्टि नो गिरिधरानुरागिनीः
प्रत्युतैति सुखयन्निजाङ्गनाः ॥ ५१ ॥
तास्तु तं सखि ! विधाय पृष्ठतः
कृष्ण-संजिगमिषातितृष्णया ।
यान्त्य एव जडतां श्रिताः श्रुते
वेणुनाद इह चित्रिता वभुः ॥ ५२ ॥

स्वं स्वं आस्पदं वासस्थानं आश्रिता एव पिपासवः ते खगमृगाः यतो मुरलीशब्दात् साम्प्रतं प्रस्तरद्रवरूपंवारि जलं प्राप्य सम्भ्रमात् पपुः । कीदृशं जलं परिसर्व्वतः प्रसरणशीलं एवं हारि मनोहारि ॥५०॥

अयं कृष्णसारः श्रीकृष्ण एव सारोयस्येतिसार्थकं स्वंनाम दधौ । यतो गिरिधरानुरागिणीः निजाङ्गनाः नो द्वेष्टि प्रत्युत ताः सुखयन् प्रतिगच्छति ॥ ५१ ॥

ता मृगाङ्गनाः तं मृगं पृष्ठतो विधाय श्रीकृष्णेन सह सङ्गेच्छायां अति तृष्णयायान्त्यः पथि वेणुनादे श्रुते सति जडतां श्रिताः सत्यः चित्रिता वभुः । तथाचास्माकं स्वामी एव कृष्ण निकटगमने प्रतिवध्नाति आसांतु मुरली इति अस्माकं तासाञ्च फलतः साम्यमितिध्वनिः ॥५२॥

पान-काल उदिते ध्वनौ जले
चाश्मधर्म्मिणि सिताऽर्द्धचञ्चवः ।
आलवाल-गतपक्षिणः समुत्-
कीर्य्यमाणगरुतो विचुक्षुभुः ॥ ५३ ॥
इत्थमेव मुरलीस्वनामृतं
वर्णनेन सुरभीकृतं मुहुः ।
कर्णचारुचषकान्तराहितं
ता मिथोऽपि परिवेषितं पपुः ॥ ५४ ॥
स्तम्भ-कम्प-पुलकादयो गता
वन्तराय-निवहान्न किं व्यधुः ? ।
किन्तु शीघ्रमनुराग एव ताः
प्रापयन्मदरणाख्यवाटिकां ॥ ५५ ॥

जलपानार्थं आलवालगतपक्षिणः पानकाले वेणुध्वनौ उदिते सति एवं जले प्रस्तर धर्म्मं प्राप्ते सति च सिता बद्धाः अर्द्धं चञ्चवो येषां तथाभूताः सन्तः विचुक्षुभुः क्षोभं प्रापुः । कथम्भूताः सम्यक् उत्-कीर्य्यमाणा उर्द्ध्वे निक्षिप्यमाणा गरुतः पक्षा येषां । आपत्काले पक्षिणा-मयं स्वभावः ॥ ५३ ॥

ता राधाद्याः कर्णरूपपात्रे निहितं अथच परस्परं वर्णनाद्वारा परि-वेषितञ्च मुरलीस्वनामृतंपपुः ॥ ५४ ॥

तासां गतौ गमने स्तम्भादयः अन्तरायसमूहान् किं न व्यधुः अपि तु चक्रुरेव । किन्तु अनुराग एवेति । तथाचाचिन्त्ययोगमायया कृतात् स्थानसङ्कोचादेव तत्र जग्मुरित्यर्थः ॥ ५५ ॥

तत्र सूर्य्य-सदने प्रविश्य ता
स्तं प्रणम्य नुतिभिः प्रसादितं।
प्रार्थयन्तु हृदयैकवल्लभं
देव ! दर्शय दयोदधे ! द्रुतं ॥ ५६ ॥

पूजनोपकरणस्य रक्षणे
तस्य तद्विपिन-देवतां तदा।
सा निरूप्य चलितालिभिः सुखं
स्वं सरः सरसरम्यकाननं ॥ ५७ ॥

व्याततान वृषभानुजा-रुचि-
र्भूभृदन्तिकभुवः परिष्क्रियां।
श्रीहरेस्तदतिदूरवर्त्तिनो
ऽप्युल्ललास सहसा हृदम्बुजं ॥ ५८ ॥

भ्राजते प्रियतमालिभिर्वृता
पद्मिनी स्व-सरसीवनेऽधुना।

---

तास्तं सूर्य्यं प्रार्थयन्त ॥ ५६ ॥

तस्य सूर्य्यस्य पूजनेति। सरः कथम्भूतं सरसरम्यकुञ्जस्वरूप काननं यत्र ॥ ५७ ॥

वृषभानुजाया राधायाः रुचिः कान्तिः। पक्षे ज्यैष्ठमासोयसूर्य्या-दुत्पन्ना कान्तिः भूभृतो गोवर्द्धनस्य निकटवर्त्ति भुवः परिष्क्रियां भूषणं व्याततान विस्तारञ्चकार। एवं तस्मात् अतिदूरवर्त्तिनो हरे-रपि हृदयकमलं सहसा उल्ललास ॥ ५८ ॥

पद्मिनी स्वरूपा प्रियतमा राधिका आलिभिर्वृता सती स्व-सरस्या

इत्यबोधि मधुसूदनस्तदै
वात्रहेत्वनुपपत्ति-लिङ्गतः ॥ ५९ ॥
तद्दिशो ऽथ पवनस्तदङ्गजा
मोदमेतमनुभावयन्नभात् ।
सोऽपि चैनमचिरात्तदङ्गजा-
मोदलालसमचुक्षुभद्बलात् ॥ ६० ॥
वेणुवादन विधेर्विरम्य नै-
वैष्ट रोद्धुमनवस्थितं मनः ।
मालती-मधुरसौरभा कुल-
स्यालिनः क्वनुधृति स्तया विना ॥ ६१ ॥

वने कुञ्जे अधुना भ्राजते इति तदैव मधुसूदनः श्रीकृष्णः अबोधि । अत्र हेत्वनुपपत्तिलिङ्गतः स्वहृदयोल्लासान्यथानुपपत्ति प्रमाणतः अबोधि । कमलिनी पक्षे अलिभिर्वृता वने जले । मधुसूदनः भ्रमरः ॥ ५९ ॥

तस्या राधिकाया दिक्सम्बन्धी पवनः तस्या अङ्गसम्बन्ध्यामोदं एतं श्रीकृष्णं अनुभावयन् सन् अभात् । सोऽपि तदङ्गजामोदोऽपि तस्या राधाया अङ्गजामोदे । पक्षे तद्विषयक कन्दर्पसुखेलालसं एनं कृष्णं बलात् अचुक्षुभत् ॥ ६० ॥

कृष्णः वेणुवादनविधेः सकाशात् विरम्य उत्कण्ठया अनवस्थितं मनः रोद्धुं न ऐष्ट न समर्थो बभुवेत्यर्थः । तत्र दृष्टान्तः मालती-त्यादि ॥ ६१ ॥

तं तदैव मधुमङ्गलोऽब्रवी-
त्तन्मनोगतविदेव देववत् ।
किञ्चिदस्ति मम पिञ्छभूषण !
स्वीयकृत्यमिति यामि तत्कृते ॥ ६२ ॥

सूर्य्य-तीर्थमनु गर्ग एष्यति
स्नातुमद्य मुनिवर्ग-वन्दितः ।
ज्योतिषां गतिविधौ वुभुत्सिते
संशयं मम स एव भेत्स्यति ॥ ६३ ॥

प्राह केशिदमनो मनो ममा
प्युच्चचाल तदवेक्षणोत्सुकं ।
किन्त्ववैमि वहुमित्रसङ्गिता
प्राभव-प्रथनया नयात्ययं ॥ ६४ ॥

---

देववत् देवता यथा मनोगतं जानाति तथा कृष्णमनोगतवित् मधुमङ्गलः तं श्रीकृष्णं अब्रवीत् । हेपिञ्छचूड ! मम किञ्चित् स्वीयं कृत्यमस्ति अतएव तत्कृते तदर्थंयामि ॥ ६२ ॥

कृत्यमेवाह । अद्य मया भागुरिस्थाने ज्योतिःशास्त्रपाठार्थं गतं तत्र तु एको महासंशयो जातः स तु भागुरेरप्यसाध्यसमाधेयः अतोऽहं गर्गस्थाने यास्यामीत्याह । मदनरणवाटिकायां सूर्य्यकुण्डे गर्गः स्नातुं एष्यति अतो मम भुत्सिते ज्योतिषां सूर्य्यादीनां गतिविधौ संशयं स गर्ग एव भेत्स्यति ॥ ६३ ॥

कृष्णआह । तस्य गर्गस्य । किन्तु वहुमित्रसङ्गितारूपप्राभव प्रथनया विभवविस्तारेण हेतुना नयस्य नीतेरत्ययं अवैमिजानामि । तथाच महद्दर्शने दीनोभूत्वा एकाकी एव या स्यतीति नीतिः ॥ ६४ ॥

चेदियं भवति नीतिरत्र ते
का क्षतिस्त्वमहमित्युभाविव: ।
स्वस्तडागवर-मध्यमीहते
गन्तुमेष तरणिश्च सत्वर: ॥ ६५ ॥
शेरते स्म धवला इमा: सखे !
नीपषण्डमनु मेदुरं पुर: ।
साम्प्रतं शिशयिषून् सखीनिमान्
मा कदर्थय मुधैव खेलयन् ॥ ६६ ॥
इत्यकुण्ठ वटुपाटवादृतै-
स्तै:प्रयातमितिदत्तसम्मती ।
जग्मतु: प्रमदलाह्वनाद्द्रुतं
तौ मुदा प्रमदयाश्रितं सर: ॥ ६७ ॥

मधुमङ्गलआह । त्वं अहं उभौ इव: गच्छाव: । एष तरणि: सूर्य्य: सत्वर: सन् स्वर्गरूपतडागवरस्य मध्यं गन्तुं ईहते । तथाच मध्याह्न समय: प्रायोजात: गर्गोपि मध्याह्न कृत्यार्थं तत्र आगतप्रायस्तस्मात् शीघ्रं गच्छाव इति भाव: ॥ ६५ ॥

हे सखे ! मे दुरं स्निग्धं कदम्बषण्ड अनुलक्षीकृत्य इमा गाव: शेरते साम्प्रतं भोजनानन्तरं शयनेछून् सखीनपि खेलयन् मुधा व्यर्थं मा कदर्थय ॥ ५५ ॥

वटोर्म्मधुमङ्गलस्य इत्यकुण्ठपाटवेन आदृतैस्तै: सखिभि: हे कृष्ण ! हे मधुमङ्गल ! युवां प्रयातं इति दत्तसम्मती तौ परमोदला इतिख्या ताह्वनात् द्रुतं प्रमदया राधया आश्रितं सर: कुण्डं जग्मतु: ॥ ६७ ॥

क्वागमाव पुरतः सखे ! न गो-
वर्द्धनः खलु नगोऽयमीक्ष्यते ।
भूरियं च नहि गोष्ठवर्त्तिनी
सातकुम्भमयता यदेतयोः ॥ ६८ ॥

मेरुरेव किमिलावृतावृतः
स्पष्टमाविरभवत् व्रजेऽंशतः ।
किन्तु कान्तिलहरी-विगाहिनं
मां शरैः किमिति विध्यति स्मरः ॥ ६९ ॥

इति निगदति कृष्णे राधिका लोकतृष्णे
मधुरिम-भरपूर्णा सापि तत्राप घूर्णाः ।
तदपघनघनानां चारुराजद्वनानां
कलितविपुलतर्षैः कान्तिपीयूषवर्षैः ॥ ७० ॥

---

श्रीकृष्णस्यसचमत्कारदर्शनार्थं तदानीं योगमायया अनावृतया राधाकान्त्या कनकमयीकृतं गोवर्द्धनं तन्निकटवर्त्तिस्थलं च दृष्ट्वा श्रीकृष्ण आह । हे सखे मधुमङ्गल ! आवांकुत्र आगमाव पुरतोयं नगः पर्व्वतः न गोवर्द्धनः एवं इयं च भूमिर्न गोष्ठवर्त्तिनी किन्तु एतयोः सुवर्णमयता ईक्ष्यते ॥ ६८ ॥

स्वर्णमयइलावृतवर्षेणावृतः सुमेरुरेव किं अंशेन व्रजे स्पष्टमाविरभवत् ॥ ६९ ॥

मधुरिमभर एव जलं तेन पूर्णा सा सरसीरूपा राधापि तस्य कृष्णस्य अपघनघनानां शरीरस्वरूपमेघानां कान्तिरूपपीयूषवर्षैः सरसीपक्षे कान्त्या इच्छया पीयूषतुल्यवृष्टिभिः करणैः घूर्णाआप । वर्षैः कीदृशैः कलितःकृतः विपुलतर्षो यैः । पक्षे कलितः खण्डितः ।

विद्युच्चम्पकवल्लिकेति जलदस्तापिञ्छशाखीत्यत
द्भानानि व्यतिदर्शिनोर्यदभवन् दूरस्थयोः प्राकृतयोः ।
सोऽयं मे रमणः किमत्र रमणी सैवेयमित्यात्मकं
तद्भानञ्च तदापतुः पुनरहो तैरेव तादात्म्यतः॥७१॥

इति श्रीभावनामृते महाकाव्ये सङ्गवलीला-
स्वादनो नामाष्टमःसर्गः ॥

घनानां कथम्भूतानां चारुराजन्ति वनानि यतः । पक्षे वनानि जलानि यत्र ॥ ७० ॥

परस्परदर्शिनोर्दूरस्थयोस्तयोः राधाकृष्णयोः प्राक् प्रथमतः विद्युच्चम्पकलतामेघतमालवृक्षेत्याद्यतद्भानानि भ्रमात्मकभानानि अभवन् अहो आश्चर्य्यं पुनस्तैर्लतावृक्षादिज्ञानैरेव सोऽयं मे रमणः कृष्णः सेयं मे रमणी राधिका इत्यात्मकं तद्भानञ्च यथार्थभानञ्च तौ राधाकृष्णौ आपतुः । ननु लतावृक्षादिज्ञानात् कथं तयोर्भानं तत्राह । तादात्म्यत इति । लता वृक्षादिभिः सहितयोः समानाकारादित्यर्थः ॥७१॥

समाप्तश्चायमष्टमः सर्गः ॥

## नवमः सर्गः ।

आयातः सखि ! माधवो यदुदयाद्वल्लीमतल्ली-ततिः
फुल्लीभूय समन्ततः सुरभयन्त्युच्चैःश्रियं शिश्रिये ।
तेन त्वत्कुसुमेषु वाञ्छितधुरा सम्पत्स्यते सेत्स्यति
स्वाछन्द्यादिह पद्मिनीगण-पतेः
सेवापि ते ऽवाधिता ॥ १ ॥
मुग्धे ! पश्य दिधीर्षुरेष रभसान्मामाजिहीते हरि
नैशे हन्त पलायितुं वलदुरुस्तम्भा दधे वेपथुं ।

आयातं श्रीकृष्णं दृष्ट्वा अन्यापदेशेन राधिकां प्रति सखी आह । सखि राधे माधवो वसन्तः पक्षे कृष्णः आयातः । यस्य वसन्तस्य उदयात् श्रेष्ठवल्लीततिः फूल्लीभूय समन्ततः सुरभयन्ती सती श्रियं शोभां शिश्रिये दधारेत्यर्थः । कृष्णपक्षे वल्लीस्वरूपात्वं फुल्लीभूयेत्यादि । तस्मात्ते तव कुसुमेषु पुष्पेषु वाञ्छितधुरासम्पत्स्यते । पक्षे कुसुमेषुः कन्दर्पस्तत्र । एवं पद्मिनोगणपतेः सूर्य्यस्य । पक्षे कृष्णस्य अवाधिता सेवा अपि स्वाछन्ध्यात् सेत्स्यति ॥ १ ॥

राधिकाआह । हे सखि ! मुग्धे ! पश्य मां दिधीषु रेष हरिः रभसात् वेगात् आजिहोते आगच्छति ! ओहाङ्गतौ । पलयितुमपि नाहमीशे । अत्र आनन्दाज्जातं जाड्यादिकं भयजन्यत्वेन व्यापयति वलदिति ।

त्वं वाचापि न रक्षणे मम पटुः किम्वा हसस्युन्मदे
लोलाक्षी चपलासि लासि कुतुकं
हंहो भिया ऽहं म्रिये ॥ २ ॥
अस्याग्रेऽपि बिभेषि हन्त ललिताशौटीर्य्य सूर्य्यप्रभा
प्रध्वस्ताखिलदम्भशौर्य्यतिमिर-व्रातस्य मुग्धेक्षणे! ।
किञ्च त्वां भुवनत्रयाखिल सती चूडामणिं लम्पटः
स्प्रष्टुं साहसमेष धास्यति बला
त्तच्चापि न श्रद्दधे ॥ ३ ॥
ब्रूषे सत्यमयन्तु हन्त सरुषेवास्मासु साध्वी-व्रत-
ध्वान्तध्वंसनभास्करः प्रकटितो धात्रैव भूमण्डले ।

---

बलवानुरुस्तम्भो यस्या एवंभूता त्वं वेपथुं दधे । त्वं कुतुकं लासि-गृह्णासि अहं भिया म्रिये ॥ २ ॥

सखीआह । हे मुग्धेक्षणे ! हन्तास्य श्रीकृष्णस्याप्यग्रे त्वं बिभेषि । कृष्णस्य कथम्भूतस्य ललितायाः पराक्रम एव सूर्य्यस्तस्य प्रभया ध्वस्तोऽखिलदम्भादिरूपतिमिरसमूहो यस्य । किञ्च एष लम्पटः एवंभूतां त्वां बलात् स्प्रष्टुं साहसं धास्यति तच्चापि अहं न श्रद्दधे न प्रत्येमि ॥३॥

श्रीराधाआह । सत्यं ब्रूषे मम साध्वी त्वं एतादृशमेव किन्तु प्राचीनापराधवशात् अस्मासु सरुषाइव विधात्रा अयं लम्पटः साध्वी व्रतरूपान्धकारस्य ध्वंसनसूर्य्यस्वरूप एव प्रकटितः । एतेन साध्वीत्वस्य दुःखदायकत्वेनान्धकारसाम्यं ध्वनितं । यः सूर्य्यरूपः कृष्णः सर्व्वाः पद्मिनीः । पक्षे व्रजसुन्दरीः मुखमुद्रणाद्विरहिताः अर्थात् प्रफुल्लाः कृत्वा ताः पद्मिनीः स्वस्मिन् आसक्ता इति प्रवादमात्रं लोके

यः सर्व्वा मुख मुद्रणाद्विरहिताः कृत्वा वलात् पद्मिनीः
स्वासक्ता इति ताः प्रवादमधिकं
लोके नयन्नन्दति ॥ ४ ॥

एवं चेत् पुरतः प्रविश्य गहने कुञ्जे निलीय द्रुतं
दुर्व्वोधाध्वनि माधवेन सहसा द्वित्रा घटीर्यापय ।
तावन्नस्त्वदिनार्च्चनोद्यमजुषां पुष्पावचायः क्षणं
गान्धर्व्वेऽस्तु निराकुलोऽत्र किमितो
युक्तिः परादृश्यते ॥ ५ ॥

एवं तत्र मिथो विचारयति स स्वप्रेयसीनां गणे
मध्ये प्रादुरभूद् यथा कुमुदिनी-वृन्दे विधुः पर्व्वणि ।

---

नयन् नन्दति सुखं प्राप्नोति। तेन पद्मिनीनां यथा दूरस्थितेनैव सूर्य्येण प्रवादमात्रं न तु सङ्ग इतिदृष्टान्तसूचितेनानुरागेण स्थायिना तृष्णातिरेकोध्वनितः ॥ ४ ॥

सखी आह। एवंचेत् पुरतोऽग्रे गहणे कुञ्जे प्रविश्य द्रुतं निलीय द्वित्रा घटीर्यापय। कथंभूते कूञ्जे सहसा माधवेन दुर्व्वोधोऽध्वा यस्य तस्मिन्। पक्षे सा प्रसिद्धा त्वं माधवेन सह अन्यै र्दुर्व्वोधोऽध्वनि कुञ्जे द्वित्रा घटीर्यापय। हे गान्धर्व्वे ! तावत्पर्य्यन्तं त्वदीयस्य इनस्य पक्षे श्रीकृष्णस्य अर्च्चनजुषांनोऽस्माकं पुष्पावचायः तदवचयनं क्षणं निराकुलोऽस्तु। किं इतःपरायुक्तिर्दृश्यते अपितु न किमपि ॥५॥

एवं प्रकारेण प्रेयसीनां गणे परस्परं विचारयति सति स श्रीकृष्णः तासां मध्ये प्रादुरभूत्। यथा पर्व्वणि पूर्णिमायां। तां अवलाः अवहित्थयैव जनितैः संरम्भैः क्रोधैःकरणैः हर्षं समुद्रस्य वृहदूर्म्मिश्रेणीं

संरम्भैरवहित्थयैव जनितैस्ताः सैकतैः सेतुभि
र्हर्षाब्धेरतनूर्म्मि-मालिमवला रोद्धुं तदा रेभिरे ॥६॥
एकैकावयव-स्फुरन्मधुरिमावर्त्ते पतन्तस्तदा
तासामक्षितरि-व्रजाः द्रुतमधुर्घूर्णाः क्षणात्ते पुनः ।
मग्नीभूय रसाप्लुतान्तरतया विन्दन्त नीचीनतां
ये तु प्राहुरिदं ह्रियो विलसितं
तत्वं न ते जानते ॥ ७ ॥
तत्सौरभ्यमहाभटैः पटिमभिर्नासाध्वनान्तःपुरं
प्राप्तैर्धैर्य्यकपाटपाटनपरैस्तासां यदाभूयत ।
का यूयं वनलुण्टिका इति तदा साटोपवर्णा स्फुरत्
सौस्वर्य्यामृतवीचयः श्रुतिगता
स्तत्सर्व्वमाप्लावयन् ॥ ८ ॥

---

तदारोद्धुमारेभिरे आरम्भं चक्रुः । पक्षे अतनूर्म्मिः कन्दर्पोर्म्मिः । तादृशसंरम्भैः कीदृशैः सैकतैः सेतुभिः । समुद्रस्योर्म्मिश्रेणी वालुकानिर्म्मितसेतुभिर्यथा रोद्धुमारभते तद्वदित्यर्थः ॥ ६ ॥

श्रीकृष्णं दृष्ट्वा तासिर्लज्जया कृतं अधोमुखं प्रकारान्तरेण वर्णयति । श्रीकृष्णस्य एकैकावयवे स्फुरन्मधुरिमरूपजलस्यावर्त्ते तासां अक्षितरिव्रजाः नौकासमूहाः पतन्तः सन्तः द्रुतं घूर्णाः अधुः । ते नेत्ररूपतरिव्रजाः तदानीमेव पुनः क्षणमध्ये रसेन जलेन पक्षे श्रृङ्गार रसेनाप्लुतान्तरतया नीचीनतां अविन्दन्त प्राप्नुवन्त । ये तु इदं लज्जाविलसितं प्राहुस्ते तत्वं न जानन्तीत्यपह्नुत्यलङ्कारो बोध्यः॥७॥

तासां सखीनां नासाध्वना अन्तःपुरं प्राप्तैः तस्य श्रीकृष्णस्य सौरभ्यरूपमहाभटैः स्वपाटवैः करणैः सखीनां धैर्य्यरूपकपाटस्य

अप्राप्य प्रतिवाचमात्तरुडिव प्राहोद्भ्रमल्लोचनः
किं न ब्रूथमदान्मदालयसमोद्यानापहारोद्यताः ।
अद्यासाद्य ममोपकण्ठमुचितां संसद्यवस्थां परा
मप्याप्तुं कि मु वाञ्छथ स्फुटमतो
ब्रूताशु यूयं स्थ काः ॥ ९ ॥

तासामेष तदाप यत् प्रतिवचो नो का अपीत्यन्तरु
द्भूतस्मारविकार-वोधि मधुरं ह्रीलौल्य-शङ्कार्च्चितं ।
तद्द्यो वर्णयितुं क्षिताबुपमितिं मृग्येदयं नेतिने
त्यस्यन् वस्तु समस्तमत्र लभते
ब्रह्मज्ञ-साम्यं कविः ॥ १० ॥

---

ओटनपरैर्यदा अभूयत तदैव का युयं वनलुण्टिका इति। कृष्णस्य साटोपवर्णस्य स्फुरत् सौस्वर्य्यामृत तरङ्गाः श्रुतिगताः सन्तः पुरस्थं यद् धैर्य्यादि तत्सर्व्वं आप्लावयन्। तथाच मोहं प्रापुरित्यर्थः ॥ ८ ॥

आनन्दजाड्येन तासां प्रतिवाचं अप्राप्य आत्तरुडिव प्राप्तक्रोध इव उद्भ्रमल्लोचनः श्रीकृष्णः आह। रे वनचारिण्यः ! साध्यो यूयं मदीयालयसमानस्य उद्यानस्य अपहारे उद्यताः किं मदात् न ब्रूथ तस्मात् अद्य मम उपकण्ठं निकटं आसाद्य संसदि समुचितां परां उक्त कटूक्ति व्यतिरिक्तां अवस्थां प्राप्तुं किं वाञ्छथ ?। पक्षे उपकण्ठं कण्ठ-समीपं आसाद्य रहस्यक्रीड़ारूपावस्थां ॥ ९ ॥

एष श्रीकृष्णः तदा तासां नो कापीति यत् प्रतिवचः प्राप। कथम्भूतं प्रतिवचः तासां अन्तरुत्पन्नस्मरविकारवोधनशीलं अथच मधुरं। पुनश्च ह्रीलौल्यशङ्काभिरर्च्चितं लज्जादीनां वोधकमित्यर्थः। तत् प्रतिवचः वर्णयितुं यः कविःक्षितौ उपमितिं मृग्येत् असौ कविः उपमानत्वेन सम्भावितं मत्तकोकिलादिवस्तुसमस्तं नेतिनेतीत्युक्त्वा

यत् कृष्णस्य मनोपि कर्णमयतामापद्य तच्चाधिकं
विद्धं हन्त मनोभुवैव सहसा चक्रे पुनः सायकैः ।
यत्तस्माद्दवथोः सवेपथुमपि स्वं निह्नुवानोऽब्रवीत्
साटोपं तदिमा व्यजिज्ञपदिव

स्वातुर्य्यं विस्फूर्जितं ॥ ११ ॥

यूयं का अपि नेति चेद्वदथ किं नोकाअपीति स्फुटं
प्रत्यक्षावगतेऽपि वस्तुनि कथं दृष्टोऽपलापः क कैः ।
पुष्पानां नहि घत्थ केवलमहो तास्कर्य्यचर्य्यां यतो
दृष्टं चोरयथेह चन्द्रवदना

आत्मानमप्यग्रतः ॥ १२ ॥

---

अस्यन् निरस्यन् ब्रह्मज्ञसाम्यं लभते । ब्रह्मज्ञो यथा अध्यस्ताप-वादार्थं सर्व्वदा नेति नेतीति करोति तथेत्यर्थः ॥ १० ॥

यत्नोकापीति वर्णत्रयरूपवचः कृष्णस्य मनः कर्णमयतां प्राप्य पश्चात्तच्च प्रतिवचनं कर्त्तृ मनः मनोभुवाद्वारा अस्य पञ्चसायकैः कर्णैः पुनरधिकं विद्धं चक्रे । पुनःपुनस्ताहृशाक्षरत्रयस्य श्रवणेच्छया मनसः कर्णे पुनः पुनः संयोगातिशयात् कर्णमयत्वं बोध्यं । तस्मात् दवथोस्तापात् जातं स्वकीयं वेपथुं कम्पं निह्नुवानः स श्रीकृष्णः साटोपं यथास्यात्तथा यत् अब्रवीत् तत्वचः कर्त्तृ स्वातुर्य्यस्य स्वकीयातुरत्वस्य विस्फुर्जितं पराक्रमं इमाः व्रजसुन्दरीः व्यजिज्ञपय-दिव ॥ ११ ॥

श्रीकृष्ण आह । नोकापीतिशब्देन मदग्रे का अपि यूयं न इति चेद्वदथ किं प्रत्यक्षावगतेऽपि वस्तुनि कथं कैर्जनैः कुत्र वा अपलापो दृष्टः । स्वं स्वं आत्मानं । चन्द्रवदनाइति । रात्रावपि आत्मानं चोरयितुं न शक्नुथ किमुत दिवसे इतिध्वनिः ॥ १२ ॥

नित्यं मत्सुमनोपहार निरता यास्ता मया कुत्र वा
प्राप्ताः स्युः कथमित्यनिद्रितदृशा रात्रिन्दिवं भाव्यते।
दिष्ट्यैवात्मभुवं श्रिता युवतयो दृष्टाश्चिरादद्य ता-
स्तन्मन्तोः फलमेव सम्प्रति ददा
न्यङ्गीकुरुध्वं द्रुतं ॥ १३ ॥

उद्यन् विश्वजने क्षणात्क्षणभरं धत्ते निरस्यं स्तमो
यः फुल्लीकुरुतेतमां करपरिष्वङ्गैर्वलात् पद्मिनीः ।
तं भास्वन्तमभीष्टदं प्रतिदिनं सेवेमहीमा वयं
पुष्पेष्वा ग्रह एष नः समुचितस्तत् किं भवान्
कुप्यति ॥ १४ ॥

नो कुप्यामि यथोदितं कुरुथ चेत् किन्त्वङ्गनाः सर्व्वथा
भाषन्ते ऽनृतमेव तेन भवतीः प्रत्येमि वामाः कुतः ।

---

सुमनः पुष्पं । पक्षे शोभन मनः । आत्मभुवं स्वीयभूमिं कन्दर्पं च श्रितास्ता युवतयो दृष्टाः । तत्तस्मात् मन्तोः पुष्पचौर्य्यमनर्थ्यैर्य्य-रूपापराधस्य ॥ १३ ॥

श्रीराधाआह । यः सूर्य्यः पक्षे कृष्णस्त्वं उद्यन् तमोऽन्धकारः । पक्षे दुःखं निरस्यन् सन् विश्वस्थजनानां ईक्षणस्य क्षणभरं उत्सवातिशयं धत्ते । एवं करस्य किरणस्य । पक्षे हस्तस्य ।परिष्वङ्गैः-करणैः पद्मिनीः पक्षे व्रजसुन्दरीः फुल्लीकुरुते । इमा वयं तं भास्वन्तं सूर्य्यं । पक्षे कान्तिमन्तं त्वां प्रतिदिनं सेवेमहि । तस्मात् पुष्पेषु आग्रहः नोऽस्माकं समुचित एव पक्षे पुष्पेषुः कन्दर्पः तस्मिन् आग्रहः ॥ १४ ॥

श्रीकृष्णोऽपि स्वपक्षसूर्य्यपक्षयोर्वोधकं सामान्यशब्देनोत्तरमाह । यथोदितं सूर्य्यपूजार्थं मत्पूजार्थं वा कुरुथ चेत् नो कुप्यामि किन्तु

देवार्थं कुसुमानि मे चिनुथ चेत् सत्यं कुरुध्वं सहे
मन्तुं पश्यत साधुतां मम परां
युष्मासु चोरिष्वपि ॥ १५ ॥

चौर्यैः सत्यमहो वयं व्रजभुवि ख्यातास्त्वमेव ध्रुवं
साधुः केन न कीर्त्यसे स्ववदनेनोक्तिश्रमैः किं ततः।
आबाल्याहृतभाषिता सरलता शुद्धिः परस्वास्पृहा
या यास्ति त्वयि सा कदा क्व नु जने
केनेक्षिता वा क्षितौ ॥ १६ ॥

युष्माभिर्व्विपरीत लक्षणजुषा वाचाहमेवात्र य-
श्चौरो ऽकारिषि साधुमण्डलनुतो वृन्दावनाखण्डलः।
तद्गर्व्वं हृदि धत्थ कश्चन विना येनेदृशीनां गिरा
मीशिध्वे किमु डम्वरं रचयितुं
गोपाङ्गना मेऽग्रतः॥ १७ ॥

---

अनृतं मिथ्यामेव सर्व्वथा भाषन्ते तेन हेतुना भवतीः वामाः कुतोऽहं प्रत्येमि । देवार्थं मे कुसुमानि । पक्षे मे देवार्थं क्रीडार्थं चिनुथ चेत् सत्यं शपथं कुरुध्वं । वामा इत्यनेन क्रीडासमये वाम्यं न कर्त्तव्य मत्रापि शपथं कुरुतेति भावः । तदा अहं मन्तुं अपराधं सहे ॥ १५ ॥

राधाह ।।आवाल्यात् सत्यभाषितेत्यादि या या त्वयि अस्ति सा कदा-कुत्र जने केन क्षितौ ईक्षिता ॥ १६ ॥

श्रीकृष्णआह । विपरीतलक्षणयुषा वाचा युष्माभिः साधुमण्डल नुतोहं यद्यस्माच्चौरो ऽकारिषि तत्तस्मात् हृदिकश्चनगर्व्वं धत्थ । येन गर्व्वेण विना गोपाङ्गना अपि युयं मदग्रे ईदृशीनां गिरां डम्वरं आडम्वरं रचयितुं किं ईशिध्वे ॥ १७ ॥

सोऽयं यौवनहेतुकः किमथवा सौन्दर्य्यसम्पज्जनिः
पातिव्रत्यनिवन्धनः किमुकला शास्त्रज्ञतासम्भवः ।
तं पश्याम्यधुना निकुञ्जमभितः स्वस्यापि वाह्वोःपरां
वैदग्धीमनुभावयानि भवतीः प्रेक्षध्वमेतामपि ॥१८॥

इत्यागत्य दिधीर्षुणा गिरिभृता राधां तदानुद्रुतां
पृष्ठीकृत्य जगाद तत्प्रियसखी साटोपसन्तर्जनं ।
कःस्यास्त्वं ललिताग्रतोऽपि कुलजां स्प्रष्टुं वलादीहसे
दूरीभूय परत्र लम्पट ! विश स्वं चेत् शमत्रेच्छसि ॥१९

सत्यं त्वं ललिते ! प्रकामसमराकाङ्क्षां मया धित्ससि
ब्रूषे मां यदिहैवमेव विगताशङ्कं वलादुन्मदा ।
त्वां दोर्भ्यामधुना पिनष्मि तदिमाः पश्यन्तु सख्योऽपि ते
येन त्वं मुहुरेव दुर्म्मुखि ! न मा
मेवं ब्रुवाणा भवेः ॥ २० ॥

---

तं पातिव्रत्यादिकं निकुञ्जमध्ये अहं पश्यामि । एवं स्वस्यापि वाह्वोर्वैदग्धीं भवतीः अनुभावयानि एतामपि यूयं प्रेक्षध्वं ॥ १८ ॥

दिधीर्षुणा कृष्णेन अनुद्रुतां पश्चात् धावनेन प्राप्तां राधां ललिता पृष्ठीकृत्य जगाद । त्वं कः स्याः कुलजां स्पृष्टुमीहसे । तस्मात् हे लम्पट इतः परत्र दूरीभूय प्रविश । स्वं कल्यानं यदि इच्छसि ॥ १९ ॥

कृष्ण आह । यथेष्टसमराकांक्षां मया सह धित्ससि । पक्षे कन्दर्प समराकांक्षां । यद्यस्मात् इहैव वलात् उन्मदा सती त्वं विगताशङ्कं यथा स्यात्तथा मां ब्रूषे । तस्मात् अहं त्वां दोर्भ्यां अधुना पिनष्मि

अन्यास्ता रतहिण्ड ! धर्षयसि या मुग्धा मुहुर्विभ्यती
रेषाऽहं ललिता पराः सहचरीः स्वं चास्तशङ्कौजसा ।
रक्षन्ती पुरतोऽपि ते प्रतिवनं पुष्पाणि नेष्ये वलात्
कर्त्तुं किञ्चिदिहेशिषे यदि तदा
किं धृष्ट ! नः क्षाम्यसि ॥ २१ ॥

राधे! पश्य सखी यमास्यकुहरादायाति यद्वक्ति तत्
सम्मत्या तव चेत्त्वमप्यहह मे पाणेः क्व वा मोक्ष्यसे ।
अस्याद्यत्रधरं रदैरपनुदंस्तुण्डस्य कण्डूयना-
न्यायातोऽस्मि समक्षमेव तव य
त्वं मौनिनी वर्त्तसे ॥ २२ ॥

इमास्ते सख्योऽपि पश्यन्तु । हे दुर्म्मुखि ! येन त्वं मां एवं ब्रुवाणा न भवेः ॥ २० ॥

ललिताह । हे रतहिन्ड स्त्रीचौर या मुहुर्विभ्यतीर्भययुक्ता स्त्वं धर्षयसि ता अन्याः एषाहं ललिता अस्तशङ्का सती अन्याः सहचरीः स्वं च ओजसा वलेन रक्षन्ती सती च तवाग्रे वलात् प्रतिवनं पुष्पाणि नेष्ये । हे धृष्ट ! त्वं यदि किञ्चित् कर्त्तुं समर्थोऽसि तदा किं नोऽस्मान् क्षाम्यसि ॥ २१ ॥

हे राधे तव इयं सखी मुखगर्त्तात् यत् आयाति तदेव वक्ति तत्र तव सम्मत्या चेद्वक्ति तदा मम पाणेः सकाशात् त्वं कुत्र मोक्ष्यसे । तस्मात् अस्यास्तत्र सख्या ललितायाः अधरं रदैर्दन्तैः [illegible] खण्डयन् मुखस्यातिकण्डूयनानि अपनुदन् दूरीकुर्व्वन् तव समक्षमेव आयातोऽस्मि यद्यस्मात्त्वं मौनिनी वर्त्तसे । मौनं सम्मतिलक्षणमिति प्रसिद्धेः ॥ २२ ॥

राधा प्राह शठेन्द्र ! किं वदसि नो
जानासि मां यास्म्यहं
गोष्ठेऽस्ति प्रथितात्र यौवतकुले
साध्वी न मत्तोऽधिका ।
तस्या मे ऽतनुधर्म्मवर्त्मनि रताः
सख्यः सदेमाःस्थिरा
स्तास्वेषा ललिता परा प्रखरता
यस्या जयेत्त्वामपि ॥ २३ ॥
सूर्य्योपासनधर्म्मवर्त्मनितरां साध्व्यस्मि चेतिस्फुटं
मूर्त्तं ते हृदि गर्व्वपर्व्वत-युगं वर्व्वर्त्ति राधे ! ऽधिकं ।
तच्छीघ्रं नखरैर्विखराड्य भवतीं जेष्यामि तेनैव चे
न्मद्वक्षः प्रहरिष्यसि त्वमधिकं
तच्चापि सोढुं क्षमे ॥ २४ ॥

---

अहं या अस्मि एवंभूतां मां त्वं नो जानासि । तस्या मे मम श्रेष्ठ धर्म्मवर्त्मनि रताः सदा निकटे स्थिरा इमाः सख्यः । पक्षे अतनोः कन्दर्पस्य धर्म्मवर्त्मनिरताः । तासु मध्ये ललिता पराश्रेष्ठा यस्या ललितायाः प्रखरता त्वामपि जयेत् ॥ २३ ॥

श्रीकृष्णआह । हे राधे अहं सूर्य्याराधनवती एवं साध्वी अस्मि इति मूर्त्तं ते तव हृदि गर्व्वरूपपर्व्वतयुगं अधिकं वर्व्वर्त्ति । तथाच अन्तःकरणस्थगर्व्वं एव बहिः पर्व्वतद्वयरूपेण विराजत इत्यर्थः । तत्पर्व्वत युगं । तेन पर्व्वतद्वयेन चेत्मद्वक्षःस्थलं त्वं प्रहरिष्यसि तदा तच्च प्रहरणमपि अहं सोढुं क्षमे ॥ २४ ॥

इत्युक्त्वास्मित चन्द्रिकाञ्चितमुखीरालीर्विलङ्घ्यव्रज
न्राधाया निदधावुरस्युरुमदात् पाणिं यदामाधवः ।
कन्दर्पः स हि कं न दर्पमतनोदापादशीर्षं शरै
श्चक्रेजर्जरमेव-तत्तनुयुगं रोमोद्गम-व्याजतः ॥ २५ ॥

किं कर्त्तुं कितव ! त्वयात्र रभसादारब्धमित्युच्चगी
स्तांप्रावोधयदालिभिर्विरचिता स्पर्शोत्थमोहाद्यदा ।
सा कान्तस्य करं ससीत्कृतिरणात्
पाण्यम्बुजाभ्यांतदा
रोद्धुं सम्भ्रममाप शुष्कमरुदत्
वामाभ्यनैर्षीद्रुजं ॥ २६ ॥

तावद्वामकरेण हन्त सुदृशः शीर्ष्णः पटे स्रंसिते
माधुर्यामृत-वीचयः समुदगुर्या व्याश्नुवाना दिशः।

---

माधवः इत्युक्त्वा स्मितचन्द्रिकया अञ्चितमुखीः आलीर्विलङ्घ्य व्रजन् सन् राधावक्षःस्थले यदा पाणिं निदधौ तदा स कन्दर्पः कं दर्पं न अतनोत् । दर्पमेव विवृणोति तयोस्तनुयुगं रोमोद्गमच्छलेन आपादशीर्षं शरैर्जर्जरितं चक्रे ॥ २५ ॥

हे कितव ! त्वया किं कर्त्तुं आरब्धं इति आलिभिर्विरचिता उच्चगीःतां राधां स्पर्शोत्थमोहाद्यदा प्रावोधयत् तदैव सा राधा कान्तस्य करं चुड़िका-शब्देन रणद्भ्यां शब्दं कुर्वद्भ्यां पाण्यम्बुजाभ्यां रोद्धुं स सीत्कृति यथास्यात्तथा सम्भ्रममाप । एवं शुष्कं अरुदत् । वामा श्रीराधा मिथ्यारुजं पीडां अभ्यनैषीत् अभिनयमकार्षीत् ॥२६॥

तावत्कालमध्ये श्रीकृष्णस्य वामकरेण राधाया मस्तकस्थ पटे स्रंसिते सति मुखमस्तकादीनां माधुर्य्यामृतवीचयः समुदगुः या वीचयः

आश्लेषाधरपानचुम्बन-विधिं प्रारिप्सितं माधवो
विस्मृत्यारभतैव केवलमहो
स्नातुं मुहुस्तासु सः ॥ २७ ॥
चन्द्रस्योपरि सान्द्रतां कथमगाद् ध्वान्तं समन्ताद्वल
त्तं किं हन्त मृधे जिगाय नहि यत् सोऽनल्प मुद्भ्राजते।
मैत्री यद्यनयोरभूत् समुचिता नोपर्य्यधः स्थायिता
दास्यं चेद्द्विजराज आप तमसो
लोके नकिं लज्जते ॥ २८ ॥
चन्द्रे ऽस्मिन्नपि के इमे शफरिके सिन्धोः सहैवोद्गते
चेदेते किमुनिश्चले यदि पुनर्नीलोत्पले ते कुतः ।

---

दिशो व्याश्नुवाणाः । स माधवः ईप्सितं चुम्बनादिकं विस्मृत्य तासु माधुर्य्यवीचिषु केवलं स्नातुं आरभत ॥ २७ ॥

स्नान समये श्रीकृष्णस्य वितर्कमाह । मुखस्थानीयचन्द्रस्य उपरि वलत्ध्वान्तं केशस्थानीयान्धकारः कथं सान्द्रतां निविडतां अगात् । चन्द्र निकटे तस्य नाश एव उचितः । किं अन्धकारस्तं युद्धे जिगाय ? नहि नहि यद्यस्मात् स चन्द्रः अनल्पमुद्भ्राजते अतिशयेन दीप्तिं करोति । न हि पराजितस्य शोभा जायते । यदि अनयोर्मैत्री अभूत् तदा उपर्य्यधः स्थायिता न समुचिता किन्तु समतया तमसोऽन्धकारस्य दास्यं द्विजराजश्चन्द्रश्चेत् आप तदा लोके किं न लज्जते ?। श्लेषेण सत्वगुणमयब्राह्मणश्रेष्ठोऽपि भूत्वा यत्तमोगुणमयस्य दास्यं आप तत्र किं न लज्जते ? इत्यर्थः ॥ २८ ॥

वितर्कान्तरमाह । अस्मिन् चन्द्रे इमे शफरिके कुत आगते । एकत्र सहवासत्वेन सिन्धोः सकाशात् चन्द्रेण सहैव उद्गते चेत् तदा चञ्चलस्वभावे एते शफरिके किं निश्चले। इदानीं लज्जादिना

वन्धोरङ्कमुपेत्य मुद्रितमुखे मन्ये ततः खञ्जना
वेतौ स्तो नहि केन वात्र गमितौ
नो नृत्यतो वा कुतः ॥ २६ ॥

इत्येवात्मगतं वदन् निजदृशोर्दिष्टं महन्मानयन्
स्वाङ्गं तत्सुषमा समामृतरसासारैर्मुहुः प्लावयन् ।
तन्नेत्रान्ततटानुरागमधुभिः पीतैर्दृशा स्वं मनः
क्षीवत्वं गमयन् भजन् विवशतामालाः
स्फिन्वन् वभौ ॥ ३० ॥

तावत्तद्भुजपाशतः शिथिलितात् स्वं मोचयित्वाव्रजन्
माधुर्यास्त्रमिव प्रयुज्य किमियं तं जृम्भयित्वाजयत् ।

नेत्रयोर्मुद्रितप्रायत्वेन निश्चलत्वात् यदि पुनस्ते नीलोत्पले तदा वन्धोश्चन्द्रस्य अङ्कं उपेत्य कुतो मुद्रितमुखे तिष्ठतः । तस्मात् एतौ खञ्जनौ स्त इति मन्ये नहि नहि अत्र चन्द्रमध्ये केन गमितौ आनीतौ कुतो वा न नृत्यतः ॥ २९ ॥

इति आत्मगतं वदन् स श्रीकृष्णः निजदृशोर्महद्दिष्टं भाग्यं मानयन् स्वाङ्गं तस्या राधायाः शोभारूपा समानामृतरसस्य निरुपमामृतरसस्य आसारैर्धारासम्पातैर्मुहुः प्लावयन् किञ्च तदानीं चुम्बनादिविधौ श्रीकृष्णस्य विलम्वं दृष्ट्वा हन्त मा मावृत्य चिरं किमयं वा करोतीत्यौत्सुक्येन नेत्रान्तस्य किञ्चिदुद्घाटनं कृतवत्यास्तस्या राधाया नेत्रान्ततटस्य स्वदृशा पीतैः अनुरागस्वरूपमधुभिः स्वं मनःक्षीवत्वं मत्ततां गमयन् एवं देहनिष्ठविवशतां भजन् श्रीकृष्णःआलीः धिन्वन् सुखयन् वभौ । अत्र एकस्य पानकर्त्तृत्वं, अन्यस्य मत्तता, अपरस्य विवशता, अन्यस्य सुखिता इत्येतैरसङ्गत्यलङ्कारः सूचितः ॥ ३० ॥

इयं राधिका तस्य श्रीकृष्णस्यानन्दवैवश्येन शिथिलात् भुज-

पाणिभ्यां प्रतिमुच्य कञ्चुकमथो
　　　　काञ्चीं कषन्ती वभौ
वध्नाति स्म किमस्तभीः परिकरं
　　　　कामाजिराजी चिकीः ॥ ३१ ॥
वेणीमर्द्धविमर्दितां कवरयन्त्युद्भ्रान्तदृष्टिः सखी
स्तर्जन्यैव ततर्ज तिष्ठत शठा ! भो स्तिष्ठतेत्यात्तगीः ।
तीक्ष्णापाङ्गशर-प्रहारविवशोऽप्यस्यास्तथावस्थितां
तां पश्यन्नतनु-व्यथोऽप्यमनुत स्वीयं स धन्यं जनुः ।३२
भो वृन्दावनभूमिदेव! सुकृतिन्! विख्यातकीर्त्ते! भवान्
यत् कर्म्म व्यधितास्य संप्रति गृहं गत्वा तयैवार्य्यया ।

पाशात् स्वं मोचयित्वा अव्रजत् । उत्प्रेक्षामाह । राधिका माधुर्य्यास्त्र-मिव प्रयुज्य तं श्रीकृष्णं जृम्भयित्वा किं अजयत् ! तदनन्तरं सा श्रीकृष्ण स्पर्शेन शिथिलितं कञ्चुकं पाणिभ्यां प्रतिमुच्य वद्ध्वा । आमुक्तः प्रति-मुक्तश्चापि नद्धश्चापि नद्धवदित्यमरः । एवं शिथिलितां काञ्चीं कषन्ती सती वभौ । अत्र उत्प्रेक्षामाह । कन्दर्पस्य आजिराजी युद्धश्रेणी तां चिकीः चिकीर्षुः राधा अस्तभीः सती किं परिकरं वध्नातिस्म । चिकीर्षस्वरूपात् क्विप् ततःसि विभक्तौ चिकीः ॥ ३१ ॥

अर्द्धमुक्तां वेणीं कवरयन्ती अर्थात् एकहस्तेन ग्रीवोपरि वेण्या वेष्टनं कुर्वती राधिका भोःशठा मत्सख्यः युष्माभिरेव मह्यमेतादृक् दुःखं दत्तं तस्माद् यूयं तिष्ठत तत् प्रतिफलं दास्यामीति गृहीतगीःसा तर्जन्या सखीःततर्ज । तदनन्तरं तस्या राधायास्तीक्ष्णापाङ्गशरप्रहारेण विवशोऽपि स श्रीकृष्णः तथावस्थितां भूषणकेशादिसम्वरणे व्यग्रां तां राधां पश्यन् अतनुव्यथोऽपि महापीडायुक्तोपि स्वंजनुरेव धन्यं अमनुत । पक्षे अतनुः कन्दर्पस्तत् पीडायुक्तः ॥ ३२ ॥

राधाआह । भो वृन्दावनस्य भूमिदेव ! ब्राह्मण पक्षे वृन्दावन

दास्ये ते खलु दक्षिणामनुपमामप्राप्तपूर्व्वां यया
पूर्णो यास्यसि मादृशीषु न पुनः
क्वापि प्रकामार्थितां ॥ ३३ ॥

राधे ! दक्षिणया त्वयाऽनुपमया सन्तोष्यमेवाग्रतः
किन्त्वाशु स्मरयागकर्म्म शुभदं मां शिक्षितं कारय ।
तत्तत्कर्म्मठतामिहाकलय मे साफल्यमायातु सा
पाण्डित्यं विफलत्वमेति कृतिभि
र्यन्नानुमोद्य स्तुतं ॥ ३४ ॥

भूमौ दिव्यति क्रीडतीति । यत् कर्म्मत्वया कृतं अस्य कर्म्मणः अनुपमां दक्षिणां संप्रत्यहं गृहे गत्वा तया जटिलाख्यया आर्य्यया द्वारा दास्ये। ब्राह्मणैः कर्म्मणि सति दक्षिणा दानस्यावश्यकत्वात् । यया दक्षिणया पूर्णः सन् मादृशीषु कदापि प्रकामं यथास्यात्तथा न पुनरर्थितां यास्यसि प्राप्स्यसि। पक्षे जटिला दत्तगालिप्रदानाद्धेतोः कदापि मादृशीषु प्रकृष्ट कन्दर्पस्यार्थितां नयास्यसि ॥ ३३ ॥

श्रीकृष्ण आह । हे राधे ! त्वया अनुपमया दक्षिणया सन्तोष विशिष्टं करिष्यन्तं मां किन्तु दक्षिणा दानाग्रतः शुभदं स्मरयाग कर्म्म कारय । मां कीदृशं शिक्षितं निपुणं । विज्ञनिष्णातशिक्षिता इत्यमरः । पक्षे मां शिक्षितं कारय स्मरयागकर्म्म शिक्षय इत्यर्थः । दक्षिणयेति करणपदं कर्त्तृविशेषणञ्च । तत्तद्यज्ञे मम कर्म्मठतां पश्य एवं सा कर्म्मठतापि साफल्यंआयातु । अतएव कृतिभिर्यत् पाण्डित्यं अनुमोद्य नस्तुतं तत्पाण्डित्यं विफलत्वमेति ॥ ३४ ॥

प्रोचे कुन्दलतापि देवर ! भवद्वैदुष्यदूष्या भवे
दस्याःसम्मतिरत्र चेदियमपि प्राज्ञी तदाज्ञायते ।
तावत् किं निकषाश्महेममहिमज्ञानं भवेत् कस्यचिद्
यावत्तन्मिथुनं न विन्दति मिथः
सङ्घर्षकौतूहलं ॥ ३५ ॥

गान्धर्वाविददात्मनः प्रियतमाद्भद्रे ! सुभद्रादपि
प्रेमास्मिं स्तव देवरे निरुपमं प्रत्यायिताहं त्वया ।
अध्याप्यातनु शास्त्रमेतदथ तद्विज्ञं त्वमेवान्वभूः
स्वख्यात्यै प्रकटीचिकीर्षसि यतः
पाण्डित्यमस्य स्वयं ॥ ३६ ॥

कुन्दलता ऊचे । हे देवर ! कृष्ण ! तव वैदुषी पाण्डित्यं तदा अदूष्याभवेत् चेत् यदि अस्या राधाया अत्र तव पाण्डित्ये सम्मतिः स्यात् । एवं तव पाण्डित्यं बुद्ध्वा अनया सम्मतिर्दत्ताचेत् तदा इयमपि प्राज्ञी अस्माभिर्ज्ञायते । तत्र सदृष्टान्तमाह । निकषप्रस्तर सुवर्णयोर्महिमज्ञानं तावत् कस्य जनस्य किं भवेत् यावत् मिथः संघर्ष कौतूहलं निकषाश्महेमरूपं तन्मिथुनं न विन्दति । मिथुन पदेन अनयोः स्त्रीपुंस्त्वमारोपितं । तद्वितय मितिवापाठः । दृष्टान्तेन रहस्य परीहासो व्यङ्गः ॥ ३५ ॥

राधा अवदत् । हे भद्रे कुन्दवल्लि ! आत्मनः प्रियतमात् सुभद्रात् पत्युः सकाशात् अस्मिन् देवरे निरुपमं प्रेम त्वया अहं प्रत्यायिता । पक्षे सुभद्रात् सुमङ्गलादात्मनः सकाशादपि देवरे प्रेम । अथ अतनु शास्त्रं एतं देवरं अध्याप्य पश्चात्तच्छास्त्रविज्ञं तं त्वमेवान्वभूः । यतः स्वख्यात्यै अस्य देवरस्य पाण्डित्यं स्वममेव प्रकटी चिकीर्षसि ॥ ३६ ॥

प्रोक्तं तत्र विशाखया प्रथमतो ऽस्यामेव राधे ऽस्यचेत्
तत्तत्कर्म्मठतां निजाक्षिविषयीकृत्य प्रतीतिं भजेः
तर्ह्येवैनमिहेष्टकर्म्मणि वृणु त्वं कामसम्पत्तये
नो चेत् स्यात् किमनङ्गसाधनवतः
कृत्यस्य ते साङ्गता ॥ ३७ ॥

कृष्ण प्राह परीक्षया किमनया राधे ! विशाखा भूवि-
ख्याते वातनु धर्म्मकर्म्मणि यतः साक्षाद्भवत्याः सखी
ये वात्स्यायनपद्धतिक्रमगतास्तेषां मनूनां मद-
भ्यस्तानामपि शुद्ध्यशुद्धि विमृश-
त्वेषा रहस्यञ्जसा ॥ ३८ ॥

---

विशाखा आह । हे राधे ! अस्य कृष्णस्य तत्तत् कन्दर्पयागकर्म्मणि कर्म्मठतां अस्यां कुन्दवल्ल्यां यदि निजाक्षिविषयीकृत्य प्रतीतिं त्वं भजेः तदैव एनं श्रीकृष्णं इह इष्टकर्म्मणि त्वं वृणु । नोचेत् कुन्दलतायां प्रतीतिं विनैव स्वस्मिन् तत् कर्म्म आरब्धं चेत् तदा अविज्ञजनद्वारा कर्म्मकृते सति ते तव अनङ्ग साधनवतः अङ्गसाधनरहितस्य अर्थात् अङ्गहीनस्य कृत्यस्य किं साङ्गता पूर्त्तिःस्यात् । पक्षे स्पष्टं । तत् कर्म्मण उत्तरोत्तर वृद्धिरेव न तु पूर्त्तिः ॥ ३७ ॥

कृष्ण आह । हे राधे ! अनया परीक्षया किं इयं विशाखा वृहद्धर्म्म कर्म्मणि भूविख्याता एव । पक्षे अतनुः कन्दर्पः यतः साक्षाद्भवत्याः सखी । तस्माद्वात्स्यायन मुनेः कामशास्त्रात्मकपद्धतेः क्रमप्राप्ता ये मनवस्तेषां मनूनां मन्त्राणां मदभ्यस्तानां शुद्ध्यशुद्धि एषा विशाखा रहसि विमृशतु । शुद्धिश्च अशुद्धिश्च द्वन्द्वैक्यं ॥ ३८ ॥

साधूक्तं हरिणेति कुन्दलतया राधा तदाभ्यर्थिता
तत्रादेष्टुमिमामथस्मितसुधास्नाताधरा साह तां ।
कौन्दीयं सुदुराग्रहा सखि ! ततो गत्वा विशाखे ! रहो
विद्धीत्यञ्चलसंवृताधरतटाः
सख्योऽहसन् संघशः ॥ ३९ ॥

राधे ! त्वा मवहित्थया प्रतिपदं क्षीणायुषा दुःशकां
गोप्तुं संप्रति वीक्ष्य दूनहृदया नोपायमन्यं लभे ।
किन्त्वग्रे सहकार एष भविता धन्योऽविता ते महान्
तत्कुञ्जं शरणं रहो व्रज यदि
स्वीयं शमाशंससि ॥ ४० ॥

हरिणा साधूक्तं इत्युक्त्वा कुन्दलतया तदा तत्र एकान्ते मन्त्र परीक्षार्थं इमां विशाखां आदेष्टुं राधा अभ्यर्थिता । तदनन्तरं सा राधा तां विशाखामाह । रह एकान्ते परीक्षार्थं कृष्णं विद्धि जानीहि । इति राधिका वाक्यं श्रुत्वा अञ्चलेन संवृताधरतटाः सर्व्वाः सख्यः मिलित्वा अहसन् । स्वेन कर्त्तव्यस्य कर्म्मणः परीक्षार्थं स्व सखीः प्रार्थयति अतः स्वमुखेनैव सम्भोगप्रार्थना कृतेति तासां हास्ये कारणं ॥ ३९ ॥

विशाखा आह । हे राधे ! प्रतिपदं क्षीणायुषा अवहित्थया गोप्तुं दुःशकां त्वां संप्रति वीक्ष्य दूनहृदया अहं त्वां गोप्तुं अन्यमुपायं न लभे किन्तु साहाय्यं करोतीति व्युत्पत्त्या सिद्धः अग्रे एष सहकारः आम्रवृक्षस्तव अविता रक्षिता भविता अत एकान्ते सहकारकुञ्जं शरणं व्रज यदि स्वीयं शं कल्याणं आशंससि श्लेषेण शं सम्भोगजन्यं सुखं साहित्यं कारयिष्यतीति श्लेषश्च । तथाच एका अवहित्था मात्रं त्वां रक्षति सापि स्वमुखेनैव दूरीकृता चेत् तदा प्रकृतकार्य्ये विलम्बो मास्तु इति ध्वनिः ॥ ४० ॥

अस्माभिस्तव यद्विधित्सितमहो साहाय्यमेतत्त्वया
दाक्ष्यात्तन्निरपेक्षया न रचितं
किं पिष्टपेषायितं ।
पुन्नागं सुमनःप्रदं घनरसैः स्वव्याहृतैः सिञ्चती
यत्त्वं फुल्लयसीति सस्मितमुखी
प्रोचे विशाखापि तां ॥ ४१ ॥

अत्रैवावसरे समागतवती नान्दीमुखी वृन्दया
सार्द्धं काञ्चनपत्रिकां हरिकरे दत्वा शशंसास्य शं ।
तामुद्घाट्य हृदा पठन् प्रमुदितस्ताभिः स संलक्षितो ऽ
नुक्त्वा किञ्चन कामपीक्षितरहा
प्रागादुदीचीमुखः ॥ ४२ ॥

पुनर्विशाखा आह । तव सखीत्वात् अस्माभिः कृष्णेण सहाङ्ग सङ्गार्थं तव यत् साहाय्यं मनसि विधित्सितं त्वया तु दाक्षिण्यात् तत् साहाय्यं साहाय्य निरपेक्षया हेतुना किं पिष्ट पेषायितं न रचितं अपितु रचितमेव । तथाचाधुना तव सखी साहाय्येनालमितिभावः । यद्यस्मात् शोभनमनःप्रदं पुन्नागं पुरुषश्रेष्ठं कृष्णं स्वव्याहृतैः स्वेनै-वोक्तैःघनरसैः सिञ्चतीत्वं तं पुन्नागं फुल्लयसि । सम्मुखार्थस्तु पुष्प-प्रदं पुन्नागवृक्षं स्वेनेव विशेषेण आहृतैः आनीतैर्घनरसैर्जलैः सिञ्चती त्वं फुल्लयसि ॥ ४१ ॥

काञ्चित् पत्रिकां हरिकरेदत्वा तस्य कृष्णस्य शं कल्याणं शशंस हे कृष्ण ! त्वं कुशलीभवेति जगाद । तां पत्रीं । पत्र पाठात् श्रीकृष्णस्या-नन्दस्ताभिः राधादिभिः संलक्षित इत्यर्थः । तदनन्तरं श्रीकृष्णः काञ्चित् व्रजसुन्दरीं प्रति किमपि अनुक्त्वा ईक्षितं रहस्थलं येन एवंभूतः उत्तराभिमुखः सन् एकान्तस्थले अगात् ॥ ४२ ॥

याते तत्र तदीक्षणाक्षणविनाभावेन दूनानना
प्यात्मानं वहिराप्त निर्वृतिमिव स्वा ज्ञापयन्ती सखीः ।
सार्द्धं ताभिरुपेत्य सम्भ्रमभरान्नान्दीमुखीं राधिका
सा नानाविधतर्कसंकुलितधीः पप्रच्छ सप्रश्रयं ॥४३

पत्रीं का प्रजिघाय सा भगवती कस्मै नहि ज्ञायते
भद्रे मत्शपथो वदैष रमयन् काञ्चित्तदुक्तां गतः ।
हास्यं मुञ्च करोमि दिव्यमपि चेदेवं भवेन्नो व्रजे-
न्मत् साक्षादयमेष तच्चतुरिमा दुर्लक्षतायै तव ॥४४

प्रावोचल्ललिता तदीक्षितमुखीमासंशयिष्टा हरे
रन्यस्यां भवदन्तिकस्थितिमतः
　　　　किं सम्भवेल्लालसा ।

---

तत्र एकान्तस्थले श्रीकृष्णे याते सति क्षणमपि व्याप्य श्रीकृष्णे क्षणस्य विना भावेन अभावेण दूनानना अपि राधा वहिरात्मानं प्राप्त निर्वृतिमिव स्वीयाःसखीः ज्ञापयन्ती सती ताभिः सखीभिः सह उप समीपेगत्व नान्दीमुखीं प्रति सप्रश्रयं सविनयं यथास्यात्तथा पप्रच्छ ॥४३॥

प्रश्नमेवाह । हे नान्दीमुखि ! इमां पत्रींका प्रजिघाय प्रहितवती । नन्दीआह सा प्रसिद्धा भगवती । राधा आह कस्मैकिमर्थं । नान्दी, नहिज्ञायते । राधा, मत्शपथोवद । नान्दी, एष श्रीकृष्णः तया पौर्णमास्या उक्तां काञ्चित् व्रजसुन्दरीं रमयन् गतः रमयितुं गत इत्यर्थः । राधा हास्यं मुञ्च । नान्दी, अयिराधे ! दिव्यं करोमि । राधा, एवंचेत् अयं कृष्णः अन्यत्र रमणार्थं मत्साक्षात् न व्रजेत् । नान्दी, हे राधे ! तव दुर्लक्षतार्थमेव तस्य श्रीकृष्णस्य एष त्वत् साक्षात् गमनरूप चतुरिमा । अतएव एतच्चातुर्य्यादेव तव मनसि तथा नायाति ॥ ४४ ॥

नान्दी वाक्ये सन्दिग्धया तया राधया ईक्षितं मुखं यस्या एवम्भूता

फुल्लां मालतिकां धयन्नलियुवा वल्लीं किमन्यां स्मरे-
दग्रे प्राप्य सुधांबुधः कथमहो धत्ते परत्र स्पृहां ॥४५
एषा त्वात्मजनुः प्रभृत्यनुपदं नर्त्ते ऽनृतं भाषते
यज्जिह्वा गुरुरेव तस्य न कलेः
　　　　　　　　किं भाविनो भाविनी ।
तन्मिथ्यैव स नो गतः परिहसन्मिथ्यैव पत्री च सा
किं मिथ्यैव विशङ्कसे सखि ! यतो
　　　　　　　　मिथ्यैव नान्दीमुखी ॥ ४६ ॥
या साक्षादिव संविदत्र महिता या सर्व्वधर्म्मैकभू-
र्व्वेदार्थं खलु मूर्त्तमेव निखिलं या ऽसूतसान्दीपनिं ।
तस्याः पारिषदी भवानि ललिते ! श्रीपौर्णमास्याः सदा
मिथ्यावादितया पराभवधुरा
　　　　　　　　पात्रीकृताहं त्वया ॥ ४७ ॥

---

प्रावोचत् । हे राधे ! भवन्निकटे स्थितिंमतो हरेः किं अन्यस्यां लालसा भवेत् ? । तत्र दृष्टान्तः फुल्लामिति । दृष्टान्तान्तरमाह । बुधःसुधामिति ॥ ४५ ॥

पुनर्ललिताह । एषा नान्दी आत्मजन्म प्रभृति अनुपदं प्रतिक्षणं अनृतं ऋते मिथ्यां विना न भाषते । यस्या नान्द्या जिह्वा भाविनः कलेः किं गुरुरेव न भाविनी ? अपि तु भविष्यत्येव । तथाच कलियुगः अस्याः शिष्योभूत्वा अधर्म्मं प्रवर्त्तिष्यत इतिभावः । तस्मात् स कृष्णः नोऽस्मान् परिहसन् मिथ्यैव गतः ॥ ४६॥

नान्दी आह । या पौर्णमासी साक्षादिव संवित् ज्ञानस्वरूपा अत्र

तस्या एव ददानि हन्त शपथं तत्वं यदेतद्वदे
त्युक्तासाह वदाम्यहं कथमहो सैव न्यषैत्सीद्‌यतः ।
किन्त्वत्राकथनं च नोचितमतो वच्म्यप्रतीतिं कृथा
मैवास्मिन्निति राधिकापि शपथं
सा कारितैवानया ॥ ४८ ॥

पूर्व्वेद्युर्मधुसूदनेन भगवत्यभ्यर्थिता सादरा
दार्य्ये ! मन्त्रमणीमहौषधविदां मुख्ये ! महातापसि !
राधां वाम्यमहीधरोपरि सदासीना मुपायात् कुत
स्तस्माद्द्रागवरोह्य साधु रमया-
म्यालीततीर्मोहयन् ॥ ४९ ॥

व्रजे महिता सर्व्वैः पूजिता । या अखिलवेदार्थं मूर्त्तमेव सान्दीपनि सुतमसूत तस्याः पौर्णमास्याः सदैवाहं पारिषदी भवानि ॥ ४७ ॥

ललिता आह । तस्याः पौर्णमास्याः शपथं ददानि यत्तत्वं तत्वद इति उक्ता सा नान्दी आह । अहो कथं वदामि यतः सा पौर्णमासी एव न्यषैत्सीत् निषेधं कृतवती । किन्तु अकथनमपिनोचितं यत स्तस्या एव शपथोदत्तः अतोऽहंवच्मि किन्तु अस्मिन् आज्ञामप्युल्लङ्घ्य वक्तुं प्रवृत्ताया मम वाक्ये अप्रतीतिं मा कृथा इति सा राधापि अनया नान्द्या शपथं कारिता ॥ ४८ ॥

नान्दी आह । पूर्व्वदिवसे मधुसूदनेन आदरात् सा भगवती अभ्यर्थिता । श्रीकृष्णस्याभ्यर्थनमेवाह । हेमन्त्रादीनां विदां मध्ये मुख्ये ! वाम्यरूप पर्व्वतस्योपरि सदा आसीनां राधां कुतः उपायात् तस्मात् पर्व्वतात् द्राक् अवरोह्य साधुरमयामि एवं तस्या आली श्रेण्योऽपि तथैव अतएव आलीश्रेणीरपि मोहयन् सन् ॥ ४९ ॥

गोप्योऽन्याः किल मन्मनोभवसुखोद्रेकचमत्कारिता
सम्पत्त्यै शतकोटयोऽपि नतरां पर्य्याप्नुवन्ति क्वचित् ।
किन्त्वेकैव मदीयहृद्भुवमलंकर्त्तुं क्षमा राधिका
किं सा कल्पलता नु संविदथ किं
किं वैजयन्ती नु सा ॥ ५० ॥

श्रुत्वैतन्मधुरं धुरं पुनरिमामङ्गीचिकीर्षुश्चिरात्
प्रत्याख्यानपरेव साह सहसा शक्यं कथं स्यादिदं ।
साध्वीनां प्रवरात्रपाजलनिधिर्जाता कुलीनान्वये
किं सान्या चपलेव ते घनरुचे
रङ्कं समारोक्ष्यति ॥ ५१ ॥

मदीय कन्दर्पसुखस्य उद्गत चमत्कारितासम्पत्त्यै अन्याः शत कोटयो गोप्योऽपि न पर्य्याप्नुवन्ति किन्तु एका राधिकैव । कथम्भुता मदीयहृदयस्वरूपं भुवं पक्षे हृदयोत्पन्नं कन्दर्पं अलं भूषितं कर्त्तुं क्षमा । अतएव सा राधिका किं कल्पलतास्वरूपा श्लेषेण आकल्पोभूषा तत्स्वरूपा लता तथाच मम भूषणरूपा सैवेत्यर्थः । किन्तु अचेतनस्य भूषणमपिनात्यन्त शोभाधायकमित्यत आह । संवित् मच्चेतन स्वरूपा तथाच तां विना मम हृदि चेतनैव न तिष्ठतीति भावः । किम्वा वैजयन्ती मालाविशेषः । श्लेषेण वै निश्चितं जयन्ती सर्व्वोत्कर्षवती ततश्च वैजयन्ती मम सर्व्वोत्कर्षरूपा पताका इति विशेषश्च ॥ ५० ॥

एतन्मधुरवाक्यं श्रुत्वा इमां धुरं भारं अङ्गीचिकीर्षुः सा पौर्णमासी वहिः प्रत्याख्यानपरा इवाह । अन्या चपला चञ्चला इव घनरुचे निविड़स्पृहस्य ते अङ्कं राधिका किं समारोक्ष्यति । पक्षे घनरुचे मेघ-सदृशस्य चपलाविद्युदिवेति भङ्ग्या आश्वास एव कृतः ॥ ५१ ॥

एवं सत्यघभिन्निवृत्य स ततो गेहं स्वमागात्तदा
साऽसर्व्वागमतन्त्रमन्त्रपटलीं पर्य्यालुलोके निशि ।
पत्रीं प्रापय नान्दि! कृष्णमधुनेत्यादिश्यमानातया
दायैता महमागमं द्रुतमतो
जानामि नो किञ्चन ॥ ५२ ॥

मन्त्रं कञ्चन पत्रिकाविलिखितं प्रेष्योपदिष्टस्तया
कृष्णस्तं जपितुं रहःस्थलमगादस्मन्मनो-मोहनं ।
हन्तात्यो! व्रजत स्ववेश्मतदितस्तत्रैव सूर्य्यार्च्चनं
कार्य्यं यत्र हरिः कुरुध्वमचिरा
देशाय तस्मै नमः ॥ ५३ ॥

एवं सति अघभित् श्रीकृष्णः ततः स्थानात् निवृत्य स्वं गेह-मगात् । तदनन्तरं सा पौर्णमासी निशि रात्रौ सर्व्वागमतन्त्रमन्त्र पटलीं पर्य्यालुलोके । प्रातःकाले मन्निकटेआगत्य हे नान्दि ! इमां पत्रीं अधुना श्रीकृष्णं प्रापय इति तया पौर्णमास्या आदिश्यमानाहं एनां पत्रीमादाय द्रुतमागमं अतःपरं किञ्चन न जानामि । पत्रीस्थां वार्त्तां न जानामीत्यर्थः ॥ ५२ ॥

राधिका आह । पत्रिकायां लिखितं अस्मन्मनोमोहनं कञ्चन मन्त्रं नान्दीद्वारा प्रेष्यतया पौर्णमास्या उपदिष्टः श्रीकृष्णः तन्मन्त्रं जपितुं रहः स्थलमगात् । तस्मात् हन्त खेदे हे आल्यः ! यूयं इतः स्थानात् स्वगृहं व्रज तत्रैव गृहे सूर्य्यपूजां करिष्यामि । तथाच यत्र देशे हरिर्व्वर्त्तते तस्मै देशाय नमस्कुरुध्वं ॥ ५३ ॥

पीत्वैतां वृषभानुजोदितसुधां प्रोवाच कौन्दीहस-
न्त्यै तत् किञ्चन युज्यते नहि ततो राधे! वृथा शङ्कसे ?।
यस्यैकाङ्गरुचिच्छटैककणिकाप्युन्माद्य साध्वी-व्रतं
त्वां सद्यः सखि ! हापयेदयमहो
मन्त्रं किमर्थं जपेत् ॥ ५४ ॥

युग्मकं ।

राधोचे भगवत्यसावनुपमं सन्नयासधर्म्मं दधे
नान्दीयं श्रित तत्पदैव विषयव्यावृत्तवार्त्तापरा ।
कौन्द्येषा तु पुनः सुभद्रसहजस्वात्मैक्यभावा भवे-
देता एव समाधि-वर्त्मनि नय-
न्त्यार्य्याः कुलस्त्रीरपि ॥ ५५ ॥

वृषभानुजोदितां सुधां पीत्वा हसन्ती कुन्दवल्ली आह । हे राधे ! त्वयोक्तं किञ्चन नहि युज्यते । तस्मात्त्वं वृथा सङ्कसे । अस्य श्रीकृष्णस्य एकाङ्गस्य कान्तिछटाय एका कणिकापि त्वामुन्माद्य तव साध्वीव्रतं सद्योहापयेत् । तस्मात् अयं कृष्णः किमर्थं मन्त्रं जपेत् ॥ ५४ ॥

राधिका आह । भगवती पौर्णमासी अनुपमं सन्नयासधर्म्मं दधे । यतो समस्तरात्रिंव्याप्य कामशास्त्रं दृष्ट्वा मन्त्रं श्रीकृष्णं ग्राहयामास ! एवं नान्दी अपि श्रिततत्पदा अतएव सर्व्वविषयेभ्यःव्यावृत्ता भिन्ना या वार्त्ता तत्परा विरक्ता इत्यर्थः । पक्षे विषयेण विशेषत आवृत्त वार्त्तापरा कुलनीधर्म्मपरा इत्यर्थः । एषा कुन्दवल्लीतु सुभद्रः सुमङ्गलः अथच सहजः स्वात्मनोः जीवपरमात्मनोरैक्यभावो यस्याः एवंभूता भवेत् ब्रह्मज्ञानरतेत्यर्थः । पक्षे सुभद्रस्य स्वपत्युः सहजे भ्रातरि श्रीकृष्णे स्वात्मनः स्वदेहस्यैक्यभावो यस्याः सा । अतएव पौर्ण-मास्यादयः एताः आर्य्याः कुलस्त्रीरपि समाधिवर्त्मनि सन्नयासवैराग्य

अत्रैवावसरे व्यजिज्ञपद्दितस्तं रूपमञ्जर्यमुः
पूर्व्वस्याः ककुभो विधुं वन-तटाद्द्रागाजिहानं पुरः ।
सम्भ्रान्ता वृषभानुजाह सुषमापूर्णः स एवैति नः
शङ्के मोहयितैव मन्त्रवलभा

गाल्यः ! करोम्यत्र किं ? ॥ ५६ ॥

कौमुद्येव धृतिं द्यतीयमरिद्यात् सद्यो यदद्यास्य मे
मन्ये साधितविद्यता निरुपमा जातास्य कामाप्तये ।
तत्क्वाप्यत्र निलीय साधु ललिते तिष्ठेयमेषोऽन्यथा
मद्बुद्धिं भ्रमयेदशक्यमवले !

मन्त्रस्य किं जाग्रतः ॥ ५७ ॥

---

मन्मज्ञानरूप स्व स्व-धर्म्मं नयन्ति पक्षे । दूत्यकर्म्मणा सम्यक् आधिः कुलधर्म्मलज्जादि त्यागजन्य मनःपीड़ा तत् स्वरूपवर्त्मनि नयन्ति ॥ ५५ ॥

रूपमञ्जरी पूर्व्वस्याः ककुभः दिशः सकाशात् वनतटात् । चन्द्रपक्षे जलतटात् द्राक् आजिहानं आगच्छन्तं तं श्रीकृष्णस्वरूपं विधुं अमुः राधायाः व्यजिज्ञपत् जिज्ञापयामास । स्वभावत एव क्षणे क्षणे नवीनस्य श्रीकृष्णस्य शोभातिशयं मन्त्रजन्यं ज्ञात्वा सम्भ्रान्ता राधा आह । पक्षे ह अप्यर्थे ज्यैष्ठमासीयसूर्य्यजापि सुषमा सम्भ्रान्तेति चित्रं । मन्त्रबलभाक् अतएवातिशयशोभापूर्णः स श्रीकृष्णः अधुना तु मोहयिता । हे आल्यः ! अत्र विषये किं करोमि ? ॥ ५६ ॥

यद् यस्मात् अस्य श्रीकृष्णस्य कौमुदी ज्योत्स्ना एव मे धृतिं द्यति खण्डयति न जाने स तु स्वयं आयाति चेत् का दशा भविष्यति ? तस्मात् अभीष्टकाम प्राप्त्यर्थं अस्य कृष्णस्य निरुपमा साधितविद्यता जाता इति अहं मन्ये तत्तस्मात् हे अबले ! जाग्रतो मन्त्रस्याशक्यं किं ? ॥५७॥

इत्युक्त्वैव शनैः स सम्भ्रमपद-न्यासैः स्वमञ्जीर-गीः
सातङ्केव कदम्बषण्ड-विटपैः स्वं निह्नुवानैव सा ।
तिर्यग्ग्रीवमपाङ्गमार्गणा-गणं पश्चान्नुदन्त्यात्मनो
रक्षाव्यग्रधियेव कुञ्चिततनुः
सद्माविशद्वाञ्जुलं ॥ ५८ ॥
दूरादेव निरङ्ककुंकुमरुचिं यान्तीं ददर्शाच्युतः
कान्तावृन्दमणीमथैत्य च सभां
पप्रच्छ तां तत्सखीः ।
सा कृष्णा स्वगृहं जगाम ललिते कालः स यातो यदा
युष्माभिः कतिधा प्रतारणधुरापात्रीकृतो
ऽहं न वा ॥ ५९ ॥

इत्युक्त्वा सा राधा सम्भ्रम पदन्यासैः करणैः वाञ्जुलं सद्म अशोक कुञ्जमन्दिरं अविशत् । कथम्भूता ? स्वस्य मञ्जीरगिरा नूपुर शब्देन सातङ्का । पुनश्च कदम्ब समूहस्य शाखाभिः स्वं निह्नुवाना पुनश्च श्रीकृष्णस्यागमन-शङ्कया तिर्य्यग्ग्रीवं यथास्यात्तथा अपाङ्गरूपमार्गणस्य बाणस्य गणं पश्चान्नुदन्ती प्रेरयन्ती । अत्रोत्प्रेक्षामाह । श्रीकृष्णात् आत्मनो रक्षार्थं व्यग्रधिया बाणं नुदती इव ॥ ५८ ॥

अच्युतः दूरादेव निर्म्मलकुङ्कुमरुचितुल्यरुचिं यान्तीं राधां ददर्श । कथम्भूतां रमणीवृन्दमणीं । तथापि तां सभां एत्य तस्याः सखीः पप्रच्छ । प्रत्युत्तरमाह । हे कृष्ण ! साराधा गृहं गता । कृष्ण आह । यस्मिन् काले युष्माभिः कतिधा प्रतारणातिशयस्य पात्रीकृतोऽहं न वा स कालो यातः । यतः सम्प्रत्यहं सिद्धमन्त्रो भवामि ॥ ५९ ॥

कर्णेऽस्यास्तु तदाभ्यधत्त रभसा नान्दीमुखी माधवः
सर्व्वं मन्त्रवलेन वेद ललिते तत् किं मृषा भाषसे ।
हन्तैवादिश तां लभस्व च यशः सा ते मृषाकोपतः
किं कर्त्तुं प्रभविष्यतीति ललिता

प्यस्त्वेवमित्यभ्यधात् ॥ ६० ॥

गत्वा वञ्जुलकुञ्जमाह महिले ! किं त्वं विधत्से रह
स्येका मन्त्रमहो जपस्यदरमामाक्रष्टुकामा किमु ।
वृत्तं तत्कुरु यच्चिकीर्षसि वलाद्भ्रोः पाशवद्धं नु वा
किं वामां स्वरदास्त्रखण्डितमहं

न त्वां निषेद्धुं क्षमं ॥ ६१ ॥

सचिल्लीकौटिल्यां स्मितनवसुधां गद्गदवच
सहुङ्कारं तस्मै प्रथममुपजह्रे यदवला ।

---

तदा नान्दीमुखी तस्या ललितायाः कर्णे अभ्यधत्त वभाष । हे ललिते ! माधवः मन्त्रवलेन सर्व्वं वेद एव तत्तस्मात् कथं त्वं मृषा-भाषसे ? । हन्त राधां आदिश ततएव स्व-यशो लभस्व । सा राधा मिथ्याकोपेन ते तव किं कर्त्तुं प्रभविष्यति ? । ललितापि तां नान्दीमुखीमुक्तं अभ्यधात् ॥ ६० ॥

वञ्जुलकुञ्जं गत्वा कृष्ण आह । हे महिले ! कान्ते ! रहसि त्वं किं विधत्से । अहो मामाक्रष्टुकामा त्वं अदरमनल्पं काममन्त्रं किमत्र जपसि ? । तत् आकर्षणं वृत्तं अधुना यच्चिकीर्षसि तत्कुरु । स्वकीय दन्तरूपास्त्रेण मां खण्डितं कुरु अहं त्वां न निषेद्धुं क्षमः ॥ ६१ ॥

अवला राधा भ्रुकौटिल्यसहितां स्मितरूप नवीनसुधां एवं हुङ्कार सहितं गद्गदवचश्च तस्मै श्रीकृष्णाय प्रथमं यत् उपजह्रे । परद्वाराकर्षक मन्त्रं जप्त्वा अधर्म्मं कृतवतः स्वस्यधर्म्मं अन्यत्र निक्षिपतीति

पिबन् सोऽस्मिश्रोत्रैस्तदपि सहसाऽमुह्यदतुलः
स दूरेस्त्वेतस्याधरमधुपानस्यमहिमा ॥ ६२ ॥

धृतापाणौ हाहानुचितमिति जल्पन्त्यपययौ -
कुचद्वन्द्वे स्पृष्टा शपथमसृजत् कुञ्जिततनुः ।
वलाद्दष्टा विम्बाधरमनुदधौ सीत्कृतिततीं
र्निकेतान्तर्नीताप्यतनुतन चेन्नृत्यमतनोः ॥६३॥

तदातामुद्धृत्योरसि भुजवलादुच्छलदुरु
स्फुरज्जङ्घा ग्रीवा पदमतिननोक्तया कुटिलतां ।
स्मरश्चापं स्वं चाम्पकमिव सकम्पं सरसय
न्नटद्विद्युद्वल्लीमिव नवघनस्तल्पमविशत् ॥ ६४ ॥

हुङ्काराभिप्रायः तदपि सा च तच्च तत् तथाच स्मित सुधा गद्गदवचो मात्रमपि पिबन् सहसा अमुह्यत् अस्या राधाया अधरसुधा पानस्य सोऽतुल महिमादूरेऽस्तु । तथाच नजाने तत्पाने का दशा भविष्यतीत्यर्थः ॥ ६२ ॥

श्रीकृष्णेन पाणौ धृता सा हाहा इदं अनुचितं इति जल्पन्ती अपययौ कियत्स्थलं अप ससारेत्यर्थः । हे कृष्ण ! तव गवां नारायणस्य शपथः इति वाक्यमसृजत् । विम्बाधरमनु विम्बाधरे । सा सीत्कृतिततीं दधे । निकेतस्य कुञ्जमन्दिरस्यान्तर्नीतापि सा अतनोः कन्दर्पस्य नृत्यं यदि न अतनुत ॥ ६३ ॥

तदा श्रीकृष्ण स्तां भुजवेगात् उरसि वक्षःस्थले नवघनो विद्युद्वल्ली मिव उद्धृत्य तल्पान्तमविशत् । वक्षःस्थले धारण समये तस्या जङ्घा-पाद ग्रीवादीनां क्रियाभिः कन्दर्पस्य नृत्यञ्चाम्पेय पुष्पधनुषा सह-उत्प्रेक्षार्थं विशेषणमाह । तां कथम्भूतां उच्छलन्ति जङ्घा ग्रीवा पादानि

प्रबोधो मोहो वा स्मरसमरमारिप्सित मनु
द्वयोर्योयोराजीन्मधुरिम भरानेव स दधे ।
तदात्वाभिव्यक्ती भवदतनुवैदग्ध्यमुभयो
र्नभिन्नत्वं प्रेमामृतकिरणातो यद्विरुरुचे ॥ ६५ ॥

इति श्रीभावनामृते महाकाव्ये नर्म्मविलासा-
स्वादनो नाम नवमःसर्गः ॥

---

यस्याः । पद्शब्दोहलन्तः । कन्दर्पः स्वकीयं धनुःकिं स ‹सयन् शब्द बिशिष्टं कुर्व्वन् ॥ ६४ ॥

आरिप्सितं कन्दर्पं समरं अनुलक्षीकृत्य द्वयो राधाकृष्णयोर्यो यः प्रवोधो मोहोवा अराजीत् स मधुरिमभरानेवदधे। एवमुभयोस्तत्-कालीनाभिव्यक्तिभवत कन्दर्पं वेदग्ध्यं प्रेमामृत किरणात् भिन्नत्वं नयत् न गच्छत् सत् विरुरुचे । तस्मात्तयोः प्रेमरूप एव कामः न तु प्राकृतयोरिव तस्माद्भिन्नः। तथाच प्रेमैव गोपरामाणां काम इत्यगमत् प्रथामिति ॥ ६५ ॥

समाप्तश्चायं नवमः सर्गः ।

## दशमः सर्गः ।

नान्दीमुखीकुन्दलते सवृन्दे
चिरान्मनोवाञ्छितवृन्दविन्दे ।
अमन्दमाकन्दतले सखीनां
सभामभातामभितोऽभियाते ॥ १ ॥

तत्रेत्य मूर्त्ता ऋतुषट्कलक्ष्मीः
प्रति स्व-सेवावसरावगत्यै ।
स्थिता निरीक्ष्यादिशदाशु वृन्दा
स्वस्वाटवीर्भूषयत स्वभाभिः ॥ २ ॥

गोवर्द्धनाद्रिं समया तु रास-
स्थल्यां त्वमेवास्स्व वसन्तलक्ष्मि ! ।

वृन्दासहिते नान्दीमुखीकुन्दलते अमन्दाम्रतले सखीनां सभां अभियाते अभिगते सत्यौ अभातां अराजतां । कथंभूते चिरकालं व्याप्य राधाकृष्णयोः सम्भोगरूपमनोवाञ्छितसमूहप्राप्ते । विद्लृ-लाभे धातुः ॥ १ ॥

तत्र सभायां षड़ृतुशोभायां षड़ृतुशोभाः प्रति स्वसेवावसर-ज्ञानार्थं स्थितास्ताः वृन्दा निरीक्ष्य आदिशत् । तमाहस्वस्वेति । स्वभाभिः स्वकान्तिभिः ॥ २ ॥

वृन्दा आह । हे वसन्तलक्ष्मि ! गोवर्द्धनाद्रिं समया गोवर्द्धनाद्रे

अध्यास्यतामर्कसुता-तटस्था
कल्पागभूमिः शरदैव कामं ॥ ३ ॥
राधासरो ऽरण्यभुवन्तु सर्व्वा
निषेव्य सर्व्वस्व-समर्पणेन ।
स्व-स्वामिनोर्व्विस्मय-कौतुकाभ्या-
मगण्यपुण्या भवथाद्य धन्याः ॥ ४ ॥
तत्रापि पूर्व्वादिषु दिक्षु सन्त्वमी
वर्षादयस्तत्तटवर्त्तिशाखिषु ।
मधोर्म्महत्वं जलकेलि-सिद्धये
मध्ये सरो ग्रीष्मगुरुत्वमस्तु वः ॥ ५ ॥
तास्तां प्रणम्याच्युत-केलिविज्ञा
विज्ञानचातुर्य्यसमास्तदाज्ञां ।

निकटे परासुलीतिख्यातायां रासस्थल्यां त्वं आस्स्व वस । शरदृतुना यमुनातटस्थकल्पवृक्षसम्बन्धिभूमिः अध्यास्यतां ॥ ३ ॥

सर्व्वा एव ऋतवः सर्व्वस्व-समर्पणेन राधाकुण्डं तत्तीरस्थ वनभूमिश्च निषेव्य राधाकृष्णयोर्विस्मय कौतुकाभ्यां अगण्यपुण्या यूयं धन्या भवथ ॥ ४ ॥

राधाकुण्डे पुनर्व्यवस्थामाह । तत्रापि राधाकुण्डे पूर्व्वादिचतुर्षु दिक्षु अमी वर्षा शरत्-हेमन्त-शिशिराश्चत्वार ऋतवःसन्तु । किन्तु राधाकुण्ड तत्तटवर्त्तिशाखिषु वृक्षेषु सर्वेषामवस्थानेऽपि मधोर्व्वसन्तस्य महत्वमाधिक्यमस्तु । एवं जलकेलि-सिद्ध्यर्थं कुण्डस्यमध्ये ग्रीष्म ऋतोर्गुरुत्वमस्तु ॥ ५ ॥

विज्ञान चातुरीभ्यामसमाः विज्ञान चातुरीभ्यां निरुपमास्ताः

प्राप्य स्वकृत्याय ययुर्मनोज्ञां
कःस्वां न लिप्सेत जनः समज्ञां ॥ ६ ॥
कृष्णस्तु कृष्णागुरु-युङ्मदद्रवै-
रारज्य राधाङ्गमनङ्गरङ्गदं ।
वेषं स्ववस्त्राभरणैरथ व्यधा-
त्तस्याः स्ववंशीमपि तुन्दसन्दितां ॥ ७ ॥
उदङ्मुखीं तामुपवेश्य वृष्यां
ह्रियैव नैसर्गिकमौनमाप्तां ।
स्वाङ्कं तया लङ्कृतमेव बिभ्रत्
पीताम्वरोप्यास्त तदेकपार्श्वे ॥ ८ ॥

---

ऋतुलक्ष्म्यः तां वृन्दां प्रणम्य तस्या आज्ञां प्राप्य । को जनः स्वां समज्ञां कीर्त्तिं न लिप्सेत ॥ ६ ॥

कृष्णस्तु सम्भोगानन्तरं राधां स्वसमानरूपां कर्त्तुं किङ्करीभिरानीय द्रवैः कृष्णागुरुयुक्त मृगमदद्रवैः राधाङ्गं आरज्य एवं स्वस्य पीताम्बरादिवस्त्राभरणैस्तस्या वेषं व्यधात् । एवं स्ववंशीमपि राधायास्तुन्दबद्धां व्यधात् ॥ ७ ॥

तदनन्तरं वृष्यां कुशासनोपरि वस्त्रादियुक्तासने तां राधां सकामजपकर्त्तृत्वज्ञापनार्थमुत्तराभिमुखीमुपवेश्य पीताम्बरः स श्रीकृष्णः स्वयमपि तस्या एकपार्श्वे आस्त । कथम्भूतां कृष्णेन यत्नाद् ग्राहितं यन्मौनं तत् ह्रिया नैसर्गिकं स्वभावसिद्धं प्राप्तां । पीताम्बरः कीदृशः तया स्वाधीनभर्त्तृकया राधया अलङ्कृतं साङ्कं बिभ्रत् । व्रतीनामासनं वृषी इत्यमरः ॥ ८ ॥

आरादथो नूपुर-किङ्किणी-स्वनै-
रायास्यतीरालितती: परामृशन् ।
भ्रुवेङ्गितेनैव वशे व्यधादरं
पुरःस्थिताः काश्चन किङ्करीर्हरिः ॥ ९ ॥

आगत्य तास्ताववलोक्य विस्मया
नूहुर्व्वहूनूचुरथो परस्परं ।
कं देशमाप्ता वयमद्य हन्त भोः
कृष्णाद्वयं यद्यतिरोचतेतमां ॥ १० ॥

तापिञ्छभासौ शिखिपिञ्छमौली
द्वावेव राजद्वन-दामभाजौ ।
पीताम्वरौ किं सुषमां समाना-
मस्मन्मनो मोहयितुं दधाते ॥ ११ ॥

श्रीकृष्णः आरात् निकटे किङ्किनोस्वनैः करणैरायास्यतीः सखीश्रेणीः परामृषन् सन् तदानीं सेवार्थं पुरःस्थिताः काश्चन किङ्करीः भ्रुवेङ्गितेन स्ववशे व्यधात् । अन्यथा ताभिरेव विज्ञापिते सति भाविकौतुकस्यासिद्ध्यापत्तेः ॥ ९ ॥

ताः सख्यस्तत्रागत्य तौ राधाकृष्णौ अवलोक्य वहून् विस्मयान् ऊहुः प्राप्तवत्यः एवं परस्परमूचुश्च । भोः सख्यः वयमद्य कं देशं प्राप्ताः ? यद् यस्मात् अत्र देशे कृष्णद्वयं रोचते ॥ १० ॥

तापिञ्छभासौ द्वौ किं समानां सुषमां शोभां अस्मन्मनो मोहयितुं दधाते ॥ ११ ॥

द्वयोः सखी नः कतरेति पृष्टा
दास्योऽपि ताः प्रोचुरिदं न विद्मः ।
हन्ताधुनैवैवमिहागमाम
प्रष्टुं पुनर्द्वौ विभिमः प्रभूष्णू ॥ १२ ॥

वृन्दाह नीचैर्ललिते! ऽनयो र्यो
मन्त्रं जपन् पाणि-धृताक्षमालः ।
विभाति वृष्यामुपविष्ट एष
श्रीकृष्ण एवेत्यनुमातुमीशे ॥ १३ ॥

मन्त्रौजसैवाद्यतनादिनाद्यतो
राधां स्वसारूप्यवतीं प्रदर्शयन् ।
लोके विराजिष्यति यत्र कुत्रचि-
न्निःशङ्कमेवं विजिहीर्षुरेतया ॥ १४ ॥

---

द्वयोर्म्मध्ये नोऽस्माकं सखी कतरा का इति ललितादिभिः पृष्टा-दास्योऽपि ताः सखीः प्रति ऊचुः । वयं इदं न विद्मः यतोऽधुनैव वयमिह आगमाम । द्वौ राधाकृष्णौ पुनःप्रष्टुं वयं बिभिमः यतः प्रभूष्णू ॥ १२ ॥

हे ललिते ! अनयोर्म्मध्ये यः पाणिना धृता रुद्राक्षमाला येन एवंभूतः सन् मन्त्रं जपन् स एव कृष्णः प्रत्यहमनुमातुमीशे ॥ १३ ॥

मन्त्रवलेन श्रीकृष्णः राधां स्व-सारूप्यवतीं प्रदर्शयन् लोके विराजिष्यति । एवंभूतः यत्र कुत्रचित् व्रजमध्ये वने वा एतया राधया सह निःशङ्कं विजिहिर्षुः ॥ १४ ॥

ऊचे विशाखा सखि ! सैव सर्व्वथै-
वास्मासु वृत्ता भगवत्यनर्थकृत् ।
पुनश्च मन्त्रं जपतीह कामुकः
कर्त्तुं स्वसारूप्यवतीं परां नु कां ॥ १५ ॥

चित्राह सख्यः ! शृणुताद्य गेहं
प्राप्ता जरत्या निकटं प्रयाताः ।
क्व मे वधूः सेति तयाभिपृष्टा
ब्रूमः किमेतामिति सङ्कटं नः ॥ १६ ॥

नान्दीमुखी व्याहरति स्म शङ्कां
चित्रे ! स्वचित्ते भजसे किमर्थं ? ।
तस्याः प्रतीत्यर्थमयं पुनर्य-
न्मन्त्रेण राधां स्त्रियमेव कर्त्ता ॥ १७ ॥

किन्त्वत्र मन्त्रं जपतोऽस्य पार्श्वे
स्थितिर्यदस्या न च सापि साध्वी ।
को वेद किं तिष्ठति मान्त्रिकाणां
मनस्यतोऽन्यत्र सखीं नय स्वां ॥ १८ ॥

---

हे सखि ! सैव पौर्णमासी अस्मासु अनर्थकृत वृत्ता ॥ १५—१६ ॥
तस्याः जटिलायाः अयं श्रीकृष्णः ॥ १७ ॥
मन्त्रं जपतोऽस्य श्रीकृष्णस्य पार्श्वे यद्यतः अस्या राधायाः स्थितिरतः सापि स्थितिरपि न साध्वी । मान्त्रिकाणां मनसि किं तिष्ठतीति को वेद ? ॥ १८ ॥

भोभोः ! स्वभासो भजतं प्रभूष्णू
ज्ञातौ स्थ एवाश्वथ माययालं ।
राधा त्वमेवासि निरेहि कुञ्जात्
कृष्णस्तु वृष्यामुपविष्ट एव ॥ १६ ॥

मन्त्रं जपत्वेष वयन्तु गेहं
यामो वृथा यापित एष यामः ।
भास्वांश्च नेष्टः क्व नु वा क्षणोऽत्रा-
यासिष्म गेहाद्गहहाद्य मुग्धाः ॥ २० ॥

इत्याह यावल्ललिता स तावत्
कण्ठ-स्वराभ्यासपरः प्रियायाः ।
अवर्त्तताथ क्षणतोऽभिनीय
ह्रियं परां ताः प्रति भाषते स्म ॥ २१ ॥

यदद्य वृत्तं मम वेदनावहं
न वेदनार्हं तदथापि चेद्रहः ।

---

मन्त्रं जपन्तं श्रीकृष्णं राधिकां मत्वा सख्य आहुः । भोः प्रभूष्णू ! राधाकृष्णौ ! अस्माभिर्युवां ज्ञातौ स्थः अतः स्वभासः स्वकान्तीः भजतं तस्मात् मायया अलं व्यर्थं । कुञ्जात् निरेहि निर्गच्छ ॥ १९ ॥

लम्पटेन सह कथोपकथनेन एकप्रहरोऽस्माभिर्वृथा यापितः एवं सूर्य्यश्च न पूजितः मुग्धा वयं कुत्र वा क्षणे अयासिष्म ॥ २० ॥

तावत् स श्रीकृष्णःराधायाः कण्ठस्वरे अभ्यासपरोऽवर्त्तत । अथानन्तरं क्षणमध्ये परां श्रेष्ठां ह्रियं अभिनीय ताः सखीः प्रति भाषते स्म ॥ २१ ॥

लभेय वक्ष्यामि तदैव ते श्रुतौ
नान्यत्र यत्त्वं ललिते ! गतिर्मम ॥ २२ ॥

तत्कण्ठ-जस्वान-विधूत संशया
राधेयमेवेति तदा तदालयः ।
निश्चिक्युरावव्रुरथो गतह्रियो
नीत्यान्यतोऽङ्गान्यपि साधु पस्पृशुः ॥ २३ ॥

अहो कराबङ्गुलयः पदद्वयं
नेत्रे कपोलावलिकं श्रुती अपि ।
अङ्गानि सर्व्वाणि हरेरिवाभवन्
नाभिद्यतैकस्तव कण्ठ-निस्वनः ॥ २४ ॥

आल्यत्र को हेतुरयं प्रकथ्यता-
मित्येव पप्रच्छुरिमं तदङ्गनाः ।

---

हे सखि ! मम यत् वेदनावहं पीडावहं वृत्तं तत्वेदनार्हं अर्थात् कथनार्हं न तथापि चेत् यदि अहं रहो लभेय तदैव तव कर्णे वक्ष्यामि न अन्यत्र । यतस्त्वं मम गतिः ॥ २२ ॥

तत्कण्ठजन्यशब्देन विधूतसंशयाः सख्यः निश्चिक्युः अङ्गानि पस्पृशुः । सखीं मत्वा काचित् हस्ते हस्तं निधाय काचित् स्कन्धे हस्तं निधायेति रीत्या ॥ २३ ॥

हे राधे ! तव करादिसर्व्वाण्यङ्गानि हरेरिवाभवन् किन्तु एकस्तव कण्ठ-स्वनो न अभिद्यत ॥ २४ ॥

हे आलि ! अत्र को हेतुः तस्या राधाया अङ्गनाः सख्यः इत्येव पप्रच्छुः

तत्स्पर्शजान्तःस्मरविक्रिया-क्रमो
योऽभूत् प्रतिस्वं न तु तस्य कारणं ॥ २५ ॥
कृष्णाकृतेरन्यगृहीततायाम
मप्येष कश्चित् प्रकटः स्वभावः ।
यत्क्षोभयेदित्थमिति स्वचित्ते
समादधुस्ताः स्वयमेव तत्र ॥ २६ ॥
स प्राह सख्यः ! स हि मां विमोहयं-
श्चक्रे यदेतन्नतरामवेदिषं ।
चिरात्तदन्ते पुनराप्तचेतना-
पश्यं यदेतत् शृणुत ब्रवीमि वः ॥ २७ ॥
आचम्य पाणौ द्रुतमेष नीत्वा
गण्डूषमेकं प्रजपन् स्व-मन्त्रं ।

किन्तु प्रतिस्वं श्रीकृष्णाङ्ग-स्पर्शजन्यो यः अन्तःस्मरविक्रिया क्रमोऽभूत् तस्य कारणं न तु पप्रच्छुः ॥ २५ ॥

श्रीकृष्णस्याकृतेरन्यगृहीततायामपि तस्या एष कश्चित् प्रकटः स्वभावः यत् अस्माकं मनःक्षोभयेत् । इत्थं अनेन प्रकारेण ताः स्वचित्ते समादधुः ॥ २६ ॥

स राधिकात्वेनाभिमतः श्रीकृष्णः आह । हे सख्यः! स श्रीकृष्णः मां विमोहयन् यत् चक्रे तत् अहं न अवेदिषं चिरात् तस्य मोहस्यान्ते पुनः प्राप्तचेतना अहं यत् अपश्यं तत् एतत् शृणुत वो युष्मान् ब्रवीमि ॥ २७ ॥

एष श्रीकृष्णः आचम्य पाणौ एकं गण्डूषं नीत्वा स्वमन्त्रं जपन्

दरच्छदौ कुट्मलयन् व्यधात्त-
स्तमास्य-फुत्कारसमीर-विद्धं ॥ २८ ॥
तेनैव नीरेण मदीयगात्रा
ण्यानञ्ज नानेति निवारितोऽपि ।
स्वास्यं तदामुद्रयमेव दिष्ट्या
ततस्तदम्भो न गले विवेश ॥ २९ ॥
तदैव तद्रूपधराणि गात्रा-
ण्येतान्यभूवन् मम विस्मितायाः ।
तदैव वृष्यां पुनराहितास्यः
प्रचक्रमेऽसौ जपितुं स्वमन्त्रं ॥ ३० ॥
अन्यच्च यत्किञ्चिदहो वचोऽभू-
द्वक्तुं नचावक्तुमहं तदीशे ।
किन्त्वेकिकां काञ्चन वो ब्रवीमि
ह्रीर्मां निरुन्धे वत किं करोमि ॥ ३१ ॥

सन् ओष्ठाधरौ कुट्मलयन् तं गण्डूषं मुख-फुत्कारवायुना वारत्रयं विद्धं व्यधात् ॥ २८ ॥

नानेत्युक्त्वा मया निवारितोपि कृष्णः मम गात्राणि आनञ्ज । तदाहं स्वमुखं अमुद्रयं तत एव हेतोः तज्जलं गले न विवेश । अतएव मम स्वर-वैजात्यं न जातं ॥ २९ ॥

वृष्यां आहिता आस्या उपवेशो येन एवंभूतो ऽसौ कृष्णः पुनः स्वमन्त्रं जपितुं प्रचक्रमे । स्यादास्या त्वासना स्थितिरित्यमरः ॥ ३० ॥

अहं तद्वक्तुं न ईशे । एवं चापल्यादवक्तुमपि न ईशे किन्तु वो युष्माकं काञ्चन एकाकिकां ब्रवीमि यतो मां ह्रीर्निरुन्धे ॥ ३१ ॥

किं ते ह्रिया वेदय नः सखीः स्वा
इत्युच्यमानोऽपि यदाह नासौ ।
तत्रास्थितैका ललितैव सर्व्वा-
स्तदापसस्रुर्व्वहिरेव मुग्धाः ॥ ३२ ॥
न वक्तु किं तेन वयं तु नो किं
ज्ञास्याम एवाखिलमास्यतोऽस्याः ? ।
इत्यात्तविश्वासतया स्थितास्ताः
कृष्णो गृहान्तर्ललितां विवेश * ॥ ३३ ॥
आश्लेष-विम्वाधरपान-कञ्चुकी-
नीवी-स्तनाकर्षण-तत्परं तु तं ।
साहालि ! किं न्वेतदसौ तदाब्रवी-
द्भद्रे ! रहस्यं परमेतदेव नौ ? ॥ ३४ ॥

हे सखि ! राधे ! तव ह्रिया किं स्वकीयाः सखीः नोऽस्मान् वेदय ज्ञापय । इत्युच्यमानोऽप्यसौ कृष्णः यदा ह्रिया न आह । तदा तत्रैका ललिता अन्याः सर्व्वाःवहिरपसस्रुः ॥ ३२ ॥

राधिका न वक्तु चेत् किं तेन ? वयन्तु अस्याः ललितायाः मुखतः किं अखिलं न ज्ञास्यामः ? इति गृहीतविश्वासतया ताः सर्व्वाःवहिःस्थिताः । कृष्णस्तु ललितामिति ॥ ३३ ॥

आश्लेषणचुम्बनादौ तत्परं श्रीकृष्णं सा ललिता आह । हे सखि राधे ! एतत् किं तदासौ कृष्णः अब्रवीत् । हे भद्रे ललिते ! नौ आवयोरेतदेवपरं रहस्यं अतएव रहस्यत्वादेव वक्तुं न शक्तं अधुना तु तत्क्रियया दर्शयामि ॥ ३४ ॥

* निनायेत्येव पाठः साधुः ।

यदा स्वकण्ठ-स्वरमाददान-
स्तया सहालाप-परः स रेमे ।
तदा स्मयो विस्मयवान् शुचिः किं
न प्राप साम्राज्यधुरां तयोःसः ॥ ३५ ॥

द्वित्रक्षणानन्तरमात्तमन्त्रा
प्राह स्वतन्त्रा ललिता मुदोच्चैः ।
एह्येहि नौ शीघ्रमितो विशाखे !
जिज्ञाससे चेदवगच्छ तत्वं ॥ ३६ ॥

प्राप्तां विशाखामथ तां तथैव सा
छलात् स्वसाधर्म्यमवापयद् द्रुतं ।
अन्या अपीत्थं मधुसूदनेन ताः
प्रासञ्जयच्चम्पकवल्लिकादिकाः ॥ ३७ ॥

---

तदालयोर्ललिताकृष्णयोः विस्मयवान् अद्भुतरसविशिष्टः एवं आ सम्यक् स्मयः हास्यरसो यत्र तथाभूतः शुचिः शृङ्गारः किं साम्राज्यधुरां न प्राप ? ॥ ३५ ॥

आत्तमन्त्रा कृष्णेन सह गृहीतमन्त्रणा स्वतन्त्रा ललिता मुदा उच्चैःप्राह । स्वतन्त्रेति स्पष्टार्थत्वात् राधया सह मन्त्रणां विनैव वच्मीति तां प्रति प्रत्यायितं । विशाखे ! नौ आवां एहि एहि आगच्छ आगच्छ तत्वं जिज्ञाससे चेत् अवगच्छ ॥ ३६ ॥

अथ प्राप्तां विशाखां सा ललिता छलात् द्रुतं स्वसाधर्म्यमवापयत् । ललिता अन्या अपि चम्पकवल्लिकादिकाः मधुसूदनेन सह प्रासञ्जयत् ॥ ३७ ॥

अथो मिथः सम्मिलने रताङ्कित
स्वान्याङ्ग-सम्वृत्यवलोकनोन्मुखाः ।
ह्रीणा भवन्त्योऽपि न ह्रीणतां ययुः
सर्व्वैकरूप्यं खलु निर्व्विवादिता ॥ ३८ ॥

राधाथ वृन्दादिकृतान्तिकोप-
वेशास्ति यत्रात्तमुकुन्दवेशा ।
तत्राजिहाना ललितादिकाली-
स्तां ज्ञातुमिच्छूर्निजगाद कौन्दी ॥ ३९ ॥

आगच्छतागच्छत भद्रमाल्यः !
कियान् विलम्बो ऽजनि वः सतीनां ।
अङ्गैरनङ्गोदय-सूचकानि
क्व वाद्य लक्ष्माण्यलमर्जितानि ॥ ४० ॥

अथानन्तरं परस्परमिलने सति रतिचिह्नयुक्तस्य स्वाङ्गस्य सम्वरणे एवं रतिचिह्नयुक्तस्य अन्यासामङ्गस्यावलोकने उन्मुखाः सर्व्वा ह्रीणा भवन्त्योऽपि न ह्रीणतां ययुः यतः सर्व्वासामैकरूप्यं निर्व्विवादिता निर्व्विवादजनकमित्यर्थः । अत्र कार्य्यकारणयोरभेदोपचारेणायुक्तमितिवत् जनकताया अतिशयत्वं व्यक्तीभवतीति भावः ॥ ३८

वृन्दादिभिः कृतोऽन्तिके उपवेशो यस्या एवम्भूता गृहीत मुकुन्द-वेशा राधा यत्रास्ति तत्राजिहाना आगता ललितादिसखीः कौन्दी निजगाद । सखीः कथम्भूताः तां राधां ज्ञातुमिच्छूः ॥ ३९ ॥

वो युष्माकं सतीनां इयान् विलम्बः कुत्र अजनि । अङ्गैः करणैः कन्दर्पोदय-सूचकानि चिह्नानि कुत्राद्य अर्जितानि । अङ्गे अङ्गस्य देहस्य न उदयो जन्म अनङ्गोदयोऽपुनर्भवो मोक्ष इत्यर्थः तस्य

निरञ्जने वञ्चपले अपीक्षणे
विभान्ति वाला अपि मुक्तवन्धनाः ।
द्विजार्दितोऽप्यूढविरक्तिकोऽधरः
स्तब्धौ स्तनौ लब्धपुनर्भवक्षतौ ॥ ४१ ॥

सायुज्यदो वः खलु माधवो भवे-
दयं त्वधाद्ध्यानमिहास्थितासनः ।
केनेदृशीं लम्भयता गतिं कृता
यूयं कृतार्थास्तदिदं महाद्भुतं ॥ ४२ ॥

प्रोवाच नान्दी ललिते ! वद द्रुतं
वृत्तं स्व-सख्या अलमन्य-वार्त्तया ।
क्व सास्ति तस्या अधुनापि किं पुनः
कृष्णाकृतित्वं वत वर्त्तते न वा ॥ ४३ ॥

---

सूचकानि योगचिह्नानि क्व अर्जितानि। परश्लोके चिह्नानि व्यक्ती भविष्यन्ति ॥ ४० ॥

कन्दर्पं चिह्नान्याह । निरञ्जने इति । मोक्ष पक्षे निरञ्जने उपाधि रहिते । तथाच मोक्षविरोधि चपलत्व-वालत्व-स्तब्धत्वादिधर्म्मवतां नेत्र-केश स्तनानां मोक्षो जात इत्याश्चर्य्यमिति । पक्षे वालाः केशाः । ब्राह्मणार्दितोऽपिलब्धवैराग्यः ब्राह्मणकर्त्तृकार्दनस्य महानरक-जनकत्वात् । पक्षे दन्तार्दितोऽपि लब्धरागराहित्यः । लब्धः पुनर्भवक्षतो मोक्षो याभ्यां एवंभूतौ स्तब्धौ स्तनौ । पक्षे लब्धनखक्षतौ ॥ ४१ ॥

माधव एव युष्माकं सायुज्यदो मोक्षदो भवेत् । पक्षे सयुजो भावः सायुज्यं संयोगः स तु कृष्णेनैव दीयते । अयंतु कृष्णः आस्थितासनः ध्यानं अधात् । श्लेषेण धवःपतिर्मा सायुज्यदो भवेत् अतएव

अस्मत्सखी वल्लिगृहान्तरोदरे
जिह्रेति कृष्णाकृतिमेव बिभ्रती ।
चिरं विमृश्यैकमुपायमैक्षत
प्राहाथ नः सा निभृतं मनीषिणी ॥ ४४ ॥

नान्दीमुखीकुन्दलते क्रमेण मा-
मालिङ्गतश्चेदनुराग-सङ्गते ।
तदैव वैरूप्यमिदं त्रपास्पदं
लीयेत न त्वौषधिसञ्चयैरपि ॥ ४५ ॥

एकत्र वर्वर्त्ति तपोऽतितीव्रता-
न्यस्यां तु साध्वीत्वधुराऽनपायिनी ।
द्वाभ्यामियं लम्पट-वेशधारिता
मन्त्रोत्थवैगुण्यभवापयास्यति ॥ ४६ ॥

---

युष्माकं ईदृशीं गतिं लम्भयता श्रीकृष्णातिरिक्तेन केन युयं कृतार्थाः कृताः तस्मादिदं महाद्भुतं ॥ ४२—४३ ॥

ललिताह । अस्मत्सखी राधा लतागृहमध्ये स्थित्वा जिह्रेति यतः सा कृष्णाकृतिं बिभ्रती धृतवती किन्तु चिरकालं विमृश्य एकं उपायं ऐक्षत । अथानन्तरं सा मनीषिणी निभृतं अस्मान् प्राह ॥ ४४ ॥

तदैव लज्जास्पदं इदं वैरूप्यं लीयेत ॥ ४५ ॥

तयोः क्रमेणालिङ्गनस्य वैरूप्यनाशकत्वे कारणमाह । एकत्र नान्द्यां अन्यस्यां कौन्द्यां । द्वाभ्यां तयोः तपःसाध्वीत्वाभ्यां मन्त्रोत्थवैगुण्यभवा इयं मम लम्पटवेशधारिता अपयास्यति ॥ ४६ ॥

त्वदादिसख्यर्बुदलक्षभाज
स्तस्याः किमाश्लेष-दरिद्रता ऽभूत् ।
समाह्वयेन्नौ यदसावतस्त्वं
ब्रूषे मृषैवेति जगाद नान्दी ॥ ४७ ॥
वृन्दाह नैतासु सखीषु किञ्चि-
त्तपोस्ति मुग्धासु कुलाङ्गनासु ।
सतीत्वमासीदतुलं यदेतत्
कृष्णः खपुष्पायितमेव चक्रे ॥ ४८ ॥
वृन्देऽसि देवी विपिनाधिकारिणी-
त्यतस्त्वयि स्युः कतिशो न सिद्धयः ।
तथौषधानीत्यपि याहि तद्रुज
स्त्वमेकिकैव प्रतिकर्त्तुमीशिषे ॥ ४९ ॥
कौन्दी-गिरेत्थं कलितस्मितासु
सर्वासु वाचं ललिता ससर्ज ।

नान्दीमुखी आह । हे ललिते ! त्वदादिसख्यर्बुदलक्षयुक्तायास्तस्या राधाया किं आलिङ्गन दरिद्रता अभूत् ? यद्यस्मात् असौ राधा नौ आवां समाह्वयेत् । अतस्त्वं मिथ्या ब्रूषे ? ॥ ४७ ॥

किन्तु आसां सखीनां यत् अतुलं सतीत्वं अस्ति तत् कृष्णः खपुष्पायितमेव चक्रे ॥ ४८ ॥

त्वयि कतिशः सिद्धयः तथा औषधानि न स्युः ? अपि तु तत्तत् सर्व्वाण्येव स्युरितिहेतोः त्वमेव याहि । राधाया रुजं त्वमेव प्रतिकर्त्तुं-ईशिषे ॥ ४९ ॥

कौन्दी-गिरा गृहीतस्मितासु सर्व्वासु सतीषु ललिता वाचं ससर्ज

किं वो विवादे हरिरेव कस्मा
त्रपृच्छ्यते मौनधरोऽपि का भीः ॥ ५० ॥
इत्यन्तरुद्भूत मनाक्स्मिताङ्कुरा
आसेदुराल्यः सहसा तदन्तिकं ।
तास्वग्रणीः सा ललितैव किञ्च न
प्राहाभिनीतत्रपलोचनाञ्चला ॥ ५१ ॥
भोः किं व्यवस्यस्यसि मान्त्रिकाणां
चूडामणिर्लब्धनिजार्थ-सिद्धिः ।
जहीहि मौनं कलयोत्तरं न
श्चिकीर्षिते कुत्रचनानुयोगे ॥ ५२ ॥
इत्युच्यमानाथ तदात्व-जात
स्व-सुप्ति-भङ्गेव विलक्ष्यमाणा ।

सृष्टिं चकार। मौनधरोऽपि हरिरेव किं न पृच्छ्यते तत्कृतराधा वैरूप्यं केनोपायेन यास्यतीति प्रश्नः कथं न क्रियत इत्यर्थः ॥ ५० ॥

आल्यः सहसा तस्याः कृष्णरूपधारिण्या राधाया अन्तिकं आसेदुः आजग्मुः। ललिता कथंभूता राधां ज्ञात्वापि कृष्णं मत्वा अभिनीता त्रपा यत्र तथाभूतौ लोचनाञ्चलौ यस्याः ॥ ५१ ॥

भोः इति सामान्यशब्देन राधाकृष्णयोः सम्बोधनं। यतस्त्वं मान्त्रिकाणां चूडामणिरसि अतः किं व्यवस्यसि ? व्यवसायं करोषि। लब्धेति राधापक्षे। लब्धा अस्माकं कृष्णद्वारा विडम्बनरूप निजार्थ-सिद्धिर्यया। नोऽस्माकं चिकीर्षिते कर्त्तुमिष्टे कुत्रचन अनुयोगे प्रश्ने उत्तरं कलय ॥ ५२ ॥

इत्युच्यमाना तदात्वजाता तत्कालीनोत्पन्ना सुषुप्तिः स्वस्व

ससम्भ्रमोद्घाटित लोचनेव
प्रावोचदाल्योऽत्र कदागताः स्थ ॥ ५३ ॥
इतस्ततः सा नुदती दृशः स्वाः
क्व वः सखा धूर्त्त इति ब्रुवाणा ।
स्व-सव्यहस्तेन जवात् स्वमूर्द्ध्न
श्चिक्षेप शैखण्डकिरीटमारात् ॥ ५४ ॥
त्वमेव किं नः सहचर्य्यसि स्फुटं
राधा ततस्त्वां प्रति किं त्रपामहे ।
निलीय यान्या हरि-वेशधारिणी
कुञ्जेऽस्ति किं सैव मृषाद्य मोहिनी ॥ ५५ ॥
विहाय तां तावदविश्वसत्यो
यदागमामात्र वयं तदेषा ।

निद्रा तस्या भङ्गो यस्या एवंभूता इव सखीभिर्लक्ष्यमाणा। तत्कालस्तु तदात्वं स्यादित्यमरः। एतावत्कालपर्य्यन्तं किं वृत्तमहं न जानामीति ससम्भ्रमोद्घाटित लोचना इव प्रावोचत्। हे आल्यः! कदा अत्र आगताः स्थ ॥ ५३ ॥

वो युष्माकं सखा क्व गत इति ब्रुवाणा केन एष वेषो मम रचितः अहं न जानामीत्यभिनीय स्ववामहस्तेन मूर्द्ध्नः सकाशात् किरीटं दूरे चिक्षेप ॥ ५४ ॥

ललिताह। त्वमेव किं अस्माकं सहचरी राधा ततस्त्वां कथं वयं त्रपामहै? हरिवेशधारिणी या अन्या कुञ्जेषु निलीयस्थिता सा अस्माकं मृषा मोहिनी तथाच सा एव कृष्ण इत्यर्थः ॥ ५५ ॥

राधिकात्वेनाविश्वसत्यो वयं यद्यस्मात्तां विहायात्रागमाम तत्त-

दैवेन रक्षाऽजनि नो हृदेव
तत्राद्य शङ्कामजहत् प्रमाणं ॥ ५६ ॥

इत्थं तदालीष्वभिनीतविस्मया-
स्त्वाह स्मितास्या विपिनालि पालिका ।
आल्यो ! निभाल्य स्वदृशैव नीयतां
सखा सखीवैष जनो मनोज्ञभाः ॥ ५७ ॥

विशेषकं ।

नान्यद्ब्रवीत् पूर्व्वमलोकि माधव-
द्वयं तथा संप्रति राधिका-द्वयं ।
ननः क्षतिः काचन किन्तु सङ्कटं
युष्माकमेवेति दधेऽति दूनतां ॥ ५८ ॥

नान्दीमुखि ! द्वापर एष नोऽदुनो
तदन्तमाकाङ्क्षसि यत्तपस्विनि ! ।

स्मान्नोऽस्माकं रक्षा दैवेनाऽजनि । अतएव एतद्विषये शङ्कामजहत् त्यागमकुर्व्वत् अस्माकं हृदेव प्रमाणं ॥ ५६ ॥

सखीषु अभिनीतविस्मयासु सतीषु स्मितमुखी वृन्दा आह । मनोज्ञभा एष जनः सखा सखी वा ॥ ५७ ॥

राधिकाद्वयमिति पूर्व्वं युष्माभिरेका राधिका एकान्ते नीता अधुना एतामपि राधिकां जानीथ इत्यर्थः । अत्रास्माकं कापि क्षतिर्नास्ति किन्तु युष्माकमेव सङ्कटं यतो सखीज्ञानस्यावश्यकत्वमितिहेतोः अहं दूनतां दधे ॥ ५८ ॥

विशाखाह । द्वापरः सन्देह एव नोऽस्मान् अदुनोत् । अतएव तस्य द्वापरस्यान्तं नाशं त्वमाकांक्षसि । यद्यस्मात् हे तपस्विनि ! पर-

वर्द्धिष्णुतामेष्यति तत् स्वधर्म्मजं
फलं तवैवेत्युदितं विशाखया ॥ ५९ ॥
विसृष्टतद्वर्णविभूषणायां
प्रसाधितायां पुनरालिपाल्या ।
श्रीराधिकायां द्रुतमेत्य तस्याः
कण्ठ-स्वरेणैव पुनः स कृष्णः ॥ ६० ॥
दराभिनीतानृजुता-त्रपा-भीः
सृष्ट्वा महाविस्मयमास्यविम्वं ।
अर्द्धं पिधायेक्षण-कोणभृङ्गी
निपीतकान्तास्य रुचिर्जगाद ॥ ६१ ॥

युग्मकं ।

मदङ्ग-वैरूप्यमयं व्यधाद्य-
त्तदस्तु सम्प्रत्यतिचित्रमीक्षे ।

---

दुःख-नाशस्य तव स्वधर्म्मत्वात् । पक्षे द्वापरस्यान्तं कलियुगं तत्र तपः कर्त्तुमाकांक्षसि कलौ तपस्विनः प्रायो भ्रष्टा एव भवन्तीति परिहासो व्यञ्जितः । तत्र स्वधर्म्मजं पक्षे कलौ सुष्ठु अधर्म्मजं ॥५९॥

आलिपाल्या त्यक्ततद्वर्णभूषणायां पुनः प्रसाधितायां सत्यां कृष्णः द्रुतं एत्य राधायाः कण्ठस्वरेणैव पुनर्जगाद इति परश्लोकेनान्वयः ॥६०॥

कथम्भूतः कृष्णः राधिकावत् ईषदभिनीता कुटिलता लज्जादयो येन । महाविस्मयं सृष्ट्वा मुखविम्बमर्द्धमाच्छाद्य राधिकावदक्षिकोणरूप भृङ्ग्या निपीता कान्तास्य-कान्तिर्येन सः ॥ ६१ ॥

अयं कृष्णः यत् मदङ्ग वैरूप्यं व्यधात् तदस्तु । सम्प्रति आश्चर्य्यमीक्षे यतो मे सखी सर्व्वाण्यपि हायनु मद्रूपादीन् धत्ते ॥ ६२ ॥

मद्रूप लावण्य-निसर्ग-वेशान्
धत्ते ऽधुना मोहयितुं सखीर्म्मे ॥ ६२ ॥

किं हन्त सख्यः! कुरुथास्य पार्श्व-
मायात माया-शत-पण्डितस्य ।
नैवातिमुग्धा भवथाद्य सर्व्वा
हास्यास्पदीभावमिमः किमन्धाः! ॥ ६३ ॥

नीत्वैव मां तावदितः पलाय्य
क्वचिद्गिरेर्गह्वर एव गुप्ताः ।
चेत्तिष्ठथावाप्स्यथ तर्हि भद्रं
नो चेदभूदेव दशा ममेयं ॥ ६४ ॥

वृन्दादयः प्राहुरहो महोन्नति
र्मायाविताया गिरिधारिणोऽद्भुता ।
राधामिमां यन्निरनैषुरालयो
राधा तु साक्षादियमागता परा ॥ ६५ ॥

---

पूर्व्वकृत विडम्बनस्य व्यक्ताशङ्कया ललितादयः किञ्चिद्वक्तुं न शक्नुवन्ति अतः श्रीकृष्ण एव निःशङ्कतया आह । मायाशतपण्डितस्यास्य कृष्णस्य पार्श्वे किं कुरुथ, तस्मादायात । हे अन्धाः ! सर्व्वा एव वयं किं हास्यास्पदीभावं इमः प्राप्नुमः ॥ ६३ ॥

तर्हि भद्रं अवाप्स्यथ नोचेत् मदीयदशा इव दशा अभूदेवेत्यर्थः ॥६४॥

गिरिधारिणो मायावित्त्वस्य उन्नतिरद्भुता । यद्यस्मादालयः इमां अस्मन्निकटे उपविष्टां राधामेव निरनैषुः निर्णयं कृतवत्यः राधा तु साक्षादियं वनादागता ॥ ६५ ॥

सख्यः ! कुरुध्वं यदसौ ब्रवीति वो
यातानया हन्त ! विहाय मोहिनीं ।
श्रुत्वेति वृन्दावन कल्पवल्ल्यपि
स्मितं दधे लब्धमनोरथा चिरात् ॥ ६६ ॥

एकास्ति युक्तिर्नहि तामृतेऽन्यं
कमप्युपायं ललिते ! ऽवलोके ।
नान्दीह सान्दीपनि-मातरं तां
समानयत्वेतदुवाच कौन्दी ॥ ६७ ॥

हन्तालि ! सैवैतदनर्थ-मूलं
किं वक्ष्यते सत्यमितोऽपि किञ्चित् ।
अन्यच्च नः प्रत्युत हा सखीनां
विडम्बनं स्रक्ष्यति तां नमामः ॥ ६८ ॥

इत्युक्तिराली-विततेर्हरिं च
राधाञ्च वृन्दाप्रभृतीश्च सभ्याः ।

हे सख्यः ! असौ वनादागता राधा यत्ब्रवीति तत्युयं कुरुध्वं युष्माकं भ्रमविषयीभूतां मोहिनीं विहाय, इति श्रुत्वा वृन्दावनकल्पवल्ली राधा स्मितं दधे। यतश्चिराल्लब्ध मनोरथा। तथाच पुनरपि आभिः सहाङ्गसङ्गो भवत्विति भावः ॥ ६६ ॥

कुन्दवल्ली उवाच। सान्दीपणिमातरं पौर्णमासीं ॥ ६७ ॥

ललिताद्य आहुः। इतोऽपि अन्यत् किञ्चित् नोऽस्माकं सखीनां विडम्बनं सा स्रक्ष्यति तस्मात्तां पौर्णमासीं नमामः ॥ ६८ ॥

सखीनां स्वमुखान्निर्गतं श्रीकृष्णकृतसम्भोगरूपविडम्बनं श्रुत्वा

अजीहसद्देवि ! सरस्वति ! त्वां
नुमो यदत्र प्रकटासि सत्या ॥ ६९ ॥

मिथस्तासां प्रेमाम्बुधि-मथनजां वाङ्मयसुधां
धयन् कृष्णस्तृष्णामधिकमुपलेभे श्रुतिभृतां ।
तदास्याब्जेनापि प्रवरपरिहासामृतमधु-
द्रवासारैर्वृष्टैरतुलमुदमाद्यन्त महिलाः ॥ ७० ॥

इति श्रीभावनामृते महाकाव्ये कुञ्जकेलि-चातुर्या-
स्वादनो नाम दशमः सर्गः ।

---

राधादीनां हास्यमाह । आलिविततेरेतादृशोक्तिः हरिप्रभृतीः सख्याःअजीहसत् । हे सखीनां वाणीरूपसरस्वति ! त्वां वयं नुमः यद्यस्मात्वं सत्या एव प्रकटासि ॥ ६९ ॥

तासां सखीनां प्रेमाम्बुधिमथनजन्यां वाङ्मयसुधां श्रुतिभृतां श्रीकृष्णो धयन् सन् तृष्णां अधिकमुपलेभे । तदैवास्य कृष्णस्य मुखेनैव वृष्टैः प्रवरपरिहासरूपामृतद्रवस्य धारासम्पातैः करणैः महिलाः सख्यः अतुलं यथास्यात्तथा उदमाद्यन्तः उन्मत्ता बभूवुः ॥७०॥

समाप्तोऽयं दशमः सर्गः ।

# एकादशः सर्गः ।

निर्यन् कुञ्जादालिपाली-परीतः
कृष्णः कान्तापाङ्गभृङ्गी-विलीढः ।
पञ्चेषूणां सञ्चयं प्राञ्चयन् किं
पादाग्रैकत्विट्कणं स्वं विरेजे ? ॥ १ ॥
वीक्ष्याकस्मात् प्रेयसः सव्यदोष्णा
राधास्कन्धं सन्दितं स्वं चकम्पे ।
माधुर्य्याब्धेरुत्तरङ्गेण केना-
प्यभ्यामृष्टा कानकाम्भोजिनीव ॥ २ ॥
पार्श्व-द्वन्द्वे दीयमाने सखीभ्यां
राधाकृष्णौ चारुताम्बूल-वीट्यौ ।

कृष्णः स्वकीयं पादाग्रस्यैककान्तिकणं पञ्चेषूणां सञ्चयं कन्दर्प समूहं प्राञ्चयन् पूजां कारयन् रेजे। तदीयकान्तिकणोऽपि कन्दर्प कोटिभिरपि प्राप्तुमभिलस्यत इतिभावः ॥ १ ॥

राधा कृष्णस्य वामहस्तेन स्वकीयं स्कन्धं सन्दितं वद्धं अकस्मात् वीक्ष्य आनन्दात् चकम्पे। अत्र उत्प्रेक्षामाह । केनापि माधुर्य्य समुद्रस्य तरङ्गेन संयुक्ता स्वर्णकमलिनी इव ॥ २ ॥

राधाकृष्णयोः पार्श्वद्वये सखीभ्यां दीयमाने ताम्बुलवीट्यौ राधिकाया

नीत्वा सव्यासव्यपाण्यङ्गुलीभि-
र्वक्त्र-द्वन्द्वे ऽन्योन्यमेवादधाते ॥ ३ ॥
वामा प्रेयो-वामपाणिं निरास्थ-
द्वक्षोजं स्वं स्प्रष्टुकामं करेण ।
चित्रं मन्ये ऽरुन्ध लावण्यवापी
पद्मं चक्रास्वादिरक्तोत्पलेन ॥ ४ ॥
शाखि-व्रातैरावृते ऽप्यन्तरन्तः
सूर्यद्योति-प्रस्फुरत्याकुलात्मा ।
सद्यः स्वेदि श्रीमुखं स्व-प्रियाया
स्तिर्यङ्मौलिच्छायया च्छादयत् सः ॥ ५ ॥

वामांगुलीभिः कृष्णस्य दक्षिणाङ्गुलीभिश्च करणैः राधाकृष्णौ नीत्वा परस्परमुखद्वये आदधाते ॥ ३ ॥

वामा राधा स्वस्कन्धस्थितं कृष्णस्य वामपाणिं स्वं वक्षोजं स्प्रष्टुकामं करेण निरास्थत् । उत्प्रेक्षामाह । स्तनरूपचक्रवाकमास्वादयितुं शीलं यस्य तथाभूतं कृष्णस्य बाहुरूपलावण्यवाप्या हस्तरूपपद्मं राधायाः हस्तरूपरक्तोत्पलेन अरुन्ध इति अहं चित्रं आश्चर्य्यं मन्ये । तद्यथा । अचेतनस्य पद्मस्यास्वादकर्त्तृत्वं । एवं सूर्य्यरूपैकमित्रयोर्द्वयोः प्रणय एव उचितः प्रत्युत हिंसा । अपरञ्च चक्रवाकाणां विपक्षरूपचन्द्रस्य मित्रेण उत्पलेन तेषां साहाय्यकरणमित्याद्याश्चर्य्यं ज्ञेयं ॥ ४ ॥

शाखिव्रातैः वृक्षसमूहैरावतेऽपि सूर्य्यकिरणैरन्तरन्तः पत्रादीनां छिद्रद्वारा मध्ये मध्ये स्फुरति सति सद्यस्तत्क्षण एव राधायाः स्वेदयुक्तं श्रीमुखं वीक्ष्याकुलात्मा श्रीकृष्णः तिर्य्यक् मुकुटच्छायया आच्छादयत् ॥ ५ ॥

भूमौ विद्युद्वारिदोपर्य्यभाता
विन्दू तत्तद्वर्णभाजौ दिनेऽपि ।
भव्यालीनां यौ दृगिन्दीवराणि
प्रोत्फुल्लान्येवाकृषातां सदैव ॥ ६ ॥
कोकाः शोकं केकिनो हर्षनाट्यं
हंसास्त्रासं पुंश्चकोराः प्रमोदं ।
ताभ्यामापुस्तेन किं वक्तुमीशे
तद्वैषम्यं स्रष्टरि ब्रह्मणीव ॥ ७ ॥
मन्दं मन्दं वृन्दयोद्दिष्टमिष्टं
वर्त्माश्रित्य स्वश्रिया रज्यमानं ।
यान्तौ नर्म्मोदन्तरङ्गैररण्यं
वर्षाहर्षाभिख्यमाप्तावभातां ॥ ८ ॥

---

भूमौ तत्रापि दिने विद्युन्मेघोपरि मुखरूपौ इन्दू अभातां कथम्भूतौ ? विद्युन्मेघयोः पीतश्यामवर्णभाजौ । ननु दिवसे उदितोऽयं केन हेतुना चन्द्रत्वेन निर्णीतः ? तत्राह । यौ चन्द्रौ भव्यालीनां मङ्गलयुक्तसखीनां दृष्टिरूपेन्दीवराणि सदैव प्रोत्फुल्लान्येवाकृषातां चक्रतुः ॥ ६ ॥

ताभ्यां राधाकृष्णाभ्यां कोकाश्चक्रवाकाश्चन्द्रोदय-ज्ञानात् शोकमापुः । केकिनो मयूराः विद्युन्मेघ-ज्ञानात् हर्षनाट्यं, हंसा विद्युन्मेघज्ञानात् त्रासं । चन्द्र-रश्मिपानकर्त्तारः पुंश्चकोराः मत्तचकोराः प्रमोदं । तेन हेतुना यथा समविषमस्रष्टरि परब्रह्मणि नैव वैषम्यं ॥ ७ ॥

वृन्दाया उद्दिष्टं इष्टं वर्त्म मन्दं मन्दं यथास्यात्तथा नर्म्मरूपस्योदन्तस्य वृत्तान्तस्य रङ्गैः करणैर्यान्तौ राधाकृष्णौ वर्षाहर्षाख्यं अरण्यभागं प्राप्तौ सन्तौ अभातां ॥ ८ ॥

विद्युन्मेघौ तत्र खे वर्त्तमाना-
वेतौ दृष्ट्वा भ्राजमाणौ धरण्यां ।
स्पर्द्धायां सम्भावनामापतुः किं
क्वैका संख्या क्वामितं वा परार्द्धं ॥ ९ ॥
नोपर्य्यावामेतयोः स्थातुमर्हौ
यावो वा क्व व्योम सर्व्वं निरुद्धं ।
एतद्भासैवेति कम्पैरभूतां
सद्यः पाण्डूभूय चिक्रिन्दिषू तौ ॥ १० ॥
किम्वा हेमोद्योतिनीलाश्मदिव्य
च्छत्रीभावं प्राप्य घर्म्मापनुत्यै ।

वर्षार्हर्म्य विभागोपरि आकाशे वर्त्तमानौ विद्युन्मेघौ धरण्यां एतौ विद्युन्मेघस्वरूपौ राधाकृष्णौ दृष्ट्वा स्पर्द्धायां किं सम्भावनां आपतुः ? अपितु न। तत्र हेतुः क्व एका संख्या क्व वा अपरिमितपरार्द्ध संख्या ॥ ९ ॥

उत्प्रेक्षामाह । अद्भुतविद्युन्मेघस्वरूपयोरेतयोःराधाकृष्णयोरुपरि आवां स्थातुं न अर्हौ किन्तु कुत्र यावः यतः एतयोर्भासा कान्त्या एव सर्व्वं व्योम निरुद्धं इति हेतोः कम्पैः करणैः सद्य एवान्तरान्तरा पाण्डुवर्णमेघवृष्टि-च्छलात् पाण्डूभूय तौ आकाशवर्त्ति विद्युन्मेघौ चिक्रिन्दिषू रोदनेच्छू अभूतां ॥ १० ॥

उत्प्रेक्षान्तरमाह । किम्वा विद्युन्मेघौ राधाकृष्णयोर्घर्म्मापनुत्यै सुवर्णयुक्त नीलाश्ममणिना दिव्यच्छत्रीभावं प्राप्य पाण्डुवर्णमेघवर्षा

वैवर्ण्यास्रे ऊहतुर्गद्गदोद्यन्
मन्द्रध्वानेनास्तुवातां मुदेमौ ॥ ११ ॥
उद्यद्भूरुश्यामशाखा-सहस्रैः
पीतैः पुष्पैः स्यन्दमानैर्मरन्दैः ।
शम्पाम्भोद-श्रीजयिन्यां विशन्तौ
नीपाटव्यां रेजतुस्तौ लसन्तौ ॥ १२ ॥
मध्ये तस्या या मणीकुट्टिमाल्यो
द्राघीयस्यः कृष्णमुद्वप्रभूताः ।
ता विन्दन्ते ऽहर्निशं शीधुवृष्टिं
जाग्रत्या सत्यालिपाल्यैव पाल्याः ॥ १३ ॥
तत्प्रान्तोत्थस्तम्भवद्विद्विवृक्षो-
दञ्चच्छाखान्योऽन्यसंश्लेषभङ्ग्या ।

---

मिषात् वैवर्ण्यास्रे ऊहतुः । गद्गदोद्यन्मन्द्रध्वानेन इमौ राधाकृष्णौ अस्तुवातां ॥ ११ ॥

तौ राधाकृष्णौ कदम्बाटव्यां विरेजतुः । कथम्भूतायां श्यामशाखा-सहस्रैः एवं पीतपुष्पैः एवं मरन्दैश्च करणैः विद्युन्मेघयोः श्रीजयिन्यां ॥ १२ ॥

तस्याः कदम्बाटव्या मध्ये द्राघीयस्यः दीर्घतरायाः मणिकुट्टिमश्रेण्यः श्रीकृष्णसम्बन्ध्यानन्दस्य केयारी इतिप्रसिद्धा वप्रभूताः अतएव ताः कुट्टिमश्रेण्यः अहर्निशं मकरन्दरूपवृष्टिं विन्दन्ते प्राप्नुवन्ति । तादृशवप्रस्य सेचनमुक्त्वा रक्षामाह । जाग्रत्या अलिपाल्या भ्रमरश्रेण्या पाल्याः, कथम्भूतया सत्या श्रेष्ठया ॥ १३ ॥

तासां कुट्टिमानां प्रान्ते उत्पन्ना अथच स्तम्भतुल्या ये द्विद्विवृक्षा-

गोपानस्येवाञ्चिताः सन्ति पुष्प-
प्रालम्बाढ्या मारकत्यो वलभ्यः ॥ १४ ॥

तत्तच्छाखालम्बितद्विद्विशोणा
श्रीमन्मुक्तामुक्तरज्जुप्रणद्धाः ।
हिन्दोलाल्यो द्विद्विसौवर्णपट्टी
भाता वातान्दोलिताः सन्ति नित्यं ॥ १५ ॥

पुष्पैः सूक्ष्मश्लक्ष्णचेलान्तरस्थै-
र्वृन्तोन्मुक्तैः किङ्करीभिः कलाभिः ।
आच्छन्नास्ताः सौरभैः सौकुमार्यै-
स्तावाक्रष्टुं साधु शक्तिं तदाधुः ॥ १६ ॥

---

स्तेषां उन्नतशाखानामन्योन्यासंश्लेषभङ्ग्या अञ्चिता युक्ताः बाँगलाघर इति प्रसिद्धा वलभ्यो भान्ति । अत्र दार्ष्टान्ते वलभीपदाभावेऽपि अतिशयोक्त्यलङ्कारादेव तदर्थो बोध्यः । उत्प्रेक्षामाह । पाड़ इति प्रसिद्धया गोपानस्या अञ्चिता मरकतमणिनिर्म्मितवलभ्य इव । गोपानसी तु वडभी छादने वक्रदारुणीत्यमरः । प्रालम्बमृजुलम्बिस्यादित्यमरः ॥ १४ ॥

तत्तत् शाखासु लम्बिता शोणा रक्तवर्णा अथ च मुक्ताभिरामुक्ता बद्धा ये रज्जवस्तैः प्रणद्धाः हिन्दोलाश्रेण्यः वायुभिरान्दोलिताः सत्यः नित्यं सन्ति ॥ १५ ॥

सूक्ष्मकोमलवस्त्रस्य मध्यस्थैः वृन्तोन्मुक्तैः पुष्पैः किङ्करीभिराच्छन्नास्ता हिन्दोलाल्यः स्वसौरभादिभिस्तौ राधाकृष्णौ तदा आकृष्टुं शक्तिं अधुः ॥ १६ ॥

मध्ये तासां काञ्चिदञ्चत्पताकां
वीक्ष्यारुह्य श्यामधामा विरेजे ।
शोभादेव्या सेव्यमानामिवैतां
मन्ये मूर्त्तानन्द एवाध्यतिष्ठत् ॥ १७ ॥
कर्षन् कान्तां हर्षवर्षासु सम्यक्
तिम्यन् हस्तालम्वमालम्वमानां ।
उत्थाप्यैतां स्वाग्रतो जाग्रतः किं
प्रेम्णो वापीमापिपत् स्वाभिमुख्यं ॥ १८ ॥
पुष्पात्रल्पारात्रिकेणास्यपद्म-
द्वन्द्वं नीराज्यालिसङ्घः सगानं ।
हारोष्णीषाद्यापयन् सुस्थितत्वं
स्रक्ताम्वूलस्थासकैः पर्य्यचारीत् ॥ १९ ॥
काञ्च्यामुक्तप्राञ्चिशाट्यञ्चलान्ते
किञ्चित्पौर्व्वापर्य्यतोऽङ्घ्री विवृत्य ।

तासां हिन्दोलाश्रेणीणां मध्ये अञ्चत्पताकां काञ्चित् हिन्दोलां श्रेष्ठां वीक्ष्यारुह्य श्यामधामा कृष्णः विरेजे । एतां हिन्दोलां ॥ १७ ॥

हर्षरूपवर्षासु सम्यक् तिम्यन् तिमितुं आर्द्रीं भवितुं कृष्णः कान्तां आकर्षन् स्वाग्रतः उत्थाप्य किं जाग्रतः प्रेम्णः राधिकारूपवापीं स्वाभिमुख्यं आपिपत् प्रापयामास ॥ १८ ॥

आलिसङ्घः पुष्पारात्रिकेण सगानं यथास्यात्तथा तयोर्मुखपद्म-द्वन्द्वं नीराज्य आरोहण-समये विपर्य्यस्तं हारोष्णीषादिषु स्थितत्वमापयन् पर्य्यचारीत् । स्थासकःखोर इतिप्रसिद्धः ॥ १९ ॥

कुब्जीभूयादाय दोलां क्षिपन्त्या-
वन्वस्थातां द्वे दिशौ प्राणसख्यौ ॥ २० ॥
अन्ये धन्ये तिष्ठतः स्मेक्षमाणे
धृत्वा पाण्योः पुण्यताम्बूलवीट्यौ ।
यूनोरास्याम्भोजयोरर्पयन्त्यौ
वेगोपान्ते मङ्क्षुलब्धावकाशे ॥ २१ ॥
आल्यो मान्याः प्रेमवन्या इतान्याः
पर्व्वश्रीलाः सर्व्वतः साधुशीलाः ।
हस्तोदस्तैः शस्तरागैः परागै-
श्चक्रुर्वृष्टिं दृष्टिमापद्य हृष्टिं ॥ २२ ॥

---

हिन्दोलाया द्वे दिशौ अनु द्वयोर्दिशोः प्राणसख्यौ कुब्जीभूय दोलामादाय क्षिपन्त्यौ सत्यौ अस्थातां । कथम्भूते सम्यक्तया दोलनार्थं काञ्च्या आमुक्तः बद्धः प्रकर्षेण पूजितः शाट्यञ्चला न्तोययोः ॥ २० ॥

अन्ये सख्यौ पाण्योश्चारुताम्बूलवीट्यौ धृत्वा ताम्बूलदानार्थं सावधानतया ईक्षमाणे अतिष्ठतः । कथम्भूते सखीभ्यां अल्पाल्पन्या कृतवेगस्य उपान्तभागे अर्थात् यत्र वेगः स्थिरीभवति तत्रैव शीघ्र लब्धावकाशे सति राधाकृष्णयोरास्याम्भोजयोरर्पयन्त्यौ यदा तु सखीभ्यां विनैव राधाकृष्णाभ्यां स्वयमेव कृते ऽतिवेगे सति तदा ताम्बूलदानं नास्तीति बोध्यं ॥ २१ ॥

अन्याःमान्याः ललिताद्या आल्यः पर्व्वश्रीलाः उत्सवलक्ष्मीविशिष्टाः सत्यः हस्ताभ्यां उदस्तैः क्षिप्तैः प्रशस्तरागयुक्तैः परागैः करणैः वृष्टिं चक्रुः स्वस्य हर्षं दृष्टिं प्राप्य ॥ २२ ॥

देव्यस्त्विष्टं मानयन्त्यः स्वदिष्टं
तौ पश्यन्त्यः श्यन्त्य एवाखिलाधिं ।
जातस्तम्भा अप्यसम्भाविताशा
दिव्यातेनुः पुष्पवर्षं सतर्षं ॥ २३ ॥
तत्सङ्गिन्यो विप्रुषो वृष्यमाणा
हृष्यन्मेघैस्तन्मरन्दत्वमापुः ।
रामाराजेरङ्गसङ्गात्तदीयै-
र्मुक्तावृन्दैरन्वविन्दन्तमैत्रीं ॥ २४ ॥
जृम्भोदञ्चत्सौरभव्रातमाद्य-
द्भृङ्गश्रेणीस्तोत्रभाजा मुखेन ।
गीतैर्नीतैर्माधुरीं साधुरीति
द्यामाच्छाद्य द्योतते स्मालिपाली ॥ २५ ॥

---

तौ राधाकृष्णौ पश्यन्त्यः अतएव स्वस्य दिष्टं भाग्यं इष्टं धन्यं मानयन्त्यः कृष्णेन सह विहारे असम्भाविताशा अपि जातस्तम्भाः सत्यः दिवि सतर्षं यथास्यात्तथा पुष्पवर्षमातेनुः । कथम्भूताः अखिलाधिं श्यन्त्यः खण्डयन्त्यः ॥ २३ ॥

हर्षयुक्तमेघैर्वृष्यमाणाः विप्रुषो बिन्दवः पुष्पसङ्गिन्यः सत्यः तेषां पुष्पाणां मकरन्दत्वमापुः पश्चात् रामाश्रेण्याः अङ्गसङ्गात् तासामङ्गस्थ मुक्तावृन्दैः सह मैत्रीं अन्वविन्दन्त ॥ २४ ॥

आलिश्रेणी वीणादिकं विनैव मुखेन गीतैः अतएव माधुरीं नीतैः प्राप्तैस्तैः करणैः साधुरीति यथास्यात्तथा द्यां स्वर्गमाच्छाद्य द्योतते ॥२५॥

नृत्यं भेजुर्हारताटङ्कमाल्या-
न्यातोद्यत्वं किङ्किणीनूपुराद्याः ।
वक्त्रे स्मित्वा सभ्यतामाददाते
यूनोर्दोलानन्दचन्द्रे प्रवृद्धे ॥ २६ ॥
अन्योन्याङ्गप्रोच्छलत्कान्तिसिन्धो-
र्वीचीव्रातामन्दहिन्दोलिकासु ।
प्राप्तान्दोलान्योऽन्य-नेत्रारविन्द-
श्रीसन्दोहैराढ्यतामापुरालयः ॥ २७ ॥
इत्थं चेतस्त्वेतयोर्दोलयन् यत्
कामो वामोऽप्यन्तरायं न चक्रे ।
लीलाशक्तेरेव तत्र प्रभावः
कोऽप्योजस्वी हेतुरित्याहुरार्य्याः ॥ २८ ॥

यूनोः राधाकृष्णयोः दोलाविहारजन्यानन्दचन्द्रे प्रवृद्धे सति तयोः हारताटङ्कमाल्यानि नृत्यं भेजुः । किङ्किण्याद्याः आतोद्यत्वं नृत्योपयोगिवाद्यत्वं भेजुः । एवं तयोर्वक्त्रे स्मित्वा नृत्ये सभ्यतां आददाते ॥२६॥

हिन्दोलिकायां राधाकृष्णयोर्दोलनं वर्णयित्वा तयोः कान्तिरूप हिन्दोलिकायां राधाकृष्णयोरेव परस्परनेत्रयोर्मेलनं वर्णयति अन्योऽन्येति । द्वयोःकान्तिसमुद्रस्य तरङ्गसमूहरूपा मन्दहिन्दोलिकासु प्राप्त आन्दोलो यया एवंभूता या परस्परनेत्ररूपारविन्दस्य श्रीःशोभा तस्याः समूहैः आलयः आढ्यतां प्रापुः। तथाच दोलनसमये परस्पर कान्तिदर्शनोत्थानन्देन तयोः शोभातिशयं दृष्ट्वा सख्योऽपि आनन्दिता बभूवुरितिभावः ॥ २७ ॥

वामः प्रतिकूलः कामः इत्थं अनेन प्रकारेण एतयोश्चित्तं दोलयन्

दोलारज्वालम्वशाखे स्व-लौल्या-
देतौ चञ्चत्पञ्चशाखाग्रगाभिः ।
पुष्पाढ्याभिः पल्लवालीभिरिष्टैः
सेवेते स्मामोदनैर्वीजनैः किं ॥ २९ ॥
तत्तत् पत्रालयन्तरानन्तशिल्प-
प्रोतान् धर्त्तुं चञ्चलान् माल्य-खण्डान् ।
यत्नैर्भृङ्गानाशकन् यद्भ्रमन्त-
स्तत्रागुञ्जन् केवलं सापि शोभा ॥ ३० ॥
दोला-वेगाधिक्यकामौ स्वपद्भ्या-
माक्रम्यैतां स्वावनत्युन्नतिभ्यां ।

यत् अन्तरायं न चक्रे तत्र लीलाशक्तेरेव कोऽपि ओजस्वी स्वभाव एव हेतुः इति आर्य्या आहुः ॥ २८ ॥

उत्प्रेक्षामाह । 'दोलासंयुक्तरज्ज्वोरालम्वने द्वे शाखे कर्त्तृभूते स्वस्य पल्लवालीभिः एतौ राधाकृष्णौ कर्म्मभूतौ किं आमदनैः सुगन्ध विशिष्टैर्वीजनैः सेवेते । कथम्भूताभिः स्वस्य शाखाया लौल्याद्धेतो-श्चञ्चलविस्तारयुक्तशाखाया अग्रगाभिः । श्लेषेण पञ्चशाखा एव पञ्चशाखःपाणिः । पचि विस्तारे धातुः ॥ २९ ॥

तत्तत्शाखास्थपत्रश्रेणीणां मध्ये मध्ये वहुशिल्पेन प्रोतान् माल्यखण्डान् हिन्दोलया सह दोलतस्तान् भृङ्गा धर्त्तुं नाशकन् किन्तु भ्रमन्तः सन्तस्तत्र केवलं अगुञ्जन् अतएव माल्यानां पश्चात् भ्रमराणां भ्रमणरूपा सा शोभापि जाता ॥ ३० ॥

दोलावेगस्याधिक्य कामौ तौ राधाकृष्णौ अतएव स्वपद्भ्यां एतां

स्वं स्वं सर्व्वाः कौशलं दर्शयन्तौ
प्रेमानन्दं तुन्दिलं चक्रतुस्तौ ॥ ३१ ॥

हिन्दोलाया रंहसी विन्दमाने
पर्य्यायेण द्वे दिशौ स्तो यदन्तौ ।
प्राप्योद्ध्वाधःस्थायिनोः खेलतोः सा
यूनोः कान्तिः कौतुकं कापि तेने ॥ ३२ ॥

राधा-हारं संस्पृशन् कृष्ण-वक्ष-
श्चक्रे नृत्यान्येकतो दिश्युदारं ।
अन्यत्रास्याः कञ्चुकीं श्लिष्यति स्म
स्रक् तस्यापीत्यापयुर्मोदमाल्यः ॥ ३३ ॥

अन्योऽन्याङ्गादर्श-दृष्टस्व-भासो-
रन्योऽन्यानालोकजक्लान्तिभाजोः ।

दोलां आक्रम्य स्वस्यावनत्युन्नतिभ्यां स्वं स्वं कौशलं सर्व्वाः सखीः दर्शयन्तौ सन्तौ प्रेमानन्दं तुन्दिलं चक्रतुः ॥ ३१ ॥

हिन्दोलाया रंहसी वेगौ पर्य्यायेण द्वे दिशौ विन्दमाने प्राप्नुवत्यौ स्तः । यस्य वेगस्य द्वौ अन्तौ प्राप्य ऊर्द्धाधःस्थायिनोः राधाकृष्णयोर्यूनोः सा प्रसिद्धा कापि कान्तिः कौतुकं तेने ॥ ३२ ॥

एकतो दिशि नृत्यानि चक्रे । अन्यत्र दिशि तस्य श्रीकृष्णस्यापि ॥ ३३ ॥

परस्पराङ्गरूपादर्शे दृष्टा स्वकान्तिर्याभ्यां तथाभूतयोः श्रीकृष्ण दर्शने उत्कण्ठिता राधा तस्याङ्गे स्वमेव पश्यति न तु कृष्णं । एवं श्रीकृष्णोऽपि एवं क्रमेण परस्परानालोकनजन्यदुःखभाजोस्तयोस्तदानी-

तर्ह्यन्योन्य-श्वासभूमाभिमर्षा-
दन्योन्यं संदृश्य तौ हृष्यतः स्म ॥ ३४ ॥
इत्थं लीला-वारिधिः कौतुकित्वा-
दत्युद्रेकं रंहसो निर्म्मिमाणः ।
पृष्ठामृष्टोत्तुङ्गपर्य्यन्तशाखा
पत्रालीकां तां चकारेव भीतां ॥ ३५ ॥
मैवं मैवं माधिकं हन्तदोले-
त्युक्तिं तस्यास्तत्सखीनाञ्च शृण्वन् ।
स्मित्वा स्मित्वा वर्द्धयन्नेव दोला
जङ्घालत्वं माधवो भ्राजते स्म ॥ ३६ ॥
वन्धाद्वेणी विच्युता नावगुण्ठ-
स्तस्थौ मूर्द्ध्नि व्यस्तता भूषणानां ।

---

मेव विरहदुःखेनान्योऽन्यश्वासभूमस्पर्शात् परस्परं संदृश्य तौ हृष्यतः स्म । श्वासेनाङ्गरूपदर्पणस्यावरणात् प्रतिविम्बो न दृश्यते इति भावः ॥ ३४ ॥

इत्थं लीलावारिधिः श्रीकृष्णः कौतुकित्वात् वेगस्यात्युद्रेकं निर्म्मिमाणः स तां राधां भीतां चकार । कथम्भूतां वेगस्याधिक्यात् पृष्ठदेशेन आमृष्टा उत्तुङ्गान्तशाखायाः पत्रश्रेणी यया ॥ ३५ ॥

हे कृष्ण ! त्वं एवं मा दोल दोलाया जङ्घालत्वं वेगवत्त्वं वर्द्धयन् ॥ ३६ ॥

मुर्द्ध्नि अवगुण्ठः न तस्थौ । वायुना अन्तरीणवस्त्रस्योत्तोलना शङ्कया पद्भ्यामाक्रान्ता या शाटी सापि पादौ नाप्यधात् न आच्छादित-

पादौ शाटी नाप्यधादित्यमुष्या
वैयग्र्ये हा जाहसीति स्म कृष्णः ॥ ३७ ॥

इत्थं स्वाक्ष्णोस्तृप्यतो रंहसा तां
वित्रस्ताक्षीमासनाङ्कं शयित्वा ।
स्वीयं कण्ठं ग्राहयामास मध्ये
दोलाखट्वं तां च जग्राह दोर्भ्यां ॥ ३८ ॥

एकीभूते चम्पकेन्दीवराभे
मूर्त्ती यूनोरुद्गिरन्त्यावभातां ।
संमर्द्दोत्थं सौरभं व्याश्नुवानं
पारेस्वर्गं हन्त पद्मादिनासाः ॥ ३९ ॥

साभ्यद्वेगा सा समन्ताद्वृताभू
द्दोलाप्याराद्दागताभिः सखीभिः ।

वती इति अमुष्या राधाया वैयग्र्ये हा खेदे कृष्णो जाहसीति स्म पुनः पुनर्हास्यं चकार ॥ ३७ ॥

कृष्णः इत्थं अनेन प्रकारेण स्वस्याक्ष्णोस्तृप्यतोः सतोःवेगेन वित्रस्ताक्षीं तां आसनाङ्कं शयित्वा स्वीयं कण्ठं ग्राहयामास । स्वयमपि दोलाखट्वाया मध्ये तां राधां दोर्भ्यां जग्राह । किन्तु कृष्णः रज्जुं विहाय स्वचरणयोरवलम्बमात्रेणैव दोलामध्ये तस्थाविति तस्य सामर्थ्यातिशयो व्यञ्जितः ॥ ३८ ॥

चम्पकेन्दीवरपुष्पयोरिव आभा ययोरेवंभूते यूनोः राधाकृष्णयोर्मूर्त्ती निविड़संयोगादेकीभूते अतएव पुष्पयोरिव सम्मर्द्दोत्थं सौरभं उद्गिरन्त्यौ अभूतां सौरभं कथम्भूतं स्वर्गस्य पारे स्थितानां पद्मादीनां नासाः व्याश्नुवानं ॥ ३९ ॥

राधा द्रागेवावरुह्याथ तस्या-
स्ताभिस्तत्तत् संलपन्ती ललाष ॥ ४० ॥
मुख्यास्वष्टास्वाद्यभूतामथालो-
मारोह्यास्यां तां सकृष्णां स्वयं सा ।
प्रेम्ना गायद्दोलयन्ती स चापि
प्रेयान् दोले पूर्ववत्तामजैषीत् ॥ ४१ ॥
एवं प्रेष्ठास्ता विशाखादिकालीः
सान्द्रं दोलान्दोलमापय्य तस्याः ।
हिन्दोलातः सोऽवतीर्य्यैव सर्व्वा-
स्वेकैकस्यामन्य-हिन्दोलिकासु ॥ ४२ ॥
तासां द्वे द्वे सुन्दरीणां स्वदोर्भ्यां
तत्रागृह्यारोह्यमह्याः प्रसह्य ।

अवलम्बनं विना दोलोपरिस्थितौ तौ राधाकृष्णौ आराद्दूरादेवागताभिः सखीभिर्धृता सा दोला साम्यद्वेगा अभूत् प्रथमतो राधा तस्या दोलायाः सकाशात् अवरुह्य ताभिः सखीभिः सह श्रीकृष्णकृततत्त द्वृत्तान्तं संलपन्ती सती ललाष । लषकान्तौ ॥ ४० ॥

अष्टासु मुख्यासु सखीषु मध्ये प्रधानीभूतां तां ललितां श्रीकृष्णेन सहितां सा राधा स्वयं दोलयन्ती सती अगायत् । स च प्रेयान् कृष्णोऽपि दोलने पूर्व्वं राधामिव तां ललितामजैषीत् ॥ ४१ ॥

एवं प्रकारेण ललिताप्रत्प्रेष्ठास्ता विशाखादिकालीःसान्द्रं दोलान्दोलनमापय्य तस्या हिन्दोलातः सकाशात् स श्रीकृष्णः अवतीर्य्य सर्व्वासु प्रधानातिरिक्तान्यहिन्दोलिकासु मध्ये एकैकस्यां हिन्दोलायां द्वे द्वे सुन्दर्य्यौ प्रसह्य बलात् मह्याः सकाशात् स्वदोर्भ्यां

भ्राम्यन्नेको दोलयत्ताः समस्ताः
प्रेमाम्भोधेस्तस्य किं वास्त्यकृत्यं ॥ ४३ ॥

युग्मकं ।

ताः सर्व्वास्तु स्व-स्व-हिन्दोलिकान्त-
स्तंचापश्यन् स्व-स्व-वक्त्रं धयन्तं ।
नैतच्चित्रं गोकुलाधीश-सूनो-
रिच्छाशक्तेः किं पुनः स्यादशक्यं ? ॥ ४४ ॥

एकं तत्रैवास्ति हिन्दोलनाब्जं
वृन्दोद्दिष्टं प्रेयसीभिर्मुकुन्दः ।
आरुह्यैतत् कर्णिकास्थोपवर्हा-
लम्वी दोषाश्लिष्टराधो रराज ॥ ४५ ॥

अष्टावाल्योऽप्यष्टपत्रान्तरस्था-
स्तत्तद्वाह्ये षोड़शाल्यो विभान्त्यः ।

---

आरुह्य तत्र दोलायां आरोह्य एक एव कौशल विशेषेण भ्राम्यन् सन् ताः समस्ताः सखीः अदोलयत् । ननु वह्वायाससाध्ये अस्मिन् कर्म्मणि कथं तस्य प्रवृत्तिः ? स्तत्राह । प्रेम-समुद्रस्य कृष्णस्य किं अकृत्य-मस्ति ? ॥ ४२—४३ ॥

अहमपि द्वयोर्द्वयोर्मध्ये तिष्ठामीति श्रीकृष्णस्य मनोगतसिद्धि-माह । सर्व्वाः सख्यः स्व-स्व-हिन्दोला-मध्ये स्व-स्व-वक्त्रं पिवन्तं तं कृष्णं अपश्यन् ॥ ४४ ॥

अधुना कमलाकारहिन्दोलां वर्णयति । एकं हिन्दोलाब्जं तत्रैवास्ति । वृन्दया उद्दिष्टं तत्प्रेयसीभिः सह मुकुन्दः आरुह्य रराज । कथम्भूतःदोषा वामहस्तेन आश्लिष्टा राधा येन ॥ ४५ ॥

वृन्दानीतस्वादुखर्जूर-जम्बू-
द्राक्षाः प्राश्नन् कान्त-भुक्तावशिष्टाः ॥ ४६ ॥
पीयूषान्तर्गर्व्वसर्व्वङ्कषस्य
प्रागेवाभूत् पानकादेः प्रपाणं ।
अन्ते हेमद्योतिताम्बूलवीटी
वृन्दान्योऽन्य-प्रीतिदानाभियोगः ॥ ४७ ॥
नान्दीवृन्दे विन्दतः स्म प्रमोदं
नोदं पाण्योर्दोलनाब्जे ददत्यौ ।
दास्योऽप्यास्योल्लासमापद्य सद्यो
नानागानारम्भशम्भा बभूवुः ॥ ४८ ॥
दोलान्दोल-क्रीड़या ताः समस्ताः
जित्वा प्राप्ताश्लेषचुम्बादिरत्नः ।

---

अष्टौ ललिताद्यालयः अष्टदलानां मध्यस्थाः तत्तदष्टदलानां बहिः षोडशदलेषु अन्याः षोडशाल्यो विभाल्यः सत्यः कान्ताभ्यां भुक्ता·विशिष्टाः प्राश्नन् ॥ ४६ ॥

खर्जूरादिभोजनात् प्रागेव पानकादेः प्रपानमभूत् । कथंभूतस्य पीयुषस्य, योऽन्तर्गर्व्वस्तस्य सर्व्वङ्कषस्य नाशकस्येत्यर्थः । भोजनान्ते सुवर्णतुल्यताम्बूलवीटी-समूहस्य परस्पर-प्रीत्यादानेन सहाभियोगः ग्रहणं ॥ ४७ ॥

तद्दर्शनात् नान्दीवृन्दे आनन्दं विन्दतःस्म । कीदृश्यौ पाण्योर्नोदं प्रेरणं दोलनाब्जे ददत्यौ । दास्योऽपि आस्योल्लासमापद्य नाना गानारम्भेण शम्भाः आनन्दयुक्ता बभूबुः ! शं शब्दात् भःप्रत्ययः ॥ ४८ ॥

ता जित्वा प्राप्तं आश्लेषचुम्बादि रत्नं येन तथाभूतः प्रेयान् कान्ता-

सार्द्धं कान्तामण्डलेनावरुह्य
प्रागात् प्रेयान् कानननात् काननाय ॥ ४९ ॥
राधास्योत्था मुद्रिता या स्मित-श्री-
स्तस्यास्तत्र स्मारकानेव दृष्ट्वा ।
यूथ्यालीनां कोरकान् स व्यचैषीत्
हृद्याधातुं तान् स्रजः संरचय्य ॥ ५० ॥
खेऽगान्मेघः कृष्ण-गात्र-च्छवित्वं
विद्युत्तासामङ्गभासा-ततित्वं ।
भूमे रूढैरिन्द्रगोपैः समूटैः
पादालक्ताभ्यक्तताव्यक्तमासीत् ॥ ५१ ॥

मण्डलेन सह हिन्दोलात् अवरुह्य एतत्काननात् अन्य काननाय प्रागात् ॥ ४९ ॥

पुनर्वर्षाऋतुं वर्णयति । राधिकाया आदौ मुखादुत्थिता पश्चाद्बहित्थया मुद्रिता या स्मितश्रीस्तस्याः स्मारकान् यूथीपुष्पानां कोरकान् दृष्ट्वा सः कृष्णःतान् कोरकान् स्रजः संरचय्य हृदि आधातुं व्यचैषीत् चयनं चकार । तथाच तन्मिषेण राधायाः स्मितमेव हृदि दधारेति भावः ॥ ५० ॥

खे आकाशे यो मेघः स कृष्णस्याङ्गच्छवित्वमगात् प्राप्तवान् । न तु मेघस्य कृष्णाङ्गच्छव्यतिरिक्तपदार्थत्वमिति भावः । एवं विद्युत् तासामङ्गकान्तिसमूहत्वमगात् । एवंभूमेः सकाशात् उत्पन्नैः समूटैः समूहविशिष्टैः इन्द्रगोपैः रक्तकीटविशेषैः करणैः पादालक्तस्याभिव्यक्तता स्फुटमासीत् । तथाच तन्मिषेण पादालक्त एव भूम्यां विराजते । इति सर्व्वत्रापह्नुत्यलङ्कारो बोध्यः ॥ ५१ ॥

कृष्णाभ्रेणातुलघनरसैः सर्व्वतो वृष्यमाणै-
रत्युत्फुल्लाः किल सुमनसः पर्व्ववत्यो लताश्च ।
तत्सस्याल्योऽप्यसमसुषमाः शं चिरायान्वभूवन्
वर्षाहर्षं वनमपि यतो हर्षवर्षास्वमांक्षीत् ॥ ५२ ॥

इति श्रीभावनामृते महाकाव्ये हिन्दोलान्दोलन
सुखास्वादनो नामैकादशः सर्गः ।

---

कृष्णवर्णमेघेन अतुलघनरसैः जलैः करणैः सुमनसो मालत्यो लताश्च अत्युत्फुल्लाः एवं पर्व्ववत्यः ग्रन्थिमत्यः तथा तत्सस्याल्योऽपि तत्तत् वृक्षफलश्रेण्योऽपि असमसुषमाः सत्यः चिराय शं सुखं अन्वभूवन् । वृक्षादीनां फलं सस्यमित्यमरः । पक्षे श्रीकृष्णरूपमेघेन अतुलशृङ्गार-रसैः करणैः सस्याल्यः प्रशस्तसख्यः रत्युत्फुल्लाः सुमनसः शोभन-चेतसः एवं पर्व्ववत्यः उत्सववत्यः रलयोरैक्यात् लताः रताश्च सत्यः चिराय शं सुखं अन्वभूवन् । यतः श्रीकृष्णविहारात् वर्षाहर्षवनमपि हर्षवर्षासु अमांक्षीत् ममज्ज ॥ ५२ ॥

समाप्तश्चायमेकादशः सर्गः ।

## द्वादशः सर्गः ।

अथ तौ पुरःसरमनोजपद्मिना-
वनुरागराज-वरवाहिनी-पती ।
प्रसरत्शिलीमुखभटाभिवेष्टितौ
ययतुः शरत्-सुखदनामकाननं ॥ १ ॥
मदिरेक्षणे! कलय मङ्गलं पुरः
स्व-मुखस्य चारु मुकुरायितं सरः ।
कनकाम्बुजं चटुलभृङ्ग-वेष्टितं
नटखञ्जनद्वयमिहातिभाति यत् ॥ २ ॥
नभसीह पाण्डिमधुरां वलाहकाः
सरसीभिराश्रितचरीं दधत्यमी ।

अथानन्तरं इह शरदि अनुरागरूपस्य राज्ञः वरवाहिनीपती श्रेष्ठ सेनापतिस्वरूपौ तौ राधाकृष्णौ शरत्सुखदनामकाननं ययतुः । सेनापतित्वनिर्व्वाहकसामग्रीमाह । कथम्भूतौ अग्रेसरः कन्दर्परूपहस्ती ययोः । पुनश्च प्रसरत्शिलीमुखा भ्रमरा एव भटास्तैरभिवेष्टितौ ! पक्षे शिलीमुखो वाणस्तद्युक्तपदातिकाभिवेष्टितौ ॥ १ ॥

कृष्णआह । हे मदिरेक्षणे ! राधे ! तव मुखस्य मुकुरवदाचरितं सरःकलय पश्य । एतेन सरसः स्वच्छत्वादिगुण उक्तः । तन्मुखप्रतिविम्व-युक्तमुकुरस्य साधर्म्यमाह । यद्यस्मादिह सरसि मुखसदृशकनकाम्बुजादिकं भाति ॥ २ ॥

नभसि वलाहकाः मेघाः वर्षाकाले सरसीभिराश्रितचरीं पाण्डि-

निजमेचकत्वमतिमेदुरं पुन-
र्ददुराभ्य एव किमु मित्रताकृते ॥ ३ ॥
अथवातपेऽतुलतपस्विनीरिमा
नभसि स्वसर्व्वधनसन्ततार्पणैः ।
परिचर्य्य विष्णुपद एव लिप्सवो
लयमापुरद्य सहसावदातताम् ॥ ४ ॥
अभितोऽपि पश्य सुमनस्सु रागिभिः
सुमनस्सु न क्वचन रज्यतेऽलिभिः ।
तव तेन सख्यतनुदूनतां ययौ
सुमनो न वेत्ति वद सत्यमद्य नः ॥ ५ ॥

मधुरां किञ्चिद्धूपरश्वेतिमातिशयं दधति । एवं अमी वलाहकाः अतिमेदुरं स्निग्धं वर्षाकालीननिजमेचकत्वं श्यामत्वं आभ्यः सरसीभ्यः पुनर्ददुः । शरत्काले सरसीनां मालिन्यापगमात् गभीरतावशाच्च श्यामत्वस्य प्रत्यक्षो भवति । तयोः परस्परमित्रतार्थं किं परिवर्त्तं कृतं ? ॥३॥

अथवा भगवत्पदे लयमिप्सवो वलाहकाः आतपे निदाघे जलशोषण मृत्तिकाविदारणादिना अतुल तपस्विनीरिमाः सरसीः नभसि श्रावणे जलरूपस्वसर्व्वधनस्य सन्ततार्पणैः निरन्तरवितरणैः परिचर्य्य सहसा अवदाततां शुद्धतामापुः । अवदातः सिते शुद्धे इत्यमरः । पक्षे श्रावणे सरसीः परिचर्य्य विष्णुपदे आकाशे लयमीप्सवो मेघा अवदाततां श्वेततां आपुः ॥ ४ ॥

हे राधे ! अभितःपश्य सुमनस्सु रागिभिरलिभिः सुमनस्सु पुष्पेषु न रज्यते इति विरोधः । परिहारश्च सुमनस्सु मालतीषु रागिभिः अन्य सुमनस्सु न रज्यते । सुमनः सामान्ये न रज्यते इति हेतोः । हे सखि ! तव सुमनोऽतनुदूनतां परमदुःखितां ययौ न वा इति सत्यं वद । पक्षे

इति माधवोऽभिदधदिद्धदीधिति
प्रमदामणी-मुखमुदश्चितस्मितं ।
दरभुग्नतारसरसेक्षणां क्षणा-
दधयद्दृशोच्चलितया भृशोत्सुकः ॥ ६ ॥

कुलकं ।

अथ वृन्दयोपहृतमम्बुजं हरिः
परिगृह्य हस्तनलिनेन शस्तरुक् ।
समजिघ्रदप्यतुलसौरभैः क्षितौ
जयसि त्वमित्यलघु तुष्टुवे च तत् ॥ ७ ॥

कमलस्तवे सखि ! कृते मया कथं
वदनं तवाभवदरालचिल्लिकं ।
दरशोणमां चटुलिताङ्ग्यवेदिषं
निज-गौरव-च्यवनहेतुकं हि तत् ॥ ८ ॥

---

तादृशमालत्यादिदर्शनरूपोद्दीपनवशात् तव मनः कन्दर्पदूनतां ययौ न वा ॥ ५ ॥

इत्यभिदधत् माधवः इद्धा दीधितिः कान्तिर्यस्या एवम्भूता प्रमदामणी राधा तस्या उदश्चितस्मितं मुखं उच्चलितया दृशाऽधयत् ॥ ६ ॥

हरिः वृन्दया उपहृतं पद्मं हस्तनलिनेन परिगृह्य अजिघ्रत् । पद्मं कीदृशं ? प्रशस्ता रुक् कान्तिर्यस्य । हे पद्म ! त्वं स्वसौरभैः क्षितौ जयसि अलघु यथास्यात्तथा तत्पद्मं कृष्णस्तुष्टुवे ॥ ७ ॥

राधाया मुखे दृष्टिं निक्षिप्य कृष्णेन कृतचुम्बनं पद्मं दृष्ट्वा किञ्चित् कुपितायास्तस्याः क्रोधेऽन्यदेव कारणं श्रीकृष्णः कौतुकाशादाह । हे सखि राधे ! मया कमलस्य स्तवे कृते तव वदनं अरालचिल्लिकं

भवतु क्रमादुभयमेव जिघ्रता
यतरद्भवेन्मधुरसौरभाधिकं ।
तदवेत्य तस्य जय एव सर्व्वदा
निज-वेणुनाप्यलघु गास्यते मया ॥ ९ ॥
इति तां निगद्य तदलक्षितं हरिः
परिचुम्ब्य तन्मुखमुवाच विस्मितः ।
अहहातुलः परिमलोऽयमेव तत्
सखि ! नानृतं त्वमपि मे समक्रुधः ॥ १० ॥

विशेषकं ।

धिगरे ! वृथैव परिफुल्ल ! मूढ़ ! किं
त्रपसे न जैत्रवनितास्य-सन्निधौ ? ।
निज-पङ्कजत्व-जलजत्वयोर्द्वयो-
रनुरूपमेव शठ ! चेष्टसेऽथवा ॥ ११ ॥

---

कुटिलचिह्निकं एवमीषत् शोणंच कथमभवत् । आं ज्ञातं हे चटुलाङ्गि ! कमलस्तवे कृते सति तव गौरवच्यवनमेव क्रोधे कारणमहमवेदिषं ॥८॥

भवतु क्रमादुभयं जिघ्रता मया यतरत् यत् सौरभाधिकं भवेत् तत् अवेत्य तस्य जय एव गास्यते ॥ ९ ॥

तत्तस्मात् हे सखि ! त्वं मे मह्यं न अनृतं अक्रुधः अपितु त्वया यथार्थं एव क्रोधः कृतः ॥ १० ॥

यस्य स्तुत्या तव रोषोऽजनिष्ट तन्निन्दयैव त्वां प्रसादयामीत्यभि- प्रायेणाह । धिगरे इति अरे मूढ ! त्वं वृथैव परिफुल्ल किं जयशील वनिताया मुखसन्निधौ न त्रपसे ? अथवा हे शठ ! तव पङ्कजातत्वं

तरुवल्लि-लास्यविधि-शिक्षणं प्रति-
क्षणमेव सत्क्षणमितो वितन्वता ।
तदुपाहृतस्वमकरन्दसौरभो-
च्चयदक्षिणाभिरपि न प्रसीदता ॥ १२ ॥
शृणु कोपने ! तव मुखाम्बुजाञ्चली-
तटमेव किं नटयता नभस्वता ।
प्रतिलभ्य तत्परिमलान् सुदुर्लभा-
नहमद्य धन्य इति नाभ्यमन्यत ॥ १३ ॥
युग्मकं ।
ललिताह यस्य दरगन्धमात्रत-
स्त्वमुदारमुन्मुरहराभिलक्ष्यसे ।

---

जडात् जलात् जातत्वंच । अतएव जडपुत्रत्वात् त्वमपि जड एव । तथाच तयोरनुरूपं चेष्टसे यतःफूल्लमसि ॥ ११ ॥

पद्मप्रभृति पुष्पतोऽपि राधाया मुखसौरभ्यस्याधिक्ये श्रीकृष्णो वायुमेव प्रमाणयति द्वाभ्यां । हे कोपने ! राधे ! शृणु । तरुवल्लीनां प्रतिक्षणं नाट्यविधौ शिक्षणं वितन्वता विस्तारयता अतएव तस्मिन् शिक्षणे तरुप्रभृतिभिरुपहारत्वेन कल्पिताभिः स्वमकरन्दसौरभसमूहरूपदक्षिणाभिरपि अप्रसीदता नभस्वता वायुना किंतु तव मुखाम्बुजस्य घेँाघट इति प्रसिद्धमञ्चलीतटमात्रं नटयता तेन नटनस्य दक्षिणात्वेन कल्पितान् तव मुखस्य परिमलान् प्रतिलभ्य अहमद्य धन्य इति किं नाभ्यमन्यत ? अपितु अमन्यत एव । तथाच पवनः आत्मना धन्यं मन्यते स्मेत्यर्थः ॥ १२—१३ ॥

यस्य मुखस्य गन्धमात्रात् त्वं उदारमुत् अभिलक्ष्यसे अतस्त्वं

मकरन्दमस्य किमु हास्यसि त्वमि-
त्यतिशङ्कया कवलितां करोषि मां ॥ १४ ॥
सखि ! मा विषीद कति वा न माधुरी
सरितः स्रवन्ति परितो यतो ऽनिशं ।
सकृदेव पञ्चषपृषन्ति-पानतः
सरसो ऽस्य किंनु भविता दरिद्रता ? ॥ १५ ॥
इति सव्यदोर्भुजगपाश-वेष्टनैः
स्वबलाद्वशीकृततनोर्नतभ्रुवः ।
अधरामृतं यदपिवत्तदुत्थिता
वदनद्वयद्युतिरतीतृपत् सखीः ॥ १६ ॥
प्रतिवर्त्मकुञ्जसरसीसरिन्नगं
रममाण एवमनुरागिणी-गणैः ।

---

अस्य मुखस्य मकरन्दं किं हास्यसि ? इति शङ्कया त्वं मां कवलितां ग्रस्तां करोषि इति शङ्कायुक्तां मां करोषीत्यर्थः ॥ १४ ॥

हे सखि ललिते ! मा विषीद, यतो राधाया मुखरूप-सरोवरस्य अनिशं निरन्तरं परितः माधुरीरूपसरितो नद्यः कति वा न स्रवन्ति अतोऽस्य सरसः पञ्चषविन्दोः सकृत्पानतः किं दरिद्रता भविता ॥१५॥

तत् अधरामृतं अपिवत् तेन पानेन उत्थिता या तयोर्वदनद्वयस्य-द्युतिः सा सखीः अतीतृपत् ॥ १६ ॥

अनुरागिणीगणैः सह वर्त्मांश्रिकं प्रतिवर्त्म कुञ्जपर्वतादौ तथान्त्र

निखिलाटवीमुकुटभूतमुल्लसत्
परिधीयमानयमुनं वनं ययौ ॥ १७ ॥

कलहंस-चक्र-कलहं कलास्पदं
कृतकर्णकैरव-कुतूहलं दधत् ।
सततं नगैरसततं फलोच्चयं
कलयद्भिरेव वलयच्छिखैर्वृतं ॥ १८ ॥

स्फटिकेन्द्रनील-कुरुविन्द-हाटकै-
रचितास्ति यत्र वहुतीर्थ-मण्डली ।
प्रतिविम्विता तदितरेति सैव नून्
भ्रमयत्यशीतकिरणात्मजाम्भसि ॥ १९ ॥

---

वर्त्मनि वर्त्मनि कुञ्जे कुञ्जे एवं रीत्या वोध्यं । रममाणः कृष्णः । परिधिर्मण्डलं तदिवाचरन्ती यमुना यत्र तथा भूतं वृन्दावनं ययौ ॥१७॥

वृन्दावनं कथंभूतं ? कलहंसचक्रवाकानां कलहं दधत् । तादृशं कलहं कीदृशं कलानां वैदग्धीनां आस्पदं । पक्षे कलहंसादीनां कलं हन्तीति तत् तदपिच कलानां मधुरशब्दानामास्पदमिति विरोधाभासः । पुनश्च कलहं कीदृशं कृतं कर्णरूपकैरवाणां कुतूहलं येन । अतएवात्र कैरवपदात कलानामास्पदं चन्द्रस्वरूपमित्यर्थोऽपि वोध्यः पुनश्च नगैः सततं वृतं । नगैः कीदृशैः रसेन ततं विस्तृतं फलसमूहं कलयद्भिः दधद्भिः पुनश्च वलयन्ती परस्परं वेष्टयन्ती शिखा अग्रभागो येषां । सर्व्वेषामग्रभागानां समतया स्थितिरित्यर्थः । पक्षे सततं नगैर्वृतं असततं नगैर्वृतमिति विरोधाभासश्च ॥ १८ ॥

यत्र वृन्दावने घाट इति प्रसिद्धा तीर्थमण्डली अस्ति । कुरुविन्दः मुगा इति प्रसिद्धः । अशीतकिरणात्मजाया यमुनाया अम्भसि प्रति

तदुपर्य्यमन्दरुचिकुञ्जपुञ्जभाक्
कुसुमाटवी लसति यत्र सर्व्वतः ।
अलि-मञ्जुगीतजनरञ्जिखञ्जन-
व्रज-हारिनाट्य-परिपाट्यनेकधा ॥ २० ॥

नवमालिका-वकुल-कुन्द-केतकी-
करवीर-केशर-कदम्ब चम्पकैः ।
अतिमुक्त-जाति-शतपत्र-कुब्जकै-
र्गिरिमल्लिका-कनक-यूथिकादिभिः ॥ २१ ॥

पनसाम्र-लाङ्गलि-गुवाक-गोस्तनी-
कदली-करञ्ज-करकेक्षु-कोलिभिः ।
धव-निम्ब-पिप्पल-वटाक्ष-किंशुकैः
कलिता सदाश्रमिभिरेव यत्र भूः ॥ २२ ॥

युग्मकं ।

विम्बिता सा तीर्थमण्डली तदितरा स्वस्मादन्या तीर्थमण्डली इति नृन् भ्रमयति ॥ १९ ॥

यत्र कुञ्जे मुक्तकुसुमाटव्या उपरिदेशे भ्रमराणां मञ्जुगीत एव जनरञ्जिखञ्जनसमूहस्य अनेकधा मनोहरा नाट्यपरिपाटी वर्त्तते ॥२०॥

यत्र वृन्दावने अश्रमिभिः श्रमरहितैर्नवमालिकाभिः सदा वलिता वेष्टिता इति परश्लोकेन सहान्वयः । पक्षे आश्रमिभिः । तथाच यथा ब्राह्मणक्षत्रियाद्याश्रमिणो जना ग्रामे क्रमशः एकप्रदेशे ब्राह्मणा अन्य प्रदेशे क्षत्रियादयो वसन्ति तथा इत्यर्थः । वकुलादिभिर्वृक्षैर्नवमालिका-कनकयूथिकादिलतासाहित्येनाश्रमिभिर्गृहाश्रमितुल्यैरेतैः सदा कलिता युक्ता भूर्यत्र वृन्दावनेऽस्तीति परश्लोकेनान्वयः । अतिमुक्तो माधवीलता ।

चतुरस्तरून् सहरुचश्चतुर्दिशं
व्रततिद्वयद्वयसमाक्रमाश्रितान्।
विटपैः परस्परमुपर्य्युपर्य्युता-
निह कुञ्ज इत्यभिदधाति कोविदः॥ २३॥

ततशाखतां स च गतस्तथा बभौ
धृतपुष्प-पल्लव-दलाच्छगुच्छकः।
वड़भीशिखाशिखरभित्तितोरण
प्रतिहाररराजि मणिमन्दिरं यथा॥ २४॥

चतुरस्रतां क्वचन चाष्टकोनतां
वलयाकृतिं च स भजन् क्वचित् क्वचित्।
निजनाथयोरतनुकेलये मनो-
नयन-प्रमोद्यलघु यत्र राजते॥ २५॥

---

शतपत्रकुब्जकौ वृक्षभेदौ। गिरिमल्लिका कुटजः। अथ कुटजः शक्रो वत्सको गिरिमल्लिकेत्यमरः। नारिकेलस्तु लाङ्गलीत्यमरः। मृद्वीका गोस्तनी द्राक्षेत्यमरः॥ २१—२२॥

अधुना कुञ्जरचना-प्रकारमाह। चतुर्दिक्षु चत्वारो वृक्षा एकरूपास्तेषां मध्ये एकैकवृक्षस्य पार्श्वद्वये लताद्वयस्य वेष्टनं। विटपैः करणैस्ते वृक्षाः परस्परमुपर्य्युपरि ग्रथिता भवन्ति। तथा सति एतान् वृक्षान् कोविदः कुञ्ज इत्यभिदधाति॥ २३॥

धृतपुष्प पल्लवादिकः स च कुञ्जः वलभ्यादिभिर्व्विराजमानं मणिमन्दिरं यथा भवति तथा विस्तृतशाखतां गतः सन् बभौ॥ २४॥

स च कुत्रचित् चतुरस्रतां कुत्रचित् अष्टकोणतादिकं

शुक-शारिका-चटक-केकि-कोकिलै-
रलि-चाष-तित्तिरि-कलिङ्ग-चातकैः ।
कलवाक्-चकोर-चरणायुधादिभि-
र्ध्वनितैव यत्र वत भाति दिक्-ततिः ॥ २६ ॥

रुरु-शल्य-कीश-महिषैः-समूरुभिः
सृमरैश्चमूरु-कपिला-शशादिभिः ।
विहरद्भिरेव किल यत्र नीयते
समयोऽतिसौहृदमिथोऽवलेहनैः ॥ २७ ॥

अहिवक्त्रवह्निहवनात्तनोश्चिरा-
न्मलयानिलैः श्रिततपोवलर्द्धिभिः ।
कृतनन्दनद्रु-कुसुमोपगूहनै-
रमराङ्गनाङ्गपरिशीलनादृतैः ॥ २८ ॥

---

निजनाथयोः कन्दर्पक्रीडार्थं यत्र वृन्दावने अलङ्कु यथास्यात्तथा राजते ॥ २५ ॥

यत्र वृन्दावने शुकादिपक्षिभिर्ध्वनिता दिक्ततिर्भाति । कलवाक् पारावतः ॥ २६ ॥

रुरुप्रभृतिमृगभेदैर्विहरद्भिरेवातिसौहृदेन परस्परावलेहनैः करणै-र्यत्र समयो नीयते ॥ २७ ॥

मलयानिलैस्तपस्यां कृत्वा स्वर्गं कैलासवैकुण्ठादि गमनेन भूरिपुण्य-विशिष्टैस्तैः पुण्यप्रभावेणैव यां भूमिं प्राप्य स्वर्गादिभ्योऽपि अधिकां काञ्चन चमत्कृतिं उपलभ्य श्रितनीति यथास्यात्तथा यत्र वृन्दावने सर्वोभ्यते वासः क्रियते इति तृतीयश्लोकेन सहान्वयः । मलयानिलैः कथम्भूतैः मलयपर्वतीयसर्पवक्त्ररूपे वह्नौ चिरकालं व्याप्य स्वतनोर्हं-

सुरदीर्घिका-सलिलपावितात्मभि-
र्गिरिजा-सरः-कमल-रेणुरूषितैः ।
कमलालयारमण-केलिपादप
प्रचय-प्रसूनमकरन्दनन्दितैः ॥ २६ ॥
अथ भूरिपुण्यपरिणामचुम्बितै-
रभिपद्य यामवमतान्यवासनैः ।
उपलभ्य काञ्चन चमत्कृतिं परां
श्रितनीति यत्र हृषितैः सदोष्यते ॥ ३० ॥

विशेषकं ।

मृग-वृक्ष-पक्षिषु पुरोवलोकिते-
ष्वतिरामणीयकमनोक्षिहारिणः ।
अभिधामपृच्छदिह कस्य कस्यचि-
न्निजतर्जनीं मधुरमुन्नमय्य सा ॥ ३१ ॥

---

वनात् प्राप्ततपोबलसम्पत्तिभिः । स्वर्गस्थनन्दनवृक्षालिङ्गनादिभिस्तेषां सौगन्ध्यमानीतं ॥ २८ ॥

सुरदीर्घिकेति शैत्यमानीतं कमलालया लक्ष्मीस्तस्या रमणो नारायणः । पुनः कथम्भूतैः व्रजभूमि वासेन अवज्ञाता अन्यत्र वासे वासना यैः । श्रितनीतीत्यनेन तेषां मान्द्यमानीतं ॥ २९—३० ॥

मृगवृक्षपक्षिषु मध्ये मनोनेत्रहारिणः कस्यचित् अभिधां साधिका तर्जनीमुन्नमय्यापृच्छत् ॥ ३१ ॥

स्वकरेण नव्यकुसुमानि मानिता-
न्यवचित्य तानि तनुवल्लितन्तुभिः ।
विरचय्य हार-कटकाङ्गदादि त-
न्मिथुनं मिथः सपदि भूषयद्बभौ ॥ ३२ ॥

परिधापने कुसुममण्डनस्य किं
स्वकुचौ प्रति त्वमतिशङ्कसे ? प्रिये ! ।
कलयास्मि निर्विकृतिरेव वर्णिता
वरवर्णिता श्रुतिभिरेव मे मुहुः ॥ ३३ ॥

सखि ! कुन्दवल्लि ! वद सत्यमस्य किं
वरवर्णिता भवति साधु वा न वा ? ।
निजदेवरस्य चरितं प्रजावती
यदवैति तत् किमपरोजनःक्वचित् ॥ ३४ ॥

वरवर्णिनी त्वमसि राधिके ! ततो
वरवर्णितां मृगयसेऽस्य यत्नतः ।

---

तानि कुसुमानि वल्ल्या वल्कलस्थसूक्ष्म सूत्रैः करणैर्हारादिभूषणं विरचय्य तन्मिथुनं परस्परं भूषयत् बभौ ॥ ३२ ॥

हे राधे ! पुष्पमण्डनस्य परिधापने स्वकुचौ प्रति कथं शङ्कसे ? तव कुचस्पर्शेऽपि अहं निर्विकारोऽस्मीति पश्य । यतो मम वरवर्णिता श्रेष्ठब्रह्मचर्य्यं गोपालतापनीश्रुतिभिर्मुहुर्व्वर्णिता ॥ ३३ ॥

प्रजावती भ्रातृजाया ॥ ३४ ॥

कुन्दवल्ली आह । हे राधे ! त्वं वरवर्णिनी ब्रह्मचारिणी । पक्षे श्रेष्ठवर्णयुक्ता असि । तत एव हेतोः अस्य वरवर्णित्वं यत्नतः मृग्यसे ।

गतशङ्कता सततसङ्गतौ तथा
स्वसतीत्व-सिद्धिरिति ते किलाशयः ॥३५॥
सखि ! तापनीं श्रुतिमहो ! न वेद को
विदितश्च रौद्रमुनिरत्रिनन्दनः ।
मम वर्णितां प्रतिगृहं स वक्ष्यति
क्षणमत्र तद्व्रजरहो मया समं ॥ ३६ ॥
चपलत्वनिस्त्रपतयोरुपाददत्
पुरुसारभागमिह निर्म्ममे स्फुटं ।
ललिते ! विधिः पुरुषजातिमीक्ष्यता-
मलिरत्र वल्लिषु गतः प्रमाणतां ॥ ३७ ॥
किमियं करोति कलयेतिभाषिणं
प्रियमानतेक्षणमवेक्ष्य राधया ।

तत्रान्वेषणे ते तव आशयद्वयं । श्रीकृष्णेन सह सततसङ्गमे निःशङ्कत्वं तथा स्वस्य सतीत्वप्रसिद्ध्यर्थं च ॥ ३५ ॥

अत्रिनन्दनो दुर्व्वासा रौद्रो रुद्रोपासको मुनिः प्रतिगृहं वक्ष्यति । त्वं तु मया सह क्षणं रहो भज ॥ ३६ ॥

श्रीराधिका ललितां प्रति पुरुषपदस्य व्युत्पत्तिमाह । विधाता चापल्यनिर्लज्जत्वयोः अधिकसारभागमुपाददत् पुरुषजातिं निर्म्ममे । अत्र वल्लीषु वर्त्तमानोऽलिरेव प्रमाणं ॥ ३७ ॥

यथा पुरुषजातेश्चापल्यादिदोषदानार्थं राधया भ्रमरो दृष्टान्तितस्तथैव श्रीकृष्णोऽपि स्वर्णयूथिकां दृष्टान्तीकृत्य स्त्रीजातेर्निर्लज्जत्वादिदोषदानार्थमाह । इयं स्वर्णयूथिका किं करोति पश्येतिभाषिणं श्रीकृष्णं

प्रकटं तमालमभिवेष्टयन्त्यलं
पिदधेऽञ्चलेन नवहेमयूथिकां ॥ ३८ ॥
इति भूरिकौतुकसुधातरङ्गिणी-
रसमज्जितान्तरतया तया समं ।
प्रविवेश तद्विपिनमध्यवर्त्तिनीं
कनकस्थलीं क्वणदनङ्गकिङ्किणिः ॥ ३९ ॥
समयास्ति यां द्युमणिविद्युदिन्दुज-
द्युति-विद्रुहि स्फुरति रत्नकुट्टिमे ।
मणियोगपीठमिह पद्मरागजं
स्फुटमष्टपत्रमवभासतेऽम्बुज ॥ ४० ॥
अनुरागिभक्त-निवहः स्व-मानसे
प्रकटीभवद्यदभिलक्ष्य सत्त्वणं ।

---

अवेक्ष्य तादृशभाषणात् पूर्व्वमेव राधया तमालं वेष्टयन्ती यूथिकां अञ्चलेन पिदधे ॥ ३८ ॥

इति प्रचुरकौतुकसुधानद्या रसेन मज्जितान्तरत्वेन स कृष्णः तया राधया समं वृन्दावनस्य मध्यवर्त्तिनीं कनकस्थलीं प्रविवेश । क्वणन्निर्म्मला किङ्किणी यस्य ॥ ३९ ॥

यां समया यस्याः कनकस्थल्या मध्ये स्फुरति रत्नकुट्टिमे मणि योगपीठमस्ति । कथम्भूते रत्नकुट्टिमे सूर्य्यविद्युच्चन्द्रजद्युतीनां विद्रुहि इह मणियोगपीठे पद्मरागजमष्टदलमम्बुजं भासते ॥ ४० ॥

अनुरागिभक्तसमूहःस्वमनसि । पक्षे स्वमनोरूपे मानससरोवरे प्रकटीभवत् यत् पद्मं सक्षणं सोत्सवं यथास्यात्तथा अभिलक्ष्य यदीय-

मकरन्दमद्भुतमतुलं पिबन् पिबं-
श्चिरमेव जीवति यदीयमद्भुतं ॥ ४१ ॥
सुरशाखिनो ऽतिसुरसार्थवर्षिणः
सुरसार्थ-दुर्लभतरस्य कस्यचित् ।
सुरतोत्सवानसुरवैरिणां सदा
सुरसय्य नित्यधृतसौभगाम्बुधेः ॥ ४२ ॥
हरिदश्मपत्रपरिगुच्छविद्रुम
प्रभपल्लवाम्बुजमणीफलावलेः ।
निखिलर्त्तुसेवितमस्य यत् सदा
तलवर्त्ति हन्त सुदृगार्त्तिसन्ततेः ॥ ४३ ॥
युग्मकं ।

मद्भुतमकरन्दं पिबन् पिबन् चिरं जीवति । मनसि तस्य माधुर्यास्वादनमेव तस्य मकरन्दपानमिति बोध्यं ॥ ४१ ॥

यत् यत् सुरशाखिनः कल्पवृक्षस्य तलवर्त्ति इति परश्लोकेनान्वयः । कथम्भूतस्य अतिसुरसफलस्य वर्षिणः । पुनश्च सुरसार्थस्य देवता समूहस्य दुर्लभतरस्य । पुनश्च असुरवैरिणं कृष्णं सुरतजन्योत्सवान् सुरसय्य आस्वादयित्वा नित्यं धृतः श्रीकृष्णदत्तसौभगाम्बुधिर्येन तस्य । हे कल्पवृक्ष ! धन्योऽसि यथा त्वत्तले मम सुरतोत्सवस्तथा नान्यत्र इति श्रीकृष्णदत्तसौभाग्यो बोध्यः ॥ ४२ ॥

पुनश्च कथम्भूतस्य इन्द्रनीलमणिवत् पत्रं यस्य, वज्रतुल्यश्वेत वर्णगुच्छा यस्य, विद्रुमप्रभातुल्यप्रभायुक्तः पल्लवो यस्य, अम्बुजमणिः पद्मरागस्तत्तुल्या फलश्रेणी यस्य, सच सच सच सच तस्य । पश्च कीदृशं सुदृशां स्त्रीणां, ज्ञानिणां, शोभनानां नयनानाञ्च अर्त्तिं हन्ते- हन्त ॥ ४३ ॥

तदुपेत्य स श्रिततदीयकर्णिकः
स्फुटकर्णिकाररमणीयकर्णिकः ।
वनिता-नितानितमहाः सहालिभि-
र्मुमुदे मुखोद्घटनलोभितालिभिः ॥ ४४ ॥

तडिदम्बुभृद्वलयिते किमम्बुभृ-
त्तडितावचञ्चलतया धृतप्रथे ।
सुरशाखिनो ववृषतुः स्ववाञ्छितं
बहु तस्य किं नु कृततत्तलस्थिती ॥ ४५ ॥

स्मरकोटिमोहननखाञ्चलद्युतेः
स्मरविह्वलीकृततनोरघद्विषः ।
नयनान्तसृष्टसशरस्मरार्बुद
गुपितप्रियाञ्चितटपीतरोचिषः ॥ ४६ ॥

---

तत्पद्मं उपेत्य आश्रिता तदीयकर्णिका येन एवम्भूतः स श्रीकृष्णः वनिता राधा तया नितरां तानितं विस्तृतं मह उत्सवो यस्य तथाभूतः सन् आलिभिः सखीभिः सह मुमुदे । कथम्भूताभिः मुखस्योद्घाटनेन लोभितोऽलिर्याभि ॥ ४४ ॥

कृष्णराधास्वरूपमेघतडितौ किं निजपीतनीलत्वस्थानीयाभ्यां विद्युन्मेघाभ्यां वलयिते ? ननु स्वर्गं विहाय पृथिव्यां किमर्थं तयो रागमनं ? तत्राह । तस्य सुरशाखिनो बहु वाञ्छितं किं कृततत्तलस्थिती सत्यौ ववृषतुः ? कथम्भूतेऽचञ्चलतया धृता प्रथा ख्यातिर्याभ्यां ते ॥ ४५ ॥

अधुना कल्पवृक्षस्थशुकोक्तं श्रीकृष्णस्य रूपं वर्णयति । ललित त्रिभङ्गीवपुषः श्रीकृष्णस्य माधुरीं सनन्दनपराशरादयो न विदुः ।

ललितत्रिभङ्गिवपुषोऽस्य माधुरीं
न विदुःसनन्दन-पराशरादयः ।
तदपि व्रजाश्रितशुकोक्तिचातुरी
विषयीकृताम्मनुभवन्ति साधवः ॥ ४७ ॥

युग्मकं ।

सहि वेद कल्पतरुमाश्रितः सदा
फलमस्य सारमुपभोक्तुमग्रणीः ।
यदवर्णयत्तदमृतं सुदुर्लभं
विबुधैरपीति जगति प्रथां दधे ॥ ४८ ॥

पक्षे नन्दनेन पुत्रेण व्यासेन सह इति परश्लोकेनान्वयः । कथम्भूतस्य स्मरकोटिमोहननखाञ्चलद्युतेरपि स्मरेण विह्वलीकृता तनुर्यस्येति विरोधाभासः । पुनश्च नयनाञ्चेन तृप्तो यः शरयुक्तः स्मरार्बुद-स्तेन कल्पिता याः प्रियास्तासां अक्षितटेन पीतं रोचिः कान्तिर्यस्य । यद्यपि पराशरादयो न विदुस्तदपि व्रजाश्रितशुकपक्षिणः उक्तिचातुरी विषयीकृतां माधुरीं साधवोऽनुभवन्ति । पक्षे व्रजाश्रित शुकदेवस्य श्रीभागवतोक्तिचातुरीविषयीकृतां माधुरीं साधवोऽनुभवन्ति ॥४६ ४७॥

अस्य कल्पवृक्षस्य सारफलमुपभोक्तुं स शुकः सदा वेद । कीदृशः अग्रणी श्रेष्ठः । यत् अवर्णयत् तदमृतं विबुधैर्देवैरपि सुदुर्लभमिति जगति प्रथां दधे । पक्षे वेदरूपकल्पवृक्षमाश्रितः सन् श्रीभागवतरूपं तस्य सारफलं उपभोक्तुं अग्रणीः । स यत् अवर्णयत् तत् श्रीभागवत रूपामृतं विबुधैरपि सुदुर्लभमिति जगति प्रथां दधे ॥ ४८ ॥

सुकुमारतां पदयुगस्य किं ब्रुवे
रसिकेन्द्र ! यस्य धरणौ यियासतः ।
स्वदृशोऽपि पादुकयितुं विशङ्कते
स्खलदस्रु ते प्रणयिणी-कदम्बकं ॥ ४९ ॥

निखिलाङ्गभारवहनाभिभूतितः
कुपितेव शोणिमधुरा दुरावरा ।
वहिरेतुमिच्छति तमामिवेक्ष्यते
तव सव्यपाद-तलपार्ष्णिवर्त्तिनी ॥ ५० ॥

तदुपर्युदेति शितिमा तयोर्द्वयो-
रधिसीमकापि रुचिरेखिकास्ति या ।
इयमेव दृङ्मधुकरीश्वरीकरी-
त्यतिविह्वलाः स्वमधुभिर्नतभ्रुवां ॥ ५१ ॥

---

शुकपक्षिणः कवितामाह । हे रसिकेन्द्र ! तव पदयुगस्य सुकुमारतां किं ब्रुवे । धरणौ यियासतो यस्य पदयुगस्य तव प्रणयिणी कदम्बकं स्वदृशो नेत्राण्यपि कठोरतया पादुकयितुं पादुकां कर्त्तुं विशङ्कते । प्रणयिनीकदम्बकं कीदृशं ? स्खलदस्रु ॥ ४९ ॥

अधुना त्रिभङ्गीललितस्य कृष्णस्य तादृशत्वमये वामपदे सर्व्वाङ्गस्य भाराक्रान्तं तद्रक्तत्वाधिक्यं तत्कोपजन्यत्वेनोत्प्रेक्षते । तव वामपद-तलवर्त्तिनी पार्ष्णिका शोणिमधुरा आरक्तवर्णातिशयः । मम प्रतिपक्षे दक्षिणपदे सत्यपि निखिलाङ्गभारवहनाभिभूतितः कुपिता इव मया अत्र न स्थेयमित्युक्त्वा बहिरागन्तुमिच्छति तमामिवास्माभिरीक्ष्यते ॥५०॥

शितिमा श्यामता । तयोर्द्वयोः शोणिमशितिम्नोः सीमामध्ये या

यदसव्यमेव चरणं पुरस्तर-
श्चरजङ्घमाप रभसेन सव्यतां ।
अतिरागिणा निजतलेन राधिका
पदलम्बिशाद्यलघुचुम्बनाय तत् ॥ ५२ ॥

इदमिद्धहिङ्गुलरसेन चर्च्चितं
विधिना स्वचित्रकरता-प्रथा-कृते ।
ध्वजपङ्कजादिलिखता ध्रुवं यतः
सकृदीक्षयन् कुलवतारमूमुहः ॥ ५३ ॥

कथमप्रतीति मभिपद्यसे प्रिये !
कलयेश्वरोऽस्मि नहि नेत्यदीदृशः ।
स्वपदाङ्कसम्पदमिमां किमाग्रहा-
न्नतथापि लब्धदरगौरवोऽप्यभूः ॥ ५४ ॥

कापि रुचिरेखिका अस्ति । इयं रेखिका नतभ्रुवां दृङ्मधुकरीर्विह्वलाः चरीकरीति अतिशयेन पुनः पुनः करोति ॥ ५१ ॥

पुरस्तिरश्चीनजङ्घं दक्षिणचरणं रभसेन कौतुकेन सव्यतां वामत्रिग्नलितां यत् आपतत् अतिरागिणा दक्षिणचरणतलेन राधिका पदलम्बिशादीनां अलघु चुम्बनाय न्यूनता अपि स्वीकृता ॥ ५२ ॥

स्वचित्रकरताप्रथानिमित्तं ध्वजपङ्कजादि लिखता विधिना इदं तलं इद्धहिङ्गुलरसेन चर्च्चितं । यतो लिखनात् त्वं कुलवतीः सकृदीक्षयन् अमूमुहः ॥ ५३ ॥

हे प्रिये ! कथमप्रतीतिमभिपद्यसे ? अहमीश्वरोऽस्मि नहि न तथा चाहमीश्वर एव इति स्वपदाङ्कसम्पदं इमां प्रियां त्वं दक्षिणचरणतले उन्नतीकृत्य किं आग्रहात् अदीदृशः ? तथापि त्वं न लब्धदरगौरवोऽपि

तनुजानुजातसुषमापटावृता-
तनुजानुतापविषमामनावृतां ।
तनुते दशां सकृदवेक्षितैव ते
तनु मध्यमाततिहृदः कलानिधे ! ॥ ५५ ॥

अतिपीनवृत्तरुचिरोरुरोचिषा
जगतीसतीरपि रतीश-वेल्लिताः ।
सहसा विधाय सहसाधरामृतैः
सह साधुताभिरपि देव ! तिम्यसि ॥ ५६ ॥

तव नाभिरोमततिपद्धतिरूपतां
ययतुः सुधाहृदतदुत्थवल्लिके ।
परितस्तु ये सुमनसां निवासभू-
रतिरामणीयकवती विराजते ॥ ५७ ॥

अभूः । इहश्यो वह्न्यो रेखा अस्माकं पदतले वर्तन्ते इत्युक्त्वा न गौरवं कुर्वन्ति ॥ ५४ ॥

जानु वर्णयति । सूक्ष्मजानुजन्यशोभा सकृदवेक्षिता सती कन्दर्प-तापेन विषमां अतएवानावृतां तनुमध्यमाततीनां हृदयस्य दशां तनुते हे कलानिधे ! ॥ ५५ ॥

अति पीनवृत्तरुचिरोरुदेशस्य रोचिषा जगतीसतीसहसा रतीशेन कन्दर्पेण वेल्लिताः कम्पिताः विधाय ताभिर्व्रजसुन्दरीभिःसह साधु यथास्यात् हससहिताधरामृतैस्तिम्यसि आर्द्रीभवसि । तासा-मधरामृतैस्त्वं त्वदधरामृतैरपि ताः तिम्यन्तीत्यर्थः ॥ ५६ ॥

सुधाहृदतदुत्थवल्लिके तव नाभिरोमावलिरूपतां ययतुः । ये ययोः

सुभगोर्द्ध्वनालमपि न न्यगाननं
स्मरसद्मपद्ममिदमद्भुतं भवेत् ।
पतिताद्दृशोऽत्र सुदृशां यदन्धतां
तदिषूपघातगलदम्बुभिर्ययुः ॥ ५८ ॥

त्रिजगत्त्रियामखिलसार-संग्रहै-
स्त्रिवली व्यधायि विधिनातिशिल्पिना ।
अनयावलग्नमिह तेन कीर्त्तय-
न्त्यवलग्नमेतदृतभाषिणो बुधाः ॥ ५९ ॥

अति तुङ्गपीनघनवक्षसो भरं
वहदेव मध्यममगादिव श्रमं ।

ह्रद्वल्ल्योः परितः सुमनसां शोभनानां मनसाञ्च मालास्थपुष्पाणाञ्च सहृदयानाञ्च निवासभूर्विराजते । परिशब्दयोगाद् द्वितीया ॥ ५७ ॥

कन्दर्पस्य सद्मस्वरूपमिदं नाभिपद्मं अद्भुतंभवेत् । अद्भुतत्वमेवाह । सुभगोर्द्ध्वनालमपि तत्पद्मं न्यक् नीचीनं आननं यस्य तादृशं न । यत् यस्मात् अत्र पद्मे सुदृशां दृशः पतिता सत्यः तस्य पद्मस्थकन्दर्पस्य इषूपघातेन गलदम्बुभिः करणैः अन्धतां ययुः । अत्र नाभिपद्मदर्शनजन्यानन्दाश्रु एव कन्दर्पवाणाघातजन्यत्वेनोत्प्रेक्षितं ॥ ५८ ॥

अनया त्रिवल्या सह लग्नं तेन हेतुना सत्यभाषिणो धीराः तव मध्यदेशं अवलग्नं कीर्त्तयन्ति । मध्यमञ्चावलग्नं चेत्यमरः । तेन ये पुनरन्य पुरुषे मध्यदेशमवलग्नं भाषन्ते ते मिथ्यावादिनो मूर्खा इत्यर्थः ॥५९॥

अति तनु अति सूक्ष्मं मध्यमं वक्षसो भरं वहत् सत् श्रमं अगादिव । श्रमाद्धेतोर्निजनामदेशे अनमदिव । त्रिभङ्गसमये वामपार्श्वे

निजवामतोऽनमदिवातितन्विदं
त्रिकभङ्गिलङ्गिमभरेण लक्ष्यते ॥ ६० ॥
नवलोलता लषति दक्षिणोऽस्य य-
त्तदिदं विमोहनकृते मृगीदृशां ।
इतरत्र पुष्कलवलित्वमस्त्यतो
गुरुभारधारणमिहैव सम्भवेत् ॥ ६१ ॥
श्वसनैर्दरावनमदुन्नमत् क्रमात्
मृदु पिप्पलच्छदनिन्दि सुन्दरं ।
निजतुन्दमिन्दुवदना-मणिस्रजां
नयसि क्वचिन्नटनरङ्गभूमितां ॥ ६२ ॥

किञ्चिन्नमनमनुभवसिद्धमितिभावः । इदन्तु त्रिकभङ्गे लङ्गिमभरेण मनोहरतातिशयेन लक्ष्यते । त्रिकः नितम्बोपरि पृष्ठदेशस्थभागविशेषः । लङ्गवङ्गौ मनोहरे ॥ ६० ॥

अस्य मध्यदेशस्य त्रिभङ्गीसमये दक्षिणपार्श्वे नवलोलता नव्यलोलत्वं । पक्षे त्रिवलियुक्तत्वं न लषति अस्त्यर्थे ल प्रत्ययः । इतरत्र वामपार्श्वे पुष्कलवलित्वं पुष्टत्रिवलित्वमस्ति । पक्षे दक्षिणपार्श्वे नवलोलत्वं न वलयुक्तत्वमिति पर्य्यवसितार्थः । इतरत्र पुष्कलवलवत्वं पुष्टवलियुक्तत्वं तदेव पुष्कलवलवत्वमिति परम्परितरूपकमस्ति अतो गुरुभारवहनमिह वामपार्श्वे एव सम्भवेत् ॥ ६१ ॥

उदरं वर्णयति । अश्वत्थदल निन्दि सुन्दरं निजतुन्दं श्वसनैः क्रमात् ईषदवनमत उन्नमच्च । तत्तुन्दं इन्दुवदनाया राधाया मणिस्रजां नटनरङ्गभूमितां क्वचित् विपरीतशृङ्गारसमये नयसि ॥ ६२ ॥

उरसीन्दिराङ्कलतिका विराजते
निकषाश्मनीव तपनीयरेखिका ।
विसतन्तुचूर्णततितुल्यतां श्रिता
भृगुलक्ष्मलोमलतिकाप्यणीयसी ॥ ६३ ॥

इह वामदक्षिणदिगुत्थिते इमे
पुरतः स्फुरत्पुरटतारहारयोः ।
प्रतिविम्बिते द्युतिकले इवेक्षिते
भवतो मसारमुकुरायते तव ॥ ६४ ॥

किममानिवान्तरिह ते समृद्धिमा-
ननुराग एव वहिरेति दृश्यतां ।
उदितेन्दु सूर्य्य शतानिन्दिकौस्तुभ-
च्छलतो यतो जगदवाप रक्ततां । ६५ ॥

निकषाश्मनि सुवर्णरेखिका इव तव वक्षःस्थले लक्ष्मीरेखारूपा लतिका बिराजते। एवं अनीयसी क्षुद्रा श्रीवत्सरूपभृगुलक्ष्मलोम लतिका विराजते। कथंभूता मृणालतन्तुचूर्णश्रेणीतुल्यतां श्रिता प्राप्ता। एतेन तस्याः श्वेतत्वं सूक्ष्मत्वं चायातं ॥ ६३ ॥

इह मसारमुकुरायिते इन्द्रनीलमणिनिर्म्मितदर्पणतुल्ये तव वक्षसि यथा संख्येन वामदक्षिणदिगुत्थिते इमे लक्ष्मीरेखा श्रीवत्सलतिके पुरटतारहारयोः स्वर्णहारमुक्ताहारयोः प्रतिविम्बिते कान्तिकले इव जनैरीक्षिते भवतः ॥ ६४ ॥

ते तव समृद्धिमान् अनुरागः अन्तरमानिव अन्तःकरणे न माति इति हेतोरिव कौस्तुभच्छलात् किं वहिर्दृश्यतां एति ? यतः कौस्तुभात् जगत् अनुरक्ततामवाप ॥ ६५ ॥

मृदुलत्रिरेखदरतिर्य्यगञ्चित
द्युतिमण्डली ललितकण्ठ-माधुरीं ।
स्वदृशाधयन्त्यधिधरं धृतिच्युता
कुलजापि दोर्व्वलयितां विधित्सति ॥ ६६ ॥

भुजदण्डदण्डितभुजङ्गम-श्रिय-
स्तव पाणिपङ्कज-पलाशपालिभिः ।
निज-नृत्यकृत्यदरगौरवाहृता
मुरली विलेढि लघुराधरीं सुधां ॥ ६७ ॥

स्नापितः स्मितामृत-पृषद्भिरर्च्चितः
शिखरप्रभद्विजनिजार्च्चिषां चयैः ।
अधरोऽनुरागधुरया नचाधरः
कथमेतु विम्वतुलनापराभवं ॥ ६८ ॥

---

अधिधरं धरण्यां धृतिच्युताकुलजापि तव कण्ठमाधुरीं स्वदृशा धयन्ती सती दोर्वलयितां विधित्सति हस्ताभ्यां वेष्टितां चिकीर्षति। कथंभूता मृदुला त्रिरेखा यस्याः । एवं त्रिभङ्गसमये ईषत्तिरश्चीनेनाञ्चिता । एवं द्युति मण्डलीभिर्ललिता सा च साच साच तां ॥६६॥

भुजदण्डेन दण्डिता भुजङ्गस्य शोभा येन एवंभूतस्य तव पाणिपङ्कजयोः पलाशपालिभिः अङ्गुलिश्रेणीभिः स्वस्य नृत्यरूपकृत्यार्थं ईषद्गौरवाहृता मुरली अधरसम्बन्धिनीं सुधां लेढि आस्वादयति यतो लघुः । नीचो हि महज्जनेन ईषदाहृतश्चेत् अत्युच्चपदं सहसैवारोहतीति प्रसिद्धः ॥ ६७ ॥

तव अधरस्मितरूपामृतविन्दुभिः स्नपितः एवं माणिक्य प्रभदन्तस्य निजार्च्चिषां समूहैः । पक्षे श्रेष्ठप्रभब्राह्मणस्य निजकान्ति

वलभिन्मणिद्रुम-नवाङ्कुरोऽग्रतो
रविजाम्बु-बुद्बुदयुगेन पार्श्वयोः ।
दरतिर्य्यगेव यदि युज्यते तत-
स्तव नासिकाप्युपमया मयार्च्यते ॥ ६९ ॥

समसन्निवेश नवपल्लवोपम
श्रवसोर्म्मणीमकरकुण्डल-त्विषां ।
मृदुगण्डमण्डल मनूद्गटच्छटा
पतितेक्षणाः कुलभुवोऽगुरन्धतां ॥ ७० ॥

रसिकत्व-लास्य-रुचि-सत्यसन्धता-
श्रितसारतादिनिज-धर्म्मविन्दुभिः ।

---

समूहैरर्च्चितः एवं नाम्ना अधरोऽपि अनुरागातिशयेन न चाधरः न न्यूनः अतएव एवंभूतस्तवाधरः बिम्बतुलनारूपपराभवं कथं एतु ॥ ६८ ॥

वलभिन्मणिद्रुमस्य इन्द्रनीलमणिनिर्म्मितवृक्षस्य नवीनाङ्कुरः। एवं तस्याग्रत उभयपार्श्वे रविजायाः यमुनायाः श्यामबुद्बुदद्वयेन ईषत्तिरश्चीनतया यदि तादृशाङ्कुरो युज्यते तदा तव नासिकापि मया उपमया अर्च्यते । अत्र नासास्थानीयोऽङ्कुरः । नासापुटस्थानीयो बुद्बुदः ॥ ६९ ॥

समसन्निवेशनवपल्लवोपलकर्णयोर्ये मणिमयकुण्डले तयोस्त्विषां या मृदुगण्डमण्डले उद्गटच्छटा तस्यां पतितेक्षणाः कुलभुवः व्रज-सुन्दर्य्यस्तस्याश्चाकचिक्येन अन्धतां अगुः प्रापुः ॥ ७० ॥

रसिकत्वादिनिजधर्म्मविन्दुभिः करणैर्येन तव नेत्रद्वयेन झषादि कृतार्थतां साधु यथा तथा गमितं प्रापितं । तत्र रसिकत्वविन्दुना-झषः कृतार्थतां प्रापितः कविपरम्परायां झषस्य रसिकत्वप्रसिद्धेः ।

झष-खञ्जनाम्बुज-चकोर-षट्पदा-
द्यपि येन साधु गमितं कृतार्थतां ॥ ७१ ॥
श्रुति वर्त्मवर्त्त्यपि तदीक्षण-द्वयं
तव माद्यति द्यति सदा सती-व्रतं ।
अतिलम्पटं तरलतारमुच्छल-
ज्जलवीचिमज्जदिव राग-सागरे ॥ ७२ ॥

युग्मकं ।

अलिकार्द्धचन्द्रमलकालिवेष्टितं
चलचिल्लिकार्म्मुकभृतो मनोभुवः ।
निशितार्द्धचन्द्रमिव भर्म्मचित्रकं
सकृदेव वीक्ष्य तव का न कम्पते ॥ ७३ ॥

एवं नास्यबिन्दुना खञ्जनः । कान्तिबिन्दुना अम्बुजं । सत्यसन्धता बिन्दुना चकोरः । श्रितसारत्वबिन्दुना भ्रमरः ॥ ७१ ॥

तव तत् ईक्षणद्वयं श्रुतिवर्त्मवर्त्ति । एतेन नयनस्य दीर्घत्वमायातं । श्लेषेण वेदमार्गवर्त्त्यपि माद्यति मत्तं भवति । एवं सदा सतीव्रतं द्यति खण्डयतीति विरोधो द्रष्टव्यः । तरला चञ्चला तारा यस्य । विरोध पक्षे तरलत्वं राति गृह्णाति अतिचञ्चलमित्यर्थः । पुनश्चानुरागसागरे उच्छलन् यो जलवीचिस्तत्र मज्जदिव । नेत्रस्य स्वाभाविकसदा जलपूर्णत्वेन प्रतीयमानत्वं शोभाधायकं भवतीति भावः ॥ ७२ ॥

अलकरूपभ्रमरेण वेष्टितं तव अलिकरूपार्द्धचन्द्रं चञ्चलचिल्लिरूपकार्म्मुकभृतः कन्दर्पस्य पुष्पमयतीक्ष्णार्द्धचन्द्रमिव । कथम्भूतं सुवर्णेन चित्रं यस्य । ललाटोपरि तिलकादिकमेव अस्त्रोपरि सुवर्णचित्रस्थानीयमिति बोध्यं ॥ ७३ ॥

न कचा अमी किल मृणाल-तन्तवो
मृगनाभिभिः शुचिरसैर्यदञ्जिताः ।
निज-चामरार्थमसमेषुभूभृता
कुटिलावभुवुरिति यत् स तद्गुणः ॥ ७४ ॥
निखिलाङ्गरूपयश एव चन्द्रमा-
स्तव मन्दहास्यवपुरास्य-मण्डले ।
समुदित्य सर्वभुवनाधिपान्तरा-
लयमध्यमन्वपि तनोति कौमुदीं ॥ ७५ ॥
व्रजमीनजीवन ! जगद्विमोहन !
त्वामतोऽर्थ्यसे तव तु जीवितेश्वरी ।

यद्यस्मात् मृणालतन्तवः मृगनाभिभिः शृङ्गाररसैरञ्जिता। तथाच शृङ्गार-रसेनार्द्रीभूतै मृगनाभिभीरञ्जितेत्यर्थः। तत्रकारण-माह। असमेषुः पञ्चेषुः कन्दर्पस्तद्रूपेण भूभृता राज्ञा निज-चामरार्थमेवाञ्जिताः। कुटिलाभवन्ति इति यत् स तस्य कुटिलकन्दर्पस्य गुण एव कारणं ॥ ७४ ॥

तत्र निखिलाङ्गस्थितरूपस्य उत्कर्षस्वरूपयश एव चन्द्रमाः तव मन्दहास्यमेव वपुर्यस्य तथाभूतः सन् मुखमण्डले समुदित्य सर्व्व भुवनाधिपानां ब्रह्मरुद्रादीनां अन्तःकरणरूपालयस्य मध्यमनु मध्ये कौमुदीं ज्योत्स्नां तनोति। तथाच ब्रह्मरुद्रादयः सदा तव मन्द-हास्यस्य ध्यानं कुर्व्वन्ति ॥ ७५ ॥

हे व्रजमीनजीवन ! हे जगन्मोहन ! त्वं मया ईड्यसे। तव तु

कुरुते भवन्तमपि मोहितं स्वरु-
क्कणिकां किरन्त्यहमिमां कथं स्तुवे ॥ ७६ ॥
अतिशोणसान्द्रनवकुङ्कुमद्रव-
च्छुरितन्यगास्यकनकाम्बुजन्मनी ।
कुसुमेषु हाटकनिषङ्गसङ्गते
मणिसम्पुटे सुभगताभिवादिते ॥ ७७ ॥
क्रमपीनहेमरुचिरैकमूलभा
कदलीद्वयं सममधोमुखं ततः ।
अमृतोदपानमथ वृत्तवीचिभि-
स्तिसृभिः स्वमेव रभसेन वेष्टितं ॥ ७८ ॥

---

जीवितेश्वरी राधिका स्वकीयकान्तिकणिकां किरन्ती सती भवन्तमपि मोहितं कुरुते अतएव इमां कथं अहं स्तुवे ॥ ७६ ॥

कलाविदा विधिना भवत्कृते तव निमित्तं अनया स्वर्णकमलादि-रूपार्थसंहत्या राधिकारूपनवकेलिकल्पलतिका रचितेति पञ्चम श्लोकेन सहान्वयः । अर्थसमूहमेवाहातिशोणेति । बहुभिः श्लोकैः । प्रथमतश्चरणारविन्दं वर्णयति । वाह्लीकदेशस्थातिरिक्तनिविड कुङ्कुमयुक्ताधोमुखकमलद्वयं । जानुद्वयं वर्णयति । द्वे मणिसम्पुटे सुभगत्वेनाभिवादिते वन्दिते । कथम्भूते कुसुमेषोः कन्दर्पस्य तून प्रसिद्धेन स्वर्णनिर्म्मितनिषङ्गेण सह सङ्गते । एतेन जङ्घाद्वयमपि वर्णितं ॥ ७७ ॥

एकमूलभाक् स्वर्णकदलीद्वयं समं अधोमुखञ्च । एतेन उरुद्वयं अमृतस्य उदपानं कूपः एतेन नाभिदेशः । मध्यदेशस्थानीयं स्वतिसृभि-स्त्रिवलिस्वरूपवर्त्तुलाकारवीचिभिः रभसेन वेगेन वेष्टितं ॥ ७८ ॥

नलिनैकपत्रमधिमध्यराजित
स्मरलेखपङ्क्तिकरके निरन्तरे ।
बिसवल्लिके किसलयावृते दरः
शरदिन्दुरङ्करहितः स्फुरत्कलः ॥ ७९ ॥
स्फुटबन्धुजीवनवकुन्दकोरकै-
स्तिलपुष्प-नीलनलिनालि-पल्लवैः
अयमर्च्चितोऽभ्रपटलीयमानुजा
तनुधोरणीयुगिति यार्थसंहृतिः ॥ ८० ॥
विधिनानयैव रचिता कलाविदा
नवकेलिकल्पलतिका भवत्कृते ।

श्रीराधिकाया उदररूपकमलस्यैकपत्रं कीदृशं अधिमध्यं पत्रस्य मध्यदेशे राजिता रोमावलीरूपस्मरलेखपंक्तिर्यत्र । निरन्तरे अव्यवहिते स्तनरूपकरके । बाहुद्वयरूपबिसवल्लिके । कथंभूते हस्तरूप किसलयद्वयाभ्यां आवृते । दरःकण्ठस्थानीयशङ्खः । स्फुरत्कलः मुखरूपपूर्णचन्द्र इत्यर्थः ॥ ७९ ॥

अयं मुखचन्द्रः बन्धुजीवप्रभृतिभिरर्च्चितः । दन्तस्थानीयाः कुन्दाः । नासास्थानीयं तिलपुष्पं । नेत्रस्थानीये नीलनलिने । अलकस्थानीयोऽलिभ्रमरः । तेन भ्रमरसहितपुष्पेणैव पूजनं ज्ञेयं । कर्णस्थानीयः पल्लवः । केशस्वरूपमेघपटली । कथम्भूता यमानुजाया यमुनायास्तनुधोरणीयुक् । धोरणी तडागादीनां जलनिर्गमनार्थं क्षुद्रप्रणाली । नानार्थोऽयं शब्दः एतेन वेणी वर्णिता ॥ ८० ॥

उपभुज्य यन्मधुरिमाणमात्मनो
न न पूर्णकामतमतां भवानगात् ॥ ८१ ॥

कुलकं ।

प्रणवानि देवि ! नखरान् पदोः सदो-
च्छलदंशुभिः शकलितेन्दुनिन्दिनः ।
नमितं ह्रियान्तिककृतास्थितेर्हरि-
स्तव वक्त्रमेकमपि येषु वीक्ष्यते ॥ ८२ ॥

भवदास्य-सौरभपतन्मधुव्रता-
वलिवारणाय करधारिताम्बुजा ।
ललिता पुरो लषति तुङ्गविद्यया
धृतवीणया सह तथेन्दुलेखया ॥ ८३ ॥

एवंभूताया राधाया मधुरिमाणं भवानुपभुज्य न न पूर्णकामतमतां अगात् ? अपितु पूर्णकाम तमतामगादित्यर्थः ॥ ८१ ॥

हे देवि ! तव नखरान् प्रणवानि । कथंभूतान् सदा उच्छलत् किरणैः खण्डितचन्द्रनिन्दिनः । अन्तिके कृष्णस्य निकटे कृता स्थिति-र्यया एवम्भूतायास्तव ह्रिया नमितं एकमपि वक्त्रं हरिः येषु नखरेषु वीक्षते ॥ ८२ ॥

योगपीठारोहणसमये अष्टसखीनां यथायोग्यस्थाने स्थितिं श्रीरूप-गोस्वामि मतानुसारेणाह । भवदिति । काकाक्षिगोलकन्यायेन परश्लोक-स्थानुदक्षिणोत्तरदिशौ ललिताया दक्षिणस्यां दिशि उत्तरस्यां दिशि तुङ्गविद्यया सह तथा इन्दुलेखया सह ललिता लषति । तथाच सम्मुखे स्थिताया ललिताया दक्षिणपार्श्वे वीणासहिता तुङ्गविद्या उत्तर-पार्श्वे इन्दुलेखेत्यर्थः ॥ ८३ ॥

अनुदक्षिणोत्तरदिशौ विशाखया
सह चित्रया व्यजनचारुचालनैः ।
अतिदर्शनोपधिकघर्म्मविन्दवः
सहसास्ततां दधति वां सदोदिताः ॥ ८४ ॥

सिचयाञ्चलेन कलितेन पाणिना
प्रणयाश्रुमार्जनपरापि वामियं ।
स्वदृशौ धृताश्रुचितती व्यधादहो !
सहरङ्गदेव्यनुजयाऽभितःस्थिता ॥ ८५ ॥

अनुपृष्ठदेशमनुरागिणौ युवा-
मदर प्रमोदयति चम्पवल्लिका ।
तपनीयकान्तिजयिनागवल्लिका-
दलवीटिकाः प्रददती मुखाब्जयोः ॥८६॥

राधाकृष्णयोरनुदक्षिणोत्तरदिशौ विशाखया सह चित्रया यत् व्यजनचारुचालनं तैः करणैः वां युवयोः परस्परदर्शनोत्थघर्म्मबिन्दवः सहसा अस्ततां दधति ॥ ८४ ॥

अभितःस्थिता अनुजया सुदेव्या सह रङ्गदेवी पाणिना गृहीतेन वस्त्राञ्चलेन वां युवयोः प्रणयाश्रुमार्जनपरापि सा स्वदृशौ आनन्देन धृताश्रुचिततौ व्यधात् ॥ ८५ ॥

युवयोर्मुखाब्जयोः स्वर्णकान्तिजयिपर्णदलनिर्म्मितवीटिकाः प्रददती चम्पकवल्ली पृष्ठदेशे स्थिता सती अनुरागिणौ युवां अनल्पं प्रमोदयति ॥ ८६ ॥

प्रणयाद्रिराजधुरया हृदूढया-
वगतेन साहसभरेण सन्तरत् ।
तव रूपकेलिजलधौ महोर्म्मिम-
त्यधिकं निमज्जदतिवेलमेव यत् ॥ ८७ ॥

तदनङ्गनक्रधृतमङ्गनार्व्बुदं
किमु वर्णितं भवति मादृशां गिरा ।
कमलाद्रिजादिभिरपीह मृग्यते
सुचिरं यदीयपदवी दवीयसी ॥ ८८ ॥

युग्मकं ।

इतिलब्धवर्णमुदयद्विवर्णितं
रभसेन रुद्धगिरमीत्तयन् शुकं ।
बनपालिकां सरसगोस्तनीफलै-
रनुतर्पयन् मुदमधत्त माधवः ॥ ८९ ॥

महोर्म्मिमति तव रूपविहारस्वरूपसमुद्रे अङ्गनार्व्बुदं हृदूढया प्रणयरूपपर्व्वतराजस्य धुरया भारेण सहावगतेन साहसभरेण सन्तरत् सत् अतिवेलं शीघ्रं अधिकं तत्र निमज्जत् यत् यस्मात् तत्तस्मात् मादृशां गिरा किं वर्णितं भवतीति परश्लोकेनान्वयः । नहि आत्मघातिनां वर्णनं सतामुचितं भवतीति भावः । पक्षे एतादृशसौभाग्यवतीनां वर्णनं किं मादृशानां वराकाणां गिरा भवति ? अपि तु न भवत्येव। दवीयसी दूरवर्त्तिनी या सा पदवी मार्गः मृग्यते । पक्षे समुद्रे मग्नानां तासां उद्धरणाय यदीयपदवी मृग्यते ॥ ८७-८८ ॥

इति लब्धवर्णं विचक्षणं शुकं रभसेन हर्षेण उदयन्ती विवर्णता यस्य तथाभूतं अथच रभसेन रुद्धगिरं तं भोजयितुं वनपालिकां वृन्दां

अतिसौभगास्पदमभूत् सभाजनैः

शुक एव भव्यसुहृदालिसंसदः ।

अनुभाव्य भागवत-माधुरीं परी-

क्षितमेव यत् स्वमकरोदसौ कृती ॥ ९० ॥

कलगानगानवरकौशलावधि

व्यतिवेदनेन विजिगीषयैव किं ।

अथ वल्लकीमुरलिके तयोः करा-

म्बुजहंसिके इव चिरेण रेणतुः ॥ ९१ ॥

सलिलाश्मताश्मसलिलत्वयोः कृतिः

कृतितां ततान कियतीमहो तयोः ।

---

ईक्षयन् माधवः सरसद्राक्षाफलैः शुकं वृन्दाद्वारा अनुतर्पयन् स्वयं मुदं अधत्त ॥ ८९ ॥

भव्यानां सुहृदालीनां ललितादीनां संसदः सभाजनैः अभिनन्दनैः शुकः अति सौभाग्यास्पदं अभूत् । असौ शुकः भगवतोः राधाकृष्णयोः माधुरीं तादृशसंसदः सभास्थजनान् अनुभाव्य स्वं परीक्षितं परीक्षण कर्म्मभूतं अकरोत् । पक्षे शुकदेवः भव्यसुहृत्श्रेणिसंसदः श्रीभागवत माधुरीं अनुभाव्य परीक्षितं राजानं स्वं स्वीयमकरोत् । संसद् इति पदं षष्ठ्येकवचनान्तं द्वितीयाबहुवचनान्तञ्च ॥ ९० ॥

तयोः राधाकृष्णयोः वीणामुरलिके करपद्मस्थहंसिके इव रेणतुः गानं चक्रतुः । तथाच कृष्णः मुरलीमवादयत् राधिका तु वीणामित्यर्थः । तत्र उत्प्रेक्षामाह । कलगानगतं यत् अनवरं श्रेष्ठं कौशलं तस्यावधेर्व्यतिवेदनेन परस्परज्ञापनेन विजिगीषयैव किं रेणतुः ॥ ९१ ॥

तयोर्वीणागानमुरलीगानयोः सलिलस्य प्रस्तरत्वं प्रस्तरस्य सलिलत्वं तयोः कृतिः करणं कियतीं अतितुच्छां कृतितां कृतित्वं

यदभेददर्शिमुनिहृत्पवैरपि
द्रववृष्टिराश्वजनि सत्यलोकतः ॥ ९२ ॥

क्षणतो ऽथ रत्नसदन-प्रविष्टयोः
सुखतल्पतल्लज-तलोपविष्टयोः ।
स्मरसिन्धुवीचिभरमज्जिता तयो-
र्ललितादिकालिततिराप वाञ्छितं ॥ ९३ ॥

काञ्चीकुण्डलहारमौलिकटकैः शय्यातपत्रालयै-
र्वल्लीवृक्षमृगद्विजैर्बहुविधैर्नानाकलाकल्पितैः
पौष्पैरेव मुदा व्यधुः परिजन-श्रेण्यस्तयोः स्वामिनोः
सेवां स्वादितवन्यमूलफलयो-
स्ताम्बूलपूर्णास्ययोः ॥ ९४ ॥

इति श्रीभावनामृते महाकाव्ये कल्पतरुतललीला
स्वादनो नाम द्वादशः सर्गः ॥

---

ततान । उत्कृष्टकृतित्वमाह । अहो आश्चर्य्यं यद् यस्मात् सत्यलोकतः अभेददर्शिनां मुनीनामपि हृदयरूपवज्रस्य द्रववृष्टिः वर्षाच्छलेन आशु अजनि ॥ ९१ ॥

रत्नमन्दिरं प्रविष्टयो राधाकृष्णयोः स्मरसिन्धु-वीचिभरेण मज्जिता ललितादिसखीततिः वाञ्छितं आप । कथम्भूतयोः सुखजनको यो शय्याप्रसिद्धैकदेशः तत्र उपविष्टयोः । तल्लजेत्यस्यामरेण प्रसिद्धार्थत्वात् ॥ ९३ ॥

परिजनश्रेण्यः पुष्पनिर्म्मितैः काञ्ची-शय्या छत्र-गृह-वृक्ष-लता प्रभृतिभिः तयोः स्वामिनोः सेवां व्यधुः ॥ ९४ ॥

समाप्तश्चायं द्वादशःसर्गः ।

# त्रयोदशः सर्गः ।

अथ पुनरपि भ्राम्यन् वृन्दावनं वनजेक्षणः
तृषापरवशो हेमन्तेष्टं प्रदेशमुपव्रजन् ।
तरुगणघनच्छायाच्छन्नां श्रितामपि तां जहौ
सरणिमथ सा मम्लौ मन्ये तदीय-वियोगतः ॥ १ ॥
निजनिजवपुः सङ्कोच्याशु प्रसार्य्य वराम्बरा-
ण्यलघुजघना रोमाञ्चाढ्या मुखोदितशीत्क्रियाः
गतिमपि जहुर्जाड्याक्रान्ताः सुसंहतजानवः
स ऋतुरभवत्तासां सद्यो हरेरिव सङ्गमः ॥ २ ॥

अथानन्तरं वनजेक्षणः कृष्णः उत्सवपरवशः सन् तथा हेमन्तेष्टं वृन्दावनस्य भागविशेषं उपव्रजन् सन् तरुगणघनच्छायाच्छन्नां सरणिं पूर्व्वं ग्रीष्मभयात् आश्रितामपि अधुना शीतभयात् जहौ । सा सरणिः श्रीकृष्णवियोगेन मम्लौ इति अहं मन्ये । म्लानिज्ञानं तु मनुष्याणां गमनागमनाभावादुत्पन्नेन तृणादिनेति ज्ञेयं ॥ १ ॥ •

स ऋतुर्हेमन्तः । तासां राधादीनां सद्यः श्रीकृष्णस्य सङ्गम इवाभवत् । श्रीकृष्णेन सङ्गमसाधर्म्यमाह । अलघुजघनास्ताः कथम्भूताः निज निज वपुः सङ्कोच्य शीतभयात् वस्त्राणि प्रसार्य्य च मुखोदितशीत्क्रियाः । जाड्याक्रान्ता शीताक्रान्तास्ता गतिमपि जहुः । सङ्गमपक्षे आनन्दजाड्यात् । पुनश्चशीतात् सुसंहते एकत्रीकृते द्वे जानुनी याभिः । एवं कृष्णसङ्गेऽपि तस्य लाम्पट्यभयात् जानुनोरेकत्रीकरणं बोध्यं ॥ २ ॥

इह सखि ! तुषारांशोरंशो निशाऽतिसमेधते
ह्रसति दिवसो भागो भा गोपतेरपि ताम्यति ।
तनुरपि धृतोत्कम्पा शम्पासमाप्यतनूद्धुता
हिममहिमभिः कान्ते ! कां ते गमिष्यति वा दशां ॥३

तदिह मम हृद्वेश्मन्यस्मिंस्त्वदुत्कलिकालिभि-
स्त्वदुचितनिवासार्थं कोष्णीकृते निभृतेक्षणां ।
प्रविश सहसा जाड्यं दूरे विहाय विहारिणी-
त्यतिजवभुज-द्वन्द्वेनैनां चकर्ष स हर्षदः ॥ ४ ॥

नहि नहि नहीत्युक्तेनापि प्रियेण दृढं वला-
दुरसि रसिका सा वाहुभ्यां न्यवध्यत वल्लभा ।

---

श्रीकृष्णः राधां आह । इह तुषारांशोश्चन्द्रस्य अंशो भागः निशा अनिशं वर्द्धते । गोपतेः सूर्य्यस्य भागो दिवसः ह्रसति अतएव तस्य भा किरणं ताम्यति । हे कान्ते ! विद्युत्समा ते तव तनुरपि अधुनैव धृतोत्कम्पा एवं अतनूद्धुता अत्यन्तम्लाना । पक्षे अतनुः कन्दर्पस्तेन उद्धुता । पश्चात् हिममहिमभिर्हिमातिशयैः कां दशां गमिष्यति ॥ ३ ॥

तत्तस्मात् त्वदुत्कलिकालिभिः त्वद्विषयकौत्कण्ठाश्रेणिभिः । पक्षे उत्कण्ठारूपसखीभिः कोष्णीकृते मम हृद्वेश्मनि जाड्यं दूरे विहाय सहसा प्रविश । हे हारिणि ! मनोहारिणि ! इति उक्त्वा स हर्षदः श्रीकृष्णः अतिजवभुजद्वन्द्वेन एनां राधां चकर्ष ॥ ४ ॥

राधया नहि नहीत्युक्तेनापि प्रियेण कृष्णेन वक्षःस्थले वाहुभ्यां असौ रसिका वल्लभा न्यवध्यत । वक्षःस्थले धारणसमये तस्या राधाया उरुदेशविमर्द्दितात् वन्धोः श्रीकृष्णस्य शिथिलितरसनावन्धात्

शिथिलरसनाबन्धाद्बन्धोस्तदूरुविमर्द्दिता-
दपतदवनौ वंशी रोषादिवादरलाघवात् ॥ ५ ॥
त्वमसि कठिने! शीता गीताश्रयाप्युरुदोषभू-
स्तदुचितफलं विश्वोद्वेजिन्यवाप्नुहि साम्प्रतं ।
इति ललितया सा वेण्यग्रे निबध्य निजुह्नुवे
स्मरमधुमदात्तां तत्स्वामी चिरादपि नास्मरत् ॥ ६
समयविदथैताभ्यः सार्द्धं प्रियेण विहारिणा
सरसमटवीपाली-पाली प्रमोदधुराधरा ।
अरुणकपिशश्यामान् श्लक्ष्णान् सुवर्णरसाञ्चितान्
लघुलघु लघून्नीशाराणां चयान् समुपाहरत् ॥ ७ ॥

---

वंशी अवनौ रोषादिव पपात । रोषे कारणमाह । अदरलाघवादूरुदेशा-घातरूपलाघवात् तद्रूपानल्पां लघुतां प्राप्य । पक्षे स्वनिष्ठाति लाघवेन ॥ ५ ॥

मुरलीं हस्ते आदाय ललिता आह । हे कठिने ! काष्ठजातित्वात् शीतकाले त्वं शीता असि न तु कदापि उष्णा । अतएव मधुरगाना-श्रयापि उरुदोषभूः । हे विश्वोद्वेजिनि ! त्वं तदुचितफलं साम्प्रतं अवाप्नुहि इत्युक्त्वा ललितया सा निजुह्नुवे अपह्नुतां चकार । तां मुरलीं श्रीकृष्णः स्मरमधुमदात् न अस्मरत् ॥ ६ ॥

अथ समयवित् अटवीपाली वनदेवी तासां पाली श्रेणी लघून् रेजाइ इति प्रसिद्धानां नीशाराणां चयान् प्रियेण हरिणा सार्द्धं ताभ्यः राधादिभ्यः सरसं लघु लघु च यथास्यत्तथा समुपाहरत् । कथम्भूतान् श्लक्ष्णान् कोमलान् । नीशारः स्यात् प्रावरणे हिमानिल निवारणे इत्यमरः । कथम्भूता प्रमोदातिशयं दधातीति सा ॥ ७ ॥

कुरुवकघटाझिण्टीश्रेणीकुरुण्टकमण्डलै-
र्हृदतनुतनूनां ते कान्ते ! यतो दधिरे रुचः ।
तदवरमदामोदैरेषां सदेह विराजिनां
नवसुमनसां माला मा लालयत्यधिकं न किं ? ॥८॥
कलय महिले ! नारङ्गाख्या लता तव सन्निधा-
वपि निजफलद्वन्द्वं नैवावृणोत्यति गर्विणी ।
स्वकुचसुषमां कञ्चुक्यास्त्वं दरापि कराग्रतः
प्रकटयसि चेदेषा गर्हाम्बुनिधौ निमज्जति ॥ ९ ॥
इति निजगिरा राधारालेक्षणास्मितबिन्दुभिः
स्नपितहृगतो वन्यामन्यां विवेश स केशवः ।

---

श्रीकृष्णः राधिकामाह । कुरुवकस्य रक्तपियावासा इतिख्यातस्य घटा । झिण्टीश्रेणी श्यामपियावासाश्रेणी । कुरुण्टकः पीतपियावासा । हे कान्ते ! एतैः कर्त्तृभिः ते तव हृदयकन्दर्पतनूनां रुचः यद् यस्माद्दधिरे । हृदयस्यानुरागित्वेन रक्तत्वं । कन्दर्पस्य श्रृङ्गारात्मकत्वेन श्यामत्वं । तत्तस्मात् अनल्पप्रमोदैः सदा इह वृन्दावने विराजिनां एषां नवपुष्पाणां माला मा मां किं अधिकं न लालयति ? स्पृहां कारयति । ललईप्सायां धातुः ॥ ८ ॥

हे महिले ! राधे ! कलय पश्य । नागरङ्गाख्या लता तव सन्निधावपि निजफलद्वन्द्वं नैवावृणोति यतो ऽतिगर्विणी । अतो यदि त्वं स्वकुचसुषमां कञ्चुक्याः सकाशात् कराग्रेण प्रकटयसि तदा एषा निन्दाम्बुनिधौ निमज्जति ॥ ९ ॥

इति निजगिरा राधाया यत् अरालेक्षणं कुटिलेक्षणं स्मितबिन्दुश्च तैः स्नपितहृक् श्रीकृष्णः अतो वनभागात् अन्यां शिशिरसुखदां वन्यां वनसमूहं विवेश । यां शिशिरसुखदां आसन्नाः प्रशाखा

शिशिरसुखदां यामासन्ना व्रजाखिलपद्मिनी-
रविरतरविद्योतो द्योतोऽधिनोदभिपद्य ताः ॥ १० ॥

विशेषकं ।

शिशिरपृतनाधावद्दुर्गा-पितुर्व्वरभूभृतो
रविपरिभवायासौ बिभ्यत् सुतस्य दिशं गतः ।
अथ धृतबलो युद्धायायात्युदङ्मुख एष य-
त्तदियमधुना स्वविक्रान्तेश्चयं चिनुततमां ॥ ११ ॥
इति कुतुकतो निर्व्वर्ण्याग्रे चलँल्ललना-सखः
स खलु परमानन्दं कुन्दैरवाप विलोकितैः ।

व्रजाखिलपद्मिनीः अविरतरविद्योतः सूर्य्यकिरणःद्योतः स्वर्गात् अभिपद्य अधिनोत् असुखयत् ॥ १० ॥

सूर्य्यस्य दक्षिणायने एवं माघादौ उत्तरदिशि गमने च कारणं कृष्णो वर्णयति । दुर्गापितुर्व्वरभूभृतो हिमालयस्य शिशिररूपपृतना सेना सूर्य्यस्य पराभवाय अधावत् । दुर्गापितुरिति दुर्गायाः स्वकन्याया वचनादिवेत्युत्प्रेक्षा व्यङ्ग्या तस्या विन्ध्यवासिनीत्वाद्विन्ध्यरवि प्रतिपक्षत्वात् विन्ध्यस्य ीत्यर्थमेव तयापि स्वपिता तत्पराभवे नियुक्त इति काव्यलिङ्गानुमाने पुनर्व्यङ्गे । असौ सूर्य्यः बिभ्यत् सन् साहाय्यार्थं सुतस्य यमस्य दक्षिणदिशं गतः । अथ धृतबल एष सूर्य्यः माघादौ युद्धाय उत्तराभिमुखो यद्यस्मादायाति तत्तस्मादियं शिशिररूपपृतना स्वविक्रान्तेश्चयं समूहं चिनुते एकत्रीकरोतीत्यर्थः । एतेन माघे शिशिराधिक्ये कारणमपि वर्णितं ॥ ११ ॥

स कृष्णः विलोकितैः कुन्दैः परमानन्दमवाप । प्रेष्ठाया राधायाः

व्यचिनुत यदा तानि प्रेष्ठाप्रसाधनकृत्तदा
दरकरवृतं सास्यं चक्रे प्रकूणितनासिकं ॥ १२ ॥
किमपि दधती वक्त्रं राधे ! ह्रिया स्मितमिश्रया
वृतमपि घृणाव्यञ्जि स्वालीर्दृशेक्षयसेऽद्य मां।
इति गिरिभृता पृष्टाप्याह स्वयं सहसा न सा
यदि सपदि तं कौन्द्यग्रेऽपि
स्फुटं ललिताभ्यधात् ॥ १३ ॥
त्रिभुवनजनैः पुण्यश्लोको महानिति कीर्त्त्यसे
स्पृशसि च धृतोत्कण्ठः कौन्दीं लतामिह पुष्पिणीं।
इयमपि चिरायेष्टे नेष्टे त्वयीश ! निवारणे
यदतिमृदुला क्रान्ता हन्तातनूग्रशिलीमुखैः ॥१४॥

---

प्रसाधनकृत् कृष्ण यदा तानि कुसुमानि व्यचिनुत तदा कुन्दवल्ली परिहसितुं करेण ईषदावृतं मुखं घृणया कूणित नासिकं चक्रे ॥ १२ ॥

हे राधे ! त्वं स्मितमिश्रया ह्रियावृतमपि घृणाव्यञ्जितमुखं करेणापि दधती आच्छादयन्ती सती किं मां स्वालीः अद्य दृशा ईक्षयसे इति कृष्णेन पृष्टापि सा राधा यदि सहसा स्वयं न आह तदैव सपदि तत्क्षणे ललिता कुन्दवल्ल्यग्रे स्फुटं अभ्यधात् ॥ १३ ॥

पक्षे पुष्पिणीं रजस्वलां। इयमपि कुन्दवल्ली चिराय इष्टे त्वयि विषये निवारणाय न इष्टे न समर्था। यद् यस्मादतनोः कन्दर्पस्य उग्रशिलीमुखैर्बाणैः क्रान्ता अति मृदुला च ॥ १४ ॥

जगति ललिते! शुद्धाः सन्ति क्व वा नु भवादृशः
स्वकुलकलितं धर्म्मं मर्म्मव्यथामिव या जहुः ।
न निजसमतां ताः प्राप्स्यन्ति क्व चाप्यतिमार्गणा
श्रममिह तदुद्भिज्जेष्वेवं वृथा वत कुर्व्वते ॥ १५ ॥
इति निगदितं कौन्द्याः सर्व्वा अजीहसदुच्चकै-
रहह किमियं स्वं नः शङ्कास्पदी कुरुतेतमां ।
यदिह ललनास्वेषैवैका प्रकुप्यति निर्भरं
तदमलधियः सभ्या अभ्यूहयन्त्यपि कारणं ॥१६॥

युग्मकं ।

इति पुरुपरीहासा नासामुदारमुदावहा-
नपरिकलितान् श्रुत्या श्रुत्याकलय्य चलन् पुरः ।

---

कुन्दवल्लीआह । या भवादृशः स्वकुलधृतं धर्म्मं मर्म्मव्यथामिव-जहुः । ता भवद्विधा निजसमतां कुत्रापि न प्राप्स्यन्ति अतएव उद्भिज्जेषु लतादिषु अतिमार्गनश्रमं वृथा कुर्व्वते ॥ १५ ॥

इति कौन्द्या निगदितं सर्व्वाः सखीः अजीहसत् हासयामास । राधिकाह । नोऽस्माकं मध्ये इयं कुन्दवल्ली स्वमेव शङ्कास्पदी कुरुते । अस्माभिस्तु लता एव उक्ता । यद्यस्मादिह ललनासु मध्ये एका कुन्दवल्ली निर्भरं कुप्यति तत्तस्मात् अमलधियः सख्यः अस्य कारणं अभ्यूहयन्ति ॥ १६ ॥

आसां राधादीनामिति उरुपरीहासान् श्रुत्या श्रवणेन पक्षे वेदे नापरिकलितान् कृष्णः श्रुत्या श्रवणेनाकलय्य पुरोऽग्रे चलन् सन् वसन्त संयुक्ता अवनीः भूमिः अलभत । परीहासान् कथम्भूतान् उदारानन्द-वहान् । अवनीःकथम्भूताः आम्रवृक्षस्य शिखायां अग्रभागे स्थितात्

अलभत रसासारैः सारैरसालशिखाङ्कुर
श्रुतमधुकणैः क्लिन्नाःस्विन्ना इवातिमुदावनी: ॥१७॥
विटपिगृहिणो वल्लीकान्तावलीवलिताशिषः
शुभमधुदिनेषूच्चैः पर्व्वोत्सवं कलयन्त्यमी ।
परभृतमुखैराजीवार्थं द्विजैः प्रतिवासरं
मधुरनुतिभिर्येषां वाट्यां सहर्षमटाट्यते ॥ १८ ॥
अजनि मदनो राजा मन्त्री मधुर्मलयानिलो
निखिलविजयी सेनानीन्द्रश्चरा भ्रमरा इह ।
पिकपरिषदः प्रापुर्दण्डेऽधिकारमदक्षिणा
व्रजकुलभुवो दण्ड्याः काराः कृता गिरिगह्वराः ॥१९॥

अङ्कुरात् स्रवन्मधुकणैः करणैः क्लिन्नाः अतएव स्विन्ना इव । कथम्भूतैः कणैः रसानामासारैः धारासम्पातस्वरूपैः अतएव सारैः श्रेष्ठैः ॥ १७ ॥

श्रीकृष्ण आह । अत्र स्थले विटपिनो वृक्षा एव गृहिणो गृहस्थाः वल्लीरूपकान्ताश्रेण्या वलिताः सम्पन्ना आशिषः कामना येषां गृहस्थानां तथाभूताः। एवममी वृक्षरूपगृहस्थाः शुभवसन्तदिनेषु उच्चैः पर्व्वणि पौर्णमास्यादौ उत्सवं कुर्व्वन्ति। गृहस्थाः खलु पर्व्वणि श्राद्धाद्युत्सवं कुर्व्वन्त्येवेति भावः। पक्षे पर्व्वणां ग्रन्थीनां उत्कृष्टं सवं प्रसवं कुर्व्वन्ति । ग्रन्थिर्ना पर्व्वपरुषी इत्यमरः। वृक्षा हि वसन्ते ग्रन्थ्यङ्कुरादि प्रसवं कुर्व्वन्ति । परैरेव भृतं मुखं येषां एवंभूतैर्द्विजैः सदा परगृहभक्षणपरायणैः। येषां गृहस्थानां वाट्यां प्रतिदिनं भार्जीवार्थं सहर्षं अटाट्यते। पक्षे परभृतैः कोकिलैर्द्विजैः पक्षिभिः ॥१८॥

इह भूमौ कन्दर्प एव राजा अजनि। मन्त्री वसन्तः। मलयानिल एव निखिलविजयी सेनानीन्द्रः। भ्रमरा एव चराः। कोकिलपरिषद

कलय पुरतः कान्ते! गोवर्द्धनोऽखिलभूभृतां
नृपतिरभवच्छक्रं शत्रुं चिरस्य निरस्य किं ।
निज-निज-रुचातत्यामेर्व्वादिभिः करभूतया
यदयमधुनोपासाञ्चक्रे विनिह्नुतविग्रहैः ॥ २० ॥

क्वचन कनकप्रस्थात् स्वस्था प्रसर्पति जाह्नवी
क्वचिदिह गुहाविद्योतन्ते हिमैर्व्विहितालयाः ।
क्वचन शिखरैर्व्वीथीं रोद्धुं रवेरभिलष्यते
क्वचन रजतग्रावैः सिंहासनान्यपि भान्ति नौ ॥२१॥

---

एव दण्डेऽधिकारं प्रापुः । अदक्षिणा वामा व्रजसुन्दर्य्य एव दण्ड्याः । गिरिगह्वराः काराः कृताः ॥ १९ ॥

हे कान्ते ! अग्रे कलय । गोवर्द्धनः किं अखिल पर्व्वतानां शत्रुं शक्रं चिरस्य चिरकालं निरस्य अखिलभूभृतां राजा अभवत् । चिरस्य चिरात् चिरेणेत्यादि सविभक्तयन्तं पदमव्ययमिति बोध्यं । यद्यस्मात् सुमेरुप्रभृतिभिः करस्वरूपया निजकान्तीनां श्रेण्या अयं गोवर्द्धनः अधुना उपासाञ्चक्रे । कथम्भूतैः निह्नुता विग्रहा देहा अथवा स्पर्द्धया युद्धानि यैः महाराजाग्रे क्षुद्राणां राज्ञां निजवृहद्वपुः प्राकट्यानौचित्यात् ॥ २० ॥

सर्व्वेषां पर्व्वतानां करदानमेवाह । क्वचन गोवर्द्धनस्य कनक प्रस्थात् सुवर्णसानुस्थानात् सुमेरुशोभारूपजाह्नवी प्रसर्पति । कथंभूता स्वस्मिन् सुमेरौ स्थिता । पक्षे स्वर्णदी । क्वचिदिह गोवर्द्धने हिमालयचिह्नरूपैर्हिमैर्विहितस्थाना गुहा विद्योतन्ते । क्वचन गोवर्द्धनस्य शिखरैरवेर्वीथीं रोद्धुं अभिलष्यते । अत्र सूर्य्यमार्गरोधो विन्ध्यपर्व्वतचिह्नं । क्वचन हे राधे ! नौ आवयोः रजतप्रस्तरैः सिंहासनानि भान्ति । इदं कैलासचिह्नं ॥ २१ ॥

इह सखि ! परा रासस्थल्यन्तिके परिचीयता-
मनुरजनि या युष्मत्केलीविलास-कलैकभूः ।
क्षणमिह मणी-वेद्यां विश्रम्यतां तदिति ब्रुवन्
हरिरुपविवेशाथानिन्ये मधूनि वनाधिपा ॥ २२ ॥

रजतचषकन्यस्ते शस्ते मधुन्यधुतानना
निहितदृगिदं कीदृक् स्यादित्युपात्तमिषा तृषा ।
प्रिय-मुख-सुधां साध्वीं स्वाद्वीं ततोऽपि मृशन्त्यमू-
मधयदधिकं राधाबाधामिह प्रतिबिम्बितां ॥२३॥

व्रजकुलभुवामुत्कण्ठाग्निज्वलन्मनसां विधे !
ह्रियमिह सृजन्नोऽभूः शापास्पदं कतिशो न किं ।
यदिदमसृजो माध्वीकं तच्चिराय निरागस-
स्तव नुतिशतं कुर्व्वे धन्येत्युवाच हृदैव सा ॥२४॥

हे सखि ! रासुलीति ख्याता परा रासस्थली अन्तिके परिचीयतां । तत्तस्मात् क्षणं विश्रम्यतां ॥ २२ ॥

शस्ते प्रशस्ते मधुनि निहितदृक् राधाकृष्णस्य मुखप्रतिबिम्ब-दर्शनार्थं अधुताननाः । तृषा तृष्णया प्रियमुखसुधां ततोऽपि मधुतोऽपि स्वाद्वीं मृशन्तो सा अमूं प्रतिबिम्बितां मुखसुधां अधिकमधयत् । कथंभूतां अबाधामिति सम्पूर्णलोचनाभ्यां द्रष्टुं शक्यत्वात् ॥ २३ ॥

हे विधे ! उत्कण्ठाग्निज्वलन्मनसां व्रजकुलभुवां नोऽस्माकं ह्रियं सृजन् सन् कतिशः शापास्पदं किं न अभूः । अधुना तु यद् यस्मात् त्वं इदं मधु असृजः तत्तस्मान्निरपराधस्य तवाहं स्तुतिशतं कुर्व्वे इति सा राधा मनसैवोवाच ॥ २४ ॥

सखि ! यदधुनैवास्याब्जं मे वलात् पिवसि स्फुटं
मधु पुनरिदं पीत्वा किंवा न वेद्मि करिष्यसे ।
इति निगदता कृष्णेनैतां विधाय पराङ्मुखीं
मधुमधुरिमैवासौ तात्कालिकः किमपास्यत ॥२५॥
पिव पिव पिवेत्योष्ठस्याधो दधार ससारघं
चषकमसकृत् कृष्णो राधोच्छलद्भ्रुवलत्स्मितं ।
नहि नहि नहीत्यास्याम्भोजं तिरोऽश्रयति स्म सा
तदपि स चलापाङ्गोरङ्गी वलात् समपाययत् ॥२६॥
तदनु ललितााद्यालीवृन्दे तथैव निपायिते
दधति नयनारुण्यं वाढं प्रमाद्यति माद्यति ।
द्यति निजह्रियामोजोऽन्योन्यं पुनश्च निपायय-
त्यति मधुमदोद्भ्रान्ता कान्ताप्यघूर्णत कीर्णधीः ॥२७

---

स्वमुखप्रतिविम्बे राधाया मुखप्रतिविम्बं दृष्ट्वा कृष्णआह । पुनरिदं मधु पीत्वा त्वं किं करिष्यते इति निगदता कृष्णेन एतां राधां पराङ्मुखीं विधाय मधुनि द्वयोर्मुखप्रतिविम्बरूपो ऽसौ तात्कालिको मधुरिमा अवैदग्ध्येन किं अपास्यत किं दूरीकृतः ॥ २५ ॥

ससारघं मधुसहितं चषकं । सा राधा उच्छलद्भ्रु एवं वलत् स्मितं यथास्यात्तथा मुखाम्भोजं तिरोऽश्रयतिस्म । रङ्गी अयं चलापाङ्गः कृष्णः ॥ २६ ॥

प्रमाद्यति वस्त्रादौ असावधाना भवति माद्यति मत्ता भवति । निजह्रियां ओजःद्यति खण्डयति । पुनश्च परस्परं मधु पाययति कान्ता राधा मधुमदोद्भ्रान्ता अतएव कीर्णधीः विक्षिप्तधीः सती अघूर्णत ॥२७॥

पपतति सुसूसूर्य्यो भूभूर्घूघूर्णति दुद्रुमो
ननटति ततत्र स्ता अस्मान् ररक्ष पिपिप्रिय! ।
इति युगपदेवास्य स्कन्धे भुजे हृदि पृष्ठतो-
ऽप्यलघु ललगुर्निःसम्ख्याना विकीर्णकचाः स्त्रियः॥२८

स च रसनिधिः प्रत्यङ्गं ततुकुचैरभिपीड़ितः
स्वनिविड़भुजापीड़ं श्लिष्यन् वलादभिचुम्बितः ।
चपलमधुरग्रीवाभङ्गं चुचुम्ब चतुर्दिशं
पिहितवदना दास्यो हास्योदयं कति रुन्धतां ॥२६॥

अयि! चलदृशः! स्वस्वामिन्यः किमद्य विशिक्षिताः
युगपदिह मामेकं सर्व्वा इमा विजिगीषवः ।
यदहह वलात्कुर्व्वन्त्येषो महाननयो ऽथवा
नहि भवथ पार्ष्णिग्राहा किं न दिष्टमलघ्विदं॥३०॥

---

हे प्रिय ! अस्मान् रक्ष । इति युगपदेव अस्य कृष्णस्य पृष्ठादौ अलघु यथास्यात्तथा ललगुः ॥ २८ ॥

प्रत्यङ्गं तासां कुचैरभिपीड़ितः अथ च स्वनिविडभुजापीडं यथास्यात्तथा आश्लिष्यन् कृष्णः वलात् व्रजसुन्दरीभिरभिचुम्बितः सन् चपलमधुरग्रीवाभङ्गं यथास्यात्तथा चतुर्दिशं ताः व्रजसुन्दरीः चुचुम्ब ॥ २९ ॥

अयि ! चपलदृशः ! किङ्कर्य्यः ! इमा विजिगीषवः मां वलात्-कुर्व्वन्ति । एषोऽधिकोऽनयः । अथवा यत् यस्मात् यूयं पार्ष्णिग्राहाः सहाया न हि भवथ इदं मम अलघुदिष्टं महद्भाग्यं किं न ? अपितु महद्भाग्यमेव ॥ ३० ॥

अथ मधुमती तं गत्वाऽजीग्रहन्मधुसंभृतं
चषकमसकृत् सोऽप्यादाय स्वकुञ्जितपाणिना ।
स्व-मधरमम्मूर्मध्ये मध्ये विदंशतयार्पयन्
पिपिव पिपिवेत्येतद्भाषानुकारमपाययत् ॥ ३१ ॥
वयमिह दिने किम्वा रात्रौ स्त्रियः पुरुषा नु वा
कलितवसनाः किम्वा नग्नास्तथा करवाम किं ।
इति किमपि ता नो जानाना अनन्वितभाषिणी-
ररमयदसौ संदर्श्याग्रे स्थिता अपि किङ्करीः ॥३२॥
न पिवसि कथं किञ्चित्त्वं च प्रियेत्यभिभाषितो
ऽवददपि तुलस्यासामास्यैरहं मधुसंभृतैः ।
कनकचषकैरस्म्यश्रान्तं पिवन्न किमीक्षसे ?
परिचर तदेत्यास्मान् स्वेदाप्लुतान्मृदुवीजनैः ॥ ३३

अथ मधुमती काचित् किङ्करी श्रीकृष्णमपि मत्तं कर्त्तुं तं मधुपात्रं अजीग्रहत् । सोऽपि कृष्णोऽपि पात्रमादाय अमूर्व्रजसुन्दरीः स्व-मधुरं विदंशतया मध्ये मध्ये अर्पयन् तासां पिव पिवेति भाषाया अनु-करणं यत्र तद्‌यथास्यात्तथा अपाययत् न तु कृष्णेन पीतं ॥ ३१ ॥

गृहीतवसना नग्ना वा इति किमपि न जानाना न ज्ञातवतीः । किन्तु अनन्वितभाषिणीस्ता असौ कृष्णः किङ्करीः संदर्श्य अवमयत् ॥ ३२ ॥

हे प्रिय ! श्रीकृष्ण ! त्वं किञ्चिन्मधु कथं न पिवसि ? इति किङ्करी-भिरभिभाषितः श्रीकृष्णः ताःप्रत्यवदत् । हेतुलसि ! आसां तव स्वामिनीनां मधुसंभृतैर्मुखैः कनकचषकैः करणैरहं अश्रान्तं निरन्तरं मधु पिवन्नसि त्वं किं न ईक्षसे ? तस्मादत्र एत्य स्वेदप्लुतानस्मान् परिचर ॥ ३३ ॥

स्वसविधमथाप्यायातुं ता विलक्ष्य विशङ्किता-
श्चषकपटलीमास्ये धृत्वाऽभिनीतनिपीतिकः ।
अरुणनयनोद्घूर्णाभ्यासी श्लथीकृतगात्रकः
समजनि यदा तर्ह्येवैता हसन्त उपाययुः ॥ ३४ ॥
अथ चतुरया कौन्द्या द्वारे कवाटिकयावृते
प्रकटितवले लोले कृष्णे निरुद्ध्य निरुद्ध्य ताः ।
धयति मधुराण्यस्मिन् दीनाननानि नानागिरा-
तनुरपिधनुर्धुन्वन्मन्ये ननर्त्त समूर्त्तिभृत् ॥ ३५ ॥
स्वयमपि पपौ पौनःपुन्यादपाययदेव ता-
स्त्रिविधसरकोद्भूता भ्रान्तिस्तदप्यवति स्म याः ।

---

मधुपाने विशङ्किता अतएव दूरे स्थिताः स्वनिकटमानेतुं ता विलक्ष्य दृष्ट्वा कृष्णः स्वमुखे चषकश्रेणीं धृत्वा अभिनीतपीतिकः । मयि मत्ते सति आसां मन्निकटागमने शङ्का न स्थास्यतीत्यभिप्रेत्य पानाभिनयः कृतः । न तु तत्पीतं । एवं सहजारुणनयने मधुपानजन्य घूर्णाभ्यासी कृष्णः यदा यत्नेन श्लथीकृतगात्रः समजनि तदैव एता हसन्त्यः उपाययूः ॥ ३४ ॥

अथ चतुरया कुन्दवल्ल्या द्वारे कवाटिकयावृते सति प्रकटितवले अथच लोले अस्मिन् कृष्णे ताः किङ्करीः निरुद्ध्य निरुद्ध्य नानागिरा मधुराणि तासां दीनाननानि धयति सति स मूर्त्तिभृत् अतनुः कन्दर्पः धनुर्धुन्वन् सन् ननर्त्त इति मन्ये ॥ ३५ ॥

अधुना कृष्णः स्वयं पपौ । एवं ताः किङ्करीः अपाययत् । सरकं मधु त्रिविधं पैष्टं गौडं पौष्पञ्च तथाच तत्पाने उद्भूता कृष्णस्य भ्रान्तिर्याः किङ्करीः अवति इमाः किङ्कर्य्यः कान्तासहितं स्मरणे

स्मररणवियद्भूषं कान्तं सकान्तमिमा व्यधुः
श्रमकणलसन्मुक्तामाल्य-च्युतं मृदुवीजनैः ॥३६॥

मधुरस-परिपाक-प्रक्रमे सम्विदिन्दौ
मद-भरतमसैषन्मुच्यमाने प्रियाणां ।
सुरतपटिमरत्नान्योन्यदानादपूर्व्व
प्रथिममुदनुभूतेर्व्यस्मयन्नालिपाल्यः ॥३७॥

इति श्रीभावनामृते महाकाव्ये मधुपानलीलानु-
मोदनोनामत्रयोदशः सर्गः ।

---

वियद्भूषं खिगच्छद्भूषणं कान्तं कृष्णं श्रमजलकणरूपमुक्तामाल्येन च्युतं रहितं मृदुवीजनैर्व्यधुः चक्रुः । तथाच मधुपानजन्यघूर्णावशात् श्रीकृष्णो याः किङ्करीः मधु पाययितुं न शक्तस्ता एव स्व-यूथेश्वर्य्याधीनां वीजनैः परिचर्य्यां चक्रुरिति भावः ॥ ३६ ॥

प्रियाणां मधुरसपरिपाकस्य प्रक्रमे आरम्भे सम्विदिन्दौ ज्ञानरूप चन्द्रे मद्भरतमसा मत्ततातिशयरूपराहुणा ईषन्मुच्यमाने सति सुरतरत्नानां परस्परदानात् अपूर्व्वविस्तृतानन्दानुभूतेर्हेतोः अकृत मधुपाना आलिपाल्यः व्यस्मयन् । तथाच मधुपानातिशयमत्तताजन्याज्ञानदशायां न सुरतसुखं किन्तु कतिपयक्षणानन्तरं तस्य किञ्चित् परिपाकाज्जातं मत्ततायाः ईषन्न्यूनत्वं तेन ॥ ३७ ॥

समाप्तश्चायं त्रयोदशः सर्गः ।

---

# चतुर्द्दशः सर्गः ।

निदाघसुभगं वनं वनजनिन्दिपद्व्यां भ्रमन्
विलोकय मधुमङ्गलं कथय कस्य हेतोः सखे !
चिरं विरसमेकको वससि हा विहायैव नो
रसालपनसाटवी-तटभुवीति तं सोऽब्रवीत् ॥ १ ॥
वयस्य ! रसिकोहमित्यलघु मन्यसे त्वं यत-
स्तदद्य विवदे त्वया वद रसो भवेत् कीदृशः ? ।
विदन्तु तव वैदुषीं मम च तामिमे साक्षिणो
रसालगुरुशाखिनो द्विज-कुलस्तुता वस्तुतः ॥ २ ॥

---

वनजं पद्मं । हे सखे मधुमङ्गल ! नोऽस्मान् विहाय आम्रपनसाटवी तटभुवि विरसं यथास्यात्तथा एकको वससि ? इति तं मधुमङ्गलं स कृष्णः अब्रवीत् ॥ १ ॥

मधुमङ्गल आह । हे वयस्य ! कृष्ण ! यतस्त्वं "अहं रसिक" इति अलघु मन्यसे तत्तस्मादद्य त्वया सह विवदे विवादं करोमि । रसः कीदृशो भवेदिति वद ? रसलक्षणं वेदेत्यर्थः । तथाच तव वैदुषीं पाण्डित्यं मम च तां वैदुषीं इमे साक्षिस्वरूपाः रसालगुरुशाखिनः आम्ररूपवृहद्वृक्षाः । पक्षे रसशास्त्रं गृह्णन्ति ये गुरवस्ते एव वेदशाखिनः विदन्तु । कथंभूता द्विजकुलैः पक्षिकुलैः । पक्षे ब्राह्मणकुलैः स्तुताः ॥२॥

सखे ! पशुपनागरी-नयनवेल्लितक्रीत ! य-
द्वने भ्रमसि निष्फले विकचमालतीमल्लिके ।
तथापि रसिकाग्रणीर्यदिह घुष्यसे भान्ति तत्
प्रसिद्धजनवर्त्तिनो गुणातयैव दोषा अपि ॥ ३ ॥
अहं तु पनसाम्रयो रसनिधीकृतस्वोदर-
स्तदप्यरसिकोऽभवं तव मते धृताहंकृते ! ।
भ्रमन्निह वने वने त्वदनुगो बुभुक्षातुरो
भवामि यदि तल्लभे रसिकता-प्रथां त्वत्कृतां ॥४॥
जगत्त्रितय-दुर्लभातुलफलैव वृन्दाटवी
तव त्वमपि नित्यतद्विहरणप्रियः ख्याप्यसे ।
परंतु तदुदित्वरामृतरसैकतानो भवा-
नभून्न तदियं सखे ! मम सखेदता नापरा ॥५॥

---

हे सखे कृष्ण ! हे पशुपनगरीनयनकम्पनेन क्रीत ! यत् यद्यपि विकसितमालतीमल्लिकायुक्ते अतएव निष्फले वने भ्रमसि तथापि जनैस्त्वं रसिकाग्रणीर्घुष्यसे तत्तस्मात् भवद्विधप्रसिद्धजनवर्त्तिनो दोषा अपि गुणतयैव भान्ति ॥ ३ ॥

पनसाम्रयोरसेन निधीकृतं समुद्रीकृतं उदरं येन तथाभूतोऽहं तदापि तव मते ऽरसिको भवामि । हे धृताहंकृते ! तदैव त्वत्कृतां रसिकताप्रथां अहं लभे ॥ ४ ॥

जगत्त्रये सुदुर्लभा अथ चातुलफला एवंभूता तव वृन्दाटवी । एवं त्वमपि "नित्यं वृन्दावनविहरणप्रिय" इति जनैःख्याप्यसे । परन्तु तस्मिन् वृन्दावने उदित्वरः उत्पन्नशीलो योऽमृतरसस्तदेकतान-

निदाघदिवसे वटो! शिशिरनिर्भराम्भोरसै-
र्नटत्सरसिजानिलैर्मधुरमल्लिका-सौरभैः ।
पलासनवपल्लवैर्वनकपोतमञ्जुस्वनै-
र्ममेयमखिलेन्द्रिय-प्रमदसाधिकैकाटवी ॥ ६ ॥

वहिर्म्मरकतद्युतिः कमलरागनिन्दिप्रभा
द्रवामृतभृतान्तरा परिमलप्रदिम्नोः खनिः ।
रसालपदवाच्यतामुपगता फलानां तति-
र्म्मदिन्द्रिय-सतृष्णतां सपदि कृष्ण! चक्रेतमां ॥७॥

पुरः कलय माधव ! द्युतिमतीमतीत्याटवी-
रिमा अपि जगत्त्रयी-मुकुटनूत्नरत्नप्रभाः ।
विलास-निवहावनीमिह वनीमिमां वां न वाक्-
महाकविपतेरपि प्रभवतीव यद्दर्शने ॥ ८ ॥

स्तदेकचित्तो भवान् न अभूत् । हे सखे ! इयमेव मम सखेदता न अपरा ॥ ५ ॥

श्रीकृष्ण आह । निदाघेति । निदाघदिवसे शीतलनिर्झरजल प्रभृतिभिर्मम रसनादिसर्व्वेन्द्रियानन्दसाधिका इयमटवी । अतएवास्मिन् वने अहं भ्रमामि । अरसिकत्वात् हे वटो ! ननु सखे ! ॥ ६ ॥

वटुराह । आम्रफलानां ततिः वहिर्म्मरकतद्युतिरिति नेत्रस्य । रसालपदवाच्यतामुपगतेति श्रवणेन्द्रियस्य ॥ ७ ॥

वृन्दा श्रीकृष्णमाह । हे माधव ! इमाः अटवीः अतीत्य द्युतिमतीं इह राधाकुण्डनिकटे इमां वनीं क्षुद्रवनीं पुरःकलय । कथंभूतां जगदिति । पुनश्च युवयोः विलाससमूहस्य अवनी अव रक्षणे धातुः ।

इति प्रमदमेदुरस्फुरदमन्दवृन्दा-वचः
सुधांशु-किरणोच्छलद्विपुलतर्षकीलालधी ।
उदित्वरपुरुत्वरं रसपुरःसरं प्रापतुः
स्व-केलिसद्मनायितं प्रियतमौ स्व-कुण्डद्वयं ॥ ९ ॥
इहापि लभते प्रथामधिकमेव राधा-सरः
क्रमेण ललितादिभिर्यदभितो निकुञ्जावली ।

क्रीडाखसमूहस्य भूमिश्चे । महाकविपतेरपि यद्वर्णने वाक्यं न प्रभवति इय ॥ ८ ॥

इति प्रणयेन मेदुरं स्निग्धं यत् स्फुरदमन्दं वृन्दावचस्तदेव सुधांशुश्चन्द्रस्तत्किरणेन उच्छलद्विपुलतृष्णा एव कीलालधिर्जलधिर्ययोस्त्वेवंभूतौ प्रियतमौ राधाकृष्णौ उदित्वरा उदयशीला पुरुत्वरा महात्वरा यत्र तद्यथास्यात्तथा । एवं रसपुरःसरं यथास्यात्तथा स्वकेलि सदनमिवाचरितं स्वकुण्डद्वयं प्रापतुः ॥ ९ ॥

इहापि कुण्डद्वयमध्येऽपि राधाकुण्डं अधिकं यथास्यात्तथा ख्यातिं लभते । यस्य राधाकुण्डस्याभितः दिगधिष्ठातृदेवतानां धनदेत्यादि नभस्वत्पर्य्यन्तानां हरित्सु दिक्षु विदिक्षु च या कुञ्जावली वर्त्तते सा ललितादिसखीभिर्ललिताकुञ्ज विशाखाकुञ्जेत्यादि निजनिजसमाख्यया अङ्गीकृता । तत्र ईश्वरः ईशानः । अन्तको यमः । शचीशः इन्द्रः । नीराधिपो वरुणः । अस्रं रक्तं पातीति अस्रपो नैर्ऋतः । क्रव्यादोऽस्रप आसर इत्यमरः । नभस्वान् वायुः । तथाच उत्तरेशानदक्षिणपूर्व्व पश्चिमाग्निकोणनैर्ऋतवायुकोणादिदिग्विदिक्षु क्रमेण ललिता-विशाखा-चम्पकलता-चित्रा-तुङ्गविद्या-इन्दुलेखा-रङ्गदेवी-सुदेवीनां कुञ्जा ज्ञातव्याः । क्रमो यथा । उत्तरस्यां दिशि ललिता कुञ्जः । उत्तर पूर्व्वयोर्म्मध्ये ईशानकोणे विशाखा-कुञ्जः । दक्षिणस्यां दिशि चम्पक लता कुञ्जः । पूर्व्वस्यां दिशि चित्रा-कुञ्जः । पश्चिमस्यां दिशि तुङ्गविद्या-

हरित्सु धनदेश्वरान्तक-शचीश-नीराधिपा-
नलास्रप-नभस्वतां निजनिजाख्ययाङ्गीकृता ॥१०॥
प्रतिक्षणमुपासिता विपिनपालिका-पालिभिः
प्रसूनमणिदर्पणप्रवलतोरणोपस्कृता ।
विलासिवरयोर्मधूत्सवनिकामहिन्दोलन
प्रसूनरणनिह्नवाप्लवजलस्थलक्रीडनैः ॥ ११ ॥
सुधामदविमर्दकृत्फलपरःशतास्वादनै-
र्म्मिथोऽक्षकलिनर्म्मभिर्व्विविधहास्यलास्यादिभिः
कवित्वरस-चर्व्वणैर्व्विविधमानतन्मार्जनैः
सदा सुभगतास्पदं निखिल-दृङ्मनोमोहिनी ॥१२॥
तथा तटचतुष्टयी विविधरत्नसोपानभृ-
त्तदन्यमणिभिः क्रमादिह तथावताराः कृताः ।

कुञ्जः । पूर्व्वदक्षिणयोर्म्मध्ये अग्निकोणे इन्दुलेखा-कुञ्जः । दक्षिण पश्चिमयोर्मध्ये नैर्ऋतकोणे रङ्गदेवी-कुञ्जः । पश्चिमोत्तरयोर्मध्ये वायुकोणे सुदेवी-कुञ्जः ॥ १० ॥

मधूत्सवो होलिका क्रीडा । प्रसूनरणः पुष्पनिर्म्मितकन्दुकैर्युद्ध लीला । निह्नवो लुक्लुकानीतिप्रसिद्धो लीलाविशेषः । आप्लवा जलक्रीडा ॥ ११ ॥

अक्षकेलिर्द्यूतक्रीडा । विविधा मानास्तेषां मार्जनं शान्तिः ॥ १२ ॥

तथा राधाकुण्डस्योत्तरदिग्वर्त्ति तटचतुष्टयी सिडी इति प्रसिद्धं विविधरत्ननिर्म्मितसोपानं बिभर्त्ति । इह सोपानमध्ये तदन्यमणिभि-र्यादृशमणिना सोपानस्य निर्म्माणं कृतं तदन्यमणिभिर्घाट इति प्रसिद्धा

तरुद्वितयकुट्टिमद्वयविराजितच्छत्रिका
सदोलनचतुष्किका यदुपरिस्थपार्श्वद्वयी ॥ १३ ॥
धनेश-दिशि तीर्थतः कलितसेतु मध्येसरो
विधूपल-गृहं विभात्यमलमञ्जुकुञ्जावृतं ।
अनङ्गयुतमञ्जरीं स्वभगिनीं स्वनामाङ्कितं
शुचौ तदधिशाययन्यगभृता सुखे मज्जति ॥ १४ ॥
तथाग्निहरिदिग्गतः कनकसेतुबन्धोऽघभित्
सरोमिलनहेतुको निखिलतीर्थखेलास्पदं ।
ततोऽस्ति सुबलाद्युरीकृतनिकुञ्जमालावृतं
क्षितौ निरुपमां प्रथां गतमरिष्टकुण्डं महत् ॥१५॥

अवतारा: कृताः । येषामवताराणामुपरिस्थपार्श्वद्वयी तरुद्वयविशिष्ट कुट्टिमद्वय विराजितौ छत्रौ यत्र तथाभूता । एवं हिन्दोलनलीलार्थं दोलनसहितौ चतुष्को यत्र तथाभूता ॥ १३ ॥

मध्येसरः सरोवरस्य राधाकुण्डस्य मध्ये चन्द्रकान्तिमणिना निर्म्मितं अनङ्गमञ्जर्य्या गृहं विभाति । ननु कुण्डमध्ये कथं सर्व्वासां गमनागमनं सम्भवति ? तत्राह । धनेशदिशि उत्तरस्यां दिशि यस्तीर्थो वर्त्तते तस्मात् । कृतः सेतुबन्धो यत्र तथाभूतं गृहं । यदधि यस्मिन् गृहे शुचौ ग्रीष्मे श्रीराधिका स्व-भगिनीं अनङ्गमञ्जरीं अगभृता श्रीकृष्णेन सह शाययन्ती सती स्वयं सुखे मज्जति ॥ १४ ॥

तथा अग्निकोणादिन्द्रदिग्गतः सङ्गम इति प्रसिद्धः स्वर्णनिर्म्मित सेतुबन्धोऽस्ति। कथम्भूतः राधाकुण्डे कृष्णकुण्डस्य मिलनप्रयोजनकः। ततः सेतुबन्धात् परत्र निरुपमां [illegible] कृष्णकुण्डं अस्ति। कथम्भूतं यथा राधाकुण्डस्य दिग्विदिक्षु ललितादिसखीनां कुञ्जाः सन्ति तथैव सुबलादीनां कुञ्जश्रेणीवृतं ॥ १५ ॥

नटन्ति शिखिनस्तटे मदकलाःकलापाञ्चिता
रटन्त्यधिजलं कलं स्वरतिशंसिका हंसिकाः ।
भ्रमन्त्यमलगुञ्जिता नभसि पुञ्जिताः षट्पदा
इतीक्षणविलक्षणाक्षणभृदाह कञ्जेक्षणः ॥ १६ ॥
पिक-प्रकरटिट्टिभ-प्रचयचातक-श्रेणयो
मराल-परिषत् शुकावलि-समूहहारीतकैः ।
सहैव युगपत् पृथक्स्वरतया लपन्तो मम
श्रवोऽपि विदधत्यमी सरसमर्थषट्कग्रहं ॥ १७ ॥
प्रफुल्लनवमालिका मृदुलमल्लिका यूथिकाः
सरोरुहकुरुण्टकप्रवरकुन्दवल्लीरलिः ।

मदकला मत्ताः शिखण्डिनः कुण्डतटे नृत्यन्ति । कथंभूताः कलापैर्नृत्यसमये विस्तृतपिञ्छैरञ्चिताः । तथा अधिजलं जले हंसिकाः । कलं रटन्ति । कथम्भूता स्वस्य या रतौ रमणं तस्याः शंसिकाः । कामोन्मत्ताः सत्यः जले शब्दं कुर्व्वन्तीत्यर्थः । एवं भ्रमरा नभसि आकाशे पुञ्जिताः सन्तःभ्रमन्ति । इति एषां शिखण्डिप्रभृतीनामीक्षणेन विलक्षणोत्सवं बिभर्त्ति । यःकञ्जेक्षणः श्रीकृष्णः स प्रेयसीं प्राह ॥ १६ ॥

अमी पिकसमूहटिट्टिभ समूहादयः सरसं यथास्यात्तथा अर्थषट्क ग्रहं षड्ऋतूत्पन्नानां एषां शब्दरूपार्थानां ग्रहः ग्रहणं यत्र तथाभूतं मम श्रवः कर्णं विदधति । समूहैः समूहयुक्तैः हारीतकपक्षिभिः । तादृशश्रेणयः कथम्भूताः हंससभा शुकश्रेणीसमूहहारीतकैः सह युगपत् एकस्मिन् काले स्वरतया लपन्तः । तथाच राधाकुण्डे एकस्मिन्नेव काले षड्ऋतूनां समागमो बोध्यः । तथाच वसन्तकाले कोकिलो वदति । ग्रीष्मे टिट्टिभः । वर्षायां चातक इत्यादि ॥ १७ ॥

अलिः भ्रमरः भिन्नभिन्नर्त्तुषु प्रफुल्ला अपि नवमालिकाप्रभृति

सदा पिवति कश्चन क्वचिदनेकभार्य्यो गृही
यथर्त्तुगमनव्रतं प्रतिदिनं क्रमाद्विन्दते ॥ १८ ॥

वराङ्गि ! परितस्थुषी परित एव युष्मत् सर-
स्तरुव्रतति-संहतिर्व्विपुलतुङ्गशाखा-शतैः ।
मिथो वलयितैस्तथा वृणुत साधु मध्येदिनं
प्रभाकरमरीचयो न सलिलस्पृशःस्युर्यथा ॥ १९ ॥

तथाप्यनुचतुर्द्दिशं चतुरनावृतद्वारतो
विशद्भिरनिलैः सदार्थिभिरथाप्ततत्सौरभैः ।
उदारनलिनीगणाद्दलिपति-व्रजानां पुन-
र्भभङ्करणतर्जनैरपि न मार्द्दवं त्यज्यते ॥ २० ॥

वह्निः सदा पिवति । यथा कश्चन अनेकभार्य्यायुक्तगृही "ऋतावेव भार्य्यामहं गच्छेयं नान्यकाले" इति नियमं प्रत्यहमेव प्राप्नोति । भार्य्याणां बहुत्वात् प्रत्यहमवश्यमेकस्या ऋतु समागमो भवतीति भावः ॥ १८ ॥

हे वराङ्गि ! कुण्डस्य परितश्चतुर्द्दिक्षु परितस्थुषी युष्मत् सरस्तरुलतासमूहः मिथो वलयितैर्वेष्टितैः शाखाशतैस्तथा साधु यथा तथा अवृणुत । यथा दिनस्य मध्ये सूर्य्यमरीचयो न कुण्डस्य सलिल स्पृशःस्युः ॥ १९ ॥

नन्वेवं चेत् जले वायोः सञ्चारोऽपि मास्तु तत्राह । तथापि अनु-चतुर्द्दिशं चतुर्द्दिक्षु अनावृतचतुर्द्वारतो विशद्भिः पवनैः सदा अर्थिभि-र्याचकैः अतएव कुण्डस्थोदारपद्मिनी-गणात् प्राप्ततत्सौरभैः भ्रमर पतिव्रजानां पुनर्भभङ्करणतर्जनैः करणैरपि न मार्दवं त्यज्यते । तथाच याचकैरिवानिलैर्मार्दवं माध्य न त्यज्यते तिरस्कारेऽपि न क्रुध्यत इवेत्यर्थः एतेन वायोर्मान्द्यमानीतं ॥ २० ॥

प्रफुल्लकमलानना चलनवीनमीनेक्षणो-
च्छलन्मधुरिमोर्म्मिजप्रतनुफेणमञ्जुस्मिता ।
भ्रमद्भ्रम-रमण्डली ललितवेणिका चक्रयुक्-
कुचेलितरुचेक्ष्यते त्वमिव ते सरस्यश्चिता ॥ २१ ॥
प्रिये ! सुरतरङ्गिणी त्वमसि भानुजा सर्व्वदा
क्वचित्त्वयि सरस्वती सरसयन्त्युदेति श्रुतीः ।
त्वमेव मम नर्म्मदा स्फुरसि वाहुदाप्यंसतः
सदा तु सरसी भवस्युदितपूर्णताविस्कृतिः ॥२२॥
अतो घनरसैर्घनप्रणयतो घनद्योतिनीं
निजापघन-मण्डलीं सुजघने ! ऽवनेनेज्म्यहं ।

हे प्रिये ! त्वमिव तव सरसी अञ्चिता पूजिता मया ईक्ष्यते । राधिकासाधर्म्यमाह । सरसी कथम्भूता । प्रफुल्लेति । उच्छलन्माधुर्य्यं यत्र एवंभूतोर्म्मिजन्यविस्तृतफेणेन मञ्जुस्मिता । भ्रमरमण्डली एव वेणिर्यस्याः । ईलिता स्तुता रुचा कान्तिर्यस्याः ॥ २१ ॥

हे प्रिये ! त्वं सुरतरङ्गिणी गङ्गा असि । पक्षे सुरतेषु रङ्गिणी । भानुजा यमुना । पक्षे वृषभानोः कन्या । क्वचिदंशे त्वयि सरस्वती श्रुतीर्व्विदान् । पक्षे कर्णान् सरसयन्ती सती उदेति । नर्म्मदा नदी । पक्षे नर्म्माणि ददासि । अंसेन वाहुदा नदी । पक्षे अंसे स्कन्धे वाहुं ददासि । अतः स्कन्धे विभागे चेति दन्त्यान्तवर्गे विश्वः । अंसेन तत्तन्नदी भवसि पुर्णताविष्कृतिस्त्वं सदा तु सरसी कुण्डं भवसि ॥२२॥

अतः हे सुजघने ! मम नदीसरोवरस्वरूपायास्तव घनरसैर्जलैः । पक्षे निविडशृङ्गाररसैः करणैः मेघवत् द्योतिनीं मम अपघनमण्डलीं हस्तपादादिशरीरश्रेणीं अहं अवनेनेज्मि शुद्धां करोमि इति क्वणित

इति क्वणितकङ्कणं मधुभिदा करं कर्षता
द्युतीरदरवर्षता विजहसे रसेन प्रिया ॥ २३ ॥

कुलकं ।

इयं न सरसी भवत्यगधरातिवाम्योपला
जहीति तदिमामिति व्रजविधोः कराग्रां बलात् ।
विमोच्य विपिनाधिपानयदतः परत्र स्थले-
ऽम्बरादि परिधापयन्त्यदरनीरखेलोचितं ॥२४॥
हरेर्नयनषट्पदस्तरुदलावलिच्छिद्रतः
प्रविश्य निभृतं कुचाम्बुजनि-कोरकावग्रहीत् ।
प्रिया तु विवृताङ्ग्यतो निखिलदिक्षु तच्छङ्कया
दृशं चकितमादधौ परिदधौ च चीनांशुकं ॥२५॥
परस्परविकर्षणाच्चपलता-लता एव ता
धुता अतनुवात्यया निपतिताः सरस्यम्भसि ।

कङ्कणं यथास्यात्तथा प्रियाया:करं कर्षता तेनैव द्युतोः कान्तीः अनल्पं वर्षता कृष्णेन प्रिया राधा रसेन करणेन विजहसे ॥ २३ ॥

इयं सरसी न भवति अपि तु अगधरा पर्व्वतभूमिः अति वाम्या अतिशयप्रातिकूल्या उपला यस्यां सा । वामौ वल्गुप्रतीपौ द्वाविस्य-मरः । पक्षे ह अगधर ! अतिवाम्यं उपलाति आधिक्येन गृह्णातीति सा न सरसो भवतीति च्विः ॥ २४ ॥

नयनरूपषट्पदः स्तनद्वयरूपपद्मकोरकौ अग्रहीत् । प्रिया राधा तु विवृताङ्गो वस्त्रेणानावृतत्वात् व्यक्ताङ्गः तस्य श्रीकृष्णस्य शङ्कया निखिलदिक्षु चकितं यथास्यात्तथा दृशं दधौ ॥ २५ ॥

जलक्रीडार्थं परस्परविकर्षणाद्धेतोश्चापल्यस्य लतास्वरूपाः

प्रिया घनरसप्रिया घनरसप्रवृत्ताजयः
प्रियाङ्गसुषमालिहोऽप्यलमनङ्गलीढा बभुः ॥ २६ ॥
मिथो ग्रथितपाणिभिर्मृदुमृदुप्रनुन्नाम्भसा
मुदग्रतरवर्त्तुलस्तननिभोर्म्मिमालासृजां ।
रराज सुदृशां हरिर्व्वितत मण्डलीमध्यगः
सहस्रदलकर्णिकाद्युतिजिदूढमञ्जुस्मितः ॥ २७ ॥
अघान्तकर ! दुस्त्यजव्रत ! यदीक्षणस्पर्शन
प्रयोजनतया व्रजे मलिनयेः कुलस्त्रीः सदा ।
जलात् प्रकटिता इमे सुलभतां गता स्ते कुचा-
स्तदद्य नयने तथाकरतले त्वमुल्लासय ॥ २८ ॥

---

अतएव कन्दर्पवात्यया धुताः कम्पितास्ताः प्रियाः कुण्डस्याम्भसि निपतिताः सत्यःबभुः । कथंभूताः घनरसो जलं । पक्षे शृङ्गाररसः स एव प्रियो यासां । पुनश्च घनरसे प्रवृत्ता आजिर्युद्धं यासां । पुनश्च प्रियस्य कृष्णस्य सुषमां लिहन्तीति तथाभूता अपि अलमतिशयेन शोभादर्शनोद्भूतेनानङ्गेन लीढाः आस्वादिताः ॥ २६ ॥

जलमध्ये सुदृशां राधादीनां विस्तृतमण्डलीमध्यगः अतएव सहस्रदलकमलस्य कर्णिकाद्युतिजित् कृष्णःरराज । कथम्भूतानां परस्परग्रथितपाणिभिः करणैः मृदु मृदु प्रनुन्नानि प्रेरितानि अम्भांसि याभिः । पुनश्च जलानां मृदुप्रेरणात् उच्चवर्त्तुलस्तनसदृशतरङ्ग मालां सृजन्तीति तथाभूतानां ॥ २७ ॥

हे अघान्तकरेति विरुद्धलक्षणया स्त्रीणां पापकर ! हे दुस्त्यजव्रत ! येषां स्तनानामीक्षणस्पर्शनप्रयोजनतया त्वं व्रजे सदा कुलस्त्रीः मलिनयेः, ते कुचाः अधुना जलात् प्रकटिता अतएव सुलभतां गताः तस्मादद्य त्वं ॥ २८ ॥

इति स्मरमतङ्गजोन्मथितधीरिमाणाः स्त्रियो
यथाभिदधुरोमिति प्रियतमोऽथ पप्रच्छ ताः ।
इमे नु किमिमे कुचा इति तदा लघिम्नो भरा-
ज्जलेषु तदुरस्सु च न्यधित पाणिपङ्केरुहं ॥२९॥
अथापसरति व्रजे मृगदृशां तटे तस्थुषी
स्वयं पयसि खेलयन्त्यलघुदृक्सफर्यौ चले ।
अनङ्गमदरङ्गिणोः सलिलसङ्गरे वैदुषीं
तयोर्विविदिषन्त्यलं सपदि कुन्दवल्ल्यब्रवीत् ॥३०
रुचा जलधरो भवान् जलधरा रमण्यः करै-
र्जलाजलियुधा क्षणं तनु हरे ! क्षणं यौवतैः ।

---

ननु ताः स्त्रियः सत्यः कथमेवं ब्रूयुस्तत्राह । स्मररूपमतङ्गजेन उन्मथितो दूरीकृतो धीरिमा धैर्य्यं यासां ताः स्त्रियः यथा अभिदधुस्तथैव ओमित्युक्त्वा प्रियतमः श्रीकृष्णः ताः पप्रच्छ । जले हस्तं दत्वा आह इमे कुचास्तने हस्तं दत्वा आह अथवा इमे कुचाः ॥ २९ ॥

श्रीकृष्णभयात् मृगदृशां व्रजे समूहे अपसरति सति स्वयं तटे तस्थुषी कुन्दवल्ली अथच जले स्वनयनरूपसफर्य्यौ खेलयन्ती सती आह । कथंभूता तयोरनङ्गमदरङ्गिणोः राधाकृष्णयोः सलिलयुद्धे वैदुषीं पाण्डित्यं विविदिषन्ती ॥ ३० ॥

हे हरे ! भवान् रुचा कान्त्या जलधरः । तव रमण्यस्तु करैर्हस्तैः करणैर्जलधरा अतः क्षणं यौवतैः जलाजलियुद्धेन क्षणमुत्सवं तनु । त्वं क्रमेण जिस्सुधोः जिजये ष्टुजस्तुतौ इत्येतयोर्धात्वोः प्रथित कर्म्मताकर्त्तृत्वे भज । कर्तृताकर्म्मते वक्तव्ये दैवात् कृष्णपक्षाश्रित

क्रमेण भज जिस्तुवोः प्रथितकर्त्तृताकर्म्मते
तयोर्गमयत प्रियाः सपदि कर्त्तृताकर्म्मते ॥३१॥
किमुक्तमिति माधवे वदति सा विपर्य्यासतः
पपाठगुरुसम्भ्रमादभिदधुस्ततः सुभ्रुवः ।
श्रुतैव सहसोदगादहह याद्य तामन्यथा
व्यधादिह सरस्वती तव वशा सुभद्राङ्गना ॥३२॥
जये सति पणग्रहे वहुवलात्कृतेः कर्त्तृता
सुखानुभवमेष्यथ प्रकटमेव यद्वाञ्छत ।
अहं यदि भजै जितो विधिवशेन तत्कर्म्मता
व्यथानुभवितां तदा क्व नु पलाय्य विन्देय शं ॥३३॥

---

कुन्दवल्लीमुखात् वैपरीत्येन तादृशवाणी निर्गता। एवं तव प्रियाः तयोर्जिस्तुवोः कर्तृताकर्म्मते त्वं गमयत प्रापयत। तत्रापि दैवात् वैपरीत्येनोक्तिः ॥ ३१ ॥

वैपरीत्यं श्रुत्वा श्रीकृष्ण आह। सा कुन्दवल्ली गुरुसम्भ्रमात् विपर्य्यासतः। पुनः श्रीकृष्णपक्षे कर्तृताकर्म्मते पपाठ। अथ सुभ्रुवो व्रजसुन्दर्य्यः अभिदधुः। या वाणी आदौ श्रुता सत्या एव सहसा उदगात् तां सरस्वतीं सुभद्राङ्गना कुन्दवल्ली सुभद्रस्य तव भ्रातुरङ्गना। पक्षे तव सुमङ्गला स्त्री अन्यथा व्यधात् यतस्तव वशीभूता। श्लेषेण सुभद्रस्य वलीवर्द्दस्याङ्गना। फलतो गवी तत्रापि वशा वन्ध्या इति परिहासश्च वोध्यः। उक्षा भद्रो वलीवर्दो, वशा वन्ध्याचेत्यमरः॥ ३२ ॥

कृष्ण आह। युष्माकं जये सति चुम्बनादिपणग्रहे वलात्कृतेः कर्तृताजन्यसुखानुभवं यूयं एष्यथ यद्यस्मात्तदर्थमेव जयं वाञ्छथ। युष्माभिर्जितोऽहं विधिवशेन यदि तस्य जयस्य कर्म्मताव्यथानुभवितां भजै तदा क्व नु पलाय्य शं कल्याणं विन्देय ॥ ३३ ॥

पणास्तु भवितात्र कः प्रथममेतदाख्याहि न-
स्तमित्यघभिदादृता प्रणिजगाद नान्दीमुखी ।
स्मृतौ लिखितमादितो धनमथो धनी गृह्यते
ततस्तु जयिना जितो दृढतया जनो नह्यते ॥३४॥
युग्मकं ।

वयं स्म धनिनो धनं पदककिङ्किणीकङ्कणा-
द्यमन्दमिह वन्धनं भुजभुजङ्गपाशैर्भवेत् ।
इति प्रियगिरा प्रियाश्चटुलचारुचिल्लीधनु-
र्विधूननपुरःसराः कति न हुङ्कृतीस्तेनिरे ॥३५॥

परस्परविसज्जिताङ्गुलिकरद्वयेनाम्वुभिः
प्रगृह्य पिहितैः पुनः करभपीड़नाच्चालितैः ।
शरैररुणपङ्कजेषुधिमुखात् स्वयं निःसृतै-
रिवप्रियमिमाः स्थिताः परित एव तं विव्यधुः ॥३६॥

श्रीकृष्णः नान्दीमुखीं प्रत्याह । नोऽस्मान् एतत् आख्याहि इति कृष्णेनादृता नान्दीमुखी प्रणिजगाद । आदौ धनं गृह्यते पश्चात् धनी जनः जयिना जितो दृढतया नह्यते वध्यते ॥ ३४ ॥

कृष्ण आह । वयमेव धनिनः स्म । धनं तु पदकेत्यादि । अमन्द वन्धनं इह भुजरूपभुजगपाशैर्भवेदिति कृष्णस्य गिरा चटुलचारुचिल्ली रूपधनुर्विधुननपुरःसराः राधाद्याः प्रियाः कति हुङ्कृतीर्न तेनिरे ॥३५॥

परितःस्थिता इमा राधाद्याः अरुणपद्मरूपस्य तूण इति प्रसिद्धस्य इषुधेर्मुखात् सकाशात् स्वयं निःसृतैः शरैरिव हस्तकमलात् निःसृतै-रम्बुभिस्तं प्रियं विव्यधुः । जलक्षेपप्रकारमाह । अम्बुभिः कथम्भूतैः

स चापि समया स्थितो लघुतया भ्रमन् सर्व्वतो-
मुखो मदनसर्व्वतोमुखशरानिवास्यन्मुहुः ।
प्रियाः शतसहस्रशो युगपदेक एवौजसा
जिगाय रभसादिमाः पुनरितो ऽपसस्रुर्भिया ॥३७

जिताः किल जिता हिही विफलगर्व्विता गोपिकाः
प्रतिस्वधन-गोपिकाः किमधुना पलाय्य स्थिताः ।
प्रमथ्य तदिमाः सखे ! पदककिङ्किणीकङ्कणा-
न्युदस्य परिगृह्य मत्करतलोपरि स्थापय ॥ ३८ ॥

यथाद्य मथुरापुरात्त्वरितमेव विक्रीय ता-
न्यतिप्रियसितोपलाततिमुपाहरिष्याम्यहं ।
वटाविति तटस्थिते ब्रुवति तर्जनीं धुन्वती
ततर्ज ललिताप्यरे ! कुटिल ! तिष्ठ तिष्ठेति तं ॥३६॥

परस्परविषज्जिता अङ्गुलयो यत्र एवम्भूतकरद्वयेन आदौ प्रगृह्य पश्चात् पिहितैः तदनन्तरं पुनः करभपीडनाच्चालितैः ॥ ३६ ॥

स च सर्व्वतोमुखः श्रीकृष्णः तासां समया मध्ये स्थितः लाघवेन भ्रमन् सन् मदन सर्व्वतोमुखशरान् । पक्षे जलरूपशरानिव मुहुरस्यन् क्षिपन् प्रियाः जिगाय । सर्व्वस्यां दिशि मुखं यस्य सः । इमास्तु भयेनापसस्रुः ॥ ३७ ॥

मधुमङ्गल आह । प्रतिस्वधनानां गोपिकाः । उदस्य उत्तार्य्य पश्चात् परिगृह्य ॥ ३८ ॥

तानि भूषणानि विक्रीय । तटस्थिते मधुमङ्गले इति ब्रुवति सति तर्जनीं धुन्वती ललिता तं मधुमङ्गलं ततर्ज ॥ ३९ ॥

अथैत्य मधुसूदने धयति ता बलात् पद्मिनी-
रपाङ्गशरपञ्जरान्तरमपि प्रविश्यौजसा ।
सभङ्कृतिमणीमयाभरणमाददाने मृगी-
दृशां कलकलेऽप्यलं शिखिपिकैः प्रवृद्धीकृते ॥४०॥
कराकरि नखानखि स्मरमृधे प्रवृत्ते ह्रियां
भियां च निचये पुनर्घनरसोर्म्मिभिः प्लाविते ।
क्षणैस्त्रिचतुरैर्म्मिथो भुजभुजङ्गबन्धाच्च्युताः
प्रलूननलिनैर्व्यतिप्रहरणाः प्रिया रेजिरे ॥ ४१ ॥

युग्मकं ।

ततः श्वसितसञ्चलच्चलदलच्छदाभोदरा
गिरा स्खलितगद्गदाक्षरभृतैत्य नान्दीमुखी ।

---

अथ मधुसूदने आगत्य पद्मिनीनामपाङ्गरूपशरपञ्जर-मध्ये ओजसा बलेन प्रविश्य ता राधाद्याः पद्मिनीर्बलात् धयति सति । एवं तासां सझङ्कृति यथास्यात्तथा मणीमयाभरणं श्रीकृष्णे आददाने सति । एवं मृगीदृशां अलङ्करणहरणसमये परस्परकोलाहलशब्दे अलं अतिशयेन शिखिपिकैः प्रवृद्धीकृते सति । मनुष्यकोलाहलश्रवणेन भयात् मयूरकोकिलादयः उच्चशब्दं कुर्वन्ति । तथाच तेषां उच्चशब्दैः राधादीनां कोलाहलोऽतिशयप्रवृद्धो भवतीत्यर्थः ॥ ४० ॥

ह्रियां भियांच समूहे घनरसः शृङ्गाररसः स एव जलं तस्योर्म्मिभिः प्लाविते सति त्रिचतुरक्षणानन्तरं परस्परभुजरूपभुजङ्गबन्धात् च्युताः प्रियाः कृष्णराधाप्रभृतयः प्रलूननलिनैः छिन्ननलिनैः करणैः परस्पर प्रहरणाः सत्यः रेजिरे । प्रियश्च प्रियाश्च प्रिया इत्येकशेषः ॥ ४१ ॥

ततो वस्त्रालङ्कारहरणानन्तरं अवलाततिः एत्य नान्दीमुखी किमपि

जगाद किमपि प्रियप्रतिहृतोत्तरीयावला-
ततिर्विगतभूषणाप्यतनुमाधुरीं बिभ्रती ॥ ४२ ॥
कुचान् विगतकञ्चुकान् नखरविक्षतान् दोर्द्वयैः
पिधाय तिमितायतालकलिपिप्रलिप्तानना ।
निबध्य शशिशेखरान् विसमिषोग्रपाशैर्बभा-
वनङ्गपृतनैव सा न खलु पद्मिनी-संहतिः ॥ ४३ ॥
अनेन गतनीतिना किमिति नान्दि ! नः खेलय-
न्त्यभूर्निकृतिवल्लरीत्युदितया तया यौवतैः ।
अनीतिमकरोः कथं गिरिधरेत्यथाकारितः
समेत्य सहसाननः स सहसाह तां साहसात् ॥४४
ममाद्य जयिनः पणग्रहकृते गतस्य स्फुटत्-
सुवर्णनलिनावलीमलिभिरावृतां जिघ्रतः ।

स्खलितगद्गदाक्षरभृता गिरा जगाद । कथंभूता श्वसितेत्यादि ॥ ४२ ॥

तिमितायतालकरूपलिपिना अक्षरेण प्रलिप्तानना अबलाततिः नखरविक्षतान् कुचान् दोर्द्वयैः पिधाय बभौ । अत्रापह्नुतिमाह । हस्तरूपं बिसं मृणालं तन्मिषेणोग्रपाशैः कुचस्वरूपशशिशेखरान् महादेवान् निबध्य सा अबलाततिः अनङ्गपृतना महादेव-प्रतिपक्षस्य कन्दर्पस्य सेना एव न तु पद्मिनीसंहतिः ॥ ४३ ॥

हे निकृतिवल्लरि ! शाठ्यलते ! नान्दि ! गतनीतिना अनेन श्रीकृष्णेन सह नो अस्मान् खेलयन्ती अभूः इति यौवतैरुदितया तया नान्द्या हे गिरिधर ! कथं त्वं अनीतिमकरोरिति आकारितः आहूतः स श्रीकृष्णः समेत्य नान्दी निकटे आगत्य । सहसा तां नान्दीं कृतापराधोऽपि साहसात् आह । सहसाननः हास्यसहिताननः ॥ ४४ ॥

रथाङ्ग-मिथुनं तथा करयुगेन खेलावशा-
द्विकृष्य दधतः कथं कथय कोऽपराधो ऽभवत् ॥४५

हरे ! वदसि नानृतं यदिह साक्षितां स्वाधर-
स्तनालिषु धृतैः क्षतैर्दधति गोपिकाः कोपिकाः ।
प्रतीहि न हि नान्यमूः कुसृति-संपुटीः सो ऽथवा
कृतोऽप्यविदुषा मया भजतु मन्तुरत्यल्पतां ॥४६॥

इयं च कुलजा-ततिः पटिमभिस्तदैवाशु मां
मुखान्यपि मुखानि नः किल कुचाः कुचा अप्यमी ।
इतीह परिचाययन्त्युरुतरोच्चगीर्भिर्नहि
न्यषिध्यदपि साम्प्रतं किमिति दम्भिनां कुप्यति॥४७

जलक्रीड़ायां जयिनोऽतएव पणग्रहणार्थं गतस्य मम कोऽपराधो ऽभवत् कथय । कथंभूतस्य अलिभिरावृतां स्फुटत्स्वर्णकमलश्रेणीं जिघ्रतः । न तु आसां मुखश्रेणीं, पुनश्च चक्रवाकमिथुनं खेलावशात् करयुगेन विकृष्य दधतः । न त्वासां स्तनयुगं ॥ ४५ ॥

नान्दी आह । हे हरे ! नानृतं अयथार्थं न वदसि । यद्यस्मात् इह गोपिकाः कोपिकाः स्वाधरस्तनश्रेणीषु धृतैः क्षतैः करणैः साक्षितां दधति । कृष्ण आह हे नान्दि ! कुसृतेः शाठ्यस्य सम्पुटीः अमूः राधाद्याः न हि प्रतीहि, इमाः प्रति प्रत्ययं माकुरु । अथवा अविदुषा स्तनचक्रवाकयोर्विशेषमजानता मया सोऽपराधः कृतोऽपि मन्तुरपराधः अल्पतां भजतु । अज्ञानकृतत्वात् ॥ ४६ ॥

इयं च कुलजाततिः स्वपटिमभिस्तदैवैतानि न पद्मानि किन्तु नोऽस्माकं मुखानि मुखानि । एवं नैते चक्रवाकाः किन्तु अस्माकं कुचाः कुचाः इति उरुतरोच्चगीर्भिः परिचाययन्ती सती मां नहि न्यषिध्यदपि । साम्प्रतं दम्भिनो इयं किमिति कुप्यति ॥ ४७ ॥

कलिर्व्विरमतादलं पणभृता पुनः खेलया
परन्तु जलमण्डुकध्वनिषु कीदृशी चातुरी ।
भवेदिति तयोदिता व्यधुरमी जलाहत्यनु
स्फुरद्विविधवादनं विविधतालनाट्य-क्रमैः ॥ ४८ ॥

प्रतिध्वनिषु तत्तटे मुदिर-गर्जित-न्यक्कृति
क्षमेषु वलितेष्वथो भ्रमति चातकीनां गणे ।
वटावपि हिर्ह्रीगिरा कलितकक्षतालं रसात्
समं नटति केकिभिर्ललितकूजनैरुन्मदैः ॥ ४९ ॥

स्तुवत्यगगणे मुहुर्म्मधुप-झङ्कृतैः सक्षर-
न्मरन्दमिषतो मुदाविरतमश्रुधाराधरे ।
समाप्य रस-सिन्धवः सरसि नीरकेलीस्तटं
गताः सपदि किङ्करी-विततिभिर्व्विभुः सेविताः ॥५०

युग्मकं ।

नान्दीआह । कलिः कलहः, विरमतात् विरमतु । पणभृता खेलया अलं व्यर्थं । किन्तु जलमण्डूकध्वनिषु युष्माकं कीदृशी चातुरी भवेत; तत्र मम दिदृक्षा वर्त्तते । इति तया नान्द्या उदिता अमी राधाकृष्णादयः जलाघाघातेन विविधवादनं व्यधुः ॥ ४८ ॥

मेघगर्जितन्यक्कृतिक्षमेषु प्रतिध्वनिषु वलितेषु सत्सु अथ तत्तटे मेघशब्दभ्रान्त्या चातकानां गणे भ्रमति सति एवं तद्वृन्दे मधु-मङ्गले ललितकूजनैः केकिभिः सह गृहीतकक्षतालं यथा स्यात्तथा नटति सति ॥ ४९ ॥

वाद्यं श्रुत्वा भ्रमरझङ्कृतैः करणैर्वृक्षगणे मुहुः स्तुवति सति । कथम्भूते क्षरन्मरन्दमिषात् मुदा अविरतमश्रुधाराधरे । रस-सिन्धवो

प्रविश्य मणिमन्दिरं विपिनपालिकाद्याहृता
रसालपनसादिकाः फल-ततीः सुधानिन्दिनीः ।
घनप्रणयतो मिथः समुपभोजिता योजिताः
स्मरेण सहसा रदच्छदन-सीधुनः स्वादने ॥ ५१ ॥

लावन्यामृत-पूरपूर्णमधुरप्रत्यङ्गवापी-रस-
व्यात्युक्षी-रभसक्रमेन मृदुलं तल्पं श्रिताः कौसुमं।
ताम्बूलव्यजनाम्बुदर्पणालसन्नेपथ्यसम्वाहनै-
र्दासीभिः परिचर्य्यमाणवपुषः कान्ता निदद्रुःक्षणं५२

इति श्रीभावनामृते महाकाव्ये जलविहारलीला
स्वादनोनाम चतुर्द्दशः सर्गः ।

---

राधाकृष्णादयः सरसि जलकेलीः समाप्य तटं गताः तत्क्षणे किङ्करीभिः सेविताःसन्तः बभुः ॥ ५० ॥

वृन्दया आहृताः फलततीः कृष्णादिभिः परस्परं प्रणयतः उपभोजिताः। तथाच कृष्णेन ताः उपभोजिताः। एवं ताभिश्च कृष्ण उपभोजित इत्यर्थः। पश्चात्ताःस्मरेण सहसा अधरामृतस्य स्वादने योजिताः। सर्व्वत्रैकशेषो बोध्यः ॥ ५१ ॥

अधुना सम्भोगमाह। लावण्यरूपजलस्य प्रवाहेण पूर्णमधुर प्रत्यङ्गस्वरूपायाः वाप्याः सरसः सकाशात् शृङ्गाररसस्वरूपजलस्य व्यात्युक्षीरभसेन परस्परसेचनवेगेन जातो यः क्रमस्तेन कौसुमं तल्पं-श्रिताः कान्ताः क्षणं निदद्रुः। नेपथ्यं वेषादि ॥ ५२ ॥

समाप्तश्चायं चतुर्द्दशः सर्गः।

# पञ्चदशः सर्गः ।

सीधुपानजलखेलनदोला-
न्दोलनादिकुतुके बलवत्त्वात् ।
एष एव नलिनीरिव पद्मी
यद्विजित्य सखि! नः प्रजगल्भे ॥ १ ॥

तद्बलोपधिकतः स्फुटमन्य-
द्धीप्रधानमधुना ललिते! त्वं ।
खेलनं विमृश यत् प्रभविष्य-
त्यस्य गर्व्व-चुलुकीकरणे द्राक् ॥ २ ॥

द्यूतकेलि-जयकैरव-चान्द्र-
ज्योतिरेव सखि! राजसि राधे! ।

श्रीराधिका ललितां प्रत्याह । मधुपान-जलक्रीडा-हिन्दोलादि कौतुके एष कृष्णः बलवत्वात् यद् यस्मात् नोऽस्मान् विजित्य प्रजगल्भे । यथा पद्मी हस्ती नलिनीर्विजित्य ॥ १ ॥

तत्तस्मात् हे ललिते! बलोपाधिकतः खेलनात् अन्यत् बुद्धि प्रधानं खेलनं अधुना विमृश । यत् खेलनं अस्य कृष्णस्य गर्व्वचुलुकी करणे द्राक् प्रभविष्यति । एतेन श्रीकृष्णापेक्षया स्वेषां बुद्ध्याधिक्यं सूचितं ॥ २ ॥

ललिता आह । हे सखि! द्यूतक्रीडायां जयरूपकैरवस्य कुमुदस्य चान्द्रज्योतिःस्वरूपा त्वं राजसि किं? पराभवरूपतमिस्र

किं दुनोतु परिभूतितमिस्रं
नित्यमेव धृतगर्व्वततीर्नः ॥ ३ ॥
इत्थमालिकृतमन्त्रणयोचे
राधया प्रियतम ! प्रभविष्णो ! ।
पाशकाजि-चतुरिम्नि जिगीषा
नर्त्तकीं न किमुरीकुरुषे त्वं ? ॥ ४ ॥
कलापकं ।
सत्यमालि ! हृदि नर्त्तयसे तां
किन्तु मत्करतलाम्बुजपट्टे ।
यर्हि वत्स्यति नृपो जयनामा
सा ह्रियैष्यति तदा निलयं द्राक् ॥ ५ ॥

अन्धकारः नित्यं धृतगर्व्वंततीः नोऽस्मान् दुनोतु । नहि चन्द्रज्योत्स्नोदयेऽन्धकारस्तिष्ठतीति भावः ॥ ३ ॥

इत्थं आल्या सह कृतमन्त्रणया राधया ऊचे । हे प्रियतम ! हे प्रभविष्णो ! पाशकयुद्धस्य चातुर्य्यरूपनृत्यस्थले जिगीषारूपनर्त्तकीं त्वं किं न उरीकुरुषे ? तथाच तस्याः सङ्गकरणे कृतनर्त्तकीसङ्गस्य तव सङ्गोऽस्माभिस्त्याज्यः अकरणे च पराजयः स्वयमेव भविष्यतीति भावः ॥ ४ ॥

श्रीकृष्ण आह । हे आलि ! सत्यं त्वं हृदि तां जिगीषानर्त्तकीं नर्त्तयसे किन्तु मत्करतलाम्बुजरूपपट्टे राजासने यर्हि जयनाम राजा वत्स्यति तदा सा जिगीषा नर्त्तकीनिलयं गृहं । पक्षे नितरां लयं नाशं एष्यति ॥ ५ ॥

इत्यघारि-गदितं मदिराक्षी
चिल्लिवल्लि-दरवेल्लितभङ्गया ।
सावधीर्य्य सपरिच्छदसारी-
रानिनाय तरसैव सुदेव्या ॥ ६ ॥

युग्मकं ।

नान्द्यभूद्वनपया सह साक्षि-
ण्यक्षकेलिसभिकाऽजनि कौन्दी ।
इष्टदायमुपदेष्टुमुदश्च-
द्वागराजत वटुर्ललिता च ॥ ७ ॥

पाणिशोणजलजोदररङ्गे
झञ्झणद्वलयमुच्छलदङ्गयाः ।
यर्हि पाशककुशीलव-युग्मं
लब्धनृत्यमधिभूमि चुकूर्द्दे ॥ ८ ॥

चिल्लिरूपा या वल्ली तस्या ईषत्कम्पभङ्गया श्रीकृष्णस्य गदितं सावधीर्य्य सम्यगवज्ञाय । सुदेव्या द्वारा आनिनाय ॥ ६ ॥

वृन्दया सह नान्दीमुखी साक्षिणी अभूत् । अक्षकेलौ, सभिका द्यूत प्रवर्त्तिका कुन्दवल्ली अजनि अभूत् । सभिका द्यूतकारका इत्यमरः । दशवामञ्चविदुप्रभृतीष्टदायमुपदेष्टुं उदश्चं प्राप्नुवद्वाग् यस्य तथाभूतो वटु र्मधुमङ्गलः कृष्ण-पक्षे अराजत । श्रीराधिका पक्षे तथाभूता ललिता अराजत ॥ ७ ॥

पाशक-निक्षेप समये झञ्झनद्वलयं यथास्यात्तथा उच्छलदङ्गया राधायाः पाणिरूपशोणकमलस्य उदररूपं यन्नृत्यस्थलं तत्र लब्ध नृत्यं पाशकरूपनर्त्तकयुगलं यदा अधिभूमि भूमौ चुकूर्द्दे ॥ ८

तर्हि कक्षकुचयोरुरुरोचि-
र्वीचिमज्जितदृशोऽपि वकारेः ।
पाशकग्रहणचापलचातु-
र्यापि नेषदपि भङ्गकलङ्कं ॥ ९ ॥

युग्मकं ।

कर्हिचिद्दशदशेति कदाचित्
सा विदुर्विदुरितिप्रसरद्गीः ।
पातयन्त्यलघु दायमभीष्टं
मूर्त्तिमत्यजनि किं न जयश्रीः ॥ १० ॥

यत् प्रिये ! दश दशेति निकामं
प्रार्थनं तदुपहासकरं ते ।
वित्तिरेव पतिता स्मर ताव-
द्देवने तव कुतो जयवार्त्ता ॥ ११ ॥

---

तदा कक्षादिषु मज्जितदृशोऽपि वकारेः पाशकग्रहणचातुरी ईषदपि भङ्गकलङ्कं न आप । तत्राभ्यासातिशयात् इति भावः ॥ ९ ॥

दशदशेत्यादि प्रसरन्ती गीर्यस्याः सा राधा अभीष्टं दायं पातयन्ती सती मूर्त्तिमती जयश्रीः किं न अजनि ? अपि तु अजनि एव ॥ १० ॥

देवने द्यूतक्रीडायां त्वं तावत् स्मर । वित्तिरेव पतिता न तु दशेति । अतो दशदशेति तव निकामं यथास्यात्तथा प्रार्थनं उपहासकरं । तेन कुतस्तव जयवार्त्तापि । पक्षे दशदशेति नितरां कामस्याधरदंशरूपस्य प्रार्थनं उपहासकरं । यतः स्मरस्य तावद्देवने तावत्प्रमाणक्रीडायां प्रयोगातिरेके इत्यर्थः । वित्तिश्चेतनैव पतिता लुप्ता इत्यर्थः । कुतो जयस्येति सूच्यमाने विपरीतरतावित्यर्थः ॥ ११ ॥

सारिका गमयितुं निजकोष्ठे-
ष्वप्रभुः सुतनुशृङ्खलिताः स्वाः ।
घातयंश्चरविधिं विमृशंस्ताः
खेलति स्म हरिराप्तजिगीषः ॥ १२ ॥

इष्टदायपतनेन सुधीः सा
राधिका यदि जिगाय तदा तं ।
आलयो विहसितुं प्रखरत्वं
लेभिरे ऽतिमृदवो ऽपि नितान्तं ॥ १३ ॥

किं वटो ! मुखमवाश्चयसि त्वं
सा हिहीति नटनारभटी ते ।
क्वागमत् क्व नु सितोपलिकार्थं
कङ्कण-प्रकरविक्रय-भङ्गी ॥ १४ ॥

स्वाः स्वीयाः सारिकाः प्रिया-कोष्ठात् निज-कोष्ठेषु गमयितुमप्रभुः असमर्थः यतः राधया स्वकोष्ठे ताः शृङ्खलिताः बद्धाः । अतःपाशक खेलायां विधिद्वयं वर्त्तते । तत्र प्रथमे गमविधौ असामर्थ्यात् द्वितीयं चरविधिं विमृशन् गृहीता विजिगीषा येन तथाभूतो हरिस्ताः स्वसारिका राधाद्वारा घातयन् खेलति स्म ॥ १२—१३ ॥

जलक्रीडासमये अस्माकं पराभवं दृष्ट्वा हिहीत्युक्त्वा सा नटनस्यारभटी क्व अगमत् । एवं तस्मिन् समये तटे स्थित्वा स्वीयवस्त्रं प्रसार्य्य हे कृष्ण ! सर्व्वासां कङ्कणाद्यलङ्करणं मह्यं देहि । मथुरायां विक्रयं कृत्वा सितोपलामानेष्यामीत्येवंरूपा विक्रयभङ्गी वा क्व अगमत् । मिस्रि इति प्रसिद्धाया मत्स्यण्डिकायाश्चरमपाकविशेषः सितोपला ॥ १४ ॥

आलयः ! शृणुत भो ! गिरि-मूर्द्ध्नि
साम्प्रतं नवसितोपलिकालीं ।
अस्य मूर्द्ध्नि वहु वर्षत तस्याः
स्वादमेत्वयमिहैव निकामं ॥ १५ ॥
न ब्रवीषि किमरे ! किमपि त्वं
कैतवेऽद्य परिभूतिभृतस्ते ।
क्षान्त्यचापलशमैर्म्मुनि-धर्म्मैः
किं वटुत्वमपि सत्यमिवाभूत् ॥ १६ ॥
कौस्तुभं पणितमानय तस्या-
प्यानये विनिमयेन विचित्रां ।
कङ्कणालिमथवामुमनेक
क्षालनैः प्रियसखी-हृदि धास्ये ॥ १७ ॥
कालनं न हि गवामिदमेत-
न्मारणं न वक-वत्स-वकीनां ।

---

उपलिका शिलाकणस्तस्याः श्रेणीं । तस्याःस्वादंवहु वर्षत, अयं वटुः तस्याः स्वादं निकामं एतु ॥ १५ ॥

कैतवे द्यूतकर्म्मणि पराभवभृतस्तव क्षान्त्यादिधर्म्मैः किं वटुत्वमपि सत्यमिवाभूत् ? ॥ १६ ॥

पणितं कौस्तुभं आनय । तस्य मथुरायां विनिमयेन कङ्कणालीं आनये । अथवा तस्यापावित्र्य निराकरणाय वहुक्षालनैः प्रियसख्या हृदि धारयिष्यामि ॥ १७—१८ ॥

अत्तवेदनमिदं तु सभायां
स्याद्विदग्धजनवुद्धि-परीक्षा ॥ १८ ॥
इत्थमालि-खरधारसरस्व-
त्यस्तपाटवतरुर्व्वटुरूचे ।
तस्य कर्णमनु संशृणुषे तत्
कौस्तुभं मम समर्पय हस्ते ॥ १९ ॥
चेत् स्वकृत्य-मिषतोऽपमृते मय्या-
क्रमं कमपि हन्त विधित्सेत् ।
एककेऽपि भवति ब्रजरामा-
संहतिर्ब्रजपुरन्दर-सूनौ ॥ २० ॥
तन्निवेद्य निखिलं ब्रजराज्ञीं
मङ्क्षु तद्विकटशासनपाशैः ।
ह्रीतमिस्रकुहरेऽद्य निवध्यै-
वाश्वमूर्नकिमु पातयितास्मि ॥ २१ ॥
युग्मकं ।

खरस्तीक्ष्णो धारः प्रवाहो यस्यास्तथाभूता सखीनां सरस्वती वागेव सरस्वती नदीति परम्परितरूपकं तया अस्तः पाटवरूपतरुर्यस्य तथाभूतो वटुस्तस्य श्रीकृष्णस्य कर्णमनु कर्णे हे सखे ! संशृणुषे ॥१९॥

स्वकृत्यमिषेण मयि अपसृते सति चेद्यदि ब्रजरामा-संहतिः एककेऽपि भवति त्वयि कमपि आक्रमं विधित्सेत ॥ २० ॥

तदा मङ्क्षु शीघ्रं ब्रजराज्ञीं अखिलवृत्तान्तं निवेद्य तस्या आज्ञारूप

धिक् धिया रहित ! किं त्वमभैषी-
रस्मि जिष्णुरधुनैव विजिष्ये ।
मातिमौग्ध्यमयचेष्टित-भङ्गया
ख्यापयाज्ञतम ! मत्परिभूतिं ॥ २२ ॥

किं हितप्रकथनेऽप्यतिकुप्य-
स्यस्तु कौस्तुभहृतिस्तव हस्तात् ।
याम्यहं युवति-पाल्यपि रङ्गी-
कृत्य नृत्यमपि कारयतु त्वां ॥ २३ ॥

चिल्लिकोण-धुवनेन मुकुन्दः
स्वीयपक्षगमिता इव सभ्याः ।
प्राह पश्यत मयैव जिताना-
मप्यतिप्रखरतां चपलानां ॥ २४ ॥

यद्यजेष्यदबला-ततिरेषा
किं व्यधास्यदिति वोढुमनीशः ।

---

विकटपाशैः लज्जारूपान्धकारकुहरे निबध्यैवाभूः किं न पातयितास्मि ? इति सर्व्वाः श्रावयित्वैव मिथ्याभयमुत्पादयामास ॥ २१ ॥

हेधिया रहित ! त्वां धिक्, किं त्वमभैषीः ? अहं जिष्णुरस्मि अधुनैव विजिष्ये । हे अज्ञतम ! मत्पराभूतिं मा ख्यापय ॥ २२ ॥

अहं यामि युवति-श्रेण्यपि त्वां रङ्गीकृत्य नृत्यमपि कारयतु ॥२३॥

भ्रूभङ्गया स्वीयपक्षपातिता इव सभ्याः प्राह । मया कर्त्री जितानामासां चपलानां अतिप्रखरतां यूयं पश्यत ॥ २४ ॥

विस्मितोऽस्म्यथ जगाद विशाखा
त्वद्भ्रुवे नम इति प्रहसन्ती ॥ २५ ॥
वैरिणी भवति या कुलधर्म्म-
ध्वंसिकापि सुहृदालिरिवाद्य ।
त्वद्वचोऽप्यनृतयन्त्युदगान्नो
धिन्वती सदसि कुञ्चितकोणा ॥ २६ ॥
देहि कौस्तुभमिति स्फुटनान्दी
वाकयतो मधुभिदि त्रपमाणे ।
कुन्दवल्लयमुमघान्तक-कण्ठा-
द्राधिकोरसि दधौ स्मयमाना ॥ २७ ॥
कृष्ण ! पश्य कुचमध्यगतं स्वं
विम्बितं मणिवरे विलसन्तं ।

---

ननु भो कृष्ण ! तव जये सति उक्तिप्रत्युक्त्या मधुमङ्गलस्य तिरस्कारसमये भवान् कथं तूष्णीं तस्थावित्यत आह । जयं विनैवास्मेतादृशी प्रगल्भता यदि एषा अवलाततिरजेष्यत् तदा किमकरिष्यदितिवोद्धुमसमर्थोऽहं त्रिस्मितोऽस्मि । तथाच तदानीं विस्मयेनाहं स्तब्धो वभूवेति भावः ॥ २५ ॥

या तव कुञ्चितकोणा कटाक्षरूपा स्त्री अस्माकं वैरिणी कुलधर्म्मं ध्वंसिकापि त्वद्वचोऽनृतयन्ती अतएव नोऽस्मान् धिन्वती सती अद्य सुहृदालिरिव उदगात् ॥ २६—२७ ॥

कुन्दवल्ली आह । पूर्व्वं यं त्वं अदधाः स मणिवरः इदानीं त्वां प्रणयेन दधाति ॥ २८ ॥

हन्त यत्त्वमदधाः स इदानीं
त्वां दधाति मणिराट् प्रणयेन ॥ २८ ॥

धन्यधन्य ! सुषमामय ! कृष्ण-
स्त्वं तवास्मि महसः प्रतिविम्वः ।
यत्र राजसि ममात्र तु वाञ्छै-
वैतुमित्यगभृदुन्नहृगासीत् ॥ २६ ॥

राधिकाप्यरमवाश्रितवक्त्रा
वीक्ष्य भान्तमिममात्मकुचान्तः ।
कञ्चुकं ह्रियमपि द्विषती सा-
नन्दजाड्यजलधौ निममज्ज ॥ ३० ॥

खेलतं रसनिधी ! पुनरत्रा-
श्लेष एव पण इत्यथ कौन्द्या ।
कैतवे घटित एव मुकुन्द-
स्तां जयन् गुहपरिग्रहचञ्चुः ॥ ३१ ॥

श्रीकृष्ण आह । हे धन्यधन्य ! शोभामय ! कृष्णस्त्वमेव । अहन्तु तव महसः कान्तेः प्रतिबिम्बोऽस्मि तत्र स्थले एतुं गन्तुं मम वाञ्छैव इति अगभृत् गोवर्द्धनधारी श्रीकृष्णः प्रेम्णा क्लिन्नहृगासीत् । उन्दी-क्लेदने ॥ २९ ॥

राधिकापि अरं शीघ्रं अधोवक्त्रा सती स्वकुचमध्ये भान्तमिमं कृष्णं वीक्ष्य व्यवधायकं कञ्चुकं द्विषती ततः कञ्चुक दूरीचिकीर्षायां प्रतिबन्धकत्वेनोत्पद्यमानां लज्जामपि द्विषती सा ॥ ३० ॥

हे रसनिधी ! युवां खेलतं इति कुन्दवल्ल्या कैतवे द्यूतकर्म्मणि घटिते प्रवर्त्तिते सति । चञ्चुः प्रवीणः ॥ ३१ ॥

प्राह गर्व्विणि! कथं कुटिलभ्रूः
साम्प्रतं भवसि कुञ्चितगात्री ।
न्यायतोऽस्ययि! जिता सुकलापि
त्वं किमत्र कृपणा पणदाने ॥ ३२ ॥

युग्मकं ।

चुम्वनगूहकदेवन एवं
सा विजित्य यदि तं प्रजगल्भे ।
प्राह सस्मितमयं निजगण्डं
तन्मुखाब्ज-निकटे निदधानः ॥ ३३ ॥

स्वगूहं सखि! गृहाण जितोऽहं
यत्त्वयात्र सदसीति ततः सा ।
स्वाः सखीःस्मित मुखीरभिवीक्ष्यै-
वाञ्चलेन पिदधे हसदास्यं ॥ ३४ ॥

हास्यरंहसि दरोपशमे सा
प्राह साहसिक! नाहमजैषं ।

न्यायतस्त्वं जिता पराभूता अतः सुकला दात्री अपि किमत्र कृपणासि? दात्रीणां कार्पण्यमनुचितमिति भावः ॥ ३२ ॥

चुम्वनमेव गूहो यत्र एवंभूते देवने क्रीडायां सा कृष्णं विजित्य यदि प्रजगल्भे; तदा अयं कृष्णः निजगण्डं दधानः सन् प्राह ॥३३॥

हसदित्यास्यस्य कर्त्तृत्वे स्वेन रुध्यमानमपि हास्यं स्वयं प्रकटी-भवतीति बुध्यते ॥ ३४—३५ ॥

ओमिति श्रितवलः पुनरस्या
एव गण्डमसकृत् स चुचुम्ब ॥ ३५ ॥

सत्यमीदृशपणां निदिशन्ती
देवनं त्वमयि ! देवरवन्धुः ।
कौन्दि ! मां हससि तत्त्वमिदानीं
खेलनाहमिति सा विरताभूत् ॥ ३६ ॥

आलि ! वेणुमहती पणजुष्टा-
मत्तकेलिमधुना रचयित्वा ।
जित्वरी भव तयेतिनिदिष्टा
दीव्यति स्म पुनरायतनेत्रा ॥ ३७ ॥

तत्र सैव जितवत्यवदत्तं
देहि वेणुमिति तं स विचिन्वन् ।
तुन्दवन्धमनु पाणिविमर्शै-
र्नाप्नुवन्नथ सखायमपृच्छत् ॥ ३८ ॥

---

हे कौन्दि ! ईदृशपणं देवनं क्रीडां निदिशन्ती त्वमेव खेल ॥३६॥

हे आलि ! पुनस्त्वं जित्वरी भव इति तया कुन्दवल्ल्या निदिष्टा सा दीव्यति स्म ॥ ३७ ॥

स श्रीकृष्णः तं वेणुं विचिन्वन् तुन्दवन्धे पाणिस्पर्शैः आप्नुवन् सन् अथ मधुमङ्गलं अपृच्छत् ॥ ३८ ॥

क्वाहमस्मि चिरमत्र वनान्ते
त्वं क्व पर्य्यटनकौतुकमत्तः ।
द्यूतपानवनितासु विषक्तः
क्व त्वमस्मि तनुमान् क्व नु धर्म्मः ॥ ३९ ॥
कौस्तुभस्तु गत एव य आसीद्
वेणुरेव तव मोहनमस्त्रं ।
सोऽप्यगादुपविशन्नथ रीरी
गीतमातनु मुखेन सुखेन ॥ ४० ॥
आर्य्य ! साधु भणितं गतवेणुः
केन कर्षत वनं प्रति रामाः ।
यापयिष्यति कथं वत यामा-
नेष सङ्कटमिदं तव चाभूत् ॥ ४१ ॥

पृष्टः स मधुमङ्गल आह । चिरकालं व्याप्यात्र वनेऽस्म्यहं वा क्व । भ्रमणकौतुकमत्तस्त्वं वा क्व । अत्यन्तासम्भावनायां क्व-द्वयं । तनुमान् धर्म्मस्वरूपोऽहं वा क्व ॥ ३९ ॥

सोऽपि वेणुरगात् गतः अधुना उपविशन् सन् मुखेन गीतं आतनु ॥ ४० ॥

ललिताह । आर्य्येति गतवेणुरेषः केन हेतुना वनं प्रतिकर्षतु । कथं यामान् यापयिष्यति । तव च गमनागमनरूपदौत्यकर्म्मणि सङ्कटमभूत् ॥ ४१ ॥

किं ब्रवीषि ललिते ! त्वमिहैका
प्रेमवत्यसि कृपालुरतो मे ।
सङ्कटं तदपनेष्यसि धन्ये-
त्यस्मयन्त सुदृशो वटु-वाक्यात् ॥ ४२ ॥
त्वं यया द्विज ! वृतोऽस्ययि ! दुर्गा
दत्तदिव्यवलिभुक् स्व पुरोधाः ।
सा त्वदूढ़तनुरेष्यति पद्मा
सख्यरुर्दवयिता तव सख्युः ॥ ४३ ॥
मुञ्च हास्यमिदमुद्दिश वंशीं
कृष्ण ! वेद्मि न गतिर्ललिते ! त्वं ।

वटुस्तां प्रत्याह । हे ललिते ! एका त्वमेवात्र श्रीकृष्णे प्रेमवती । मयि च कृपालुरसि अतो धन्या त्वं मत् सङ्कटमपनेष्यसि । तथाच कृपया स्वयमेवागत्य श्रीकृष्णेन सह मिलनं करिष्यसीति भावः । इति मधुमङ्गल वाक्यात् सर्व्वाः सुदृशः अस्मयन्तः हास्यं चक्रुः ॥ ४२ ॥

कुप्यन्ती ललिता आह । हे द्विज ! यया वृतः अतएव पुरोधाः पुरोहितः सन् दुर्गायै दत्तस्य दिव्यवलेः पूजोपहारस्य भोक्ता असि । सा पद्मासखी चन्द्रावली त्वद् ढ़तनुः अर्थात्तव स्कन्धे आरुह्य अत्र कुञ्जे आयास्यति । तव सख्युः श्रीकृष्णस्य अरुःपीड़ां दवयिता । पक्षे हे द्विज पक्षिन् ! हे दुर्गया आदत्त ! स्ववलित्वेन स्वीकृत इत्यर्थः । वलिभुग्वायसस्त्वं यया वृतोऽसि । स्वस्य पुरो धावतीति स्वपुरोधा औणादिकः ॥ ४३ ॥

श्रीकृष्ण आह । मुञ्चेति । ललिताह । हे कृष्ण ! अहं न वेद्मि ।

त्वत्सखी किमहरन्नहि विष्णुः
कापि नात्र परवस्तु जिहीर्षुः ॥ ४४ ॥
सा च्युता मम हृतैव भवत्या
दोलकेलिमनु तुन्दपटाद्वा ।
माधवार्क-शपथः सखि ! पाने
सीधुनः किमु शपेऽच्युत ! विष्णोः ॥ ४५ ॥
कच्चिदम्वुयुधि वा नहि नह्ये-
वाम्वुजेक्षण ! तदेव हि दिव्यं ।
तर्हि मे क्व नु गता वत वंशी
कौतुकं किमिह पश्यथ सभ्याः ! ॥ ४६ ॥
दातुमप्रभुमहो ? गूहमेषा
त्वां निवध्य भुजवल्लरिपाशैः ।
यद्रुयियासति मनोजनृपाग्रे
कात्र युक्तिरिति कुन्दलताचे ॥ ४७ ॥

---

कृष्ण आह गतिरिति । ललिताह । नहीति, आसां मध्ये कापि परवस्तु जिहीर्षुर्नास्ति ॥ ४४ ॥

दोलकेलौ मम तुन्दवन्धाद्विच्युता सा भवत्यैव हृता । हे माधव ! सूर्य्य-शपथः । हे सखि ! मधुपाने वा किं हृता । हे अच्युत ! विष्णोः शपे ॥ ४५ ॥

हे अम्बुजेक्षण ! तदेव दिव्यं ॥ ४६ ॥ ४७ ॥

हन्त ! किं व्रजपुरन्दर-सूनोः
कष्टमेतदवलोकितुमीशे ।
क्षम्यतां तदथवा पणहेतोः
पीतचेलमुररीकुरु राधे ! ॥ ४८ ॥
माधवोऽवददये ! समधीत
ज्योतिषागम ! सखे ! गणयासां ।
का जहार मुरलीमथ किञ्चि-
द्भावयन् स ललितेति जगाद ॥ ४९ ॥
नाहमस्मि कुटिलेति वदन्ती-
माह तां गिरिधरो रसनां स्वां ।
कञ्चुकीं कच-ततिं च विमुक्त
ग्रन्थिमीक्षय न चेन्मम का भीः ॥ ५० ॥
सा क्रुधा वहु दुधाव निचोलं
द्रागथात्तचिकुरो हरिरस्याः ।

---

नान्दीमुख्याह । हन्त किं भुजपाशैर्बद्धा राजाग्रे श्रीकृष्णस्य नयन-रूपकष्टं अवलोकितुमहं कथमीशे ॥ ४८ ॥

श्रीकृष्ण आह । हे अधीतज्योतिषागम ! मधुमङ्गल ! गणय, आसां मध्ये का जहार ॥ ४९ ॥

हे कुटिल ! नाहमस्मीतिवदन्तीं ललितां गिरिधर आह । हे ललिते ! स्वीयां रसनां क्षुद्रघण्टिकां विमुक्तग्रन्थिं ईक्षय ॥ ५० ॥

सा ललिता द्राक् शीघ्रं निचोलं दुधाव कम्पयामास । अथानन्तरं

कञ्चुकीं करधुतो ऽपि नखैर्घ्नन्
लोचनेङ्गितविदत्यजदेनां ॥ ५१ ॥
राधिकामथ तथैव विशाखां
तत्तदक्षितटधूननुन्नः ।
स व्यकर्षदपरा अपि चक्रे
न क्षणात्त्रुटितकञ्चुलिकाः किं ॥ ५२ ॥
तावदेत्य बनदेव्यथ काचित्
प्राह सूर्य्यसदने जटिलागात् ।
तास्ततो निखिलकेलिमुदस्य
त्रस्तनेत्रमगुरन्तिकमस्याः ॥ ५३ ॥
किं स्थ रे ! क्व नु विलम्बमकार्षीः
स्नातुमद्य यदगां सुर-नद्यां ।
किं न कुन्दलतिकामिह वीक्षे
सा गता मम पुरोहितहेतोः ॥ ५४ ॥

अस्या आत्तचिकुरो हरिः ललितया करेण धुतोऽर्थात् निवारितोऽपि कञ्चुकं नखैर्घ्नन् खण्डयन् राधिकां प्रति ललिताया लोचनेङ्गितवित् कृष्णः एनां ललितामत्यजत् ॥ ५१ ॥

तासामक्षितटधुननेन नुन्नः प्रेरितः सन् राधिकां तथैव विशाखां स व्यकर्षत् । अपरा अपि सखीः किं क्षणात् त्रुटितकञ्चुलिकाः न चक्रे ॥ ५२ ॥ ५३ ॥

सुरनद्यां मानसगङ्गायां स्नातुमद्य अगां मम पुरोहितस्य हेतोः सा कुन्दलतिका गता ॥ ५४ ॥

नैति किं चिरमियं कलयारा-
दागतां सहपुरोधसमेनां ।
विप्रवेशधरकृष्णसमेता
सा गताथ निजगाद च वृद्धां ॥ ५५ ॥
नाद्य कोऽपि चिरमार्गगतोऽपि
प्राप्यते द्विज-सुतो निज-गोष्ठे ।
किन्त्वयं मधुपुरीभव आगा-
दत्र गर्गकलिताखिलविद्यः ॥ ५६ ॥
एनमेव वहु वर्णिनमत्र
स्तौति पण्डित-ततिर्म्मतिमन्तं ।
तन्मयाग्रहशतैरिह नीतं
त्वं पुरोहिततया वृणु वध्वाः ॥ ५७ ॥
तं जरत्यवददद्य कृतार्थै-
वाभवं भवदवेक्षण-मात्रात् ।

इयं कुन्दलता चिरकालं व्याप्य कथं न एति । राधिकाह । पुरोहितेन सहितां निकटे आगतां एनां पश्य ॥ ५५ ॥

पक्षे गर्गेण कलिता ज्ञापिता अखिला विद्या यस्य सः । मधुपुरीभव इति सत्यैव सरस्वती ॥ ५६ ॥

एनं वर्णिनं ब्रह्मचारिणं वहु स्तौति । पक्षे वहुरूपिणं शुक्लो रक्तस्तथा पीत इति तु सरस्वती । पुरोऽग्रे वध्वा हिततया वृणु ॥ ५७ ॥

विप्रवर्य ! परिपूरितकामां
मद्वधूं कुरु समर्च्चय मित्रं ॥ ५८ ॥
धीरतारनयनः सितवासा
दर्भसम्वलितपुस्तकपाणिः ।
सामगानमधुरस्वरकण्ठो
मूर्त्तिमान् स इवैष तदोचे ॥ ५९ ॥
वर्णिनो यदपि नोचितमेव
स्त्रीविलोकनमथाप्यतिसाध्वीं ।
कारये स्तृततनूमिह काम-
प्रांशुमद्‌यजनमद्य तु वृद्धे ! ॥ ६० ॥
स्वस्तिवाचनपुरःसरमेतां
पूजयन्नथ जगाद नतार्च्चीं ।
वासरे नवरसादरसेवा-
चार्य्य मत्र वृणु मां धिनु मित्रं ॥ ६१ ॥

---

विशेषेण प्रकर्षेण वर्य्येति सरस्वती । मित्रं सूर्य्यं । पक्षे मित्रं त्वां अर्च्चय तत एव वधूं पूरितकामां कुरु ॥ ५८ ॥

एष श्रीकृष्णस्तदा ऊचे । कथम्भूतः धीरे तारे ययोस्तथाभूते नयने यस्य ॥ ५९ ॥

तथापि वस्त्रेण च्छादिततनुं अतिसाध्वीं कामं वाञ्छितं प्राति पूरयति कामप्रं अंशुमतः सूर्य्यस्य यजनं कारये । पक्षे कामपूरक कान्तिकं मद्‌यजनमिति च्छेदः ॥ ६० ॥

एतां पूजयन् पूजयितुं जगाद । वासरस्य इनवरः प्रभुवरः सूर्य्य-

त्वं स्मरार्च्चनविधेरुपचारा-
नाहरन्त्यलघु तोषय भावैः ।
वच्मि मन्त्रमहमों जय सर्व्व-
व्यापकेश्वर! जगद्धितकारिन्! ॥ ६२ ॥

भास्करेक्षण! तमोनुद! शश्वत्
पद्मिनीगण-विकाशकभानो! ।
धर्म्मदाय परमार्थ-सवित्रे
कामदाय महसे ऽस्तु नमस्ते ॥ ६३ ॥

पत्युरस्तु कृपया तव भास्वद्-
यागतो ऽयुतगवाप्तिरमुष्याः ।
कल्यतानवरतं चिरमायु-
र्वृद्धिरित्यमुमयाचत वृद्धा ॥ ६४ ॥

---

स्तस्य सादरसेवाचार्य्यं मां वृणु मित्रं सूर्य्यं च धिनु सुखय । पक्षे वासरे दिवसे एव नवरसस्य अदरसेवा अनल्पास्वादः मित्रं मां ॥ ६१ ॥

अर्च्चनविधेरुपचारान् आहरन्ती सती मित्रं स्मर मननमात्रं कुरु। भावैस्तं तोषय। पक्षे कन्दर्पार्च्चनस्य विधेः। मन्त्रं तु अहमेव वच्मि। जय सर्व्वेत्यादि पदं उभयपक्षे सङ्गमनीयं ॥ ६२ ॥

हे पद्मिनीगणविकाशकभानो! पक्षे पद्मिनीगणविकाशकः भानुः किरणो यस्य। पक्षे धर्म्मदाय धर्म्मखण्डकाय नमः। पक्षे परमो यः सङ्ग-रूपोऽर्थस्तस्य सवित्रे जनयित्रे ॥ ६३ ॥

तव कृपया अमुष्याः पत्युः सूर्य्ययागात् अयुतगवाप्तिरस्तु। पक्षे तव पत्युरिति सामानाधिकरण्यं। अयुतकान्तिप्राप्तिरस्तु। अनवरतं

एवमस्त्विति वदत्यघशत्रा-
वेत्य तत्र मधुमङ्गल ऊचे ।
सूर्य्यसूक्तमहमेव पठामी-
त्यक्षिपद्दृशमशेषनिवेद्ये ॥ ६५ ॥
मूर्ख ! लम्पटसख ! त्वमिहागाः
किं वटुः प्रतिदिनं पुनरेषः ।
पूजयिष्यति वधूमतिसौम्यः
श्याम इत्यदरयज्जरती तं ॥ ६६ ॥
पूर्णतां यदि जगाम महेष्टि-
र्दक्षिणामियमदत्त सुवर्णम् ।
नाग्रहीदयमथैत्य वटुस्त-
न्नीतवानथ निवेदितमाद ॥ ६७ ॥
साम्प्रतं शृणु सती-कुलवर्य्ये !
भास्वते नम इतीह पठन्ती ।

---

निरन्तरं । कल्यता नैरुज्यं । निरामयः कल्य इत्यभिधानात् । पक्षे कल्यता सामर्थ्यं तज्जन्यं नवं नवं रतं च ॥ ६४ ॥

एवमस्त्विति श्रीकृष्णो वदति सति तत्र मधुमङ्गल एत्य ऊचे अहं पठामीत्युक्त्वा लोभेन अशेषनैवेद्ये दृशमक्षिपत् ॥ ६५ ॥

हे लम्पटसख ! त्वं कथमत्रागाः ॥ ६६ ॥

यदि महेष्टिः पूर्णतां जगाम । तदा इयं वृद्धा सुवर्णं दक्षिणामदत्त । अयं ब्रह्मचारी न अग्रहीत् । वटुस्तत्र एत्य सुवर्णं नीतवान् । निवेदितं च आद भक्षितवान् ॥ ६७ ॥ ६८ ॥

उत्थिता कृतपरिक्रमणा त्वं
त्वां ऽऽलग्नशिरसा प्रणमामुं ॥ ६८ ॥
सा तथा विदधती तदुदञ्चत्
पाटवामृतरसार्पितचित्ता ।
वेणितष्ठणादिति क्षिति-पृष्ठे
नो विवेद मुरलीं निपतन्ती ॥ ६९ ॥
किं किमेतदिति तां जरती द्रा-
गाददे ऽथ परिचित्य धुतास्या ।
हुं हुमित्यरुणदृष्टिरतर्ज-
द्गर्जदुच्चदुरगीव मृगाक्षीं ॥ ७० ॥
शैल-सानुगतया पतयालु-
र्वंशिका ध्रुवमलम्भि मयार्ये ! ।
दुःखदेयमिति सूरसुतायां
क्षेपणाय कलिता किमु कुप्येः ॥ ७१ ॥

सथा नमनं विदधती सा तस्य श्रीकृष्णस्य उदञ्चत् उदयं प्राप्नुवत् यत् पाटवामृतं तस्यास्वादे अर्पितचित्ता सती वेणितष्ठणदिति शब्दं कृत्वा क्षितिपृष्ठे निपतन्तीं मुरलीं न वेद ॥ ६९ ॥

धुतास्या कम्पितास्या सा अरुणदृष्टिः सती अतर्जत् । गर्जन्ती उच्छलन्ती पन्नगी इव ॥ ७० ॥

शैलसानुगतया मया पतयालुर्वंशिका अलम्भि । यमुनायां क्षेपणाय तत्स्थानात् इयं गृहीता किं त्वं कुप्येः ॥ ७१ ॥

हा ! कलङ्किनि ! दुरन्वयजाते !
मां प्रतारयसि नित्यमिदानीं ।
वृद्ध-संसदि निवेद्य यते त्वत्
कामुकस्य तव चाप्युचिताय ॥ ७२ ॥
किं निदानकमिदं वहुरोषा-
क्रोशनं तव वधूं प्रति वृद्धे ! ।
अप्रसङ्गविदमर्हति वक्तुं
चेद्वदाखिलहितश्रयिणीं मां ॥ ७३ ॥
आर्य्य ! विप्रतनय ! ब्रजराजं
वेत्सि ? हुं स तु पुरे ऽपि यशस्वी ।
तस्य कोऽप्यजनि ? सूनुरयं च
श्रूयते ऽघवककेशिनिहन्ता ॥ ७४ ॥
तस्य कश्चन गुणं शृणु साध्वी
कापि नामधृतयेऽप्यधिगोष्ठं ।

त्वत्कामुकस्य कृष्णस्य तव च उचिताय उचितशास्तिं कर्त्तुं अहं यते ॥ ७२ ॥

अप्रसङ्गविदं मां वक्तुं अर्हति चेत् वद ॥ ७३ ॥

हे विप्रतनय ! ब्रजराजं त्वं वेत्सि ? हुं जानामीत्यर्थः । स तु मम पुरे यशस्वी प्रसिद्धः । पुनर्वृद्धा आह । तस्य पुत्रः कोऽपि वर्त्तते ? श्रीकृष्ण आह । अयमपि अघवकादिहन्तृत्वेन मधुपुरे मया श्रूयते ॥ ७४ ॥

न स्थिता यत इयन्तु वधूटी
केवलास्ति न च वेद्मयथ किं स्यात् ॥ ७५ ॥
सेयमस्य मुरली पुनरस्या
एष गानमिषमोहन मन्त्रैः ।
आनयन् कुलवतीर्व्वनमों श्री-
विष्णवे नम इति प्रकरोति ॥ ७६ ॥
तद्गिरा स्मितविराजितवक्त्रो
व्याजहार मुरली किल कीदृक् ।
देहि मह्यमिति स स्वकरेऽधा-
त्तामनीक्षितचरीमिव पश्यन् ॥ ७७ ॥
आर्य्ये! कार्य्यविदुषो ऽस्ति तवेच्छा
चेदिमां मणिमयीं नय दत्तां ।
यात्वियं ब्रजवनान्मधुपुर्य्या-
मत्र तिष्ठतु सती-कुलधर्म्मः ॥ ७८ ॥

---

अधिगोष्ठं गोष्ठे कापि न स्थिता ॥ ७५ ॥

एष नन्दपुत्रः अस्या गानमिषेण मोहनमन्त्रैः । कुलवतीरानयन् औँ श्रीविष्णवे नम इति करोति ॥ ७६ ॥

वृद्धावचनेन स्मितविराजितवक्त्रः श्रीकृष्णः व्याजहार । मुरलीं अनीक्षितचरीमिव पश्यन् करे अधात् दधार ॥ ७७ ॥

हे आर्य्ये ! अर्थग्रहणरूपकार्य्यविदुषस्तव यदि इच्छा स्यात्तदा मया दत्तां मणिमयीं मुरलीं नय ॥ ७८ ॥

आदिश त्वमधुना निज-गेहं
सस्नुषा द्रुतमये समये त्वं ।
नित्यमेहि धिनु नस्तव भक्ता
मद्वधूमनुगृहाण गुणाब्धे ! ॥ ७६ ॥
इत्यघारि-चरितामृतवल्लया:
सन्ततं त्रिजगति प्रचरन्त्याः ।
मध्यवासरविकास्युरुकेली
पुष्प-वृन्दमधिगोष्ठमचैषं ॥ ८० ॥
प्रीतिरेव सुदृशां कुसुमानि
व्यस्य तानि मदनो ऽकृत वाणान् ।
ते च मर्म्मभिद एव सदासां
तच्च शर्म्मभरितं प्रिययोगे ॥ ८१ ॥

अधुना त्वं आदिश आज्ञां देहि सस्नुषा अहं गृहं अये । त्वन्तु सूर्य्यपूजासमये नित्यं एहि । तव भक्ता नोऽस्मान् धिनु । पक्षे अनु अनन्तरं वधूं गृहाण स्वीकुरु ॥ ७९ ॥

मध्याह्नलीलामुपसंहरति । श्रीकृष्णस्य लीलारूपामृतवल्ल्या गोष्ठसम्बन्धि अथ च मध्यदिवसविकासिकेलिरूपपुष्पवृन्दं अहं अचैषं ॥ ८० ॥

तानि कुसुमानि व्यस्य विस्तार्य्य कन्दर्पः वाणान् अकृत । ते च वाणा आसां व्रजसुन्दरीणां सदा मर्म्मभिद एव भवन्ति तच्च वाणविद्धं मर्म्म श्रीकृष्णसंयोगे शर्म्मभरितं सुखपूर्णमभूत् ॥ ८१ ॥

इति हरिमभिवन्द्य स्वालयं सालिबध्वा
स समगमदमन्दोत्कण्ठया यर्हि वृद्धा ।
प्रियसखधृतपाणिः सोऽपि तत्पृष्ठवर्त्म
प्रहितनयन आप स्वान् सखीन् वक्षतो गाः ॥८२॥

इति श्रीभावनामृते महाकाव्ये माध्याह्निकलीला
स्वादनोनाम पञ्चदशः सर्गः ।

---

आलिसहितया वध्वा समं वृद्धा यदा अगमत् तदैव कृष्णोऽपि गा रक्षतः स्वान् सखीन् आप ॥ ८२ ॥

पञ्चदशः सर्गः समाप्तः ।

## षोड़शः सर्गः ।

अथ प्रेम्नः स्थेमन्यपि समजनि स्थैर्य्यरहिता
प्रिया प्रेयस्यक्ष्णोरमलकमलद्वन्द्वमहसोः ।
तटात् स्वस्यावासात् प्रवसति विदूरे दवथवो
वलादाक्रम्यास्या हृदयनगरीं भेत्तुमविशन् ॥ १ ॥
सखी-संघाश्वासौषधमपि निरोजो विदधतीं
दधाना स्वप्राणप्रिय-विरहजां संज्वररुजं ।
क्षणार्द्धं कल्पानां शतममनुते यं गुरु-गृहं
निरम्भस्कं कूपं ह्रियमशनिजं जालपटलं ॥ २ ॥

प्रेम्नः स्थेमनि स्थैर्य्येऽपि सति प्रिया धैर्य्यरहिता अजनीति विरोधाभासालङ्कारः। राधिकाया अमलकमलद्वन्द्वतुल्यकान्तिविशिष्टयो-रक्ष्णोस्तटात् कथम्भूतात् श्रीकृष्णस्य वासगृहात् तस्मात् प्रेयसि श्रीकृष्णे विदूरे प्रवसति प्रवासं गतवति सति । दवथवश्चित्तविषादादि-रूपास्तापाः अस्याः श्रीराधिकाया हृदयनगरीं वलादाक्रम्य भेत्तुं अवि-शन् ॥ १ ॥

सखीसमूहस्याश्वासरूपौषधमपि निरोजो निर्व्वलं विदधतीं श्रीकृष्णस्य विरहजन्यां संज्वररुजं दधाना श्रीराधा क्षणार्द्धं कल्पानां शतं, एवं गुरुगृहं निर्जलकूपं, एवं ह्रियं अशनिनिर्म्मितजालपटलं अमनुत ॥ २ ॥

तदालीनां पाल्या समुचितसपर्य्याकुलधियां
द्रवैः पीनःपुन्यान्मलयजभवैर्लिप्तवपुषः ।
स्तृतायाश्चाभीक्ष्णं बिसकिसलयैः सैन्धव-रसैः
समीपेऽस्याः प्रायात् प्रणयविकला चन्दनकला ॥३॥

कुतो वृन्दारण्यात् कथमिदमगा गोष्ठमहिषी-
निदेशात् कस्मात् स त्वरितमशनीयोपहृतये ।
सुतस्यास्याः किं संप्रति स कुरुते कन्दुकतति-
व्यतिक्षेपग्राहोत्तरविविध खेलां सवयसा ॥ ४ ॥

अरे ! किं श्रीदामन् ! वदसि मम दोरर्गलवल-
त्तटी लोठीघट्टप्रघटननिपिष्टाखिलतनो ! ।
विरम्याजेनर्म्णोऽप्यपसर मदाडम्बरलव
स्फुटत् कर्णो ऽभ्यर्णाद्यदि सपदि शं वाञ्छसि भृशं५

आलीनां श्रेण्या चन्दनभवैर्द्रवैर्लिप्तवपुषः राधायाः कथम्भूतायाः सैन्धवरसैः कर्पूरसगन्धिजलसहितैः किसलयैः स्तृतायाः आच्छादितायास्तस्याः समीपे चन्दनकला प्रायात् ॥ ३ ॥

चन्दनकले ! कुत आगता ? वृन्दारण्यात् । त्वं इदं वृन्दारण्यं कथं अगाः ? व्रजेश्वर्य्या निदेशात् । कस्मात् स निदेशः ? अस्या यशोदायाः सुतस्य कृष्णस्य अशनीयस्य भोज्यद्रव्यस्य उपहृतये वनमध्ये तस्मै दातुं । स श्रीकृष्णः संप्रति किं कुरुते ? सवयसा सहकन्दुकततेः परस्परक्षेपग्रहणमेव उत्तरं यस्या स्तथाविधविविधखेलां कुरुते ॥ ४ ॥

वृन्दावने दृष्टां सख्या सह श्रीकृष्णस्य खेलामाह । मम दोरर्गलस्य वलत्तटो एव लोठी लोढ़ा इति प्रसिद्धस्तस्याः घट्टनस्य चलनस्य

जयश्रीः श्रीदाम्नि प्रथितमहसां धाम्नि सहसां
व्यराजीद्राजिष्यत्यवकलय राजत्यपि सदा ।
तवैवांसः साक्षी भवति तदपि त्वं भजसि किं
मुखाटोपी कोपी स्वमहिमविलोपी चपलतां ॥६॥
बकीं मन्त्रैर्विप्रा निधनमनयन् यः पुनरघ-
स्तदन्तस्त्वं सर्व्वे वयमपि न किं हन्त ययिम ।
बकः कैर्व्वा गण्यो गिरिरपि तदिष्टः स्वयमहो !
वियत्यस्थादस्तौजसि भवति गर्व्वः कथमभूत् ॥७॥
स इत्थं तत्प्राणार्व्वुदनियुत निर्म्मञ्छ्यकिरणो
रणोत्साहं साहङ्कृतिभणितपीयूषपृषतैः ।

---

प्रघट्टनेन नितरां पिष्टा निखिला तनुर्यस्य हे तथाभूत ! आजेर्युद्धस्य नाम्नः सकाशादपि विरम्य मदभ्यर्णात् त्वं अपसर ॥ ५ ॥

श्रीदामा आह । प्रथितं ख्यातं महस्तेजो येषां तथाभूतानां सहसां बलानां धाम्नि श्रीदाम्नि जयश्रीः जयरूपा सम्पत्तिः व्यराजीत् राजिष्यति । अधुना राजत्यपीति कालत्रयवर्त्तित्वं तदपि चपलतां भजसि । मुखमात्र एव आटोपो यस्य ॥ ६ ॥

बकीं पूतनां । तदा गिरिर्गोवर्द्धनः इष्टः पूजितः सन् स्वयमेव वियति आकाशे अस्थात् । अस्तौजसि बलरहिते भवति त्वयि कथं गर्व्वः समभूत् ॥ ७ ॥

तेषां श्रीदामादीनां प्राणार्व्वुदनियुतनिर्म्मञ्छ्यकिरणः स श्रीकृष्णः

समं मित्रैर्द्वित्रैरुपसरिदमन्दं विपुलयन्
क्षणां निन्ये मूर्त्तप्रणयरस एव प्रणयिभिः ॥ ८ ॥

कलापकं ।

इति प्रेष्ठोदन्तामृतसरिति तत्प्राणशफरी
ररक्षेयं क्षिप्त्वा प्रथममुपकण्ठे विलुठतीः ।
सुतस्नेहक्लिन्नव्रजपति-गृहिण्या अभिमते
प्रवृत्तां चक्रे तामथ धृतमुदं मोदकविधौ ॥ ९ ॥

ततः स्नाता चर्च्चांशुकतिलकलीलाम्बुजमक-
र्यलक्तस्रग्वेणीप्रतिसरवतंसाञ्जनवती ।
नासि श्रीमन्मुक्ता चिबुकधृतविन्दुः कुसुमयु-
क्कचा ताम्बूलास्या षड़धिकदशाकल्पमधुरा ॥१०॥

शिरोरत्नग्रैवेयकपदककेयूररसना
शलाकाताटङ्कोज्ज्वलवलयहारोर्जितरुचिः ।

अहङ्कारव्यञ्जकशब्दरूपपीयूष-बिन्दुभिः रणोत्साहं विपुलयन् द्वित्रै-र्म्मित्रैः समं क्षणं निन्ये । उपसरित् यमुनाया निकटे ॥ ८ ॥

इयं चन्द्रनकला श्रीकृष्णस्योदन्तो वार्त्ता तद्रूपामृतसरिति उपकण्ठे समीपे विलुठतीः राधिकायाः प्राणसफरीः क्षिप्ता प्रथमं ररक्ष पश्चात् यशोदाया अभिमते पक्वान्नविधौ राधिकां प्रवृत्तां चक्रे ॥ ९ ॥

षोड़शाकल्पमाह । प्रतिसरः हस्तसूत्रं । अवतंसेत्यस्याकार-लोपः ॥ १० ॥

द्वादशाभरणमाह । ग्रैवेयकं ग्रीवाभूषणं । शलाका चक्री शलाकेति ख्याता । ताटङ्कं कर्णभूषणं कुण्डलादि ॥ ११ ॥

रणन्मञ्जीरश्रीः करपददलोर्म्मिच्छविमती
विरेजे श्रीराधाद्यधिकदशरत्नाभरणिनी ॥ ११ ॥

युग्मकं ।

अयं यामो यामो भवति दिवसान्तः कथमिमं
नयामो यो ऽशाम्यन्नहि युगसहस्रैरपि गतैः ।
विधात्रा किं सृष्टो मम हृदयकुल्माषदलन-
प्रवृत्तेनैवासौ कठिनतरलोठः शठधिया ॥ १२ ॥

इति क्लिद्यन्नेत्रां विधुरवदनां मङ्क्षु ललिता
समारोह्य क्षौमं न्यगददगदङ्कारचरिता ।
त्वमुत्तीर्णा राधे ! कटुतरमभूः खेदजलधिं
दिशं पश्य प्राचीं विशति सखि ! गोधूलिरधुना॥१३॥

अयं यामः दिवसचतुर्थांशः यामो यमसम्बन्धी भवति यतो दिवसस्याप्यन्तो नाशो यस्मात् । कथं इमं यामं नयामः । यो यामगतैरपि युगसहस्रैर्न शाम्यत् । अथवा यामो न भवति किन्तु मम हृदयरूप-कुल्माषस्य कोद्रनिष्कुशितान्नस्य दलने प्रवृत्तेन विधात्रा लोढा इति प्रसिद्धः कठिनतरलोठः सृष्टः ॥ १२ ॥

इति रुदन्नेत्रां दुःखितवदनां राधां आटानी इति प्रसिद्धं क्षौमं मंक्षु शीघ्रं समारोह्य न्यगदत् उवाच । स्याद्दुः क्षौममस्त्रियामित्य-मरः । ललिता कथंभूता, विरहजन्यरोगनाशकचरितं यस्याः । रोगहार्य्यगदङ्कारो भिषग्वैद्यौ चिकित्सके इत्यमरः । त्वं खेदजलधिं उत्तीर्णा अभूः । यतो गोधूली प्राचीदिशं विशति ॥ १३ ॥

न गोधूलिर्भद्रे ! अनुभव भवतीदं विधु-रजो
दृशं तृप्तां दूराद्विशति किमवादीः सखि ! दिशं ।
यदेतत् कण्ठान्मे शमितदवथु प्राणपतगान्
हृदानिन्ये मन्ये तदयि ! मृतसंजीवनमिदं ॥ १४ ॥
मदर्थं त्वत्प्रेयो-वदननलिनस्वेदकणिका
हरन् शैत्यामोदी विपुलकरुणः प्राच्यपवनः ।
अहो ! भाग्यं स्पृष्ट्वा सपदि ललिते ! जीवयति मां
जगत्प्राणो नाम्ना भवति गुणतोऽप्येष नितरां ॥१५
स्मरन्मां दीनां स व्रजतिलक-सूनुः किमधुना
पुरोगाः कृत्वा गा द्रुततरमुपैति प्रणयवान् ।
कथं वास्य-द्रौत्यं भवतु समदोक्षालसगतेः
कथं वा स्फारत्वं त्यजतु स दवीयान् वनपथः ॥१६॥

श्रीराधा आह । इदं विधुरजः कर्पूरधूलिर्भवति । दूरात् शीतलीकरणार्थं मम तृप्तां दृशं विशति । अतः हे सखि ! पूर्वश्लोके दृशमित्यनुक्त्वा कथं दिशं विशतीत्यवादीः । किंवा इदं कर्पूरधूलिर्नभवति किन्तु मृतसञ्जीवनं । यद्यस्मादेतद्रजःशमिताः शान्ता दवथवस्तापा यत्र तद्यथास्यात्तथा प्राणपक्षिणः कण्ठात् हृत् हृदयं आनिन्ये ॥ १४ ॥

श्रीकृष्णस्य वदनकमलस्वेदकणिका हरन् शैत्येन तस्य शरीर सम्बन्धेनामोदी च पूर्वदिक्सम्बन्धो पवनः मां स्पृष्ट्वा जीवयति अतो यथा नाम्ना तथा गुणतोऽपि जगत्प्राणो भवति ॥ १५ ॥

दीनां मां स्मरन् गाः पुरोगाः कृत्वा द्रुततरं उपैति समदोक्षा मत्तवलीवर्द्दास्तेषामिव मन्थरगतेरस्य कथं वा द्रौत्यं भवतु । दवीयान्

मुखाब्जं बिभ्राणो विमलतिलकं वेल्लदलकं
रणद्भृङ्गस्तोमस्तुततुलसिकास्रक्-परिमलः ।
श्रितप्रेङ्खत् पिञ्छारुणदरनतोष्णीष-सुषमो
धुवन् बाधां राधे ! त्वरितमधुनैवैष्यति स ते ॥१७॥

हिही पिङ्गे ! धूम्रे ! धवलि ! शबलि ! श्येनि ! हरिणी-
त्यहो ! तत्तद्वर्णप्रथितमणिमालाजपपरः ।
असंख्या अप्येवं सपदि गणयन्नाह्वयति गाः
स कान्तस्त्वन्नेत्रज्वरभरमुपैष्यन् शमयितुं ॥१८॥

इतो वंशी-ध्वानात् कलय सखि ! राधे ! कलकलं
व्रजे रामाराजेरुदितवितनोर्निर्जिगमिषोः ।
तदग्रे स्वारामे कुसुममिषतो याम जरतीं
प्रतार्य्यैत्युत्कण्ठाचुलुकितधृतिः सा द्रुतमगात् ॥१९॥

---

दूरवर्त्ती वनपथः कथं वा स्फारत्वं त्यजतु । तथाच दुर्भाग्याया मम मृतसञ्जीवनस्याप्यकिञ्चित्करत्वं जातमिति भावः ॥ १६ ॥

ललिता आह । चञ्चलालकं मुखं बिभ्राणः । अथच श्रितश्चञ्चलः पिञ्छो यत्र एवं अरुणवर्णश्चासौ ईषत् कुञ्चितो यः उष्णीषस्तस्य सुषमा यत्र तथाभूतः स कृष्णस्तव बाधां धुवन् अधुना एष्यति । ऊर्म्मिमत् कुञ्चितं नतमित्यमरः ॥ १७ ॥

स तव कान्तः असंख्या अपि गा एवं क्रमेण गणयन् त्वन्नेत्रज्वरं उपशमयितुं उपैष्यन् आगमिष्यन् आह्वयति ॥१८॥

वंशीध्वानात् उदितवितनोः उदितकन्दर्पाया अतएव गृहान्निर्जिगमिषोः रामाश्रेणेः कलकलं कलय । अतस्तासामग्रे स्वीयारामे याम ॥ १९ ॥

त्वया दत्तेनालं श्रवणमनु पुष्पेण यदिह
स्वयं दूराद्वंशीध्वनिरसवतंसो ऽलगदयं ।
पतामि त्वत्पादे सखि ! वकुलमाले ! जहिहि मा-
मितो गत्वा कृष्णाम्बुद-घनरसैः स्यां शिशिरिता ॥ २०

प्रियस्निग्धश्यामाञ्जनरस इतोऽग्रे विपिनतः
समेत्येतं धास्ये निजनयनयोः संज्वरहरं ।
किमानैषीर्भस्म त्वमिदमहहानज्मि न दृशा
वनेनेति श्यामा त्वरितमुपराधं वनमगात् ॥ २१ ॥

युग्मकं ।

विलम्बं नो भद्रे ! कुरु जहिहि चन्द्रावलि ! रुजं
न धन्ये ! मान्थर्य्यं कलय कमले ! यात्र सदनात् ।
कथं पालि ! क्राम्यस्युपसर हरेरङ्गसुषमा-
मृते जीवेत्याल्यो व्रजमृगदृशां सम्भ्रममधुः ॥ २२ ॥

---

अथ श्यामापि उपराधं राधायाः समीपं वनमगादिति द्वितीय-श्लोकस्थेनान्वयः । हे वकुलमाले ! त्वया श्रवणे दत्तेन पुष्पनिर्म्मितावतंसेनालं यद्यस्मादिह श्रवणे वंशीध्वनिरसरूपोऽवतंसः स्वयमेवालगत् । शिशिरिता शिशिरीकृता अहं स्यां ॥ २० ॥

विपिनतः श्रीकृष्णरूपाञ्जनं समेति एतमेव धास्ये । त्वन्तु गृहस्थितं इदं भस्मरूपमञ्जनं नेत्रे दातुं किं आनैषीः । अहं तु अनेन भस्मना दृशो न आनज्मि ॥ २१ ॥

भद्रायाः काचित् सखी भद्रामाह । हे भद्रे ! विलम्बं न कुरु । एवमेव सर्व्वत्र सम्बोधनान्तपदं यूथेश्वरीवाचकं । इति आल्यः सख्यः व्रजमृगदृशां सम्भ्रममधुर्धारयामासुः ॥ २२ ॥

इतो हम्वाहम्वाध्वनिभिरुपगोष्ठं निजसुतान्
ह्वयन्तीर्धावन्तीरखिलसुरभीर्वीक्ष्य सहसा ।
वलः श्रीदामाद्यैः सह सहचरैः सत्वरगति-
र्विषादाब्धेरम्बाः प्रथममुदहार्षीत् पुरि विशन् ॥२३

इतः प्रेङ्खत्प्रान्तप्रमदमदभारालसदृशा
कृशाङ्गीरानङ्गीष्वतिरभसघूर्णासु विकिरन् ।
चलद्दामारामानुपमसुमनःकन्दुकपरि-
ग्रहोद्धेपक्षेपप्रचितनवलावण्यजलधिः ॥ २४ ॥

रुचाध्वानं नीलोत्पलवनमयीकृत्य दृगलि-
व्रजानां कान्तालेर्मधुररससत्रं विरचयन् ।

श्रीकृष्णस्य प्रेयसीवर्गसहितमिलनसमयमालक्ष्य किञ्चिन्मिषेण वलदेवश्रीदामादीनां पुरि प्रवेशमाह । निजवत्सान् हम्बाध्वनिभिराह्वयन्तीः अथच धावन्तीः सुरभीरालक्ष्य श्रीदामाद्यैः सह वलदेवः पुरि विशन् सन् विषादसमुद्रात् सकाशात् अम्बाः मातृः प्रथमं उदहार्षीत् उद्धारं चकार ॥ २३ ॥

चलत् प्रान्तभागो यस्या एवं भूतया प्रमदमदभाराभ्यां अलसदृशा करणेन कृशाङ्गीः व्रजसुन्दरीः आनङ्गीषु अनङ्गसम्बन्धिनीषु अतिहर्षघूर्णासु विकिरन् सन् इतः प्राप्तः । कथम्भूतः ।आरामसम्वन्धिसुमनोभिर्निर्म्मितस्य कन्दुकस्य अन्यस्मात् सख्युः सकाशात् परिग्रहः एवमुद्धेपः कम्पः प्रक्षेपश्च तैः प्रचितः व्याप्तः नवलावण्यरूपजलधियेन । पक्षे रामाणां स्त्रीणां शोभनमनोरूपकन्दुकस्य ॥ २४ ॥

रुचा स्वकान्त्या अध्वानं नीलोत्पलवनमयीकृत्य कान्ताश्रेनेनेत्ररूपभ्रमरश्रेणीनां मधुररससत्रं विरचयन् व्रजभुवं अलञ्चकार ॥ २५ ॥

व्रजन्मन्दं मन्दं मुखररसनानूपुरमलं
चकार श्रीकृष्णः प्रियसखवृतो गोकुलभुवं ॥ २५ ॥

अलं ह्रीदम्भेन प्रकटय चलद्भृङ्गविकस-
द्दृगब्जं देवोऽग्रे पशुपतिरसावेति वरदः ।
अनेनैतत्पूजां वितनु वितनु द्रोहपटल-
प्रशान्त्यै विद्धीमं त्वमुशति ! राधेति सुभदं ॥२६॥

त्वमेवामुं श्यामे ! त्वरितमुपधाव प्रकटित
द्युतिं हृद्याम्भोजस्तवकमुपनीयार्हणकृते ।
मुहूर्त्तेऽस्मिन् कामं सुमुखि ! यदि सम्पादयति ते
महेशोऽयं मज्जाम्यमृतजलधौ तत् स्वयमहं ॥२७॥

मृषा मा त्वं वादीः कलय ललिते ! वल्लिपटलीः
समुत्फुल्लास्त्यक्त्वा मधुकरयुवा घूर्णति कुतः ।

---

श्यामाह । चलद्भृङ्गस्थानीयेनालकेन लसद्दृगब्जं प्रकटय । अग्रे पशुपतिर्महादेव पति । पक्षे पशूनां पतिः श्रीकृष्णः । अनेन नेत्रकमलेन । वितनु विस्तारय । वितनुः कन्दर्पः तत्सम्बन्धिद्रोहपटल-प्रशान्त्यै इमं देवं अतिशुभदं विद्धि ॥ २६ ॥

श्रीराधा आह । त्वमिति । हृद्यं मनोज्ञं । पक्षे हृदि भवं कमल-कोरकस्थानीयस्तनद्वयं अर्हणार्थं उपानीय अमुं महादेवं त्वमेव उपधाव । अस्मिन् शुभमुहूर्ते महेशस्तव कामं पूजितः सन् यदि सम्पादयति तदा तद्दर्शनात् अमृतजलधौ अहं स्वयमेव मज्जामि ॥ २७ ॥

श्यामाह । ललिते ! अयं महेशः कस्याः पूजनं गृह्णातीत्यत्र त्वमेव प्रमाणं मृषा मा वादीः पश्य यदि अन्यासां पूजां गृह्णाति तदा कथं व्रज-

सखि ! श्यामे ! सत्यं न्यपतदतुलामोदसरितो
भ्रमौ यन्मालत्यास्तदयमित इष्टे न चलितुं ॥२८॥
यदेत्थं संलापः प्रणयसरसी-घोरणिरिव
श्रुती कृष्णस्याराद‌शिशिरयदानन्दपृषतैः ।
तदा श्रीराधास्यं मदिरधृतलास्यं दरदृशो-
रवाप्याग्रं तस्य द्रुतमधिलतं निह्नुति मगात् ॥ २९॥

कलापकं ।

पिपासार्त्तौ हा मे दृगनघचकोराविह सुधा-
मुपेतामालक्ष्योन्नतविवृतचञ्चू अभवतां ।
अरे ! धातर्धिक् त्वां बलदघ ! यदाभ्यां सपदि तां
प्रदायैवाह्वार्षीरिति हृदि तदोचे गिरिधरः ॥ ३० ॥

सुन्दरोरूपाः समुत्फुल्ला वल्लिपल्लवैस्त्यक्त्वा तव सखीमप्रेक्ष्य घूर्णति । ललिताह । यस्मात् राधिकारूपमालत्याः अतुलामोदनद्याः भ्रमौ न्यपतत् तस्मात् अयं भ्रमरः इतः अन्यत्र चलितुं न इष्टे न समर्थः ॥२८॥

आसां इत्थं संलापः कीदृशः । प्रणयरूपसरोवरस्य घोरणिः जलनिःसरणार्थं प्रणालिका इव अमृतबिन्दुभिः श्रीकृष्णकर्णौ यदा अशिशिरयत् तदैव राधिकाया आस्यं कर्तृ तस्य श्रीकृष्णस्य ईषद्दृशोरग्रं अवाप्य लतायां निह्नुतिमगात् ॥ २९ ॥

पिपासार्त्तौ मम निरपराधचकोरौ निकटप्राप्तां सुधां आलक्ष्य उन्नतविवृतचञ्चू अभवतां अरे ! धातः ! हे बलदघ ! महापराधिन् ! ॥ ७० ॥

विमुञ्च त्वं लज्जेक्षणामपि दृशः कोणमपि मे
यथा तेनैवास्यं सकृदपि विलिह्यामघरिपोः ।
प्रसीदानन्दाभ्र ! त्वमपि नहि रुन्धीममतनो !
नमस्ते मां मा कम्पय चरणयोस्तेऽस्मि पतिता ॥ ३१ ॥

इति प्रेम्णा प्रोच्य स्वगतमभिधाष्र्ट्यं पुनरिदं
कथं कुर्य्यामित्थं व्यमृशदपि यावद्वरतनुः ।
विकृष्यालयस्तावत् पटिम-भरतो वल्लिकुहरा-
दुपानीय प्रेष्ठाननचकितदृष्टिं व्यधुरिमां ॥ ३२ ॥

अपाङ्गाभ्यां यूनोर्नभसि यमुना धातृतनया-
रसैरेकीभूता सुरसरिदुता चित्रमुदगात् ।

---

हे आनन्दमेघ ! इमं दृशोः कोणं मा रुन्धि । हे अतनो ! कन्दर्प ! ॥ ३१ ॥

इति स्वगतं प्रोच्य स्वयमुद्यम्य दर्शनप्रदत्तरूपधार्ष्ट्यं कथं कुर्य्यामिति यावद्वरतनुः श्रीराधा व्यमृशत् तावत् आल्यः अत्र निर्जन-स्थले कुलाङ्गनानां स्थितिर्न योग्या किन्तु गृहं याम इत्यादि पटिमभरतो विकृष्य वल्लिकुहरात् उपानीय श्रीकृष्णस्यानने इमां राधां चकित दृष्टिं व्यधुः ॥ ३२ ॥

यूनोः राधाकृष्णयोः श्यामरक्तवर्णाभ्यां अपाङ्गाभ्यां आकाशे श्रीकृष्णस्य रक्तांशघटितकटाक्षरूपानीथैः सरस्वतीरसैर्जलैरेकीभूता राधायाः श्यामांशघटित कटाक्षरूपा यमुना उभयोः श्वेतिमांशघटित कटाक्षरूपा सुरसरित् गङ्गा तया उता ग्रथिता सती आश्चर्य्यं यथास्या-त्तथा उदगात् । यत्र तादृशयमुनायां एतयोर्हृदयकरिणौ निमग्नौ आस्तां कथम्भूतायां उभयतः आगमनादेव उभयतः प्रवाहायां । पुनः

निमग्नौ यत्रैतद्धृदयकरिणौ द्रागुभयतः
प्रवाहायामास्तां विकचकमलालीक्षणततौ ॥ ३३ ॥
ततो निष्पन्दाङ्गं रसिकमिथुनं तत्प्रियसुहृ-
द्गणो वर्त्म-प्रान्तादितरजनशङ्काकुलमनाः ।
विकृष्याराक्तत्पुरसरणिमानीय रभसात्
प्रबुद्धं प्रत्याशासितहृदमकार्षीत् पटिमभिः ॥३४॥
जनन्या वात्सल्यं तनुमदिव पित्रोः किमसवो
वहिष्ठाः श्रीकृष्णः स्वसदनमियायेति विदुषी ।
विशाखा प्राहैषीत् सपदि तुलसीमञ्जरिमथ
व्रजेश्वर्यै दातुं तदभिमतपीयूषवटिकाः ॥ ३५ ॥
बलात् पाणिं नीव्यामहह मम धित्सत्ययमयं
विशाखे ! त्वं वीथ्यां कलयसि किमेतत् कुतुकिनी ।

---

कथम्भूतायां विकचकमलानामिव आलोक्षणानां सखीनेत्राणां ततिर्यत्र तस्यां । पक्षे विकचानां कमलश्रेणीनां क्षणततिरुत्सवपरम्परा यत्र । यद्वा विकचकमलेषु अलीनां क्षणततिर्यत्र ॥ ३३ ॥

वहिरङ्गजनशङ्काकुलमनाः तयोराधाकृष्णयोः सुवललिताद्रिप्रियसुहृद्गणः आनन्दमूर्छया निष्पन्दाङ्गं रसिकमिथुनं ततो वर्त्मप्रान्तादाकृष्य रभसात् वेगात् स्व स्व पुरसरणिं आनीय मूर्छातः प्रबुद्धं मिथुनं प्रत्याशया बद्धहृदयमकार्षीत् । षिञ बन्धने ॥ ३४ ॥

जनन्या यशोदायाः पित्रोर्नन्दयशोदयोर्व्वहिष्ठाः प्राणा इव श्रीकृष्णः स्वसदनं इयाय इति । विदुषी विशाखा पीयूषवटिकाः व्रजेश्वर्यै दातुं तुलसीमञ्जरिं प्राहैषीत् प्रेषयामास । वल्लीर्मञ्जरिः स्त्रियामित्यभिधानात् मञ्जरी मञ्जरिश्च ॥ ३५ ॥

यदुच्चैः क्रोशन्तीमपि न हि जहात्येष बत मां
सतीनां मूर्द्धन्यां तदिह कथयार्य्यां द्रुतमितः ॥३६॥
विलप्यैवं राधा दरविकसिताक्षी समुदित-
क्लमा प्रस्विन्नाङ्गी विततवथुर्वेपथुमती ।
तनूं वीक्ष्य स्वीयां कुसुमशयनन्यस्तसुषमां
विलक्षालीराह स्मरपरिभवान्नम्रदगिरा ॥ ३७ ॥
क्व मे प्रयान् वीथ्यां चकर किमहं निष्कुटभवं
किमेतद्वेश्माहो ! सखि ! गुरुपुरस्थं भवति किं ? ।
इयं सन्ध्या प्रातः किमजनि किमाहो ! स्विदभव-
न्निशीथः किं निद्राम्यहह किमु जागर्म्मि वद तत् ॥३८
त्वमारामाद्ग्रामाम्बुजमुखि ! समायाः प्रियतमो
रहःकुञ्जे स त्वामरमयदथागात् स्व भवनं ।

श्रीराधा उन्मादेनात्मानं श्रीकृष्णेन बलात् क्रियमाणं मत्वा सखीं प्रत्याह । बलादिति ॥ ३६ ॥

विरहज्वालाशान्त्यर्थं सखीरचितकुसुमशयनन्यस्तसुषमां तनुं वीक्ष्य विलक्षा अहं ग्रामाद्बहिः पुष्पवाटिकायां श्रीकृष्णेन सङ्गता आसं कथमत्र पुष्पशय्यायां विद्यमानेति विस्मयान्विता सती आलीराह । विलक्षो विस्मयान्विते इत्यमरः ॥ ३७ ॥

अहं वीथ्यां किं चकरेति स्वस्य वैपरीत्य सम्भावनया प्रश्नः । एतद्गृहं किं तत् पुष्पवाटिकाभवं ? इयं किं सन्ध्या ? प्रतिदिनं विहारानन्तरं गृहागमनोचितं प्रातः किं अजनि ? ॥ ३८ ॥

प्रेमोन्मत्तां तां सखी परिहसति । हे अम्बुजमुखि ! त्वं आरामात्

चिरात् खेदं पित्रोर्भृशमुपशमय्यैष्यति पुन-
र्व्विधुः स त्वन्नेत्रोत्पलयुगविकाशार्थमधुना ॥३९॥
यत् प्रागासीद्व्रजपुरसरोर्जीवनाद्विच्युतं द्रा-
गुग्रैस्तापैर्व्विरहहरविनोत्पादितान्तर्व्विदारं ।
कृष्णाम्भोदे मिलति रभसादेतदानन्दधारा-
सारैः पूर्णं त्वरितमभवत् फुल्लपङ्केरुहास्यं ॥ ४० ॥

इति श्रीभावनामृते महाकाव्ये आपराह्लिकलीला-
स्वादनोनाम षोड़शः सर्गः ।

---

स्वधाम समायाः श्रीकृष्णोऽपि कुञ्जे त्वां अरमयत् । अथ स्वभवनमगात् । विधुः श्रीकृष्णः चन्द्रश्च ॥ ३९ ॥

यत् व्रजरूपसरः श्रीकृष्णरूपजीवनात् जलात् विच्युतं एवं श्रीकृष्णविरहरूपसूर्य्येण तापैः करणैरुत्पादितान्तर्व्विदारं प्रागासीत् । फुल्लपङ्केरुहतुल्यानि व्रजवासिनां मुखानि यत्र । सरोवर पक्षे पङ्केरुहाणां आस्या स्थितिर्यत्र । स्यादास्या त्वासना स्थितिरित्यमरः ॥ ४० ॥

समाप्तोऽयं षोड़शः सर्गः ।

## सप्तदशः सर्गः ।

द्वौ भास्वन्तौ विधिरतुलयत् पद्मिनी-नित्यबन्धू
कृष्णास्तत्रावनिमयमयात् पाण्डरः खं लघिष्ठः ।
धातैवाप प्रथितमधिकं किन्तु मौढ्यं स एकः
को वा हैमं गणयति सुधीः शर्षपार्द्धेन सार्द्धं ॥१॥
उद्यन्नक्तंदिनमपि जगल्लोचनानन्द-धारा-
निर्म्माणार्थं स्थिरचर-ततेः प्रेमधर्म्मप्रकाशी ।
माधुर्य्याढ्यैर्मृदुलकिरणो गोपरार्द्धप्रचारी
हारी लोकान्तरसुतमसामभ्रविभ्राजितश्रीः ॥ २ ॥

---

श्रीकृष्णस्य गोष्ठप्रवेशसमये स्वर्गाङ्गनानां परस्परोक्तिमाह । द्वाविति । मन्दाक्रान्ता छन्दः । श्रीकृष्णसूर्य्यस्वरूपौ द्वौ भास्वन्तौ पद्मिनीनित्यबन्धुस्वरूपसमधर्म्मं दृष्ट्वा विधिरतुलयत् । पाण्डरः श्वेतः सूर्य्यः आकाशं अयात् यतो लघिष्ठः । अत्र तोलने स एको धाता एव विस्तृतं अधिकं मौढ्यं आप । तत्र हेतुः को वेति ॥ १ ॥

विधातुर्मौढ्ये तयोर्वैधर्म्यरूपहेतुमाह । लोचनानामानन्दधारा-निर्म्माणार्थं नक्तंदिनं व्याप्य उद्यन् । सूर्य्यस्तु लोचनमात्रप्रकाशार्थं दिनमात्रं व्याप्य उद्यन् । स्थिरचरेति । सूर्य्यस्तु मनुष्यस्यैव वर्णाश्रमधर्म्मप्रकाशी । मृदुलेति । स तु चण्डकिरणः । सूर्य्यस्तु गो-सहस्रप्रचारी । किरणपरोऽपि गो शब्दः । अतएव सहस्रगुरिति तस्य संज्ञा । लोकानां जनानां अन्तःकरणस्य सूक्ष्मभूतानां वासना

कष्टाम्भोधेः परमतरणिर्भीरुहृच्चक्रवाक-
द्वन्द्वस्यारात् करवितरणेनावनेर्भाग्य-राशिः ।
मित्रश्चित्रातुलगुण-खनिः किं गवाधीश्वराशा-
पूर्त्यै गच्छन् हतभगदृशो हा जिहासत्ययं नः ॥३॥
इत्थं स्वःस्त्रीजन-कलकलैर्लाघवं स्वं विवस्वान्
मेने श्रोत्रामृतमिव कृती यत्तदाशानुगामी ।
मूढाऽमंस्तात्मनि वरुणादिङ्नागरी सौभगं य-
न्मन्ये तेनाप्रकटयदियं हन्त ! मिथ्यानुरागं ॥ ४ ॥
कलापकं ।

रूपाणामपि तमसां हारी । सूर्य्यस्तु लोकानां वाह्यतमोमात्रहारी । अभ्रस्येव अभ्रादपि वा विभ्राजिता श्रीर्यस्य ! सूर्य्यस्तु अभ्रेण विगत भ्राजिता आच्छादिता शोभा यस्य ॥ २ ॥

सूर्य्यस्तु भीरुहृत् विरहभययुक्तं हृदयं यस्य तस्य चक्रवाकद्वन्द्वस्य किरणदानेन कष्टसमुद्रस्य नाममात्रेणैव तरणिः न तु परमतरणिः । यतो रात्रिगतविरहदुःखस्य नाशासामर्थ्यात् । स तु भीरूणां स्त्रीणां हृत्स्थस्य चक्रेत्यतिशयोक्त्या स्तनद्वयस्य हस्तदानेन कष्टसमुद्रस्य परमनौकारूपः । गवाधीश्वरयोर्नन्दयशोदयोर्वाञ्छापूर्त्त्यै गच्छन् अयं कृष्णः हतभगदृशो नोऽस्मान् किं जिहासति । पक्षे गवाधीश्वरो वरुणस्तदाशायास्तद्दिशः पालनाय । गोशब्दोऽत्र पक्षे जलवाची ॥ ३ ॥

इत्थं स्वर्गस्त्रीणां कलकलशब्दैर्जातं स्वीयं लाघवं कृती सूर्य्यः श्रोत्रेन्द्रियस्यामृतमिव मेने । तत्र हेतुर्यद्यस्मात् तस्मिन् श्रीकृष्णे या आशा अभिलाषस्तदनुगामी । पक्षे नन्दीश्वरे गन्तुं श्रीकृष्णस्य या आशा पश्चिमदिक् तदनुगामी । स्वर्गाङ्गनोक्तस्य गवाधीश्वराशापूर्त्त्यै इति शब्दस्य पश्चिमदिक्पालनायेत्यर्थं मत्वा पश्चिमदिक्स्वरूपा नागरी मूढा प्रकृतार्थमजानती कृष्णस्यागमनसम्भावनया आत्मनि

कृष्णोऽगच्छद्यदनुविशिखं हर्म्यगस्त्रीजनेऽश्रु
स्तिम्यत्पुष्पाञ्जलिकिरि दरोदञ्चयन् लोचनान्तं ।
स्वः-सुन्दर्य्यः पुलकितनवोऽमंसत स्व-स्व-भाग्यं
तेन स्थाने क्वचन सुदृशां मुग्धता दोग्धि मोदं॥५॥
याते पित्रोर्नयनपदवीं तत्पुरान्तःप्रविष्टे
तद्वात्सल्यामृतजलनिधौ मज्जति श्रीमुकुन्दे ।
तं ज्ञात्वाक्ष्णोरविषयमभूद्भानुरङ्गारतुल्य-
स्तत्प्राप्त्यर्थं किमनु लवणाम्भोधिमासीन्मिमङ्क्षुः६
तद्विश्लेषज्वरशमलवे ऽप्यक्षमा यर्ह्यभूवन्
गान्धर्व्वाया विसकिसलयोशीरचन्द्राम्वुजाद्याः ।

यत् सौभगं अमन्यत तेनैव हेतुना अन्तःकरणस्य मिथ्यानुरागमप्रकटयत् । अतएव सन्ध्याकाले पश्चिमदिशि रक्तवर्णं दृश्यते ॥ ४ ॥

हर्म्यगतस्त्रीजने श्रीकृष्णोपरि अश्रु स्तिम्यत् पुष्पाञ्जलिकिरि सति । पुष्पाञ्जलीन् किरतीति पुष्पाञ्जलिकिः किरन्तं तस्मिन् । सजलपुष्पस्पर्शेन श्रीकृष्णः लोचनान्तमीषदूर्द्ध्वं मञ्चयन् अनुविशिखं गलीति प्रसिद्धायां प्रतिविशिखायां यदगच्छत् तेनैवास्मान् पश्यतीति मत्वा स्वर्गस्थसुन्दर्य्यः स्वभाग्यममंसत । इदं स्थाने युक्तमेव यतः सुदृशां कचन विषये मुग्धता अज्ञानमपि आनन्दं दोग्धि ॥ ५ ॥

पित्रोरन्तःपुरं प्रविष्टे श्रीकृष्णे वात्सल्यसमुद्रे मज्जति सति सूर्य्यस्तं नेत्रयोरविषयं मत्वा अनुरागेणाङ्गारतुल्यः सन् पुनस्तत् प्राप्त्यर्थं लवणसमुद्रं मिमंक्षुर्मग्नेच्छुरासीत् ॥ ६ ॥

श्रीकृष्णस्य विश्लेषज्वरशान्तिलवेऽपि यर्हि एते अक्षमाः अभूवन्

काऽप्यागत्य व्यधित ललितादेशतस्तर्हि तस्या-
स्तद्वृत्तान्तामृतरसपृषत्-सेचनं कर्णरन्ध्रे ॥ ७ ॥
संज्ञां लब्ध्वा हरिणनयना सम्भ्रमादुत्थितोचे
तत्राश्रान्तं श्रवणमरुभूरालि ! धन्या ममाभूत् ।
अस्यां स्वप्नेऽन्वभवमधुनापूर्वपीयूष-वृष्टिं
धिन्वत्येषा तदिह सखि ! मां शीतलीवोभवीति॥८॥
आयातेयं सुमुखि ! तुलसीमञ्जरी गोष्ठराज्या
गेहात् सख्युस्तव यदवदद्वृत्तमस्मादजागः ।
इत्युक्ताल्या वद पुनरपीत्यम्बुजाक्ष्यादिदेश
प्रेयःसायन्तनगुणकथां प्राह मध्येसभं सा ॥ ९ ॥
तातस्याक्ष्णोः पदमुपययावादितो गोपुराग्रे
कृष्णो दोर्भ्यां पुलकिततनोरुद्गृहीतोऽथ सद्यः ।

---

तदानीमेव नन्दीश्वरात् कापि आगत्य ललितानिदेशेन राधायाः कर्ण-रन्ध्रे श्रीकृष्णस्य वृत्तान्तामृतबिन्दुसेचनं व्यधित ॥ ७ ॥

हे आलि अश्रान्तं निरन्तरं तत्र मम श्रवणरूपा मरुभूमिः धन्या अभूत् । अस्यां मरुभुवि अधुना स्वप्ने अपूर्वामृतवृष्टिं अहमन्वभवं । एषा मरुभूमिः मां धिन्वती सती स्वयं शीतलीवोभवीति अतिशयेन पुनःपुनर्भवति ॥ ८ ॥

तव सख्युः श्रीकृष्णस्य यद्वृत्तान्तमवदत् तस्मादेव त्वं अजागः मूर्च्छितः प्रबुद्धा बभूव । आल्या इत्युक्ता सा अम्बुजाक्षी राधा पुनरपि तद्वृत्तान्तं वद इत्यादिदेश । सा तुलसीमञ्जरी मध्येसभं सभाया मध्ये ॥ ९ ॥

निष्पन्दस्योरसि चिरमयं भ्राजते स्म स्थिराङ्गः
कैलाशान्तःसरसि विकशन्नीलपद्मं यथैकं॥ १० ॥
उष्णीषाग्रं दरविघटयन्नश्रुभिः सिच्यमानं
शीर्षं जिघ्रन् पिहितमकरोदास्यमस्य व्रजेशः।
मन्ये चन्द्रं विमलशरदम्भोद आवृत्य तस्य
ज्योत्स्ना-जालैः स्वमलमकरोदात्मतापापनुत्यै॥११॥
यान्ती गेहादजिरमजिराद्गेहमायान्त्यथो या
शुष्यद्वक्त्रानयदतिरुजैवान्तिमं याममह्नः।
सा गोष्ठेशा तरणि-तनये नेत्रयुग्मात् कुचाभ्यां
जह्नोः कन्ये असृजदिव तं प्रेक्ष्य सूनुं समीपे ॥१२॥
नाङ्के कर्त्तुं वलितजड़िमा सन्नकण्ठी न वार्त्तां
प्रष्टुं नापीक्षितुमपि यदि प्राभवत् साश्रुपूर्णा।

कैलाशस्थानीयो नन्दः सरोवरस्थानीयं वक्षः ॥ १० ॥

वक्षःस्थलस्थितस्य श्रीकृष्णस्य उष्णीषाग्रं ईषद्विघटयन् शीर्षं जिघ्रन् व्रजेशः मस्तकघ्राणसमये स्वमुखेन श्रीकृष्णस्य मुखं पिहितं आच्छादितमकरोत्। अत्रोत्प्रेक्षामाह। जलाभावेन सूर्य्यातपतप्तः शरत्कालीनश्वेतमेघः चन्द्रस्य ज्योत्स्नाजालैः स्वीयतापदूरीकरणाय चन्द्रं आवृत्य स्वं अलं अकरोदिति अहं मन्ये ॥ ११ ॥

सा यशोदा श्रीकृष्णस्य विरहेण गेहात् अजिरं यान्ती अजिरात् गेहं यान्ती सती अतिरुजा अतिकष्टेनैव दिवसस्यान्तिमं याममनयत्। सा समीपे श्रीकृष्णं प्रेक्ष्य नेत्रद्वयात् तरणितनये द्वे यमुने असृजत्। एवं स्तनाभ्यां जह्नोः कन्ये द्वे गङ्गे असृजत् ॥ १२ ॥

सा यदि अङ्ककरणवार्त्ता प्रश्नदर्शनादिकं कर्त्तुं मिथ्याद्दिषु न प्राभवत्

दीपावल्या कलितललितारात्रिकं राममातै-
वास्याः क्रोड़े करधृतमुपावेशयत् तर्हि कृष्णं ॥१३॥
किं वात्सल्यामृत-जलनिधिं जन्मभूमिं विधुस्ता-
मध्यास्ताहो ! किमु निजखनिं प्रेममाणिक्यराजः ।
किं कस्तूरीद्रवचिततनोः स्नेहपीयूषपुत्र्याः
कुक्षेर्भूषाहरिमणिरभादर्पितः साधु धात्रा ॥ १४ ॥
यावन्मामाकलयजननीत्यक्षि-धारां स्वहस्ते-
नोन्मृज्यास्याः स मुदमतनोन्नीतिहंसी-तड़ागः ।
गोधूलीनां ततिमधितनु क्षालयद्भिः पयोभिः
स्तन्यैरेव व्यरचि रुचिरं लालनं तस्य तावत् ॥१५॥

---

तदा कलितं रोहिण्या कृतं आरात्रिकं यस्य तं श्रीकृष्णं करे धृत्वा रोहिण्यैवास्या यशोदाया अङ्के उपावेशयत् ॥ १३ ॥

विधुः कृष्णः चन्द्रश्च वात्सल्यामृतसमुद्ररूपजन्मभूमिं किं अध्यास्त । किम्वा स्नेहरूपपीयूषस्य श्यामवर्णकस्तूरीद्रवेण युक्ता या पुत्तलीतिख्याता पुत्री तस्याः कुक्षेः विधात्रा अर्पितः भूषारूपहरिमणिः अभात् ॥ १४ ॥

हे जननि ! मां आकलय इत्युक्त्वा मातुरक्षिधारां स्वहस्तेन उन्मृज्य अस्याः मातुः स श्रीकृष्णः यावत् मुदं अतनोत् । तस्यैतदुचितमेव यतो नीतिरूपहंस्यास्तड़ागस्वरूपः । तावत् लालनं कर्तुमसमर्थाया यशोदायास्तन्यैरेव पयोभिर्लालनं व्यरचि । कथं भूतैः गोधूलीनां ततिं अधितनु तनौ क्षालयद्भिः ॥ १५ ॥

आनन्दोर्म्मिष्वनुपरमणीष्वप्यमूं चेतयन्ती
कृत्ये प्रावर्त्तयद्भिमते यर्हि वात्सल्यलक्ष्मीः ।
तर्ह्येवासौ स्वतनय-तनुं पाणिनामृज्य दासी-
रस्याभ्यङ्गस्नपनलपनोन्मार्जनादौ न्ययुङ्क्त ॥१६॥

वत्स ! स्वच्छप्रणय ! सदने वर्त्तते या निषण्णा
मन्ये नास्यां तव दरदयाप्युद्भवेदाकुलायां ।
यातस्तात ! स्वकुलकमल ! त्वं वनं यत् स्मृतेर-
प्येनां सङ्गे न हतजननीमानयस्येकदापि ॥१७॥

अह्नि प्राप्तेऽप्युपरममिहात्यन्तदैर्घ्येऽपि जात !
त्वं नायासि स्वगृहमदराम्रेडितोऽपि स्वपित्रा ।
क्षामो व्यामोहयसि यदमून् क्षुत्पिपासासहः स्व-
द्रष्टॄन् वन्धुंस्तदलमसुभिर्मातुरेतैः कठोरैः॥ १८ ॥

---

आनन्दोर्म्मिषु अनुपरमणीषु उपरामाभावं प्राप्तासु अनिवृत्तासु सतीस्वित्यर्थः । यदा वात्सल्यलक्ष्मीः अमूं यशोदां चेतयन्ती सती वात्सल्योचितकृत्ये प्रावर्त्तयत् तदा असौ यशोदा, दासीः अस्य अभ्यङ्गादौ न्ययुङ्क्त ॥ १६ ॥

हे स्वच्छप्रणय ! हे वत्स ! गृहे निषण्णा या माता वर्त्तते तस्यां । हे स्वकुलकमल ! वनं यातस्त्वं स्वसङ्गे नेतुमुचितां हतजननीं स्मृतेरपि सङ्गे न आनयसि ॥ १७ ॥

अत्यन्तदैर्घ्येऽपि अह्नि उपरमं प्राप्तेऽपि त्वं पित्रा आम्रेडितो द्विस्त्रिरुक्तोऽपि गृहं नायासि । यतस्त्वं क्षुत्पिपासासहः अतःक्षामः कृशः सन् वन्धून् मोहयसि ॥ १८ ॥

अम्बावेहि त्वमतिचटुलं प्लावितं खेलनाब्धौ
बालालीभिर्मम सवयसं स्वं च न स्मर्त्तुमीशं ।
शिष्टोऽस्म्येको न यदिममितोऽवारयिष्यं तदायं
नैष्यत् संप्रत्यपि गृहमिति प्राह राज्ञीं बटुः सः ॥१९

तथ्यं ब्रूषे कथमपि न मे मन्यमाना निषेधं
बाला एव प्रखरनखराः प्रत्यहं बाहुयुद्धे ।
नीलाम्भोजादपि मृदुतलादङ्गयन्त्यस्य गात्रं
तत् किं कुर्वे चपलतनये नात्र कोऽप्यस्त्युपायः॥२०

इत्थं तत्संलपितमपि तत्राहमाकर्णयन्ती
कृत्यं तात्कालिकमकरवं यत्तयादिष्टमिष्टं ।
रोहिण्यागादथ रसवतीं पौर्णमासी किलिम्बा
धात्री गार्ग्यादिभिरपि सहालालयत् सा स्व-सूनुं॥२१

स्नातः पीताम्बरभृदलिकप्रान्तसंनद्धकेशः
क्लृप्तां चर्च्चां मलयजरसैर्वैजयन्तीं च बिभ्रत् ।

---

मधुमङ्गल आह। अम्ब ! त्वं अवेहि। 'बालकानां पक्षे स्त्रीणां श्रेणीभिः खेलनाब्धौ प्लावितं मम सवयसं आत्मानं स्मर्त्तुं न ईशं समर्थं किं पुनस्त्वां अत एवंभूतं इमं शिष्टोऽहं यदि इतः खेलनात् न अवारयिष्यं तदा अयं संप्रत्यपि सन्ध्याकालेऽपि गृहं न ऐष्यत् ॥ १९ ॥

सरस्वती पक्षे बाला स्त्रियः । नीलकमलादपि मृदु गात्रं ॥ २० ॥

इत्थं अनेन प्रकारेण तस्या यशोदायाः संलपितं आकर्णयन्ती अहं यशोदया आदिष्टं कृष्णस्य तात्कालिकं तैलाभ्यङ्गादि कृत्यं अकरवं । धात्री मुखरा ॥ २१ ॥ २२ ॥ २३ ॥

काञ्ची-हारा-ङ्गद-वलयवान् कौस्तुभी नूपुराढ्य-
स्ताटङ्क-श्रीरमलतिलकस्तर्हि कृष्णो व्यराजीत् २२

सार्द्धं मित्रैः सपदि विहितस्नानभूषानुलेपं
रामं कृष्णं वटुमपि सुखेनोपवेश्य व्रजेशा ।
आदाविष्टं सुरभिशिशिरं पानकं पाययित्वा
नानाभेदं त्रिविधमथ सा भोजयामास भक्ष्यं ॥२३॥

एतद्वोऽतिप्रियमिति यदा सीधुकेल्यादि तेभ्यो
युष्मत्पङ्क्तं वटकपटलं पञ्चभेदं ददौ सा ।
सस्नौ पञ्चेन्द्रियमपि तदैवाशु तेषां प्रमोदै-
स्तत्सौरभ्यप्रदिमसुरसाख्यानरूपामृताब्धौ ॥२४॥

एतद्भ्गोऽप्यनुभवपथं यस्य भाग्यादयासी-
त्तस्मै स्वर्गो जननि! किमितो रोचते वापवर्गः ।
धिग् धातारं यदयमुदरं नैव चक्रे विभुं मे
ये मादेहीत्यभिदधति तान् सागसोऽत्र ब्रवीमि ॥२५

एतद्वटकं वो युष्माकमतिप्रियमित्युक्त्वा तदा तेभ्यो ददौ । तदैव तेषां पञ्चेन्द्रियमपि कर्त्तृ सौरभाद्यब्धौ सस्नौ । आख्यानं शीधुकेलिप्रभृति संज्ञा ॥ २४ ॥

हे जननि ! तस्मै किं स्वर्गो रोचते अपि तु न । यद्यस्मादयं धाता मे उदरं विभुं न चक्रे । ये भोजने असमर्था अपि मा देहीत्यभिदधति तानहं सागसः सापराधान् ब्रवीमि ॥ २५ ॥

इत्थं सग्धिं कलितवटुगीर्व्याविहास्यासमाप्य
प्रक्षाल्यास्यं सुरसखपुराः प्राश्य ताम्बूलवीटीः ।
विश्रम्यैव क्षणमनुमतो मित्र-वृन्देन याव-
द्दोग्धुं धेनुर्निरगमदसौ तावदत्राहमागां ॥ २६ ॥

इत्येतस्या मुखविधुवरादञ्चलग्रन्थितश्च
प्राप्तै राधा सहसवयसा प्रेयसस्तैरभीष्टैः ।
लीलाफेलामृतरसभरैः श्रावणीरासनीभ्यां
मुद्भ्यां सिक्तानकृत शिशिरान् निम्नगाभ्यामि-
वासून् ॥ २७ ॥

निःसृत्यासावथ गुरुपुरादेत्य कासार-तीरं
तत्रोद्यानान्तरगतवरक्षौममारुह्य सालिः ।
वक्त्रज्योत्स्नामधयदपरा लक्षिता यन्मुरारे-
स्तेनाविन्दन्मुदमुदयिनीं चाक्षुषीमप्यपारां ॥२८॥

---

कलिता श्रुता वटोर्गीर्येन स श्रीकृष्णः परस्परपरिहासवचनं व्याजहासीतया सग्धि सहभोजनं समाप्य ॥ २६ ॥

एतस्यास्तुलस्याः मुखविधुवरात् प्राप्तैः लीलामृतरसैः एवं तस्याः अञ्चलग्रन्थितश्च प्राप्तैः श्रीकृष्णस्य भुक्तावशिष्टामृतरसभरैश्च जाता या श्रवणसम्बन्धिनी मुत् एवं रसनासम्बन्धिनी मुत् ताभ्यां असून् प्राणान् सिक्तान् अकृत । निम्नगाभ्यां नदीभ्यामिव ॥ २७ ॥

कासारतीरं पावनसरोवरतीरं । आटालीति प्रसिद्धं क्षौमं । अपरैरलक्षिता सती श्रीकृष्णस्य यद्वक्त्रज्योत्स्नां अधयत् तेनैव चाक्षुषीमपि मुदं अविन्दत् ॥ २८ ॥

आस्योदञ्चत्कुटिलचिकुराच्छादकोष्णीषराजे
मुक्तामुक्ता दर चलति किं कानकी सूत्रपंक्तिः ।
किम्वा चन्द्रोपरि घनतमोग्रासकोद्यद्द्युरत्न
द्योते विद्युल्लसति चपला भावलिप्रोतमूला ॥ २९ ॥

धर्म्मध्वान्तं व्रजकुलभुवां भिन्दती स्वैर्मयूखै-
रेते गण्डद्वयमनुचले कुण्डले नाघशत्रोः ।
अग्रे स्थातुं तरणियुगलं नेशमेवाननेन्दोः
पार्श्वद्वन्द्वं भजति नटनैः प्रीणनार्थं यदस्य ॥३०॥

कन्दर्पो यत् स्वमकर-युगं कर्णनद्धं व्यधान्नो
विध्यन्नस्येक्षणशितशरैर्व्वाढ़मेकाग्रचित्तः ।

मुखस्य ऊर्द्धं अञ्चन्तः ये कुटिलालकास्तेषामाच्छादकोष्णीष-
राजे मुक्तया आमुक्ता वद्धा तोररा इति प्रसिद्धा कनकसम्बन्धिनी सूत्र-
पंक्तिः किं ईषच्चलति । किम्वा मुखचन्द्रोपरि केशस्थानीयघनतमसो
ग्रासको यः रक्तोष्णीषस्थानीयोद्यद्द्युरत्नः उदयकालीनसूर्य्यस्तस्य द्योते
प्रकाशे चपला चञ्चला विद्युल्लसति । कथम्भूता भावल्या मुक्तास्थानीय
नक्षत्रश्रेण्या प्रोतं मूलं यस्याः सा ॥ २९ ॥

कुण्डलद्वयचाञ्चल्यं वर्णयति श्लोकाभ्यां । व्रजसुन्दरीणां धर्म्म-
रूपान्धकारं भिन्दती चञ्चले कुण्डले न भवतः गण्डद्वयमनु गण्डद्वये ।
मुखचन्द्रस्याग्रे स्थातुं नेशं न समर्थं सूर्य्ययुगलं अस्य चन्द्रस्य नटनैः
प्रीणनार्थं यद्यस्मात् पार्श्वद्वन्द्वं भजति तस्मात् कुण्डले न भवत इति
पूर्व्वेणान्वयः ॥ ३० ॥

स्वस्य वाहनरूपं मकरयुगं कन्दर्पः श्रीकृष्णस्य कर्णनद्धं व्यधात् ।

तत्रोत्तंसस्तुवदलिघटाभङ्कृतित्रस्तमेत-
द्यत्नान्मौग्ध्याद्पसृतिकृते हन्त ! किंवा विधत्ते ॥३१

स्वच्छं स्निग्धं नयनयुगलं प्रापये हन्त ! कान्ते
ते तारे सम्भृतमदभरे चञ्चले द्रागमूतां ।
ताभ्यां ये वाजनिषत सुतास्ते जनान्तःपुरेभ्यः
कृष्ट्वा कृष्ट्वा धृतिकुलवधुर्दूषयन्ते कटाक्षाः ॥ ३२ ॥

सर्व्वाशोद्यत्तरसि दृशि यद्दस्यवोऽनङ्गनद्यां
हर्षौत्सुक्याधृतिमदमुखाः सन्ति सञ्चारिणोऽमी ।
तारानाम्नीं हरिमणिमयीं नावमाश्रित्य लोलां
तद्रामाणां नयनवणिजां लुण्ठनायेति विद्मः ॥३३

नैतन्मन्दस्मितमुदयते शोणविम्बाधरौष्ठात्
वन्धूकाभ्यां जगदलिकृते श्च्योतते नो मरन्दः ।

किमर्थं नद्धं तत्राह । नोऽस्मान् कृष्णस्येक्षणरूपशितशरैर्विंध्यन् वेद्धुं । तस्मात् वेधने स्वस्यैकाग्रचित्तार्थं दाऽनस्य वन्धनं ज्ञेयं ॥३१॥

श्रीकृष्णस्य नयनयुगलं ये तारा स्वरूपे द्वे कान्ते प्राप ते तारे सम्भृतमदभरे अतएव चञ्चले अभूतां ताभ्यां चञ्चलाभ्यां ताराभ्यां ये कटाक्षाख्याश्चञ्चलाः सुता अजनिषत ते जनान्तःपुरेभ्यः धृतिकुलवधूः कृष्ट्वा दूषयन्ते ॥ ३२ ॥

पुनश्च कृष्णस्य दृशं कन्दर्पनदीत्वेन वर्णयति । कन्दर्पस्य नदीरूपायां दृशि । हर्षाद्याः सञ्चारिभावरूपा दस्यवो यत् सन्ति । पक्षे सर्व्वत्र सञ्चारिणः । दृशि कथम्भूतायां सर्व्वासु आशासु उद्यन् तरोवेगो यस्याः । तस्मात् तारानाम्नीं नावं आश्रित्य व्रजसुन्दरीणां नयनरूपवणिजां लुण्ठनाय विद्मः ॥ ३३ ॥

लक्ष्यीभूते मम सखि ! दृशौ वैद्रुमस्मार-यन्त्रो-
न्मुक्तं पश्य प्रविशति बलात् किन्तु कार्पूरनीरं ॥३४॥
निर्व्वर्ण्यैव प्रियमुखविधुं तां ह्रियेवोर्म्मि-मध्ये
हर्षाम्भोधेः सपदि विशतीं चेतयन्ती विशाखा ।
प्रोचे पश्य प्रियसखि ! हरेर्दोहलीलां यदर्थं
सायं श्वश्रू-गिरमतिकटुं वेत्सि पीयूषकल्पां ॥३५॥
उत्कर्णानां धवलि ! शवलीत्येवमाहूयते या
सा गौर्हम्वेत्युदितविदितोल्लङ्घ्य सर्व्वाः समीपं ।
आयाताश्रुस्तिमितनयना पाणिना मृष्टपृष्ठा
कण्डूयाभिर्दर गिरिभृता प्रीणितादौ बभुव ॥ ३६ ॥
उद्यत्पार्ष्णिः प्रपदयुगलालम्बितक्ष्मो ऽधिजानु
न्यस्ते ऽमत्रे सखि ! मणिमये बिम्बितश्रीमुखेन्दुः ।

जगद्रूपभ्रमरनिमित्ते बन्धूकाभ्यां मकरन्दो न च्योतते । किन्तु विद्रुमनिर्म्मितकन्दर्पयन्त्रात् मुक्तं कर्पूरसम्बन्धि जलं लक्ष्यीभूते मम दृशौ बलात् प्रविशति ॥ ३४ ॥

हर्षसमुद्रस्य उर्म्मिमध्ये सखीनामग्रे स्पृहाव्यञ्जककान्तमुख वर्णनजातया लज्जया इव विशतीं तां श्रीराधां विशाखा चेतयन्ती प्रोचे । पीयूषकल्पामिति अनुरागस्थायि कार्य्यं ॥ ३५ ॥

श्रीकृष्णोक्तिश्रवणार्थं उत्कर्णानां गवां मध्ये शवलिधवलीत्येवं कृष्णेन या आहूता हम्वेति शब्देन ज्ञाता सा गौर्दर कण्डूयादिभिरादौ श्रीकृष्णेन प्रीणिता बभूव । ईषदर्थे दराव्ययमित्यमरः ॥ ३६ ॥

पादाग्रयुगलेनालम्बिता पृथ्वी येन । अधिजानु जानूपरि न्यस्ते मणि-

गोतुन्दस्पृग्दर शिथिलितोष्णीषनिर्यन्मदालि-
श्रेणीजिष्णुद्युतिमदलकस्त्यक्तलास्येक्षणाब्जः॥३७
इष्ट्वा क्षौणीं प्रथमपयसो धारया ताभिरेव
द्वित्राभिः स्वाङ्गुलिकुलमथोधोऽञ्जलीं चोन्दयित्वा ।
तां तेनैवोन्नमदवनमत् पाणिपद्मं दधानो
दोहन्यन्तः शनशनशनद्घस्मघम्मेति घोषैः ॥३८॥
उद्यत्कर्णाः शशिमुखि ! परास्तत्र सोत्कण्ठयन् गाः
सद्यः प्रोद्यत्तदमलकर्णाश्वित्रितस्वोरुजङ्घः ।
ग्रीवाभङ्गोदितरुचि गवा तर्णकेनापि सास्रै-
र्नैत्रैः पीतद्युति नवसुधो दोग्धि दुग्धं प्रियस्ते॥३९॥

---

मये अमत्रे पात्रे प्रतिबिम्बितो मुखचन्द्रो यस्य। गोरुदरस्पर्शेन दर शिथिलितो य उष्णीषस्तस्मान्निर्यन्तो मत्तभ्रमरश्रेणीजिष्णवो द्युतिमदलका यस्य ॥ ३७ ॥

प्रथमया धारया क्षौणीं इष्ट्वा पश्चात् द्वित्राभिर्धाराभिः स्वस्याङ्गुलिकुलं एवं ऊधोऽञ्जलीं उन्दयित्वा क्लेदयित्वा तेनाङ्गुलिकुलेन उन्नमदवनमत् पाणिपद्मं यथा स्यात्तथा तां उधोऽञ्जलीं दधानः। ऊधस्तु क्लीवमापीनमित्यमरः। तदनन्तरं दोहनीमध्ये शनशनत् शब्दः पश्चाद्दोहनीपूर्त्तिसमये घम्मघम्मेति घोषैः ॥ ३८ ॥

तस्या दोहनसमाप्तिसमयज्ञानात् अन्या गाः उत्कण्ठयन् मम दोहनसमयो जात इत्युत्कण्ठां कारयन्। दोहनसमये गवा वत्सेनापि ग्रीवाभङ्गोदितरुचि यथास्यात्तथा सास्रैर्नेत्रैः पीता कान्तिरूपा नवसुधा यस्य तथाभूतस्ते प्रियः दुग्धं दोग्धि ॥ ३९ ॥

मुञ्चोपेहि त्वरय नय मे देहि याहीति गावो
नानावर्णाः परमविषदा दुह्यमानाश्च गावः ।
तत्रत्या या गिरिधरतनोः श्यामला याश्च गाव-
स्ता दुष्पारा इह परिमिताः किं कवेर्म्मान्ति गावः ॥ ४०

दुग्ध्वा कृष्णः प्रियसखदृशा सूच्यमानां कदाचि-
द्राधां याति प्रणयभरतः कर्हिचित् स्वालयाय ।
ग्रीष्मे सायं सरसि रसिकस्तापशान्त्यै कदापी-
त्वेवं लीलामृतजलनिधौ तस्य मज्जन्ति धन्याः ॥ ४१

किरणहरिसहस्रं सर्व्वतो व्याश्नुवानं
व्यधित दिवसभर्त्तुः खण्डशो यान् विदीर्णान् ।

---

मुञ्चे त्यादि गोपीनां गावो वाचः नानावर्णाः नानाक्षराः परमविषदा निर्म्मलाः तथा जनैर्दुह्यमानाः पूर्य्यमानाः एवं गावोऽपि शुक्लपीतादि नानावर्णाः विषदाः निर्म्मला दुह्यमानाश्च एवं तत्र स्थितायाः गिरिधरतनोः श्यामला या गावः किरणा याश्च गावस्ताः सर्व्वा दुष्पारा अपरिमिताः । अतएव इह एतासां वर्णने परिमिताः कवेर्गावः वाचः किं मान्ति ॥ ४० ॥

गोदोहानन्तरं श्रीकृष्णः प्रणयभरतः कदाचित् राधिकां याति कदाचित् स्व गृहे याति । कदापि ग्रीष्मसमये स्नानार्थं पावनसरोवरे याति ॥ ४१ ॥

दिवसभर्त्तुः सूर्य्यस्य सर्व्वतो व्याश्नुवानं किरणरूपसिंहसहस्रं वियति आकाशे यान् तिमिरहस्तिनः विदीर्णान् व्यधित । तस्मिन् सूर्य्ये अस्तं वियति गच्छति सति एतत् किरणरूपसिंहसहस्रं करिभिरेव

वियति वियति तस्मिन्नस्तमेतत् पुनस्तै-
स्तिमिरकरिभिरेव ग्रस्यमानं निलिल्ये ॥ ४२ ॥

इति भावनामृते महाकाव्ये सायन्तनलीलास्वादनो
नाम सप्तदशः सर्गः ।

---

ग्रस्यमानं सत् निलिल्ये । तथाच श्रीकृष्णस्य गोदोहनादि लीलानन्तरं रात्रिर्ब्बभूवेति भावः ॥ ४२ ॥

समाप्तोऽयं सप्तदशः सर्गः ।

# अष्टादशः सर्गः ।

अधिधरमधिपस्यानन्द-सिन्धोरघारे-
र्मुखरुचि-कणमेकं गोपुराग्रे स्थितस्य ।
खमनुमुकुरमच्छं विम्बितं वीक्ष्य लोका
विधुरयमुदगादित्युद्ययुर्वर्णयन्तः ॥ १ ॥
तदवकलनजातापत्रपां पद्मिनीनां
ततिमथ वलभीस्थां वीक्ष्य वस्त्रावृतास्यां ।

इदानीं रात्रौ उदितं चन्द्रं श्रीकृष्णमुखकान्तिकणत्वेन उत्प्रेक्षते। अधिधरमिति। अघारेरेकं मुखरुचिकणं निर्म्मलं मुकुरतुल्यं मुखमनुलक्ष्योकृत्य विम्बितं वीक्ष्य एतादृशविशेषानुसन्धानं विना मुग्धा लोका विधुरयमुदगादिति हेतोः अधिधरं धरायां वर्णयन्तः वर्णयितुं उद्ययुः उद्यमं चक्रुः। कथम्भूतस्य आनन्दसिन्धोरधिपस्य आनन्दसमुद्रराजस्य ॥ १ ॥

तस्मिन्नेव समये चन्द्रोदयं वीक्ष्य जातं कमलानां मुद्रणं श्रीकृष्ण कर्त्तृकदर्शनाधीनलज्जयोत्पन्नगोपीमुखाच्छादनदर्शनहेतुकत्वेन उत्प्रेक्षते। तदवकलनेति। तदवलोकनेन अघारिकर्त्तृकावलोकनेन जातापत्रपां वलभीस्थां पद्मिनीनां ततिं वस्त्रावृतमुखां वीक्ष्य अहह खेदे सरसि च जलजाली कमलश्रेणी। श्लेषेण जड़ोत्पन्नश्रेणीयमपि पद्मिन्य इति स्वीयैः पद्मिनीत्वाभिमानैः समकुचत् इति हेतोर्जलजाली

समकुचदहह ! स्वैः पद्मिनीत्वाभिमानैः
सरसि च जलजाली तर्हि मूढेति शङ्के ॥ २ ॥
मुदितवति चकोर-स्तोम एकत्र शस्तै-
रुदितवति परत्रामङ्गलैश्चक्र-सङ्घे ।
धृतमुदि कुमुदान्तर्मुच्यमाने ऽलिवृन्दे
मलिननलिन-मध्ये वध्यमाने च तस्मिन् ॥३॥
तमसि विपिनमाप्ते सादने दीपदूने
विशति सदनराजीं वैपिने पुष्पगन्धे ।
वरतनुहृदगारे धैर्य-लज्जे प्रविश्य
द्यति समुदितदर्पे दर्पके सर्पकेलौ ॥ ४ ॥

---

मूढ़ा इति अहं शङ्के यतो व्रजसुन्दरीभिः सह तासां वृथैव स्पर्द्धेति-भावः ॥ २ ॥

प्रदोषसमये दिनरात्रिकालयोः राज्ञोरधिकारानिश्चयेन जातं प्रजानां सुखं दुःखं च वर्णयति त्रिभिः । एकत्र प्रदेशे शस्तैश्चन्द्रोदय-रूपमङ्गलैः चकोरस्तोमे मुदितवति सति । एवमपरत्र प्रदेशे चन्द्रोदय रूपैरमङ्गलैः चक्रवाकसमूहे रुदितवति सति । रुदिर अश्रुविमोचने । एवं कुमुदान्तःसकाशात् मुच्यमाने अलिवृन्दे धृतमुदि जातानन्दे सति। तस्मिन्नेवालिवृन्दे मुद्रितकमलमध्ये वध्यमाने च सति तेषां दुःखं ॥३॥

सादने सदनसम्बन्धिनि तमसि अन्धकारे वनं विशति सति कथं-भूते दीपालोकेन दूने । गृहे स्थितस्य दुर्जनदत्तदुःखेनैव वैराग्यवशात् वनवासो जायत इति रीतिः । एवं वैपिने विपिनसम्बन्धिनि रात्रि-विकाशिनः पुष्पस्य गन्धे सदनराजीं गृहश्रेणीं प्रविशति सति । तथा च तेषां वैराग्यलोपात् वनवासं विहाय गृहवासो जातेति भावः ।

इति वत दिन-रात्र्योर्निश्चिते नाधिकारे
विगलितकुलजातिज्ञानधर्म्मे तदा यः ।
व्रजभुवि वलितोऽभूत् स प्रदोषो व्यरंसीत्
किमु भवति चिरस्था तामसी कापि सम्पत् ॥ ५

विशेषकं ।

अपि गुरु-पुरमध्ये हक्कवाटावरुद्ध
स्वतनु कनकवेश्माभ्यन्तरस्वान्ततल्पे ।
प्रियतममधिवेश्यारीरमद् या तदा तां
सुखयितुमथ राधामागतेन्दुप्रभोचे ॥ ६ ॥
विधुररुचिरसि त्वं यं विना हन्त राधे !
विधुररुचिरभूत् स त्वामृते ऽन्यास्वथापि ।

रात्रिसमये समुदितो दर्पो यस्य अतएव सर्पकेलौ दर्पके कन्दर्पे गोपीनां हृदयागारे प्रविश्य धैर्य्यलज्जे द्यति खण्डयति सति ॥ ४ ॥

इति दिनरात्र्योरधिकारनिश्चयाभावेन कुलजातिज्ञानधर्म्मे विगलति सति पक्षे कुलजानां अतिज्ञाने धर्म्मे च विगलति सति तदा व्रजभुवि यः प्रदोषो वलितोऽभूत् स वलितप्रदोषो व्यरंसीत् विरतोऽभूत् । प्रदोषस्य वलितत्वरूपोत्कर्षस्य नाशरूपांशे अर्थान्तरन्यासमाह । तामसी तमोगुणजन्या । पक्षे तमःसम्बन्धिनी ॥ ५ ॥

इदानीं श्रीकृष्णस्य गोष्ठागमनसमये पथि प्रियतमं दृष्ट्वा आनन्द मूर्च्छादशामध्ये एव स्फुर्त्तिप्राप्तेन श्रीकृष्णेन सह रममाणां श्रीराधां प्रति तत्रागत्य इन्दुप्रभा आह । गुरुपुरमध्येऽपि मुद्रितनेत्रत्वेन हक्कवाटावरुद्धस्वतनुरूपकनकगृहस्याभ्यन्तरे स्वान्तःकरणरूपतल्पे या प्रियतमं अधिवेश्य अरीरमत् तां राधां । आगता इन्दुप्रभा ऊचे ॥ ६ ॥

हे राधे ! यं विना त्वं विधुररुचिः खण्डितकान्तिरभूत् स विधुः

भवति हृदयहारी स त्रिलोक्यास्तवाहो !
भवति हृदयहारी भूततां लब्धुमुत्कः ॥ ७ ॥
रचय सखि ! तदस्योदन्तपीयूषवृष्टी-
रिति रहसि विशाखा प्रार्थ्यमाना तदा सा ।
यदवददिदमाली संहतेरंहसारात्
पपुरजरतृषस्ताः कर्णपालीचकोर्य्यः ॥ ८ ॥
गिरिधरबलदेवालङ्कृतात्मद्विपार्श्वो
व्रजधरणिवरेण्यो भोजनायोपविष्टः ।
धनपतिरिव शोभामाप नन्दीश्वरान्तः
पुरसदसि निधिभ्यां पद्मशङ्खाभिधाभ्यां ॥ ९ ॥

---

श्रीकृष्णः त्वां विना अन्यासु अरुचिरभूत् । अत्र शब्दविरोधो व्यङ्ग्यः । यः श्रीकृष्णः त्रिलोक्या हृदयं हर्त्तुं शीलं यस्य तथाभूतो भवति । हे भवति ! भो राधे ! सः श्रीकृष्णः तव हृदयस्य हारतुल्यीभावं लब्धुमुत्कः । अत्रापि शब्दमात्रविरोधो व्यङ्ग्यः ॥ ७ ॥

हे सखि ! इन्दुप्रभे ! तत्तस्मादस्य श्रीकृष्णस्त वार्त्तारूपपीयूषवृष्टी रचय इति विशाखया प्रार्थ्यमाना सा यदवदत् इदं आरात् निकटे आलीसंहतेः कर्णपालीचकोर्य्यः रंहसा वेगात् पपुः । कथम्भूता अजरा तरुणी तृट् यासां ताः ॥ ८ ॥

तद्वृत्तान्तं इन्दुप्रभा आह । श्रीकृष्णबलदेवालङ्कृतात्मद्विपार्श्वः व्रजधरणिवरेण्यो नन्दः । धनपतिः कुवेरः नीलपद्मशङ्खनिधिभ्यां यथा शोभां आप । नन्दीश्वरग्रामस्यान्तःपुरसदसि । कुवेरपक्षे नन्दीश्वरस्य महादेवस्य ॥ ९ ॥

प्रतिरजनि निमन्त्र्यानीयमानैः सपुत्रै-
र्हरि-वदनचकोरैः सादरैरावृतोऽसौ ।
परित उपविशद्भिः प्रेमभूभृद्भिरुच्चै-
स्तुहिनगिरिरिवाभान्मूर्त्त आनन्द-पुञ्जः ॥१०॥
युग्मकं ।

वहुविधमधुरान्नव्यञ्जनादीनि तेभ्यो
लघु लघु परिवेश्य द्विस्त्रिरेकैकशः सा ।
सखि ! वलजनयित्री निर्वृतिं प्राप काञ्चित्
स्वकरकलितपाक-श्लाघया तन्मुखेभ्यः ॥ ११ ॥

तनय ! जनयतीदं पुष्टिमोजश्च भुङ्क्ष्वे-
त्यनुपदमपि तैस्तैः स्नेहविक्लिन्नचित्तैः ।

---

व्रजराजस्य उपनन्दादीन् भ्रातॄन् प्रति रजन्येव स्व-स्व-गृहे कृष्णं भोजयितुमुद्यतान् वीक्ष्य व्रजराजस्तानेव श्रीकृष्णं भोजयितुं उपनन्दादिभिः कृता या या सामग्री तत्सहितान् कृत्वा स्वगृहे निमन्त्र्य आनीय श्रीकृष्णेन सह भोजयामास स्वयं च बुभुजे इत्याह । प्रतीति । पुत्र सहितैः व्रजराजस्य सोदरैः श्रीकृष्णस्य वदनरूपचन्द्रस्य चकोरैः अतएव तस्य दर्शनं विना जीवितुमसमर्थैः यतः प्रेमपर्व्वतैस्तैः सह तुहिनगिरिर्हिमालय इव व्रजराज उपविष्टः ॥ १० ॥

वलजनयित्री रोहिणी तेभ्यो नन्दादिभ्यः एकैकशः एकस्मै एकस्मै लघु लघु द्विःत्रिः यथा स्यात् द्विवारं त्रिवारं परिवेश्य तेषां मुखेभ्यः स्वकरकलितपाकश्लाघया काञ्चित् निर्वृतिं प्राप ॥ ११ ॥

हे तनय ! इदं वस्तु पुष्टिं ओजो वलं च जनयति अतो भुङ्क्ष्व

अपि निज-निज-पात्राद्दीयमानं तदाद
प्रणिहितरुचिकृष्णो धेनुकारिश्च कामं ॥१२॥
त्वमयि ! कियदशानेत्याक्षि-भङ्ग्यैव मात्रा
सदसि पितृ पितृव्यैः शश्वदुक्तो गिरापि ।
स सपदि यदभुङ्क्तापूरितेनैव तृप्ति-
र्निशि निशि तदिहैषां सग्धिराचारमात्रं ॥१३॥
हरि-मुख-मकरन्दैर्दृग्भिरादीयमानैः
कलितनवसपीति प्रीतिमद्बन्धु-वृन्दं ।
अथ निरनिजदास्यान्यात्ततांम्वूलवीटि
प्रतिनिजभवनान्तः संविवेश प्रविश्य ॥ १४ ॥

इत्युक्त्वा अनुपदं प्रतिक्षणमपि तैर्निजपात्रादपि दीयमानं तद्वस्तु कृष्णो वलदेवश्च प्रणिहितरुचि यथास्यात्तथा आद बुभुजे ॥ १२ ॥

अयि हे कृष्ण ! गुरुजनसमक्षे स्पष्टं वक्तुमसमर्थया मात्रा यशोदया अक्षिभङ्ग्यैव पित्रादिभिर्गिरा स्पष्टमुक्तः श्रीकृष्णः सपदि तत्क्षणे यत् अभुङ्क्त तेनैव श्रीकृष्णकर्त्तृकभोजनेनैव एषां नन्दादीनां तृप्तिरपूरि पूर्णा वभूव । सग्धिः सहभोजनं तु तेषां लोकाचारमात्रं तृप्तिस्तु श्रीकृष्णकर्त्तृकभोजनेनैव नतु स्व-स्व-भोजनेनेति ज्ञेयं ॥ १३ ॥

प्रीतिमद्बन्धुवृन्दं स्व-स्व-दृष्टिरूपपरिचारकैरादीयमानैः श्रीकृष्ण-मुखकमलस्य माधुर्य्यरूपमकरन्दैः करणैः कलिता कृता नवा सपीतिः सहपानं येन तथाभूतं । अथ भोजनानन्तरं मुखानि निरनिजत् जलेन शोधयामास । तदन्तरं आत्ता गृहीता ताम्बूलवीटीयेंन तथाभूतं सत् निजनिजभवनान्तः प्रविश्य संविवेश सुष्वाप ॥ १४ ॥

अधिवलभिवलक्षे सक्षणं पुष्पतल्पे
रहसि सहसितास्यैरावृतः स्वैर्वयस्यैः ।
यदवददवसादप्रस्तुतौ ते स्तुवानो
मधुरिमगरिमाणं श्रूयतां तच्च राधे! ॥ १५ ॥

सरसमनुगवीनस्यापराह्णे भवद्भिः
सममसममहिम्नोऽप्यञ्जसा गच्छतो याः ।
मम धृतिततिमद्यान्नद्य गोष्ठ-प्रदेशे
कथय सुबल! ता मां मोहयित्र्यो रुचः काः॥१६

अहह ! मधुरिमाब्धेः किं सुधा मथ्यमानात्
किमिति ललितविद्युद्वीचयो वस्त्रपूताः ।
किमु परिमलनीवृन्मूर्त्तिसाम्राज्यलक्ष्म्यः
किमतनुविशिखानां राशयश्चाम्पकानां ॥१७॥

हे राधे ! अधिवलभि वलभ्यां बलक्षे धवले पुष्पतल्पे सक्षणं सोत्सवं यथास्यात्तथा हास्ययुक्तमुखैर्व्वयस्यैरावृतः सन् ते तव विरहजन्यावसादप्रस्तुतौ यत् अवोचत् तत्श्रूयतां । कथंभूतः तव माधुर्य्यस्य गरिमाणं स्तुवानः ॥ १५ ॥

अपराह्णे भवद्भिः सह अनुगवीनस्य गवां पश्चाद्वर्त्तमानस्य असममहिम्नोऽपि मम धृतिततिं या रुचः अद्य अद्यन् खण्डितवत्यः । हे सुबल ! मां मोहयित्र्यस्ता रुचः काः कुत्रत्याः ॥ १६ ॥

ता रुचः किं मथ्यमानात् माधुर्य्यसमुद्रादुत्पन्नाः सुधारूपाः ? वस्त्रेण पूताः छानिता इति लोके प्रसिद्धाः अतएवातिललितविद्युद्वीचयः । किं वा परिमलस्य नीवृत् देशरूपा मूर्त्तिमत्यः साम्राज्य शोभाः ॥ १७ ॥

तदुपरि घुसृणाक्तं किं सरोजं प्रफुल्लं
शुचिजलधिजनिर्वा क्षोभनः कश्चनेन्दुः ।
मणिमयमदिराभ्यां तस्य चाङ्के नटद्भ्यां
मम दृगुपसरन्त्येवार्दिता पुच्छघातैः ॥ १८ ॥
किमिदमहह ! वस्त्वित्यूढसम्भ्रान्तिमूढे
तदनुभवलवस्याप्यंशमारब्धुकामे ।
मयि घनजलदाल्येवावृतं सद्य एव
व्रतति-ततिषु लीनं प्राभवं तन्न लेढुं ॥ १९ ॥
सपदि नयन-युग्मोद्दिष्टवर्त्मा तदागा-
न्मम हृदयभटस्तन्मार्गणार्थं समर्थः ।
न पुनरयमिदानीं यत् परावर्त्तते त-
द्वनभुवि कुसुमेषोर्बन्धमापेति बुध्ये ॥२०॥

तस्या रुचः उपरि मुखस्थानीयं कुङ्कुमाक्तं किं सरोजं प्रफुल्लं । किञ्च शुचिः शृङ्गाररसः स एव जलधिस्तदुत्पन्नश्चन्द्र एव कन्दर्पं जन्यक्षोभजनकः। तस्य चन्द्रस्य अङ्के नटद्भ्यां मणिमदिराभ्यां खञ्जनाभ्यां स्वस्य कटाक्षरूपपुच्छाघातैः तन्निकटे उपसरन्ती मम दृक् अर्द्दिता ॥ १८ ॥

इदं अद्भुतं वस्तु किमिति प्राप्तसम्भ्रान्त्या मूढे मयि तादृशवस्तुनोऽनुभवलवस्याप्यंशं आरब्धुकामे सति सद्यस्तत्क्षण एव अतिशयोक्त्या नीलशाटीस्थानीयया निविड़मेघश्रेण्या इवावृतं वल्लीश्रेणिषु लीनं तद्वस्तु लेढुं आस्वादयितुं अहं न प्राभवं ॥ १९ ॥

मम नयनयुग्मेन उद्दिष्टवर्त्मा मम हृदयरूपभटस्तद्वस्तुमार्गणार्थमगात् । यद्यस्मात् पुनरिदानीमपि न परावर्त्तते तत्तस्मात् मम हृदयभटः वनभुवि कन्दर्पस्य बन्धं आप इति अहं बुध्ये ॥ २० ॥

अघहर ! भवता यालोक्यत श्लाघ्यरूपा
तदवधिधुतधैर्य्या सापि राधाधिधारा ।
विविधदवथुपात्री स्वाः सखी रोदयित्री
विलुठति गलदम्भोधारया धौतगात्री ॥२१॥

अयमयमयते त्वां तन्वि ! धिन्वन् मुकुन्दो
रसनिधिरथ स क्व क्वेति संलापशेषे ।
प्रथमरजनिजातं ध्वान्तमालक्षयन्ती
शमयति रुजमस्या व्रीड़याथावृताङ्गया:॥२२॥

इति सुबल-वचोभिः कृष्ण-नेत्राम्बुजाभ्यां
प्रणयिनि ! पृषता द्रागानुपूर्व्या निपेतुः ।

---

तदनन्तरं श्रीकृष्णं प्रति सुबल आह । हे अघहर ! भवता श्लाघ्यरूपा या राधा अलोक्यत तदवधि आधिधारा आधेर्मनःपीड़ाया धारारूपा सा राधा विविधपीड़ापात्री सती विलुठति ॥ २१ ॥

तस्या वैक्लव्यमालक्ष्य सखीनां यत् सान्त्वनवाक्यं तत् सुबल आह । अयं अयं श्रीकृष्णः धिन्वन् सुखयितुं त्वां अयते प्राप्नोति । अथ सखीवाक्यानन्तरं स श्रीकृष्णः क्व क्व इति राधायाः संलापस्य शेषे अन्ते सति प्रथमरजन्युत्पन्नमन्धकारं श्रीकृष्णत्वेन दर्शयन्ती सखी श्रीकृष्णागमनसम्भावनया जाता या लज्जा तया सम्वृताङ्गया अस्यारुजं पीड़ां शमयति ॥ २२ ॥

हे प्रणयिनि राधे ! कृष्ण-नेत्राम्बुजाभ्यां सकाशात् पृषता बिन्दवः । तत्र दृष्टान्तमाह । हिमकरश्चन्द्रस्तस्य किरणराजिभ्रान्त्या चकोरैः भुक्तपूर्व्वा मुक्ता वयमतुरिव ॥ २३ ॥

हिमकरकरराजिभ्रान्तितो भुक्तपूर्वां
ववमतुरिव मुक्तां मञ्जुचञ्चू चकोरौ ॥ २३॥
विशेषकं ।

परिचरणपरां मां तस्थुषीं तत्र दृष्ट्वा
न्यदिशदयममन्दोत्कण्ठया कुण्ठितास्यः ।
उपसुरतरु राधा भानुपुत्र्यास्तटे मा-
मभिसरतु रसेनेत्याशु तां ब्रूहि गत्वा ॥२४॥
श्रुतमुरजनिनादः स्वं दिदृक्षून् ससभ्यान्
वहिरुपविशतोऽगात् साम्प्रतं नाट्यरङ्गं ।
क्षणमथ कृततत्तत्तीर्थपूर्त्तिर्वलभ्यां
शयितुमयमुपैष्यत्यम्बया लाल्यमानः ॥२५॥

---

पुनरिन्दुप्रभा आह । व्रजराजस्य दासीत्वेन परिचरणपरां अतएव तत्र श्रीकृष्णनिकटे तस्थुषीं मां दृष्ट्वा अयं श्रीकृष्णः न्यदिशत् आज्ञां चकार आज्ञामेवाह । भानुपुत्र्या यमुनायास्तटे उपसुरतरु सुरतरोः कल्पवृक्षस्य निकटे रसेन साहजिकानुरागेणाभिसरतु इति तां राधां ब्रूहि ॥ २४ ॥

मद्गमनानन्तरं श्रीकृष्णो यत् करिष्यति तदपि शृणु । स्व-स्व-गुणं दर्शयितुकामानां वहिःस्थितानां गायकादीनां श्रुतो मृदङ्गस्य शब्दो येन स श्रीकृष्णः नाट्यरङ्गं उपविशतस्तान् साम्प्रतं अगात् प्राप । अथ क्षणं तेषां गानादिश्रवणेन तृष्णापूर्त्तिं कृत्वा शयितुं वलभ्यां अट्टालिकायां उपैष्यति गमिष्यति । यतः पुत्रस्य वन भ्रमणश्रमज्ञानेन व्याकुलया अम्बया लाल्यमानः ॥ २५ ॥

अतुलचतुरिमाणं तं जनालक्ष्यमानं
गतमिव निजकान्तं विद्धि सौर्य्यास्तटान्तं ।
त्वमयि ! कियदशित्वा स्वान् गुरून् वञ्चयित्वा
द्रुतमभिसर रागादित्युदित्वैव सागात् ॥२६॥
सपदि जटिलया सा भोजनायाह्वयन्त्या
सविधमनुसृतोचे सङ्कुचस्यत्र चेत्त्वं ।
प्रियमपि निजभक्तं तद्गृहीत्वा व्रजेतो
रहसि सह सखीभिः साध्वि ! साधूपभुङ्क्ष्व।२७
स्मितमधुरदृगब्जं लेहयन्ती तदालीं
विनयनयमहिम्ना धिन्वती तां च राधा ।
वदसि यदिदमार्य्ये ! कुर्व इत्येवमुक्त्वा
शयनगृहमगात्तद्दत्तमन्नादि नीत्वा ॥ २८ ॥
प्रिय-मुखमकरन्दामोदधामौदनादौ
कृतमिलनतया तत् स्वाद्यतामाप तासां ।

हे राधे ! निजकान्तं यमुनायास्तटान्तं गतमिव विद्धि ॥ २६ ॥

सपदि तत्क्षण एव भोजनायाह्वयन्त्या जटिलया सविधं निकटं अनुसृता प्राप्ता राधा ऊचे । हे राधे ! मन्निकटे भोक्तुं सङ्कुचसि चेत् प्रियं निजभक्तं स्वीयमोदनं गृहीत्वा इतो व्रज । सरस्वतीपक्षे निज-भक्तं स्वाधीनं प्रियं व्रज ॥ २७ ॥

सरस्वत्या कृतो योऽर्थस्तस्य स्मरणेन स्मितमधुरदृगब्जं आलीं सखीं पक्षे अलिं भ्रमरं तदास्वादयन्ती राधा विनयनयमहिम्ना तां च जटिलां धिन्वती सती शयनगृहमगात् ॥ २८ ॥

सुरसरिति गतं चेद्यत्र तत्रत्यमम्भो
जगदघमपि भिन्दत् वन्द्यतां याति लोके॥२६
शृणु सखि ! गुरवोऽन्तः शेरते साम्प्रतं ते
सदनमनुगवां सोऽप्यस्ति दूरे ऽभिमन्युः ।
स्मृतिमतिधृतिलज्जाः शाययित्वा स्व-तल्पे
तदभिसर रसेन स्व-प्रियं केलिकुञ्जे ॥ ३० ॥
अनुपदवलमानप्रेमसन्दर्शिताध्वा
कुसुमशरभटैनैवाभितः पाल्यमाना ।
हृदि पुनरुपगूढ़ोत्कण्ठयाल्या चलन्ती
श्रमलवमपि राधे ! नाध्वनो ज्ञास्यसि त्वं॥३१
यदि जनतति-नेत्र-श्रोत्र-दंशाद्विभेषि
व्रज धवलनिचोलेनावृतीकृत्य गात्रं ।

इदानीं चातुर्य्येण सख्यानीतेन श्रीकृष्णभुक्तावशिष्टान्नेन सह-मेलयित्वा राधा तदन्नं भुक्तवतीत्याह । प्रियमुखाधरामृतस्यामोदधाम्नि कृष्णभुक्तावशिष्टान्नादौ जटिलयादत्तान्नेन सह कृतमिलनतया तत् अन्नादि स्वाद्यतामाप । ननु कथं तन्मिलनेन सर्व्वेषामन्नानां स्वादु सुगन्धत्वं स्यात्तत्र दृष्टान्तदर्शनेनाह । गङ्गायां यत्र तत्रत्य जलं गतं चेत् जगतां अघं भिन्दत् सत् लोके बन्द्यतां याति ॥ २९ ॥

गुरवोऽन्तःपुरे शेरते सांप्रतं । अभिमन्युस्तु दूरे गवां सदनमनु सदने अस्ति अतः स्मृतिधृतिलज्जादिकं विहायाभिसरेत्यर्थः ॥ ३० ॥

उत्कण्ठया च आल्या हृदि आलिङ्गिता सती चलन्ती त्वमध्वनः श्रमलवमपि न ज्ञास्यसि ॥ ३१ ॥

जनततीनां नेत्रश्रोत्रे एव दंशौ डाँस इति प्रसिद्धौ ताभ्यां विभेषि-

मुखरजगदिव स्वं नूपुरं चानपेक्ष्य
श्रितविचकिलमाल्या तारहारा स्मितास्ये! ॥ ३२
तव चरणनखेन्दोश्चन्द्रिकैकापि सर्व्वं
जगदिदमवदातं सख्यलंकर्त्तुमीष्टे ।
विधुरविधुरयं तत् पौनरुक्त्यं जगामे-
त्यकृत विधिरशुद्धं किं मसीरेखयामुं ॥ ३३ ॥
इति निज सहचर्य्या दीपितस्मारचर्य्या
निरुपमगुणधुर्य्या निर्यती गोष्ठपुर्य्याः ।
अगणितगुरुवाधा काननं प्राप राधा
प्रणयसरिदिवाराद्दूढ़माधुर्य्यधारा ॥ ३४ ॥

कुलकं ।

चेत् शुक्लाभिसारोचितश्वेतनिचोलेन स्वगात्रमावृतीकृत्य व्रज । एतेन नेत्रदंशात् आवरणं कृतं । श्रोत्ररूपदंशात् आवरणमाह । त्वां निन्दतां मुखरजनानां उपेक्षा यथा कृता तथा मुखरनूपुरस्यापि त्यागेन उपेक्षा कर्त्तव्येत्यर्थः । विचकिलं रायबेल इतिप्रसिद्धश्वेत पुष्पं ॥ ३२ ॥

अलं अतिशयेनावदातं श्वेतीकर्त्तुं ईष्टे । तत्तस्मात् अयं विधुर-विधुः मलिनचन्द्रः पौनरुक्त्यं जगाम । इति हेतोर्विधातापि अमुं चन्द्रं कलङ्करूपयया मसीरेखया किं अशुद्धं अकृत ॥ ३३ ॥

निरुपमानां गुणानां धुर्य्या भारवाहिका । गोष्ठपुर्य्याः सकाशात् निर्यती निर्गच्छती सती राधा आरात् दूरे स्थितं काननं प्राप । कथं-भूता प्रणयसरिदिव । यत् ऊढ़ा माधुर्य्याणां धारा यया तथाभूता ॥३४॥

परिजननिकुरम्बैराप्तकिञ्चिद्विलम्बै-
रधिगतगुरुवार्त्तैः स्व-स्व-सेवार्थमार्त्तैः ।
त्वरितमनुसरद्भिर्दाक्ष्यचातुर्य्यवद्भि-
र्व्विपिनभुवि निजेशालम्भि सा मुग्धवेशा ॥३५

यदि पुनरवरोधेऽन्विष्यते सा विरोधे
गुरुभिरुदितरोषैः कर्हिचिद्दृष्टदोषैः ।
व्रजपतिसुत-लीलापर्व्वनिर्व्वाहशीला
विरचिततदुपाया स्यात्तदा योगमाया ॥३६॥

निखिलमपि निनादं वंशिकावाद्यमेव
प्रियकमपि पुरस्थं स्वप्रियं भावयन्ती ।
परिमलमपि सर्व्वं तत्प्रतीकोत्थमेवे-
त्यमुमभिमनुते स्म प्राप्तमेवाध्वनीयं ॥ ३७ ॥

परिजननिकुरम्बैर्दासीसमूहैः आप्तो गृहीतः किञ्चिद्विलम्बो यैः । ननु कथं विलम्बः कृतस्तत्राह । अधिगता गुरूणां वार्त्तायैस्तथाभूतैर्दासीवर्गैः सा निजेशा राधा अलम्भि प्राप्ता । मुग्धः सुन्दरः ॥ ३५ ॥

ग्रन्थकर्त्ता एव कामप्यनुपपत्तिमाशङ्क्य समादधाति । यदीति । अवरोधे अन्तःपुरे सा राधिका यदि गुरुभिः अन्विष्यते । अथवा गुरुभिः कर्त्तृभिस्तया सह विरोधे सति श्रीकृष्णस्य लीलोत्सवनिर्व्वाहशीला योगमाया एव विरचिततदुपाया स्यात् ॥ ३६ ॥

निखिलशब्दमेव वंशिकावाद्यमेव भावयन्ती प्रियकं कदम्बं । तस्य प्रतीकोत्थं शरीरोत्थं । इयं राधिका अध्वनि अमुं श्रीकृष्णं प्राप्तमेव मनुते ॥ ३७ ॥

कलयसि ललिते ! किं कौतुकं त्वद्भुजङ्गो
भुजमधित वलान्मे वेष्टयन् कण्ठमेषः ।
इति चपलमुदञ्चद्भ्रूलिचापा चकम्पे
वरतनुरवलोक्यैवांसगां स्वीयवेणीं ॥ ३८ ॥
पियसखि ! परमार्थी माधवः स्यादुदारा-
त्वमपि भवसि तस्मै चित्तवित्तादि दत्वा ।
कथमहमिह मध्ये वारयित्री द्वयोः स्यां
स्मृतिभवबहुधर्म्माधर्म्मविज्ञापि भूत्वा ॥३९॥
भुवि भवति स एकः कर्ण एवात्र दाता
त्वममलमुखि ! कर्णौ द्वौ च दत्तावकार्षीः ।

पृष्ठस्थितां वेणीं अकस्मात् स्कन्धगतामालक्ष्य तामेव श्रीकृष्णस्य हस्तत्वेन निश्चित्य ललितां प्रति सप्रणयकोपमाह । त्वद्भुजङ्गः त्वयि विषये कामुकः एष श्रीकृष्णः मे कण्ठं वेष्टयन् वलात् मे भुजं अधित-दधार । इति चपलं यथास्यात्तथा उदञ्चत् उदयं प्राप्नुवन् भ्रूचापो यस्या-स्तथाभूता ॥ ३८ ॥

ललिता आह । हे राधे ! माधवः परमार्थी परमयाचकः । त्वमपि तस्मै कृष्णाय चित्तवित्तादि दत्वा उदारा भवसि । अतः कथं द्वयोर्मध्ये अहं वारयित्री स्यां । तत्रापि स्मृतिशास्त्रात् भव उत्पत्ति-र्ययोस्तथाभूतयोर्बहुधर्म्माधर्म्मयोर्व्विज्ञापि भूत्वा । पक्षे स्मृतिभवः कन्दर्पः तस्मादुत्पन्नबहुधर्म्माधर्म्मविरोधयोर्व्विज्ञा भूत्वा ॥ ३९ ॥

पुनः परिहासान्तरमाह । पृथिव्यां एकः कर्ण एव दाता प्रसिद्धः त्वं तादृशदातारौ द्वौ कर्णौ कृष्णाय दत्तौ अकार्षीः । एवं वलिमपि दातारं किं नाजैषीः अपि तु अजैषीः । यत एक एव वलिस्त्रिविक्रमे दाता अभूत् । त्वन्तु अतनवः महान्तः शतपरिमिता विराजन्तो विक्रमा

वलिमपि किमजैषीर्न त्रिवल्यर्पणौषि
ण्यतनुशतविराजद्विक्रमे ऽस्मिन्नघारौ ॥ ४० ॥

नयनयुगलमेतद्रूपसात् कृत्य नासे
अपि परिमलसिन्धौ प्रक्षिपन्त्या त्वयास्य ।
व्यरचि सखि ! वितीर्णा या तयैवैष वेण्या
हरिरपि निजबाहूभूतया त्वां सिनोति ॥४१॥

इति पथि हसिता सा तत्रपे तत्र सख्या
प्रसभमुदयमानैस्तर्षलक्षैरजस्रं ।
विगलितमपि धैर्य्यं धर्त्तुमभ्यस्यमाना
वकुलवनमुपागान्मन्दमन्दं चलन्ती ॥ ४२ ॥

कलापकं ।

किमिदमहह ! तस्याः शिञ्जितं भूषणानां
भ्रममगममहं वा चाटकौरेव रावैः ।

यस्य तस्मिन् अघारौ पापनाशके ऽस्मिन् त्रीन् वलीनेव अर्पयितुं दातुमिच्छसीत्यर्थः । पक्षे कन्दर्पशततोऽपि विराजद्विक्रमो यस्य तस्मिन् ॥४०

इदानीं परिहासं कृत्वा भ्रमदूरीकरणार्थं यथार्थवृत्तान्तमपि परीहासमुद्रयैवाह । नयनेति । एतस्य श्रीकृष्णस्य रूपसात्कृत्य रूपाय नयनयुगलं दत्वा त्वया या वेणी वितीर्णा व्यरचि यस्मै दत्ता कृता एष हरिः तां वेणीं स्वीयां मत्या निजबाहुभूतया त्वां सिनोति बध्नाति ॥४१॥

इति सख्या हसिता सा तत्रपे हठात् अजस्रं उदयमानैस्तृष्णालक्षैर्विगलितमपि धैर्य्यं धर्त्तुमभ्यस्यमाना सती उपागात् । सोपसर्गादस्यतेर्व्विकल्पे आत्मनेपदं ॥ ४२ ॥

अहह आश्चर्य्यं तस्या राधिकायाः किं भूषणानां शिञ्जितं किम्वा

श्रुतिपथगतमेवाक्षोभयन्मां यदैत-
त्तदजनि फलितो वा मामको भाग्यशाखी॥४३

इति तरुणतमालाश्लिष्टपृष्ठं मुकुन्दं
मुहुरपि विमृशन्तं काचिदादौ विलोक्य ।
प्रमुदितमतिराशु व्याजहाराम्वुजाक्षीं
कलय सुमुखि ! राधे ! माधवं तस्थिवांसं ॥४४

अहमिह कतिशो वा नैवमालोकयं त-
न्न मम रमण एष स्यादिति स्वान्त-मध्ये ।
निरचिनुत कृशाङ्गी तं पुरो वीक्ष्य राधा
द्रुतहृदतनुघूर्णाकीर्णधीरप्यधीरा ॥ ४५ ॥

---

चटकसम्बन्धिशब्दै रेवासौ राधिकाया भूषणशब्द इति भ्रमं अहं अगमं प्रेमोन्मादेन रात्रावपि चटकशब्दस्य सम्भावना जातेति भावः । यद्यस्मादेतत् शिञ्जितं श्रुतिपथगतमात्रमेव मां अक्षोभयत् । अतएव तस्या भूषण-शब्द एव तस्मात् मदीयो भाग्यरूपवृक्ष एव वा फलितोऽभूत् ॥ ४३ ॥

इति राधिकाया आगमनं मृशन्तं तरुणतमालाश्लिष्टपृष्ठं श्रीकृष्णं विलोक्य काचित् सखी राधिकां व्याजहार । तस्थिवांसं स्थितवन्तं ॥ ४४ ॥

श्रीराधिका सखीं प्रत्याह । पुरस्थितं तमालमेव कृष्णत्वेन अहं कतिवारान् नैवालोकयं तस्मान्न एष मम रमण इति स्वीयान्तःकरण-मध्ये निरचिनुत निश्चयं कृतवती सा कृष्णं वीक्ष्य द्रुतहृदपि कन्दर्प घूर्णाकीर्णधीरपि ॥ ४५ ॥

मम भृशमपि मुग्धां यद्दृशं त्वं विशाखे !
भ्रमयसि तदिदं ते हास्यमास्तां विदूरे ।
भ्रमयसि न च यद्वा माधवोऽयं तमालः
स्थिर इति तव सत्यैवाभवद्गीर्व्विदग्धे ! ॥ ४६
न हसितमयि ! किन्तु त्वत्समाश्वासनार्थं
गदितमिदमिहानालोकयन्त्या मया तं ।
त्वमतिचतुरिमाब्धिर्म्माभ्रमस्तत्र राधे !
भवतु तदपि तुष्ट्यै रोचिरस्य क्षणं ते ॥४७॥
इति सरसिजमुख्योर्वाचमाचम्य सख्यो-
र्हरिरथ समुदश्चद्दोःकरोपात्तशाखः ।
पिहितमणिविभूषः कौतुकी तत्र साक्षा-
त्तरुवर इव तस्थौ त्यक्तपीतोत्तरीयः ॥ ४८ ॥
विशेषकं ।

हे विशाखे ! यद्यस्मात् मुग्धां मूढामपि मम दृशं वारं वारं भ्रमयसि तत्तस्मादिदं ते हास्यं दूरे आस्तां । किम्बा मां न भ्रमयसि किन्तु यथार्थमेव वदसि यतः स्थिरतमाल एव माधव शब्देनोक्तः मधौ-वसन्ते उत्पन्न इति व्युत्पत्तेः ॥ ४६ ॥

विशाखा आह । अयि राधे ! इयं हास्यं न भवति किन्तु तं श्रीकृष्णं अनालोकयन्त्या मया तव आश्वासनार्थं इदं गदितं उक्तं । तथापि त्वन्तु अतिचतुरिमाब्धिरतो न अभ्रमः न भ्रमयुक्ता भवसि । तदपि अस्य तमालवृक्षस्य रोचिः कान्तिरेव ते तव क्षणं तुष्ट्यै भवतु ॥ ४७ ॥

इति सख्योर्व्विशाखा-राधयोर्व्वाचमाचम्य आस्वाद्य सम्यगुदञ्चन्

सुरतरुतलतस्तं कृष्णमन्विष्य दूरा-
दिह वकुल-निकुञ्जे यावदेवानयामः ।
नलिनमुखि ! तमालस्कन्ध-विन्यस्तहस्ता
धृतिलवमपि धृत्वा तावदत्रास्व राधे ! ॥४६॥

इति सललितमाली-वृन्दमुक्त्वा प्रयातं
वरतनुरवलोक्यामन्दकन्दर्पचिन्ता ।
लघु लघु सविधेऽस्यागत्य सा विस्मयाब्धौ
न्यपतदतनुहर्षक्ष्माधरं चारुरोह ॥ ५० ॥

युग्मकं ।

कति न कति तमाला लोकिताः सन्त्ययं तु
व्रजपति-सुतकान्तीर्हन्त ! ता एव धत्ते ।

हस्तो येन तथाभूतो हरिः कराभ्यां गृहीतशाखः । आच्छादितमणिमय भूषणः सन् साक्षात्तरुरिव तस्थौ ॥ ४८ ॥

सख्यः परिहसन्त्यः श्रीकृष्णमेव तमालत्वेनोपदिश्य तेन सहैकान्ते मिलनार्थं युक्तिमुत्थापयन्ति । सुरतर्व्विति । सुरतरुतलात् यावत् कृष्णं अन्विष्य वयं अत्रानयामः तावत् तमालस्य स्कन्धे हस्तं न्यस्य अत्र क्षणं आस्व तिष्ठ ॥ ४९ ॥

सखीवृन्दं ततोऽन्यत्र प्रयातं । तदनन्तरं सा वरतनुरपि अमन्द कन्दर्प-चिन्तायुक्ता सती तस्य तमालत्वेन निश्चितस्य श्रीकृष्णस्य निकटे आगत्य अहो ! तमालोऽयं साक्षात् श्रीकृष्ण एव इति बिस्मय-समुद्रे न्यपतत् । एवं वस्तुस्वभावेन तद्दर्शनजन्योऽतनुर्महान् हर्ष रूपो यः पर्व्वतस्तं चारुरोह । एकस्मिन्नेव काले समुद्रपतनपर्व्वता-रोहणरूपशब्दविरोधो द्रष्टव्यः ॥ ५० ॥

मया आलोकिताः कति तमाला न सन्ति अयन्तु तमालः साक्षात्

मधुरिम-भरमेवं स्थावरेष्वप्यपारं
यदसृजदत एकं नौमि धातारमेव ॥ ५१ ॥
भवतु निकटमेत्य स्वेत्तणे तर्पयामी-
त्यमितमुदुपगम्यैवाश्रुपूर्णेदमूचे ।
निरुपमरुचिजाल ! त्वां स्तुवे किं तमाल !
त्वमयि ! नहि नगः श्रीकृष्ण एवासि
साक्षात् ॥ ५२ ॥
तदतिदवथुशीर्णां मामिहाश्लिष्य वाढं
निजमधुरमरन्दैः सिञ्च भूमीरुहेन्द्र ! ।
सुखजलधितरङ्गैः साधु तैरेव तावत्
क्षणमतनुदवार्त्तं प्लावयामि स्वचेतः ॥ ५३ ॥
इति सपदि निभाल्याप्यस्य गात्राणि मौग्ध्या-
न्नच परिचिनुते स्म प्रौढ़शुद्धानुरागा ।

श्रीकृष्णस्य ता एव कान्तीर्धत्ते । तस्मात् य एव विधाता एवं माधुर्य्यातिशयं स्थावरेष्वप्यसृजत् । तं एकं विधातारमेवाहं नौमि ॥५१॥ अपरिमिता मुत् हर्षो यस्यास्तथाभूता सती ऊचे । हे निरुपमरुचि समूहो यस्य तथाभूत ! ॥ ५२ ॥

यस्मात् साक्षात् श्रीकृष्ण एव त्वं तस्मात् कन्दर्प-पीड़या शीर्णां मां वाढं अतिशयेनाश्लिष्य निज-मधुरमकरन्दरूपैरधरामृतैः सिञ्च । कन्दर्पदवार्त्तं चेतः अहं प्लावयामि ॥ ५३ ॥

प्रौढ़शुद्धानुरागा इति । अनुरागस्य स्वभावोऽयं यत् प्रतिक्षणं कान्तस्याप्राप्तिं सम्भावयतीति भावः ॥ ५४ ॥

परिहितमपि पीतं तस्य वासो मृगाक्षी
निजतनुरुचिपुञ्जं विम्वितं मन्यते स्म ॥५४॥
सचकितमवलोक्यैवाभितः सा यदोद्य-
न्निजभुजलतिकाभ्यां तं वलादालिलिङ्ग ।
स्मरमदघनघूर्णः सोऽपि दोर्भ्यां प्रगाढ़ं
प्रतिपरिरभते स्म प्रेमरत्नाकरस्तां ॥ ५५ ॥
तनुयुगमतनुर्यत् कीलितीकृत्य वाणै-
रतिरुचिरममुष्णाच्चित्तरत्नं प्रयत्नैः ।
तदृत इव तमालो माधवोऽभूच्चिरं सा-
प्यजनि कनकवल्ली तं वलाद्वेष्टयन्ती ॥ ५६ ॥
अथ कथमपि कान्ता प्रत्यभिज्ञातकान्ता
धृतरतिरणरङ्गाप्यूढ़लज्जातरङ्गा ।

---

सखीनामागमनशङ्कया अभितः सचकितमालोक्य सा यदा श्रीकृष्णमालिलिङ्ग । स्मरमदघनघूर्णः स कृष्णोऽपि तां प्रति परिरभते स्म ॥ ५५ ॥

यस्मात् अतनुः कन्दर्पः राधाकृष्णयोस्तनुयुगं वाणैर्विद्ध्वा कीलितीकृत्य एकत्रीकृत्यातिरुचिरं चित्तरत्नं अमुष्णात् अचोरयत् । चोरो हि राज्ञि फुत्कारशङ्कया तं वाणैर्विद्ध्वैव तस्य द्रव्यं गृह्णातीति रीतिः । तस्मात् प्रेमावेशेन जाड्योदयात् श्रीकृष्णः सत्य एव तमाल इवाभूत् सापि जाड्येन कनकवल्ली अजनि ॥ ५६ ॥

नायं तमालः किन्तु मम कान्त एव इति प्रत्यभिज्ञातः कान्तो यया तथाभूता कान्ता राधा अनन्तरं धृतो रतिरणरङ्गः सम्भोगो यया

स्वमतुलसरलत्वं तस्य चातुर्य्यवत्त्वं
मुहुरपि रसयन्ती सिस्मिये कुन्ददन्ती॥५७॥

पौष्पं तल्पमुपेत्य पुष्पधनुषः साम्राज्य-संसिद्धये
यद्यत् प्रारभत प्रियद्वयमिदं साक्षात् सरस्वत्यपि ।
आलीनां नयनेभ्य एव चिरमेवाधीत्य चेद्वर्णये
यत्किञ्चिन्न समापयेत्तदपि सा स्तम्भाश्रुवैस्वर्य्य-
भाक् ॥ ५८ ॥

इति श्रीकृष्णभावनामृते महाकाव्ये प्रादोषिक
विलासास्वादनो नामाष्टादशः सर्गः ।

---

तथाभूतापि स्वधर्म्मवाम्यमकृत्वा प्रत्युत स्वकर्त्तृकालिङ्गनेन ऊढः प्राप्तो लज्जातरङ्गो यया तथा भूता। किन्तु स्वीयमतुलसारल्यं श्रीकृष्णस्य च चातुर्य्यवत्त्वं मुहुरास्वादयन्ती सती सिस्मिये स्मितं चकार ॥ ५७ ॥

राधाकृष्णरूपप्रिय-द्वयं पुष्पशय्यां प्राप्य कन्दर्पस्य साम्राज्य सिद्धये यद्यत् प्रारभत साक्षात् सरस्वत्यपि सखीनां नयनेभ्य एव सकाशात् इदं चिरमेवाधीत्य यत् किञ्चिद्वर्णयेत् चेत् तदपि वर्णनं न समापयेत् न समाप्तं बभूव यतो वर्णनारम्भत एवानन्देन स्तम्भाश्रुगद्गद स्वरभाक् सा भवति ॥ ५८ ॥

समाप्तोऽयमष्टादशः सर्गः ।

## ऊनविंशः सर्गः ।

प्रसूनचापः स महापराधी
प्रापाधिकारं तव काननेऽस्मिन् ।
त्वां मार्गयन्तीः सुकुमारगात्री-
र्हा ! मार्गणैर्भेत्स्यति मत्सखीस्ताः ॥ १ ॥

तत्त्वं त्रातुमितोऽर्हसि प्रियतमेत्युक्तोऽच्युतो राधया
तां प्रत्याह समाश्वसि ह्यनुपमस्नेहामृतस्नापिते ! ।
यो मां मृग्यतिमात्रमत्र तमहं मृग्यन् हृदैवादधा-
म्येतन्मे व्रतमव्रणां तदिह ताः शस्तैः करिष्ये
ऽङ्किताः ॥ २ ॥

युग्मकं ।

---

प्रेम्णा सखीनामपि श्रीकृष्णेन सह सम्भोगार्थं श्रीराधिका युक्तिमुत्थापयति । महापराधी कन्दर्पस्तव वृन्दावने अधिकारं प्राप । अतस्त्वामन्वेषयन्तीर्मम सखीर्बाणैर्भेत्स्यति विद्धाः करिष्यति ॥ १ ॥

इति राधया उक्तः श्रीकृष्णः तां प्रत्याह । हे सखीः प्रति अनुपम स्नेहामृतस्नापिते ! राधे ! एतद्व्रतं अव्रणं अच्छिद्रं तत्तस्मात् ताः सखीः शस्तैर्मङ्गलैरङ्किताः करिष्ये ॥ २ ॥

इत्यन्यत्र गते हरौ परिजनैः कैश्चिन्निदिष्टैरसा-
न्नेपथ्यानि पुरेव साधु रचितान्यङ्गेषु तस्यास्तथा ।
नूत्नं तल्पमकारि पौष्पमपि ताः कृष्णोपभुक्ता यथा
पश्येयुर्ललितादयो विधुमुखीं तां वाससज्जा-
मिव ॥ ३ ॥

अथागतास्ताः कुटिलभ्रुवः सखी
राधाभिनीयैव विषादमब्रवीत् ।
प्रेयान् स नायान्मम किं ततोऽसुभि-
स्तन्वाथवा भूषितया किमेतया ॥ ४ ॥

उपालिप्सूरालीः पुनरुपसृता वीक्ष्य पिहित-
स्मिता चिल्लीवल्लीं दर चटुलयन्त्याह सुतनुः ।

अन्यत्र सखीनां निकटे गते सति राधया निदिष्टैः कैश्चित् परिजनै-र्दासीभिः रसात् रागात् तस्या अङ्गेषु नेपथ्यानि रचितानि तथा वासकसज्जा-सम्पादनार्थं पुष्पसम्बन्धितल्पमपि नूत्नं तथा अकारि यथा कृष्णोपभुक्ता ललितादयस्तां राधां वासकसज्जामिव पश्येयुः ॥३॥

श्रीकृष्णेन कृतं यद्विडम्बनं तस्य हेतुभूतां राधिकां प्रति कुटिल भ्रुवः सखीः राधा विषादमभिनीयाब्रवीत् । प्रेयान् स श्रीकृष्णः यदि न अयात् ततो मम प्राणैः किं अथवा वासकसज्जोचितभूषण विशिष्टया तन्वा किं ? ॥ ४ ॥

उपसृता निकटं प्राप्ता आलीः उपालिप्सूः उपालम्भनेच्छूर्वीक्ष्य भ्रूवल्लीं ईषच्चञ्चलयन्ती राधा आह । अहो ! वो युष्माकं कष्टं यतो बिम्बाधरकुचे क्षतमजनि । अथवा भुजङ्गं सर्पं पक्षे कामुकं कृष्णं

अहो ! कष्टं किं वः क्षतमजनि विम्वाधरकुचे
भुजङ्गं मृग्यन्त्यः कमविशत वा गह्वरवरं ॥ ५ ॥
भुजङ्गं स्वाधीनं सुमुखि ! जनतां दंशयसि य-
त्तदास्तां ते ख्यातं व्रज-भुवि यशो मा हस पुनः ।
अहं चेद्व्याख्यास्ये किमपि चरितं तत् सपदि ते
गिरं तां ह्रीर्देवी विरमयितुमाविर्न भविता ॥ ६ ॥

इत्येव यावल्ललिता वभासे
मध्येसभं तावदुपेत्य कृष्णः ।
प्राहालयो ! वच्मि चरित्रमस्या-
श्चित्रं यदेवाद्यतनं सुरम्यं ॥ ७ ॥

युग्मकं ।

आगत्यैव प्रकटमनया याच्यत प्रेष्ठ ! मह्यं
देह्याश्लेषं मदधरसुधां निर्विवादं गृहीत्वा ।

---

मृग्यन्त्यः कमपि गह्वरवरं अविशत । तत्रस्थकण्टकैरेव वा किं विद्धा वभूवुरिति भावः ॥ ५ ॥

यद्यस्मात् भुजङ्गद्वारा जनतां दंशयति तत्तस्मात् व्रज-भुवि तव ख्यातं यश आस्तामेव पुनर्म्मा हस हास्यं मा चकार । सपदि तत्-क्षण एव लज्जा देवी तव वाक्यं विरमयितुं स्थगयितुं किं न आविर्भविता ? ॥ ६ ॥

मध्येसभं सभामध्ये ॥ ७ ॥

श्रीकृष्ण आह । अनया राधया प्रकटं अयाच्यत । याच्ञामेवाह । हे प्रेष्ठ ! मदधरसुधां गृहीत्वा मह्यं आश्लेषं देहि । स्वधर्म्मं वाक्यं

कामाग्निर्मे ज्वलति हृदि तं साधु निर्व्वापयेति
श्रुत्वैवाहं न्यपतमधिकं विस्मयाम्भोधि-मध्ये ॥८॥
तावद्धैर्य्यं ह्रियमपि वलाद्यामुने सान्द्रपङ्के
मग्नीकृत्य स्वयमतिमुदालिङ्ग्य तल्पे निवेश्य ।
निर्जित्याहं वितनुयुधि निर्यापितोऽस्मान्निकुञ्जा-
द्युष्मानेवाश्रयमथ मुखं सावृणोदञ्चलेन ॥ ९ ॥

ब्रूषे मृषा वा ललिते ! रवेस्तत्
पृच्छात्र दत्वा शपथं सखीं स्वां ।
तथादृता साह न वेद्मि मोहा-
त्तमालमुद्दिश्य यदप्यवोचं ॥ १० ॥
हास्यप्लुतास्यनलिनासु सखीषु कृष्णः
प्रावोचदर्थनमिदं निभृतं न चित्रं ।

---

विहाय स्वमुखेन अस्याः सम्भोगप्रार्थनां श्रुत्वा विस्मयसमुद्र-मध्ये अहं न्यपतं ॥ ८ ॥

धैर्य्यलज्जां च यमुना-पङ्के मग्नीकृत्य स्वयं मां वलात् आलिङ्ग्य शय्यायां निवेश्य अनन्तरं कन्दर्पयुद्धे निर्जित्य कुञ्जात् निर्यापितो निष्काशितोऽहं युष्मानेव आश्रयं । अथानन्तरं सा लज्जया अञ्चलेन मुखं आवृणोत् ॥ ९ ॥

ललिता आह । हे कृष्ण ! त्वं मृषा ब्रूषे । कृष्ण आह । हे ललिते ! सूर्य्यस्य शपथं दत्वा स्वां सखीं राधिकां पृच्छ । तथा तेनैव प्रकारेण ललितया हे सखि ! यथार्थं वदेति आदृता सा राधा आह । मोहात् अज्ञानात् तमालमुद्दिश्य यदप्यवोचं तत्तु न वेद्मि विस्मृता वभूवेत्यर्थः ॥ १० ॥

"सिञ्चाङ्ग ! नस्त्वदधरामृतपूरकेणे"-
त्यस्या गिरं सदसि तां न हि विस्मराम॥११

वंशीं लभेय यदि तामिह वादयेय-
मुन्मादयेयमभिकृष्य समानयेयं ।
स्वस्वप्रकृत्यननुरूप चरित्ररूप
वाचस्तदाहमपि वो रचयेयमग्रे ॥ १२ ॥

इत्युक्तवत्यै निजवल्लभायै
कृष्णस्तदैवोमिति वंशिकां स्वां ।
दत्वा ततोऽगादपरत्र ताभिः
सार्द्धं सखीभिः कुतुकं विधित्सुः ॥ १३ ॥

अथ जगावधरार्पितवंशिका
विधुमुखी मधुरं हरिवेशभाक् ।

---

हास्यप्लुतमुखकमलासु सखीषु सतीसु कृष्णः प्रावोचत् । श्रीराधिकाया एकान्ते इदं सम्भोगप्रार्थनं न चित्रं किन्तु महारासे व्रजसुन्दरीणां सभामध्ये अस्याः "सिञ्चाङ्गनेति" वाक्यं नहि विस्मराम ॥ ११ ॥

वंशीहेतुक एव स स्वभावविपर्य्ययः अतएव वंश्या एव दोषो नतु मम इति प्रतिपादयितुं राधिका आह । अहं यदि वंशीं लभेय । एवं तां वंशीं यदि वादयेयं । तेनैव वादनेन यदि उन्मादयेयं । तेन उन्मादनेन युष्मानभिकृष्य यदि समानयेयं । तदा स्वस्वप्रकृत्यननुरूपाणि चरित्ररूपवचांसि यासां तथाभूताः रचयेयं करोमीत्यर्थः ॥ १२ ॥

ओमिति स्वीकृत्य राधिकायै स्वीयां वंशीं दत्वा कौतुकं कर्त्तुमिच्छुः श्रीकृष्णः सखीभिः सार्द्धं ततः सकाशात् अन्यत्रागात् ॥ १३ ॥

श्रीकृष्णं बिना अन्यस्य वंश्यापि आकर्षकत्वं नास्तीति निश्चित्य

हरिरगात् प्रमदात् प्रमदाकृतिः
परिवृतो ललितादिभिरालिभिः ॥ १४ ॥
कुलभुवो भुवनप्रथितात्त्विषः
कथयतात्र कथं द्रुतमागताः ? ।
निशि दिशि प्रदिशि भ्रमथादरा-
दयि ! दरापि दरं कुरुतावलाः ! ॥ १५ ॥
तद्यात गोष्ठं नहि तिष्ठतात्र वः
स्त्रीणां स्वधर्म्मः पति-सेवनं यतः ।
किम्वा भजध्वे हृदि पुष्पमार्गण-
स्पृहामियं निष्कुट एव सेत्स्यति ॥ १६ ॥

हरिवेशभाक् सा अधरार्पितवंशिका सती मधुरं यथास्यात्तथा जगौ-श्रीकृष्णोऽपि प्रमदात् हर्षात् प्रमदाया राधाया इव कुङ्कमलेपनेनाकृति-र्यस्य तथा भूतः सन् सखीभिः सह अगात् अभिकृष्य समानयेयमिति पूर्व्वोक्ता तस्या निकटमित्याक्षेपलब्धं ॥ १४ ॥

महारासारम्भे श्रीकृष्णो यथा "रजन्येषा घोररूपे"त्यादिकं उवाच तथैव श्रीकृष्णवेशधारिणी राधिकाप्याह । त्रिभुवने ख्याता यशोरूपा कान्तिर्यासां तथाभूताः कुलाङ्गना भूत्वा कथमत्र वने यूयमागता इति कथयत । कथं वा, निशि रात्रौ भ्रमथ आदरात् कस्यापि पुरुषस्यादरं प्राप्य । अयि अवला ! दरापि ईषदपि दरं भयं कुरुत ॥ १५ ॥

किम्वा पुष्पस्यान्वेषणस्पृहां हृदि भजध्वे चेत्तदा इयं स्पृहा निष्कुटे। गृहारामास्तु निष्कुटा इत्यभिधानात् तत्रैव स्व-स्व-गृहोद्याने सेत्स्यति सिद्धा भविष्यति न त्वत्र । पुष्पमार्गणः कामः निष्कुटो वृन्दावनं । किञ्च कृष्णमुद्दिश्य स्ववाम्यमालम्ब्यापि सपरिहासमाह । निष्कुट एव

इति तदुदितमात्रादास्य-वैरस्य भाजो
नखमणिलिखितक्ष्मा ऊचिरे साश्रु कान्ताः ।
प्रियतम ! रसमूर्त्ते ! मैव वक्तुं त्वमेवं
त्वदनु सृतिभृतोऽस्मानर्हसि प्रेमसिन्धो ! ॥१७

विशेषकं ।

मदनदहनदूनाः स्वास्तनूस्त्वन्मुखेन्दो-
रमृतरस-निषेकैः कुर्म्महे शैत्यभाजः ।
इति चिरजनितां नश्छिन्धि माशां स्ववेणु-
ध्वनिभिरपि निषिच्यैवानया तीक्ष्णवाचा॥१८

अथाननाब्जे स्मितमाधुरीं सा
प्रकाश्य वैधुर्य्यमपास्य सद्यः ।

---

निजनन्दीश्वरगृहोद्यान एव स्वगृहदासीभिरेव तां स्पृहां साधय नतु मयेति ॥ १६ ॥

महारासे "मैवं विभो ! ऽर्हति भवा"नितिवत् राधिकावेशधारिकृष्ण प्रभृतिललितादयोऽप्याहुः । तस्याः कृष्णवेशधारिण्या राधाया उदितमात्रादेव मुखे बैरस्यभाजस्ता अश्रुयुक्ताः कान्ता ऊचिरे । पक्षे क्रान्तः कृष्णश्च कान्ता ललितादयश्चे त्येकशेषः । तासां वचनमेवाह । हे प्रियतम ! हे रसमूर्त्ते ! पक्षे प्रियतमा रसमूर्त्तिर्यस्या हे तादृशे ! राधे ! त्वदनुगमनधारिणीः अस्मान् एवं कठोरं वक्तुं नार्हसि यतः हे प्रेमसिन्धो ! ॥ १७ ॥

कन्दर्पाग्निना दूनाः स्वास्तनूस्तवाधरामृतैः वयं शैत्यभाजः कुर्म्महे । इति चिरकालं व्याप्य उत्पन्नामाशालतां वेणुध्वनिभिर्निषिच्यानया तीक्ष्णया वाचा मा छिन्धि ॥ १८ ॥

अथ कठोरवचनानन्तरं "प्रहस्य सदयं गोपीरात्मारामोऽपी"तिवत्

स्ववेषभावेक्षणभावभाजा

कान्तेन रेमे श्रिततन्निसर्गा ॥ १९ ॥

सस्नुस्ताः कौतुकाब्धौ सरभसमसकृ-

द्वीक्ष्य वीक्ष्यैव सख्यः

कृष्णश्रीराधायोर्या स्मरसमरकला

वाम्यचापल्यभाजोः ।

स्वा अप्याश्लिष्यमाणा व्यधिषत न तनूः

किं तया प्रेष्ठसख्या

वृन्दा दूरस्थितैव स्वममनुत जनु-

र्धन्यमश्रुप्लुताक्षी ॥ २० ॥

पश्यन्तीनां सखीनामपि निभृतमसौ

कान्तमादाय तस्मा-

दन्तर्धायैव देशात् क्वचन रहसि तं

क्रीडयन्ती यदाभात् ।

सा राधिकामुखकमले स्मितमाधुरीं प्रकाश्य तेन हास्येनैव तासां राधा वेषधारिश्रीकृष्णललितादीनां वैधुर्य्यं विरहदुःखं अपास्य दूरीकृत्य श्रीराधिकाया वेषरचनेक्षणभावविशिष्टेन श्रीकृष्णेन सह आश्रितस्तस्य श्रीकृष्णस्य निसर्गः स्वभावो यया सा राधा रेमे ॥ १९ ॥

यथा संख्येन वाम्यचापल्यभाजोः कृष्णराधयोः स्मरसमरकला वारं वारं वीक्ष्य वीक्ष्य ताः सख्यः आनन्दसमुद्रे सस्नुः स्नानं चक्रुः । याः सख्यः स्वास्तनूः तया प्रेष्ठसख्या न किं आलिङ्गिता व्यधिषत अकार्षुः ? अपि तु अकार्षुरेव ॥ २० ॥

ता अप्यश्वत्थनीपप्रभृतितरु-तती-
स्तौ विषादेन पृष्ट्वा
दृष्ट्वा दृष्ट्वापि जातार्पितनयनयुगाः
खेदमेवाभिनिन्युः ॥ २१ ॥

वनाद्वनं यान्त्यथ मण्डयन्ती
विचित्रमाल्याभरणैः प्रियं सा ।
न पारयेऽहं चलितुं क्व चेति
गिरा विहायैव तमाशु लिल्ये ॥ २२ ॥

भुवमश्रुभिरार्द्रयन्मुहुः
कृतहाहास्वन एव माधवः ।
ललितादिभिरावृतः पुन-
र्विललापोच्चतरं स्वरं सृजन् ॥ २३ ॥

---

रासे श्रीकृष्णो यथा अन्तर्धानं चकार तथा सापि चकार इत्याह । पश्यन्तीनामिति । "दृष्टो वः कच्चिदश्वत्थ" इतिवत् ता ललितादयोऽपि पृष्ट्वा अनन्तरं कुञ्जमन्दिरे तयोः सम्भोगं गवाक्षार्पितनयनाः सत्यः दृष्ट्वा दृष्ट्वा आनन्दमग्ना अपि महारासे "केशप्रसाधनं त्वत्र कामिन्याः कामिना कृत"मिति बदन्तीनां विपक्षाणां खेदोत्थवचनमनुसृत्य तस्यानुकरणार्थं खेदमेवाभिनिन्युः ॥ २१ ॥

श्रीकृष्णवेषधारिणी राधा स्ववेशधारिणः प्रियस्य "न पारयेऽहं चलितु"मिति वचनं श्रुत्वा तं विहायैव सा लिल्ये अन्तर्धानं चकार ॥ २२ ॥ २३ ॥

दयिते ! ह समागमेन नो
धिनु यत्त्वच्चरणाम्वुजं हृदि ।
मृदुलं कठिने ! शनैः शनै-
र्निदधे तद्दनु मा तृणाङ्कुरैः ॥ २४ ॥
साथ स्मितास्यागमदाशु विद्युत्
पीताम्वरा नीरदनीलरोचिः ।
स्वस्वार्चिरन्योन्य-समर्पणात् किं
तदङ्गवस्त्रे दधतुः सुसख्यं ॥ २५ ॥
काचित् पाणिं काचन पादाम्वुजमस्या-
स्तर्ह्येवैका वाहुमधादुत्पुलकेऽंशे ।

"जयति तेऽधिकं जन्मने"तिवत् श्रीकृष्णललितादयोऽप्याहुः । हे दयित ! श्रीकृष्ण ! इह समागमेन नोऽस्मान् धिनु सुखय। पक्षे हे दयिते ! राधे ! ह स्पष्टं । यद्वा मा हस परिहासं मा कुरु । आगमेन आगमनेन । यच्चरणकमलमस्माकं कठिने हृदि व्यथाशङ्कया शनैर्निदधे तच्चरणं तृणाङ्कुरैर्मा दुनु मा दुःखय ॥ २४ ॥

"तासामाविरभूत् शौरि"रितिवत् सापि तत्राविर्व्वभूवेत्याह । श्रीकृष्ण इव विद्युत्तुल्यपीताम्बरा मेघतुल्यरोचिः सा अगमत् । श्रीकृष्णाङ्ग स्वकान्तिं राधाङ्गाय दत्वा तस्या अङ्गकान्तिं स्वयं जग्राह । एवं तयोर्व्वस्त्रयोरपि परस्परकान्तिसमर्पणात् किं राधाकृष्णयोर्द्वे अङ्गवस्त्रे सुसख्यं दधतुः ॥ २५ ॥

"काचित् कराम्बुजं शौरे"रितिवदाहुः । महारासे श्रीराधिका यथा "काचित् भ्रुकुटिमावध्ये"ति पद्योक्तभावं चकार । तथात्रापि राधा-भावभावितः श्रीकृष्णोऽपि भ्रूचापलभङ्गीं यद्तानीत् विस्तारयामास ।

कान्तश्चिल्लीचालनभङ्गीं यदतानीत्
तामास्वाद्यैवाजनि राधा विततात्ती ॥ २६ ॥
वृन्दावादीत्तावदुपेत्याम्बुजनेत्रौ
राधे ! ऽजैषीस्त्वं निजकान्तं भ्रमयन्ती ।
कृष्ण ! प्रोद्यद्दुर्गमभावो यदभूस्त्वं
तेनाश्लिष्टस्त्वं च महत्या जयलक्ष्म्या ॥ २७ ॥
तामर्थयित्वा मुरलीं ततः सा
मुकुन्द-पाणौ निदधे यदैव ।
तदैव कृष्णोऽहमहो ! न राधे-
त्याश्चर्यमेवाभिनिनाय रङ्गी ॥ २८ ॥
विद्युन्मेघौ यौ मिथो वर्णभाव-
व्यत्यासेनावर्षतां हर्षधाराः ।

---

तां भङ्गीमास्वाद्यैव श्रीकृष्णभावभाविता राधा विस्मयेन विस्तृताक्षी अजनि ॥ २६ ॥

अम्बुजनेत्रौ राधाकृष्णौ वृन्दा आह । हे राधे ! स्वकान्तं विभ्रमयन्ती सती अजैषीः जययुक्ता त्वमभूः । हे कृष्ण ! प्रकर्षेण उद्यन् राधाया दुर्गमभावो यत्र तथाभूतस्त्वं अभूस्तेन हेतुना त्वमपि महत्या जयशोभया आश्लिष्टः तथा च तवापि जयोऽभूदिति भावः ॥ २७ ॥

सा वृन्दा । पूर्वोक्तवृन्दावाक्येनैव नाहं राधा अपि तु कृष्ण एव इति ज्ञानं जातमेव अधुना अभिनयमात्रं चकारेति भावः ॥ २८ ॥

राधाकृष्णरूपौ यौ विद्युन्मेघौ परस्परवर्णभावव्यत्यासेन हर्षधारा

तावासीनौ स्वीकृतस्वस्वरूपौ
देव्याटव्याः सेव्यमानौ व्यभातां ॥ २९ ॥
अप्राणापि प्राणिनो मोहयन्ती
लब्धप्राणा स्यान्नवद्वारदेहा ।
मध्येयामं द्राग्वशीभूय सारं
मध्ये प्रेम्ना मोदयन्ती त्रिलोकीं ॥ ३० ॥
तामालि ! जानीहि मम प्रहेली-
मित्युच्यमाना हरिणाह राधा ।
उत्कोचमेवाधरशीधु यस्यै
ददासि वंशी तव कुट्टिनीयं ॥ ३१ ॥

युग्मकं ।

गायन्ती ततमनुरागिणी यशस्ते
या मूर्च्छां भजति लसद्गुणावलिश्रीः ।

---

अबषंतां स्वीकृतस्वस्वरूपौ तौ एकत्र आसीनौ वसन्तौ सन्तौ वृन्दया फलपुष्पमालादिभिः सेव्यमानौ विशेषेण अभातां ॥ २९ ॥

"भजतोऽनुभजन्त्येक" इति वत् प्रहेलिकासंलापं रासाङ्गमाह । प्राणरहितापि प्राणसहितान् मोहयन्ती सती स्वयं लब्धप्राणा नवद्वार देहा च स्यात् । एवं मध्येयामं यामस्य प्रहरस्य मध्ये शीघ्रं वशीभूय प्रेम्ना त्रिलोकीं मोदयन्ती सती सारं धत्ते । वंशीपक्षे मध्येयाममिति या वंशी मध्ये मं मकारं धत्ते । ततश्च वंशी सती कीदृशी भूयसा प्रेम्ना अरं शीघ्रं त्रिलोकीं मोदयन्ती ॥ ३० ॥

हे राधे ! मम एतादृशप्रहेलीं जानीहि इति हरिणा उच्यमाना राधा आह । यस्यै दूतीरूपायै वंश्यै अधरामृतरूपां उत्कोचं ददासि ॥३१

ग्रामस्थाप्यतनुरसेषु या प्रवीणा
तां ब्रूहि प्रणयनिधे! प्रहेलिकां नः ॥ ३२ ॥
ईर्ष्यन्ती मम मुरलीं कलावलीभि-
र्जैत्री मां सुखयति माधुरीं दधाना ।
सा राधे! त्वमिव सुवृत्तपीनतुम्बी-
स्तन्यत्र स्फुरति रसेन वल्लकीयं ॥ ३३ ॥
अथोचिरे श्रीललिता-विशाखा-
चित्रादयोऽपीहितजैत्रभावाः ।

अधुना श्रीराधिका प्रहेलीमाह । या अनुरागिणी सती ततं विस्तृतं तव यशः गायन्ती मूर्च्छां भजति । कथम्भूता लसद्गुणावलीनां श्रीः शोभा यत्र । सा ग्रामस्था ग्राम्यापि अतनुरसेषु कन्दर्परसेषु प्रवीणा । वीणापक्षे ततं वीणासम्बन्धिवाद्यं गायन्ती कुर्व्वती-त्यर्थः । वाच मवोचदितिवत् सर्व्वेऽपि धातवः करोत्यर्था एव । अनुरागिणी अनुकूलवसन्तादिरागवती । मूर्च्छा मूर्च्छना । रसन्त्याः शब्दायन्त्या गुणानां तन्त्रीणां श्रेण्याः शोभा यस्याः । सप्त स्वरास्त्रयो ग्रामा इति गानशास्त्रोक्तास्त्रयो ग्रामास्तत्रस्था या प्रकृष्टा वीणा श्रेष्ठ रसेषु विषये भवति श्रेष्ठरस-प्रतिपादिका इत्यर्थः । अर्थे वेदाः प्रमाण-मितिवत् विषयसप्तमी । तां कथम्भूतां प्रहेलिकां श्लाघितां । हेडु-श्लाघायां ॥ ३२ ॥

श्रीकृष्ण आह । कलो मधुरास्फटध्वनिः कलाश्चतुःषष्टिश्चे-त्येकशेषस्तस्य श्रेणीभिर्मुरलीं जेत्री इयं तव वल्लकी वीणा मां रसेन रागेण सुखयति । हे राधे! त्वं यथा सुवर्त्तुलपुष्टतुम्ब्याविव स्तनौ यस्यास्तथा भूता । तथा वीणापि वर्त्तुलपुष्टतुम्ब्याविव स्तनौ यस्या-स्तथा भूता ॥ ३३ ॥

जेतुरयमिति तस्येदमित्यादिना जैत्रो यो भावस्तथा च ईहितं

तमन्वधिन्वन् स्वसखीं पटिम्नो
भङ्ग्यैव याः संसदि वर्णयन्त्यः ॥ ३४ ॥

बाला अप्यतिवृद्धा ये बन्धं मोक्षं च बिभ्रति ।
शुद्धानपि तमोधाम्नो वद तान् कुटिलानपि ॥३५॥

प्रतिकर्म्मनिबद्धानामपि कृष्णोऽस्मि मोक्षदः ।
येषां रत्युद्गमे केशान् विभक्तांस्तानिमान् भजे ॥३६

धृत्वा विभूतिं भ्रमतीह सर्व्वथा
ध्वन्यर्थ-तत्व-प्रथनेऽतिपण्डिता ।

---

वाञ्छितं जयित्वं याभिस्तथाभूता ललितादयो ऽप्यूचिरे। या ललिता-दयः पाटवस्य चातुर्य्यस्य भङ्ग्यत्र स्वसखीं राधिकां वर्णयन्त्यस्तं श्रीकृष्णं अधिन्वन् सुखयामासुः ॥ ३४ ॥

विरोधमुद्रयैव प्रहेलीं ललिता आह । बालका अतिवृद्धाः ये बन्धं बिभ्रति त एव मोक्ष्यंच बिभ्रति । शुद्धानपि तमोगुणाश्रयान् कुटिलान् वद । केशपक्षे अत्यन्तवृद्धिं प्राप्ता बालाः केशाः संस्कारसमये बन्धं बिभ्रति पश्चात् श्रीकृष्णकृतं मोक्षं च बिभ्रति । धूलिप्रभृतिमालिन्य रहितत्वेन शुद्धानपि तमःस्थानीयश्यामरूपस्य धाम्नस्तान् कुटिल केशान् ॥ ३५ ॥

श्रीकृष्ण आह । तान् विशिष्टभक्तान् अहं भजे येषां भक्तानां प्रतिकर्म्म कर्म्मणि कर्म्मणि निबद्धानां रत्युद्गमे प्रेमोपक्रमे कृष्णोऽहं संसारात् मोक्षदोऽस्मि । कथम्भूतान् भक्तान् केशान् के सुखे ईशते ऐश्वर्य्यं कुर्व्वन्ति अस्य श्लोकस्यार्थान्तरेण प्रहेलिकया अप्युत्तरमाह परस्परविभक्तान् केशान् भजे। येषां केशानां प्रतिकर्म्म "आकल्पवेशौ नेपथ्यं प्रतिकर्म्म प्रसाधन"मित्यमरात् केशसंस्कारसमये निबद्धानामपि कृष्णोऽहं रत्युद्गमे सम्भोगारम्भे मोक्षदोऽस्मि ॥ ३६ ॥

विशाखा प्रहेलीमाह। या योगिनी विभूतिं धृत्वा अध्वनि पथि

या योगिनी संभृतविश्वभावदृ-
ग्धन्योऽसि तां चेत् प्रिय! वोढुमीशिषे ॥३७॥
अनङ्गसौख्यसिद्धये यदुज्वलात्मवेदनं
कृपार्द्रया यया मुहुस्तदेव पाठितोऽभवं ।
विरज्य सर्व्वकर्म्मतो यदाज्ञया वनं गतो
लभेय निर्वृतिं गुरुं प्रियादृशं स्तवीमि तां॥३८
सदापवर्गसाधनो नितान्तदान्तविग्रहः
शुचिप्रियो रुचिप्रदोऽनुरागिताधुराधरः ।

सर्व्वथा भ्रमति । कथम्भूता अर्थानां वस्तुभूतानां तत्वानां महदादीनां तत्वविस्तारे पण्डिता । पुनः कथंभूता संभृतं धृतं विश्वेषामपि भावदृक् भावज्ञानं यया । हे प्रिय ! तां वोढुं समर्थोऽसि चेत् तदा त्वं धन्योऽसि राधिकाया दृक् पक्षे बिभूतिं कज्वलं धृत्वा चाञ्चल्यवशात् सर्व्वथा भ्रमति । कथम्भूता ध्वन्यर्थो व्यज्यमानानि वस्तूनि तेषां तत्वप्रथने पण्डिता । योगः कृष्णाङ्गेन सह सम्बन्धस्तद्वती । सम्भृता संपूर्णा विश्वे सर्व्वे अपि भावा औत्सुक्यादयो यस्यां सा चासौ दृक् चेति ॥ ३७ ॥

श्रीकृष्ण आह । अङ्गस्याभावोऽनङ्गं देहराहित्यरूपं यत्सुखं मुक्तिरित्यर्थः तस्य सिद्धये उज्वलः शुद्धो यो जीवात्मा तदनुभवो भवति । तत् आत्मवेदनं कृपार्द्रया यया योगिन्या अहं मुहुः पाठितोऽभवं । यस्या योगिन्या आज्ञया सर्व्वकर्म्मतो विरज्य वनं गतः सन् अहं निर्वृतिं लभेय । तां गुरुं योगिनीं स्तवीमि । कीदृशीं प्रियं आ सम्यक् दृक् ज्ञानं यतस्तां । दृक्पक्षे कन्दर्पसौख्यसिद्धये यत् उज्वलात्मनः शृङ्गार रसस्वरूपस्य वेदनं ज्ञानं भवति तदेव ज्ञानं यया दृशा अहं पठितः । तस्या दृशः कटाक्षरूपाया आज्ञया सर्व्वतो विरज्य वनं गतः सन् निर्वृतिं लभेय । तां राधाया दृशं स्तवीमि ॥ ३८ ॥

भिन्ना प्रहेलीमाह । सदा अपवर्गार्थं साधनं यस्य । नितान्तदान्तः

य एव भाति सौभगैस्तमत्र वर्णयन्नपि
स्वया रसज्ञयैव तां नयाच्युताशु धन्यतां ॥३९
किं वर्णयित्वैव विरम्यतामहो !
रसज्ञयाप्यस्य विनोपगूहनं ।
तदालयो योजयतामुमुत्सुकं
प्रियाधरं सन्ततमुत्कयानया ॥ ४० ॥
तनुतातनुलम्पटतां कुटिलाः !
स्वविटस्फुटकीर्त्तितकीर्त्तिभराः ।
इति भीषणभङ्गुरचिल्लिकटु-
क्रकचैः स्व-सखीः समतर्जदियं ॥ ४१ ॥

अतिशयेनान्तर्व्वाह्येन्द्रियनिग्रहो यस्य स चासौ विग्रहश्चेति सः । शुचि शुद्धं वस्तु प्रियं यस्य । अनुरागिताया अनुरागस्य धुरां अतिशयं धरति एवंभूतो यः सौभाग्यैर्भाति तं स्वकीयजिह्वया वर्णयन्नपि किं पुनस्तया जिह्वया आलिङ्गनेन तां जिह्वां धन्यतां नय । अधरपक्षे सदापवर्गं साधयति । प फ ब भ मकाररूप प-वर्गाणां ओष्ठाधरेणोच्चारणात् । अतिशयेन दान्तः श्रीकृष्णस्य दन्तसम्बन्धी विग्रहो युद्धं यस्य तथाभूतः । शुचिः शृङ्गाररसः प्रियो यस्य । अनुरागिता लालिमा तस्या अतिशयो यस्य तथाभूतश्चासौ अधरश्चेति ॥ ३९ ॥

श्रीकृष्ण आह । अहो ! रसज्ञया आलिङ्गनं विनैव किं वर्णयित्वैव विरम्यतां । रसज्ञा विरता भवेदित्यर्थः । तस्मात् हे आलयः ! मम जिह्वया सह संयोगे उत्सुकं राधिकाया अमुं अधरं सन्ततमुत् कण्ठतया अनया मम रसज्ञया सह यूयं योजयत ॥ ४० ॥

श्रीराधा सखीः प्रति प्रणयकोपवती आह । हे कुटिलाः ! सख्यः ! यूयं लम्पटेन सह कन्दर्पलाम्पट्यं तनुत विस्तारयत । अहं तु इतो

न रुषा परुषा भव साध्वि! भृशं
रचयाम्यथ निर्व्वचनां भवतीं ।
स्वकलामभिरक्ष्य विलक्षणधीः
प्रतिवक्ष्यसि चेदयि! जेष्यसि मां ॥ ४२ ॥

एकेन शोभामपि योऽभिधत्ते
द्वाभ्यां दिविष्ठांस्त्रिभिरेव वर्णैः ।
तवाप्यभीष्टं द्युनगं चतुर्भिः
श्रोत्राभिरस्यं सखि! पञ्चभिर्व्वः ॥ ४३ ॥

यामि इति तात्पर्य्यार्थः । यूयं कथम्भूताः स्वविटेन स्वीयकामुकेन स्फुटं यथास्यात्तथा कीर्त्तिताः ख्याताः कीर्त्त्यतिशया यासां ताः । इति प्रकाश्य भीषणा भयोत्पादिकाश्च ता भङ्गुराः कुटिलीकृता याश्चिल्लयो भ्रुवस्ता एव करात इति तीक्ष्णक्रकचरूपास्तैः स्वसखीः समतर्जत् ॥ ४१ ॥

श्रीकृष्णः रुषा च्छलेन यान्तीं श्रीराधां वारयन्नाह । हे साध्वि ! रुषा कठोरा मा भव । अहं तु भवतीं प्रहेलिकया निर्व्वचनां करोमि । त्वन्तु स्वीयां कलां वैदग्धीं संरक्ष्य प्रतिवक्ष्यसि प्रत्युत्तरं दास्यसि चेत् तदा विलक्षणधीः अतिसुधीस्त्वं मां जेष्यसि ॥ ४२ ॥

राधया ज्ञातार्थामपि लज्जया वक्तुमशक्यामेवंभूतां दुरूहां प्रहेलीं श्रीकृष्ण आह । एकेनेति । यो वर्णः एकेन स्वात्मक वर्णेन शोभां अभिधत्ते वदति । एवं यः पदात्मकः शब्दः स्वावयवाभ्यां द्वाभ्यां दिविष्ठान् देवान् वदति । त्रिभिर्व्वर्णैस्तवाभीष्टं वदति । चतुर्भिर्व्वर्णैर्द्युनगं कल्पवृक्षं वदति । पञ्चभिर्व्वर्णैर्युष्माकिं कर्णानां रसनीयं किमपि वस्तु वदति । प्रहेलिकाया अर्थो यथा । एकेन शोभामपीति प्रश्नेन शोभावाचकः सुशब्द उक्तः । द्वितीयेन देवतावाचकः अक्षरद्वयात्मकः सुरशब्द उक्तः । तृतीयप्रश्नेन स्त्रीणां अभीष्टस्य सुरतस्य

तमाचक्ष्व शब्दं त्वमित्युच्यमाना
प्रियेण प्रिया नम्रवक्त्रारविन्दा ।
अनीशापि रोद्धुं स्मितं भङ्गुरभ्रू-
रमुं सूक्ष्मधीर्व्याजतो व्याजहार ॥ ४४ ॥
वदैकेन चारुत्तरेणैव तावत्
क्रमाल्लब्धवर्णेन मत्प्रश्नवीथीं ।
त्वमादौ ततः स्वेहितं शब्दमेतं
प्रियां वाचयन् याहि पद्मां सखीं स्वां ॥४५॥

---

वाचकः अक्षरत्रयात्मकः सुरतशब्द उक्तः । चतुर्थप्रश्नेन कल्पवृक्ष-वाचकः चतुरक्षरात्मकः सुरतरुशब्द उक्तः । पञ्चमप्रश्नेन स्त्रीणां श्रोत्राभिलषणीयस्य सुरतरुतस्य वाचकः सुरतरुतशब्द उक्तः । सम्भोगोत्थध्वनिविशेषवाचकः सुरतरुतशब्दः ॥ ४३ ॥

हे राधे ! तं शब्दं त्वं आचक्ष्व इति श्रीकृष्णेन उच्यमाना प्रिया लज्जया नम्रवक्त्रपद्मा स्मितं रोद्धुं असमर्थापि प्रणयकोपेन भङ्गुरभ्रूः सती व्याजतश्छलतः अमुं श्रीकृष्णं उवाच । यतः सूक्ष्मबुद्धिः ॥४४॥

हे लब्धवर्णेन विचक्षण श्रेष्ठ ! लब्धवर्णो विचक्षण इत्यमरः । इनः सूर्य्ये प्रभावित्यमरः । एकेन उत्तरेण मत्प्रश्नवीथीं प्रश्नस्य श्रेणीं क्रमात्त्वं आदौ वद । पश्चात् स्वस्य ईहितं त्वत्प्रश्नविषयी-भूतं एतं शब्दं पद्मा सखीं चन्द्रावलीं वाचयन् वाचयितुं तस्या निकटे याहि । पक्षे लब्धवर्णेनेति पदं उत्तरेणेत्यस्य विशेषणं । अर्थो यथा । सुरतरुतशब्दस्थेन एकेन उत्तरेण अन्त्येन तकारेण सह क्रमात् एकैकेन पूर्व्वपूर्व्वलब्धवर्णेन मम प्रश्नवीथीं वद ॥ ४५ ॥

गृहो कमिच्छेत्तरुणोहितं किं
किं चारु वाद्यं किमु कर्णवेद्यं ।
सख्यः किमाकर्णयितुं निलीना-
स्तिष्ठन्ति तत्त्वं वद निर्व्विवादं ॥ ४६ ॥
सुरतरुपूर्व्वं तमिति मुकुन्दे
वदति तदतिपटिमामृतविन्दे ।
सपदि सखीभिरथैधितमाना
युवति-मणिर्मुमुदे स्मयमाना ॥ ४७ ॥
शब्दमहो ! तमवाचयदत्रै-
वाश्विममेव भवत्यपि चित्रैः ।

तां प्रश्नवीथीमाह । गृहस्थः कमिच्छेदिति प्रश्ने सुरतरुतपदस्यान्त्यतकारेण सह आद्यवर्णसुशब्दस्य योगे सति सुतमिछेदिति प्रश्नस्यार्थः । तरुणस्य किं ईहितं वाञ्छितमिति प्रश्ने अन्त्यतकारेण सह द्वितीयवर्णस्य रेफस्य योगे सति रतं रमणमिच्छेदिति प्रश्नार्थः । चारुवाद्यं किमिति प्रश्ने अन्त्यतकारेण सह तृतीयवर्णस्य तकारस्य योगे सति ततं वीणादिवाद्यमिति प्रश्नार्थः । कर्णवेद्यं किमिति प्रश्ने अन्त्यतकारेण सह चतुर्थवर्णस्य रुकारस्य योगे सति रुतं शब्दमिति प्रश्नार्थः। सख्यः किं श्रोतुं निलीनाः सत्यस्तिष्ठन्तीति सुरतरुतमिति प्रश्नार्थः ॥ ४६ ॥

सुरतरुपूर्व्वं तमिति सुरतरुतमित्यर्थः । तं श्रीकृष्णे वदति सति । कथम्भूते तस्या राधाया अतिपटिमामृतं अतिशयबुद्धिकौशलरूपामृतं विन्दे प्राप्नुवति विद्लृलाभे । शः प्रत्ययः । तादृशामृतस्यास्वादनं कुर्व्वतीत्यर्थः । सपदि तत्क्षणे सखीभिरेध्येधितः वर्द्धितः मानः आदरो यस्याः सा युवतिमणिः राधिका मुमुदे । पज्झटिकाछन्दः ॥४७

प्रश्नवरैर्म्मिषतस्तदजेया
कृष्णधियाप्यसि वाढ़ममेया ॥ ४८ ॥
इत्येवमुक्त्वा वहुमाल्य-गन्ध-
ताम्वूल-दिव्याभरणेन वृन्दा ।
निषेव्य कृष्णं धृतरासतृष्णं
विज्ञाय विज्ञा प्रणुनाव किञ्चित् ॥ ४६ ॥

युग्मकं ।

रसिक ! सिकता तूलावल्या तथातुलशिल्पिभि-
र्व्यरचि रुचिरं चित्रं मित्रात्मजा-पुलिनेऽनिलैः ।
तनुतरतरङ्गाल्यस्तुल्या जलस्थलयोर्यथा
स्युरसितसिते कान्ती भ्रान्तीर्जनस्य तदस्यतः ॥५०

वृन्दा आह द्वाभ्यां । अहो आश्चर्य्यं श्रीकृष्णः यं शब्दं तां वाचयिष्यति तमेव शब्दं अमुं श्रीकृष्णं भवती मिषतः छलेन चित्रैः प्रश्नवरैरवाचयत् । तत्तस्मात् सर्व्वप्रकारेण भवती अजेया । श्रीकृष्णस्य धियापि वाढ़ं अतिशयेन अमेया परिमातुमशक्या त्वमसि ॥ ४८ ॥

वृन्दा श्रीकृष्णस्य रासे तृष्णां विज्ञाय किञ्चित् प्रणुनाव प्रस्तावमकरोत् । नुस्तुतौ । प्रपूर्व्वश्च तदा प्रस्तावे वर्त्तते ॥ ४९ ॥

हे रसिक ! सिकता वालुका एव रुइ इति प्रसिद्धास्तूलास्तेषामावल्या श्रेण्या । एवमनिलैरपि अतुलशिल्पिभिः यमुनापुलिने रुचिरं चित्रं व्यरचि उच्चनीचभावेन तरङ्गाकारचित्रं अकारि इत्यर्थः । तथा यमुनास्थसूक्ष्मतरङ्गश्रेण्योऽपि चित्ररूपा एव भवन्ति । अतएव जलस्थलयोस्तुल्याकारा एव यथा स्युः । उत्तरवाक्यस्थयत्पदस्य तत्पदापेक्षाभावान्न दोषः । तस्मात् पुलिनयमुनयोरसितसिते शुक्लश्यामे द्वे कान्ती एव जनस्यैक्य भ्रान्तीः अस्यतः दूरीकुरुतः ॥ ५० ॥

किमतिवितता कार्पूरीयं सरिन्निज-मध्यतो
मृगमदरसामन्यां काञ्चिद्धुनीं दधतीक्ष्यते ।
किमथमितयशः सौर्य्यास्तौर्य्यत्रिकैः स्वगतैरिदं
त्रिजगदपि संस्ताव्यैवेमां समाश्लिषदादरात् ॥५१॥

एह्येहि कान्ते ! विलसाम हन्ते-
त्युपात्ततत्पाणिदलः कलावान् ।
आगत्य मध्ये पुलिनं वितेने
हल्लीशकोल्लासमुदारलीलः ॥ ५२ ॥

कलयत कलधौतनीरधौतं
व्यधित क एतदहो ! महोज्ज्वलं नः ।

यमुनाया उत्तरदक्षिणकूलद्वयस्थितं पुलिनं अतिशयश्वेतत्वेन कर्पूरसम्बन्धिनदीत्वेन उत्प्रेक्ष्य यमुनां मृगमदरसमयनदीत्वेनोत्प्रेक्षते । किमिति । अतिविस्तृता कर्पूरसम्बन्धिनी इयं सरित् स्वस्य मध्ये कस्तूरीरसमयीं अन्यां धुनीं यमुनास्वरूपां नदीं दधती किं जनैरीक्ष्यते । तथा च तादृशपुलिनरूपां नदीं जनाः पश्यन्तीत्यर्थः । किम्वा इदं पुलिनं सौर्य्याः सूर्य्यपुत्र्या यमुनाया अपरिमितयश एव स्वगतं तौर्य्यत्रिकं राससम्बन्धि नृत्यगीतवाद्यादिकमेव तैः करणैः त्रिजगत् इमां यमुनां संस्ताव्य स्तवं कारयित्वा समाश्लिषत् आलिङ्गनमकरोत् । तथा च यमुनायाः पुलिनरूपयश एव आदरात् यमुनामालिङ्ग्य तिष्ठतीत्यर्थः ॥ ५१ ॥

वृन्दावचनेन स्मृत्या रूढं रासं चिकीर्षुः श्रीकृष्णः श्रीराधामाह । हन्त हर्षे । उपात्तं गृहीतं तस्या राधायाः पाणिदलं येन सः । मध्येपुलिनं पुलिनस्य मध्ये । हल्लीशकस्य उल्लासं वितेने विस्तारयामास । नारीणां मण्डलीनृत्यं बुधा हल्लीसकं विदुरिति तल्लक्षणं ॥ ५२ ॥

स्थलममलसदृशो ! भृशोत्सुकाना-
मिह वहुरासविलास-साधुसिद्ध्यै ॥ ५३ ॥
मधुरिमसरसं विधाय शुक्लं
गुणमखिलं विधिरेव वस्त्रपूतं ।
पुलिनमिदमथाशु तेन सिक्त्वा
जगति कलां प्रथयाञ्चकार किं स्वां ॥ ५४ ॥
सान्द्रस्तु तच्छानितशिष्टभागः
साक्षेपनिःक्षेपवशादितः किं ।
खेऽभूत् शशाङ्कः कणिकासमूहो
नक्षत्रलक्षत्वमवाप राधे ! ॥ ५५ ॥

हे अलसदृशो गोप्यः ! विलासे उत्सुकानां नोऽस्माकं रासविलास-सिद्ध्यर्थं कोऽपि जनः कलधौतनीरैः रूप्यघर्षणेनोत्पन्नजलैः उज्वलं इदं पुलिनरूपस्थलं धौतं व्यधित अकार्षीत् इति यूयं कलयत पश्यत । कलधौतो रूप्य-हेम्नोरित्यमरः ॥ ५३ ॥

उत्प्रेक्षान्तरमाह । विधाता अखिलजगद्वर्त्तिशुक्लगुणं चूर्णं कृत्वा माधुर्य्यरूपजलेन सरसं बिधाय च पश्चात् वस्त्रेण पूतं छानितं च कृत्वा तेन शुक्लगुणेन पुलिनमिदं सिक्त्वा सेचनं कृत्वा किं स्वीयां कलां वैदग्धीं प्रथयाञ्चकार ॥ ५४ ॥

तस्य छानितगुणस्य सान्द्रो निविड़ो यो हेयरूपात्रशिष्टभागः स एव पुलिनस्य मालिन्याशङ्कया ऊर्द्ध्व प्रदेशे एव अत्र स्थले हेयभागं मा त्यज। पुलिनं मलिनं भविष्यतीत्याक्षेपसहितनिःक्षेपवशात् आकाशे चन्द्रोऽभूत् अवशिष्ट भागस्थमलिनांशः कलङ्कोऽभूत् निःक्षेपसमये तस्मान्निःसृतो यः कणिकासमूहः सतु नक्षत्राणां लक्षत्वं लक्षसंख्याधिशिष्टत्वं अवाप ॥ ५५ ॥

इति वर्णयन्तमनुरागिणी-गणाः
समया विधाय निजकान्तमग्रतः ।
इतरेतरात्तभुजवल्लि-मण्डली-
रचनातिशोभमवतस्थिरे क्षणं ॥ ५६ ॥

कलापकं ।

किमनङ्गकीर्त्तिरसपूरिते सर-
स्युदितं महद्विकचमेकमद्भुतं ।
कनकाम्वुजं मधुरनीलकर्णिकं
विवुधाङ्गनाक्षिमधुपावलिस्तुतं ॥ ५७ ॥
किम्वा धरण्यैव धृतं निजालिके
महोत्सवे चन्दनचन्द्रचर्च्चिते ।

इति वर्णयन्तं निजकान्तं गोपीगणाः समया विधाय मध्ये कृत्वा इतरेतरं आत्ता गृहीता भुजवल्ली यत्र तद्यथा स्यात् एवं मण्डलीरचनया शोभा यत्र तद्यथास्यात्तथा क्षणं अवतस्थिरे ॥ ५६ ॥

इदानीं पुलिनं कन्दर्पस्य यशोरूपजलपूर्णसरोवरत्वेनोत्प्रेक्ष्य गोपीमण्डलीं च तादृशसरोवरोत्पन्नस्वर्णकमलत्वेन श्रीकृष्णं च तादृशकमलस्य नीलकर्णिकारत्वेनोत्प्रेक्षते । कन्दर्पस्य कीर्त्तिरूप जलपूरिते सरसि महत् अनन्तदलविशिष्टं विकसितं एकं स्वर्णकमलं उदितं कथंभूतं श्रीकृष्णरूपनीलकर्णिका यत्र । पुनः कथंभूतं देवाङ्गनानां नेत्राण्येव भ्रमरश्रेण्यः तैः स्तुतं ॥ ५७ ॥

अधुना तु पुलिनं पृथिव्याश्चन्दनयुक्तललाटत्वेन उत्प्रेक्ष्य श्रीकृष्णं च तादृशललाटस्थमण्डलाकारकस्तूरिकातिलकत्वेन गोपीमण्डलीं च तादृशतिलकस्य चतुर्द्दिक्षु केसरनिर्म्मितचित्रत्वेनोत्प्रेक्षते । कस्मिं-

कस्तूरिकाचा[illegible]कं
काश्मीरचित्रावलिवेष्टितं वभौ ॥ ५८ ॥

काणाक्योऽमूरम्भाः शम्भाः कार्पूरेऽस्मिन् नव्ये भव्ये।
वप्रे सप्रेमैवावव्रुः किं तापिञ्छं पिञ्छोत्तंसं ॥५९॥

शारद्या किं सौरज्वालावल्याश्लिष्टं त्यक्त्वाकाशं।
हैमे देशे स्निग्धाम्भोदो विद्युन्मालामध्ये रेजे ॥६०॥

षड्जस्वरेणाथ चतुःश्रुतिस्पृशा-
रोहावरोहो गमव र्विभूषयन् !

---

श्चिन्महोत्सवे पृथिव्या स्त्रिया चन्दनकर्पूरचर्च्चिते पुलिनरूपनिज-ललाटे धृतं कस्तूरिकायाश्चारुतमालपत्रकं तिलकं किं वभौ? कथं-भूतं गोपीरूपकेसरचित्रावलिभिर्वेष्टितं ॥ ५८ ॥

पुनः पुलिनं कर्पूरकेदारत्वेनोत्प्रेक्ष्य गोपीमण्डलीं च तादृश-केदारोत्पन्नकदलीत्वेन कृष्णं च तादृशकदलीमण्डलमध्यस्थिततमाल-वृक्षत्वेनोत्प्रेक्षते। अस्मिन् कर्पूरमये वप्रे के[illegible] सिद्धे केदारे कथम्भूते नव्ये स्तव्ये। पुनश्च कथम्भूते भव्ये मङ्गलरूपे। तस्मिन् उत्पन्ना अमूः गोप्य एव कानक्यो रम्भाः कनकमय्यः कदल्यः कथम्भूताः शम्भाः मङ्गलयुक्ताः अस्त्यर्थे भ प्रत्ययः। तथाभूताः कदल्यः किं सप्रेम यथास्यात्तथा श्रीकृष्णरूपतापिञ्छं तमालमाववुः ॥ ५९ ॥

पुनश्च पुलिनं हिमकलामयत्वेन श्रीकृष्णं मेघत्वेन गोपीमण्डलीं च विद्युन्मालात्वेन चोत्प्रेक्षते। शारद्या शरत्कालोत्पन्नया सूर्य्यसम्वन्धि-[illegible] पुलिनरूपे हैमे हिम-सम्वन्धिनि देशे किं स्निग्धमेघो विद्युन्माला-मध्ये रेजे ॥ ६० ॥

रसिकेन्द्रशेखरः श्रीकृष्णः अष्टादशश्रुतीनां मध्ये चतुःश्रुतीः स्पृशतीति चतुःश्रुतिस्पृक् तेन षड्जस्वरेण तेन तेन इति अनुकरण

केदाररागं रसिकेन्द्रशेखर-
स्तेनेति तेनेति यदा ललाप सः ॥ ६१ ॥
तदमितमाधुरी सुरसतीः सपतीरपि खे
व्यधित विमानगा विवशयन्त्यतनुज्वरिताः ।
अभजत दर्पकः सललनोऽपि तदीयमहा-
मदनशरप्रहार विधुरो वहुमोहमहो ! ॥६२॥
अथ ललितादिकण्ठमिलनात् किलगानधुरां
नटनमपि प्रतिप्रियतमा-द्वय-मध्यगतः ।
विनिहिततत्तदंसभुज एव जवेन यदा-
रभत विधातुमद्भुतविलासकला-जलधिः॥६३॥

शब्देन यदा केदाररागमाललाप किं कुर्व्वन् स्वरस्या रोहावरोहौ गमकैः करणैर्भूषयन् ॥ ६१ ॥

तस्य श्रीकृष्णस्यापरिमितमाधुरीकर्त्री सपतीः पत्या सह वर्त्तमाना विमानगताः सुरसतीर्देवाङ्गनाः विवशयन्ती कन्दर्पज्वरविशिष्टा व्यधित अकार्षीत् । ललनया रत्या सह वर्त्तमानः कन्दर्पः प्राकृतकन्दर्पः श्रीकृष्णस्याप्राकृतमहाकन्दर्पस्य शरप्रहारेण विधुरो दुःखितः सन् महामोहं अभजत ॥ ६२ ॥

अथानन्तरं प्रतिप्रियतमेति द्वि द्वि प्रियतमयोर्म्मध्यगतः श्रीकृष्णः विनिहिता अर्पिता तासां तासां स्कन्धदेशे भुजा येन तथाभूतः सन् ललितादिकण्ठस्वरमिलनाद्धेतोर्गानातिशयं एवं नृत्यमपि विधातुं कर्त्तुं यदारभत तर्हि तदैव वाद्याद्यधिष्ठातृदेवताः स्वस्वक्रियाश्चक्रुरिति परश्लोकेनान्वयः ॥ ६३ ॥

वादित्ररागस्वरमूर्च्छनाश्रुति
ग्रामक्रियाहस्तकतालदेवताः ।
स्व-स्व-क्रियाश्चक्रुरुदित्य सम्भ्रमा-
न्मूर्त्ताः प्रतीता इव तर्हि संहताः ॥ ६४ ॥

युग्मकं ।

कच्छपिकाभिस्तत्र मृदङ्गे-
ष्वनुपदमुदयति नवनवनिनदे
नृत्यगतीः क्वाप्यश्रुतदृष्टा
विदधति सह युवतिभिरघमथने ।
थै तथ थैया ता तथ थैया
दृमिकि दृमिकि तृकितृकि तृकि तृकि था ।
इत्थमुदीयुस्तालतरङ्गा
मधुरवदनसरसिज-कुलकलिताः ॥ ६५ ॥

---

क्रिया गानशास्त्रे प्रसिद्धा वाद्यादीनामवान्तरक्रिया । तेषामधिष्ठातृदेवताः अलक्षिताः सत्यः उदित्य उदयं कृत्वा स्वस्ववाद्यादिक्रियाश्चक्रूः ॥ ६४ ॥

कच्छपिकाभिर्वीणाभिः सह मृदङ्गेषु अनुपदं प्रतिक्षणं नवनवशब्दे उदयति सति अघमथने श्रीकृष्णे अश्रुतदृष्टा नृत्यगतीः युवतिभिः सह विदधति कुर्वति सति । थै तथ थैया इत्यादितालतरङ्गाः तालबोधकोद्घटनशब्दाः मधुरवदनकमलसमूहैः कलिता उत्पन्नाः उदीयुः उदयं प्रापुः ॥ ६५ ॥

कङ्कणकिङ्किण्याद्यलिवाद्यै-
र्झणदिति झणदिति मधुरिमलहरीं ।
काञ्चन भेजुः काञ्चनवल्लयः
किमुदितशुचिरसमृदुलसुमनसः ॥ ६६ ॥
किं सुषमाब्जेरेत्य विरेजुः
स्मरकृतमथनरभसभरजनिताः ।
लक्ष्म्य इमाः स्वां कीर्त्तिमचैषु-
र्व्विधिजगदविदितनटनपटिमभिः ॥ ६७ ॥
न विद्युदभ्रैः कनकेन्द्ररत्नै-
र्न वा न वा चम्पकनीलपङ्कजैः ।

इदानीं गोपी-श्रेणीं स्वर्णवल्लीत्वेनोत्प्रेक्ष्य तासां कङ्कणकिङ्किण्यादि ध्वनिं भ्रमर-झङ्कारत्वेन मनांसि च पुष्पत्वेनोत्प्रेक्षते । गोपीरूपाः काञ्चनवल्ल्यः कङ्कणकिङ्कण्यादिरूपा अलय एव वाद्याः वाद्याश्रयोऽपि वाद्यपदेनोच्यते । चतुर्व्विधमिदं वाद्यमित्यमरोक्तेः । तथा च तादृशालिवाद्यैर्जातां झणदिति झणदिति काञ्चन मधुरिमलहरीं किं भेजुः ? कथम्भूताः तत्कालोत्पन्नशृङ्गाररसरूपजलेन मृदुलातिशोभनमनांस्येव सुमनांसि पुष्पाणि यासां ताः ॥ ६६ ॥

उत्प्रेक्षान्तरमाह । शोभासमुद्रस्य कन्दर्पकृतमथनवेगातिशयेन जनिताः इमा गोपीरूपा लक्ष्म्यः अत्रागत्य किं विरेजुः ? विधिनिर्म्मित जगद्वर्त्तिजनैरज्ञातनृत्य-चातुर्य्यैः करणैः स्वां कीर्त्तिं अचैषुः चयनं कृतवत्यः ॥ ६७ ॥

अधुना श्रीकृष्णघटितगोपीश्रेणीं केसरमृगमदलिप्तरसमय गोलिकानिर्म्मितजपमालात्वेनोत्प्रेक्षते । सा गोपीश्रेणीरूपा माला

रसैस्तु काश्मीरमदाञ्जितैः सा
मालेव रेजे स्मरजप्यमाला ॥ ६८ ॥

हस्तकशस्तपदार्थविभेद
ख्यापनतालगतिक्रमनाट्यात् ।
ये परिरम्भकुचग्रहचुम्बा-
स्तेन ततः पृथगासत रासात् ॥ ६९ ॥

त्वद्वदनं सदनं लवनिम्नां
तत्र च हन्त ! दृगन्तविलासाः ।
तेष्वसमां * सुषमामुपजग्मुः
सुन्दरि ! कामकलाः सकलास्ताः ॥ ७० ॥

विद्युन्मेघैर्निर्म्मिता न भवति। नवा स्वर्णेन्द्रनीलरत्ननिर्म्मिता भवति। नवा चम्पकनीलकमलैर्निर्म्मिता भवति किन्तु कास्मीरमृगमदाभ्या-मञ्जितैर्लिप्तैः शृङ्गाररसैर्निर्म्मिता कन्दर्पस्य जप्यमाला सती रेजे ॥६८॥

रासाङ्गैरपि सम्भोगाङ्गान्यपि सिद्ध्यन्तीत्याह। ये आलिङ्गनकुच-ग्रहणचुम्बास्ते रासात् पृथक् न आसत। रासात् कथम्भूतात् हस्तकेनाभिनयविषयीकृता ये प्रशस्तचन्द्रकमलादिपदार्थप्रभेदास्तेषां ख्यापनं एवं तालगतीनां क्रमेण नाट्यं च यत्र तस्मात् ॥ ६९ ॥

श्रीकृष्ण आह। हे सुन्दरि! त्वद्वदनं लावण्यगृहं तत्र वदने कटाक्ष-विलासाः सन्ति। हन्त हर्षे। तेषु दृगन्तविलासेषु ताः सकलाः कामकला अनुपमां शोभामुपजग्मुः प्रापुः ॥ ७० ॥

* असमामित्यत्र अनुपमामितिपाठस्तु टीकाकृतां सम्मतः ।

कान्ते ! त्वदास्योदयदत्तमिन्दु
र्मृगच्छलाद्दुर्यश एव धत्ते ।
जनोपहासासहनोऽथ वा किं
द्विजोऽपि मूढ़ो गरलं जघास ॥ ७१ ॥
इत्यघदमनोऽगायत् कान्तां तां सरिगमपैः
साप्यतिचतुरा गीतैस्तैस्तैस्तं किमु न जगौ ।
तत्र तु यदभूत् सम्बुद्ध्यन्तं तत्पदमनया-
गीयत रभसादन्तन्यस्ताद्यस्वरसुरसं ॥ ७२ ॥

हे कान्ते ! त्वन्मुखोदयेन दत्तं दुर्यश एव चन्द्रः मृगच्छलात् धत्ते। कुष्ठी जनो यथा स्वगात्रस्थं श्वित्रं क्षतादिचिह्नख्यापनेन आच्छादयति तथा चन्द्रोऽपि स्वस्थितं दुर्यशः मृगचिह्नख्यापनेनाच्छादयतीत्यर्थः । अथवा जनानामुपहासेनासहनोऽसहिष्णुः सन् मरणाकाङ्क्षया द्विजश्चन्द्रः पक्षे ब्राह्मणोऽपि भूत्वा गरलं जघास बुभुजे। ब्राह्मणस्य विषभक्षणमत्यन्त निषिद्धं तदपि कृतं अमृतमयत्वेन मरणं च न भविष्यत्येतादृशज्ञाना-भावात् मूढ़ः ॥ ७१ ॥

इति अनेन प्रकारेण कृष्णः कान्तामगायत् । सापि कान्तापि सरि-गमपैः षड्ज-र्षभ-गान्धार-मध्यम-पञ्चमैः स्वरैः कान्तेन गीतैस्तैस्तैः पदै-श्च तं कान्तमेव किं न जगौ यतोऽतिचतुरा। चातुर्य्यमेवाह । "सुन्दरि" इति "कान्ते" इति यत् सम्बुद्ध्यन्तं पदं श्रीकृष्णेन गीतं तदेवान्ते न्यस्ते-नाद्यस्वरेणाकारेण सुरसं सत् अनया रभसात् वेगात् अगीयत । "सुन्दरि" इत्यत्र "सुन्दर" "कान्ते" इत्यत्र "कान्त" इति । पक्षे सम्यक् बुद्धेरन्तः अवधिर्यत्र तत्पदं । अन्ते न्यस्तेनाद्यस्वरेण षड्जेन स्वरेण सुरसं कृत्वा अगीयत ॥ ७२ ॥

मण्डलरचनां तासामस्यन्नाह स कुतुकी
नृत्यत महिला एकैकश्येनाद्भुतमधुना ।
ओमिति ललिता तास्वादौ सा व्यञ्जितपटिमा
धिद्धी द्राँद्राँद्राँ कुट्ट तृकि थेत्युद्भटमनटत् ॥ ७३ ॥

इत्थं विशाखादिसखी-ततेः क्रमात्
पृथक् पृथङ्नाट्यकलाविदग्धतां ।
आस्वादयन्मूर्द्ध-विधूननैर्मुहुः
कान्तः सकान्तः सफलीचकार तां ॥ ७४ ॥

ताः सभ्यत्वं दधुरथ निखिलाः
सख्यः काश्चिज्जगुरति मधुरं ।
तत्रानद्धध्वनिधृतरभसौ
राधाकृष्णौ ननृततुरतुलं ॥ ७५ ॥

---

स कुतुकी कृष्णः तासां मण्डलरचनां अस्यन् दूरीकुर्व्वन् सन् आह । हे महिलाः सुन्दरीस्त्रियः अधुना एकैकशो भावः एकैकश्यं एकैकत्वे-नेतियावत् । तथा च एकैकत्वसंख्यया विशिष्टा यूयं नृत्यत । विशेषणे तृतीया । तासु मध्ये आदौ ललिता ओमिति स्वीकृत्य व्यञ्जितं व्यक्ती कृतं नृत्ये चातुर्य्यं यया तथाभूता सती धिद्धीत्यादितालवोधकानुकरण शब्दं प्रकाश्य उद्भटं यथास्यात्तथा अनटत् ॥ ७३ ॥

इत्थं अनेन प्रकारेण विशाखादिसखी श्रेण्याः पृथक् पृथक् नाट्य कलावैदग्धीं कान्तया सह वर्त्तमानः श्रीकृष्णः मस्तकविधुननैः करणै-र्मुहुरास्वादयन् तां वैदग्धीं सफलीचकार ॥ ७४ ॥

अथ सखीनां नृत्यानन्तरं मृदङ्गध्वनिना धृतो रभसो वेगो याभ्यां

तत्ता धि द्धी तति कट घृघि त-
त्तत्ताधिद्धी ततिकट घृघितत् ।
इत्यन्वास्याम्वुजयुगमनटन्
वर्णाः कर्णामृतसममधुराः ॥ ७६ ॥

परस्परोपात्तकराञ्जयोस्तयो-
र्भुजोद्धुतिद्योतितरत्नभूषयोः ।
ताटङ्कतारल्यधुरोररीकृता
ज्योत्स्ना मुखेन्दू स्नपयन्त्य आवभुः ॥ ७७ ॥

मिथोहस्तालम्वार्पिततनुभरौ तौ तथा वेगनुन्नौ
जुघूर्णाते येन स्मरघटकृतो रत्नचक्रैकरूप्यं ।

---

तथाभूतौ राधाकृष्णौ अतुलं यथास्यात् ननृतुः । ताः सख्यस्तु सभ्यत्वं नृत्यास्वादनकर्त्री त्वं दधुः । तासां मध्ये काश्चित् सख्यो जगुः ॥ ७५ ॥

तत्ताधिद्धीत्यादितालवोधकवर्णाः अन्वास्याम्बुजयुगं आस्यकमल-युगे आनटन् । कथम्भूताः कर्णानाममृतसममधुराः ॥ ७६ ॥

परस्परं गृहीतं कराब्जं याभ्यां तथाभूतयो राधाकृष्णयोः कथ-म्भूतयोः भुजकम्पनेन द्योतितानि कान्त्युच्छलनेन प्रकाशितानि हस्तस्थ रत्नभूषणानि ययोस्तयोर्मुखचन्द्रौ कर्म्मनृत्यसमये ताटङ्कानां कुण्डलानां चाञ्चल्यातिशयेन उररीकृताः स्वीकृताः ज्योत्स्नाः कर्त्र्यः स्नपयन्त्यः सत्यः आवभुः ॥ ७७ ॥

अधुना परस्परहस्तावलम्वं कृत्वा भ्रमणकौशलेन तयोश्चक्राकृति-नृत्यमाह । परस्परहस्तावलम्वे अर्पितभरौ याभ्यां तथाभूतौ राधा-कृष्णौ वेगेन नुन्नौ प्रेरितौ सन्तौ तथाजुघूर्णाते भ्रमणं चक्रतुः । येन भ्रमणेन कन्दर्परूपघटकृतः कुम्भकारस्य पीतनीलरत्नमयचक्रैकरूप्यं अगातां प्रापतुः । तदा तादृशभ्रमणसमये तयोर्वेणी द्वयमपि भ्रमत्

तद्वागातां वेणीद्वयमपि तयोः पृष्ठसङ्गं विहाय
भ्रमन्नीलश्रीमत्परिधिवरतां तद्बहिः प्राप्य रेजे ॥७८

ततस्तालोपान्तं समयमनु तावङ्गुलिग्रन्थिमुक्तौ
पृथङ्नानाभेदं सममनटतां दुर्गमार्गाधिरोहं ।
समाप्तौ तु प्रेष्ठोरसि हरिरधाद्दक्षिणं पाणिपद्मं
स्वरामेनैतेन स्पृशदिव कुचं वारितं तत्तयापि ॥७९

काचित्तदा वीजयति स्म भूषा-
व्यत्यासमस्यत्यपरा लिलेप ।
श्रीखण्डकर्पूररसैस्तदङ्गा-
न्येकास्ययोरर्पयति स्म वीटीः ॥ ८० ॥

सत् पृष्ठसङ्गं विहाय नीलशोभायुक्तपरिधिवरतां मण्डलश्रेष्ठतां वहिः प्राप्य रेजे ॥ ७८ ॥

तदनन्तरं चक्रभ्रमिनृत्यजनकीभूततालस्योपान्तं तालसमाप्त्यव्यवहितपूर्व्वसमीपसमयमनुलक्ष्मीकृत्य तौ राधाकृष्णौ अङ्गुलिग्रन्थितो मुक्तौ सन्तौ पृथक् नृत्यानां नानाभेदं यथास्यात् समं एकदैव दुर्गमार्गस्याधिरोहो यत्र तद्यथास्यात्तथा अनटतां । तालसमाप्तिसमये तु श्रीराधिकाया उरसि वक्षःस्थले दक्षिणं पाणिपद्मं अधात् दधार । तस्मिन् समये तया राधयापि बामेन एतेन पाणिपद्मेन स्वकुचं स्पृशदिव तत् कृष्णस्य पाणिपद्मं वारितं । तथा च परस्परसम्मुखतया नृत्यसमये यदा श्रीकृष्णः तालसमाप्तिमिषेण दक्षिणहस्तेन कुचं स्पृशति तदैव तयापि तालसमाप्तिमिषेण पाणिपद्मं वारितमित्यर्थः ॥ ७९ ॥

तदा नृत्यसमाप्त्यनन्तरं काचित् सखी तौ वीजयतिस्म । काचित् अङ्गदहारादिभूषाणां व्यस्ततां अस्यतो दूरीकुर्व्वतो चन्दनकर्पूररसैस्तयोरङ्गानि लिलेप । एका तयोरास्ययोर्वीटीः अर्पयतिस्म ॥ ८० ॥

लिहन्त्वर्व्वाचीना निजरसनया रासं कथं तं हठा-
न्नगीर्यत्रेशाना सफलितदृशां तात्कालिकानामपि ।
प्रभुस्तं प्रेमा चेत् कमपि चतुरं स्वाधारमाख्यापये-
त्तदीयैर्म्माधुर्य्यैरपहृतधिया तेनापि वर्ण्यो न सः ॥८१

किन्तु शक्तिरतुला कृपा तयोः
सा स्वयं शुकमुखेन्दुना जगत् ।
द्योतयन्त्यलमवैक्षयद्दिशं
धाम विन्दति तयैव सेक्षणः ॥ ८२ ॥

इति भावनामृते महाकाव्ये रासविलासास्वादनो
नामैकोनविंशः सर्गः ।

अधुना प्रेमभक्तिं विना रासवर्णनं न सम्भवेदित्याह । अर्व्वाचीना आधुनिका जनाः स्वरसनया तं रासं कथं हठात् लिहन्तु वर्णयन्त्विति यावत् । तात्कालिकानां श्रीकृष्णस्य प्रकटलीलाकालोत्पन्नानां अतएव तादृशलीलादर्शनेन सफलितदृशां गीर्व्वचनं यत्र रासवर्णने न ईशाना न समर्था । प्रेमा यदि कृपया प्रभुर्भवति तदा स्वाश्रयोभूतं कमपि चतुरं जनं तं रासं आख्यापयेत् व्याख्यातुं वक्तुं प्रेरयेत् । तथाच प्रेमभक्तिं विना रासवर्णनं न भवेदिति भावः । तदीयैः राससम्बन्धिभिर्म्माधुर्य्यैः प्रेमवैवश्येन अपहृता धीर्यस्य तेन जातप्रेम्णा जनेनापि स रासो वर्ण्यो न भवति ॥ ८१ ॥

किन्तु तयोः राधाकृष्णयोरतुला कृपाशक्तिः शुकदेवस्य मुखरूप चन्द्रेण जगत् अलं अतिशयेन द्योतयन्ती सती यदि दिशं एक देशं ऐक्षयत् दिग्दर्शनं कारयामासेत्यर्थः । तदा तयैव दिशा सेक्षणः ईक्षणेन ज्ञानेन सह वर्त्तमानो जनः धामरासस्वरूपं विन्दति प्राप्नोति ॥ ८२ ॥

समाप्तोऽयमेकोनविंशः सर्गः ।

## विंशः सर्गः ।

अथ प्रवन्धाननुसृत्य चित्रं
तौर्य्यत्रिकं साधु विधाय कान्ताः ।
विहृत्य कृष्णावनयोर्नयोढ़-
स्वस्वाङ्गवेशा विविशुर्निकुञ्जं ॥ १ ॥
खर्जुर-रम्भा-पनसा-म्र-जम्बू-
प्रभृत्यतिस्वादुफलानि वृन्दा ।
आहृत्य तत्तद्द्युतिसौरभाभ्या-
मस्तावयत्तत्तदगानधीशौ ॥ २ ॥
सख्यः समानैषुरथाभिरस्याः
कर्पूरकेल्यादितया प्रसिद्धाः ।

अथानन्तरं कान्तश्च कान्ताश्च कान्ताः श्रीकृष्णसहितव्रजसुन्दर्य्यः अनेकतालमिलनात् जातान् प्रवन्धान् अनुसृत्य आश्चर्य्यं तौर्य्यत्रिकं नृत्यगीतवादित्रादिकं साधु विधाय कृत्वा पश्चात् कृष्णाया यमुनाया वनयोः जलस्थलयोः अर्थात् यमुनाया जले यमुनायाः कुलस्थले च विहृत्य नयेन स्वस्वोचितनीत्या ऊढा स्वीकृताः स्वस्वाङ्गवेशा याभिस्तानि कुञ्जं विविशुः ॥ १ ॥

वृन्दा फलानि आहृत्य तेषां तेषां फलानां कान्तिसौरभाभ्यां तान् तान् अगान् वृक्षान् अधीशौ राधाकृष्णौ अस्तावयत् स्तवं कारयामास ॥ २ ॥

पीयूषपर्व्वामृतकेलिशीधु
विलासकानङ्गगुटीर्व्वटीस्ताः ॥ ३ ॥

आस्वाद्य तत्तत् प्रियया सहास्यः
सहास्यमास्ये द्युतिलब्धलास्ये ।
दास्यर्पिताः स्वर्णसुवर्णपर्ण-
वीटीर्दधे कुन्दरदो मुकुन्दः ॥ ४ ॥

धात्रार्पितो नीलनिधौ निधौत-
श्चन्द्रो नु माधुर्य्यरसेन योऽसौ ।
स्वान्तर्धृतोडुप्रचयोऽनुरागै-
स्तिम्यंस्तदीयाननतामगात् किं ॥ ५ ॥

सख्यस्तु गृहादानीताः कर्पूरकेल्यादिपञ्चवटकाः राधाकृष्णयोरग्रे समानैषुः आनीतवत्यः । कथम्भूताः अभि रस्याः अभि सर्व्वतो भावेन रसनीयाः ॥ ३ ॥

प्रियया सह आस्या उपवेशो यस्य । स्यादास्या त्वासना स्थिति-रित्यमरः । तथाभूतः कृष्णः सहास्यं यथास्यात्तथा तत्तत् वटकादिकं आस्वाद्य कान्तिभिर्लब्धं लास्यं नृत्यं यत्र तथा भूते आस्ये मुखे दासीभि-रर्पिताः स्वर्णवत् सुष्ठु वर्णपर्णनिर्म्मिताः विटीर्दधार ॥ ४ ॥

श्रीकृष्णस्य मुखं वर्णयति । विधात्रा श्रीकृष्णस्य स्कन्धपर्य्यन्तं शरीररूपनीलनिधौ अर्पितो यश्चन्द्रो माधुर्य्यरसेन नितरां धौतोऽसौ स्वान्तर्धृतदन्तरूपनक्षत्रसमूहो येन तथाभूतः सन् श्रीकृष्णस्य मुख रूपतां किं अगात् ? कथंभूतः अनुरागैस्तिस्मन् आर्द्रीभवन् ॥ ५ ॥

धैर्य्यं तदास्यास्तिमिरीवभूव
त्रपा तु भेजे नलिनीवनीत्वं ।
स्मारो विकारः कुमुदायितोऽभू-
द्दृगिन्दुकान्तेन दधार साम्यं ॥ ६ ॥
एषां तरूणामतिसूक्ष्मपत्र-
च्छिद्रच्युतान्मारुतवेल्लितानां ।
लोलेक्षणे ! लोकय चन्द्रिकाणां
कणान् जनान्मानयतो मनोजं ॥ ७ ॥

यदा श्रीकृष्णस्य मुखरूपचन्द्रस्य उदयो वभूव तदा अस्या राधाया अपि धैर्य्यं तिमिरीवभूव । धैर्य्यरूपान्धकारस्य चन्द्रोदयनाश्यत्वादिति भावः । अस्या लज्जा तु नलिनीवनीत्वं कमलिन्याः क्षुद्रवनत्वं भेजे । चन्द्रोदये कमलिन्या अपि म्लानत्वं प्रत्यक्षसिद्धं । तदानीं कन्दर्पं विकारः कुमुद इवाचरितोऽभूत् । चन्द्रोदये कुमुदं प्रफुल्लीभवतीति भावः । तस्या दृक् नेत्रं चन्द्रकान्तमणिना सह साम्यं दधार । चन्द्रोदये सति चन्द्रकान्तमणेरपि धारा निःसरति । तथैव श्रीकृष्णस्य मुख-चन्द्रदर्शनात् श्रीराधिकाया नेत्रात् आनन्दाश्रुधारा निःसरतीति भावः ॥ ६ ॥

श्रीकृष्णस्तदा प्रियायाः कन्दर्पभावोद्गममनुमाय तादृशभाव पोषकमुद्दीपनं दर्शयति । हे कन्दर्पभावोत्पन्नचाञ्चल्यविशिष्टेक्षणे ! राधे ! एषां पवनेन वेल्लितानां कम्पितानां सघनवृक्षाणां पत्राणां परस्परं निविड़संयोगात् सूक्ष्मा ये पत्रच्छिद्रास्तस्मात् च्युतान् ज्योत्स्नानां कणान् त्वं आलोकय पश्य । कथं भूतान् जनान् मनोजं कन्दर्पं मानयतः ज्ञापयतः अनुभावयत इति यावत् ॥ ७ ॥

वृन्दावनस्यापचितिं विधित्सु-
र्या याः स्वभासः प्रजिघाय चन्द्रः ।
ताः किं पलाशावलिचालनीभिः
संशोध्य गृह्णात्यनिलोऽस्मदाप्तः ॥ ८ ॥
तत्कौसुमं तल्पमनल्पकौशलं
कल्पद्रु-कुञ्जे क्षणमाश्रिता वयं ।
भजाम विश्राममिति ब्रुवन् धृत-
प्रियाकरः केलिकलानिधिर्व्वभौ ॥ ९ ॥
विशेषकं ।
स्वबाहुसन्दानितकण्ठया तया
संविश्य पर्य्यङ्कवरे हरौ स्थिते ।

पत्रच्छिद्रद्वारा निःसृतज्योत्स्नाकणात् सच्छिद्रपत्रसमूहरूपचालन्या छानितत्वेनोत्प्रेक्षते । वृन्दावनस्यापचितिं परिचर्य्यां कर्त्तुमिच्छुश्चन्द्रः याः याः स्वज्योत्स्नाः प्रजिघाय प्रस्थापयामास । हि गतौ । प्रपूर्व्वहिधातुः प्रस्थापनार्थकः । ता एव ज्योत्स्ना अस्माकमाप्तः पवनः किं पत्रश्रेणीरूपचालनीभिः संशोध्य छानिताः कृत्वा गृह्णाति ॥ ८ ॥

तत्तस्मात् हे प्रिये ! कल्पवृक्षस्य कुञ्जे कुसुमतल्पं आश्रिता वयं क्षणं विश्रामं भजाम इति ब्रुवन् शयनार्थं धृतः प्रियायाः करो येन तथा भूतः सन् बभौ ॥ ९ ॥

स्वस्य कृष्णस्य वामबाहुना सन्दानितो बद्धः कण्ठो यस्याः तया प्रियया सह पर्य्यङ्कश्रेष्ठे संविश्य शयित्वा श्रीकृष्णे स्थिते सति तयोः पादसम्बाहनमेव सुखरूपकर्म्म यासां तथाभूतानां तस्या राधायाः

तत्पादसम्वाहनशर्म्मकर्म्मणां
तत्किङ्करीणां समपूरि वाञ्छितं ॥ १० ॥
ऊर्व्वोः स्वयोः कानकपीठयोः क्रमा-
न्निधाय पादाम्वुरुहे निजेशयोः ।
द्वे दासिके तत्शयनान्तसङ्गते
दृग्विन्दुभिः पाद्यमिवोपजह्नतुः ॥ ११ ॥
उद्भिन्नरोमाङ्कुरपालिरेव
प्रापार्घ्यतां किन्तु तयापि शङ्कां ।
तन्मार्द्दवालोचनया दधत्यौ
पाण्यम्वुजैरार्च्चयतामिवैते ॥ १२ ॥

किङ्करीणां कदा राधाकृष्णयोः शयनं भविष्यति कदा वा पादसम्वाहनं प्राप्स्याम इति वाञ्छितं समपूरि पूर्णं वभूव ॥ १० ॥

अधुना किङ्करीणां ये उरुदेशास्तान् स्वर्णपीठत्वेनोत्प्रेक्ष्य सम्वाहनार्थं उरुदेशेस्थितानि तयोः पादकमलानि देवतात्वेन चरण स्पर्शजन्यं तासामष्टसात्विकं षोड़शोपचारपूजासामग्रीघटकत्वेन चोत्-प्रेक्षते । निजेशयोः राधाकृष्णयोः पादकमले स्वर्णनिर्म्मितपीठ स्वरूपयोः स्वोयोरुदेशयोः क्रमात् निधाय द्वे दासिके तयोः शयनस्य शय्याया अन्तदेशं सङ्गते सम्वाहनार्थं प्राप्ते सत्यौ आनन्दाश्रुभिः करणैः पाद्यमिवोपजह्नतुः ॥ ११ ॥

उद्भिन्ना उद्गता रोमाङ्कुरश्रेणीरेवार्घ्यतां प्राप । एते किङ्कर्य्यौ चरणयोर्म्मार्द्दवालोचनया तयापि उरुदेशस्थरोमाञ्चश्रेण्यापि चरणयो-र्व्यथा भविष्यतीति शङ्कां दधत्यौ सत्यौ स्वपाणिकमलैरेवार्च्चयता-मिव । तथा च वेदनाशङ्कया तयोश्चरणकमले स्वोयोरुदेशात् स्वपाणि-कमलेषु दधतुरित्यर्थः ॥ १२ ॥

गन्धं तु कस्तूर्य्यमृतांशुपङ्कै-
र्वक्षः स्थलस्थैरुपकल्प्य सद्यः ।
निश्वासधूपैर्नखरत्नदीपै-
रालोकमाल्यैर्धिनुतः स्म नीत्या ॥ १३ ॥
नैवेद्यतायां करकावुरोजौ
संस्पर्शनेनाभिमतौ विधाय ।
प्राणप्रदीपैः स्मितचन्द्रमिश्रै-
र्निर्म्मञ्छनं प्रेमभराद्व्यधत्तां ॥ १४ ॥
हिरण्यरम्भोपरिवर्त्तिपल्लवे-
ष्वासज्य रक्तोत्पलकोरकोत्तमाः ।

अधुना आनन्दवैवश्येन स्ववक्षःस्थलधृताभ्यां चरणकमलाभ्यां गन्धोपहारमाह । वक्षःस्थलस्थैः कस्तूरीकर्पूरपङ्कैर्गन्धं उपकल्प्य तयोरानन्दाधिक्यजन्यश्वासातिशया एव धूपास्तैः । एवं नखरत्नान्येव दीपास्तैः । एवं आलोकोऽवलोकनं तद्रूपैर्म्माल्यैश्च षोड़शोपचारपूजा-बोधकशास्त्रनीत्या धिनुतः स्म सुखयतः स्म ॥ १३ ॥

कदाचित् आनन्दातिशयेन स्तनोपरिधृताभ्यां चरणकमलाभ्यां नैवेद्योपहारमाह । उरोजौ तासां स्तनावेव करकौ दाडिमौ स्तनाभ्यां सह चरणकमलस्य स्पर्शेन हेतुना नैवेद्यतायां अभिमतौ सम्मतौ विधाय कृत्वा । तासां नासाद्वारा निःसृताः पञ्चप्राणा एव निकटस्थ स्मितकर्पूरमिश्रिताः सन्तः कर्पूरवर्त्तिका बभूवुस्तैरेव प्रेमभरात् निर्म्म-ञ्छनं आरात्रिकं व्यधत्तां अकुरुतां ॥ १४ ॥

किङ्करीणां उरुदेशौ स्वर्णकदलीत्वेनोत्प्रेक्ष्य तयोः तत्रस्थित-पादौ पल्लवत्वेन पादमर्द्दनार्थं मुष्टीकृतहस्तं रक्तोत्पलकलिकात्वेन

भृङ्गालिझङ्कारभृतोऽनटन्नहो !
तत्पादसम्वाहनदम्भतोऽसकृत् ॥ १५ ॥
तौ वीजयन्त्यो वलयानि झङ्कृति-
स्तुतैः प्रसूनव्यजनैः परा वभुः ।
मूर्त्तैर्यशोभिः कविवृन्दवर्णितैः
किं स्वैरधिन्वन्नधिपौ नटीकृतैः ॥ १६ ॥
सुवर्णवर्णाः क्रमुकेन्दुजाती
लवङ्गचूर्णाद्युचितांशभाजः ।
ताम्वूलवीटीरपरे न्यधत्तां
तदास्ययोः पार्श्वगते कराभ्यां ॥ १७ ॥

---

मर्द्दनार्थं उत्क्षेपणावक्षेपणक्रियाः नृत्यत्वेन च उत्प्रेक्षते । उरुदेशरूप स्वर्णरम्भोपरिवर्त्तमाना ये राधाकृष्णयोः पादपल्लवास्तेष्वासज्य आसक्तीभूय मुष्टीकृतहस्तरूपरक्तोत्पलकलिकोत्तमाः तयोः पादसम्वाहनच्छलतः असकृत् अनटन् नृत्यं चक्रुः । कथम्भूताः मणिवन्धस्थाः चुरी इति ख्याता वलयास्त एव भ्रमरश्रेणयस्तासां झङ्कारभृतः ॥ १५ ॥

पराः किङ्कर्य्यः हस्तस्थवलयरूपभ्रमरझङ्कारेण स्तुतैः पुष्पमय व्यजनैस्तैः राधाकृष्णौ वीजयन्त्यः सत्यः वभुः दीप्तिं चक्रुः । पुनः श्वेतपुष्पमयव्यजनश्रेणीं किङ्करीणां यशोरूपत्वेनोत्प्रेक्ष्य व्यजनानां चालनक्रियाश्च नृत्यत्वेनोत्प्रेक्षत । किङ्कर्य्यः कविसमूहवर्णितैर्व्यंजनरूपमूर्त्तिमद्भिर्यशोभिः किं अधिपौ राधाकृष्णौ अधिन्वन् असुखयन् । कथम्भूतैः ताभिरेव नृत्यार्थं नटीकृतैः ॥ १६ ॥

क्रमुकः गुवाकः इन्दुः कर्पूरः । तेषां चूर्णीकृतानां अधिकांश निवेशे वैरस्यं स्यादितिहेतोः उचितांशं भजन्ति यास्तास्ताम्वूलवीटीः

यौ पूर्णचन्द्रावुदितौ निरङ्कौ
तदंशुपीयूषरसाभिषिक्ते ।
स्वपल्लवाभ्यां कलिके गृहीत्वा
गाङ्गेयवल्ल्यौ मुहुरीजतुः किं ॥ १८ ॥
कान्ते ! दिशैताः शयनाय गन्तुं
घूर्णद्दृशः संप्रति खिन्नगात्रीः ।
श्रान्तिः पदोस्तेन शमं ययौ चे-
त्तदर्थमेतावहमेव धास्ये ॥ १९ ॥
इत्युक्तिमात्रेण समीहितस्यै-
वार्थस्य सिद्धिं किल ता विदुष्यः ।

अपरे किङ्कर्य्यौ तयोर्मुखमध्ये निधत्तां । कथम्भूते वीटीप्रार्थनार्थं तयोः पार्श्वं गते ॥ १७ ॥

किङ्कर्य्यौ स्वर्णवल्लीत्वेनोत्प्रेक्षते । राधाकृष्णयोर्यौ निष्कलङ्कौ पूर्णमुखचन्द्रौ उदितौ तयोः किरणामृतरसाभिषिक्ते गाङ्गेयवल्ल्यौ किङ्करीरूपस्वर्णवल्ल्यौ स्वीयहस्तरूपपल्लवाभ्यां वीटिकारूपे कलिके गृहीत्वा मुखचन्द्रौ किं मुहुरीजतुः पूजयाञ्चक्रतुः ॥ १८ ॥

श्रीकृष्णः श्रीराधिकामाह । हे प्रिये ! एताः किङ्करीः शयनाय गन्तुं आज्ञापय । यतो निद्रया घूर्णद्दृशः सम्प्रति रासविहारेण खिन्नगात्रीश्च तन्वि खिन्ना इति पाठे तन्वीति सम्बोधनं । ते तव पादयोः श्रान्तिः समं शान्तिं उपशममिति यावत् न ययौ न प्राप । रासविहारजन्य पदश्रमो यदि न गत इत्यर्थः । तदर्थं श्रमदूरीकरणाय एतौ तव पादौ अहमेव धास्ये धरिष्यामीति परिहासो द्योतितः ॥ १९ ॥

श्रीकृष्णस्य इत्युक्तिमात्रेण ताः किङ्कर्य्यः वाञ्छितार्थस्य सम्भोगस्य सिद्धिं विदुष्यः ज्ञानवत्यः सत्यः ततस्थलात् निरीयुः निर्जग्मुः ।

संपूज्य देवाविव पूजयित्र्य-
स्तन्मन्दिराल्लब्धवरा निरीयुः ॥ २० ॥
निष्णात एवातनुतीर्थसारे
रोमाञ्चपूर्णः स्फुरितोज्वलाङ्गः ।
स्मृत्युद्भवाशेषविशेषधर्म्मा-
नुष्ठानदक्षो रभसं स भेजे ॥ २१ ॥
प्रारम्भ एवाघभिदस्तदास्या-
मृतं त्रिराचम्य त एव यासीत् ।
श्रद्धा तयैवाशु विधिर्व्वभूवा-
नङ्गोऽपि साङ्गो निरपायमिष्टः ॥ २२ ॥

तत्र दृष्टान्तमाह । पूजयित्र्यः पूजाकर्त्र्यः स्त्रियो यथा देवौ संपूज्य लब्धवराः सत्यस्तन्मन्दिरान्निरीयुः ॥ २० ॥

अधुना श्लेषेण सम्भोगं वर्णयति । स श्रीकृष्णः अतनुतीर्थसारे महातीर्थश्रेष्ठे निष्णातः नितरां स्नातः तदनन्तरं स्नानोत्थशीतेन रोमाञ्चपूर्णः अङ्गमार्जनेन स्फुरितोज्वलाङ्गश्च एवं स्मृतिशास्त्रोद्भवा-शेषविशेषधर्म्मानुष्ठाने दक्षःसन् रभसं हर्षं भेजे । सम्भोगपक्षे कन्दर्प-रूपसरोवरस्य घाट इति प्रसिद्धे तीर्थश्रेष्ठे निष्णातः पारङ्गतः कन्दर्प-भावोदयेन रोमाञ्चपूर्णः । स्फुरितानि उज्वलरसस्याङ्गानि यस्य सः । स्मृत्युद्भवः कन्दर्पः तस्याशेषविशेषधर्म्मास्तेषामनुष्ठाने स निपुनः । रभसं सम्भोगार्थं वेगं भेजे ॥ २१ ॥

कर्म्मणः प्रारम्भ एवामृतं जलं त्रिराचम्यतः त्रिराचमनं कुर्व्वतः अस्य अघभिदः कृष्णस्य कर्म्मणि या श्रद्धा तयैवाभीष्टो विधिः विधि-बोधितकर्म्म अनङ्गोऽपि अङ्गरहितोऽपि निरपायं निर्व्विघ्नं यथास्यात्तथा साङ्गो वभूव । पक्षे सम्भोगारम्भ एव तस्या राधाया आस्यामृतं अधरामृतं

नानोपचारान् कलयन् मुदाशा-
वन्धं वितन्वन्नपसार्य्य विघ्नान् ।
स शातकुम्भातनुरत्नकुम्भे
कृत्वा करन्यासमुपात्तकान्तौ ॥ २३ ॥
सोमं लिखित्वाभजदेव देवं
कृतद्विजाच्छादनदानमानः ।
स्तिम्यन्निवानन्दधुरातरङ्गै-
रैक्यं प्रियाङ्गेन सहात्मनोऽगात् ॥ २४ ॥

त्रिराचम्यतः त्रिःपानं कुर्व्वतः श्रीकृष्णस्य सम्भोगे या श्रद्धा आसीत् तयैवानङ्गो विधिः कन्दर्पविधिः प्रियाया वाम्यादिविघ्नसत्त्वेऽपि कृष्णवलाधिक्येन निरपायं निर्व्विघ्नं यथास्यात्तथा साङ्गो वभूव ॥ २२ ॥

कर्म्मारम्भे प्रथमतो यज्ञेश्वरपूजामाह । पूजायाः पूर्व्वं नानोपचारान् कलयन् संगृह्णन् आशावन्धं छोटिकया दशदिग्वन्धं वितन्वन् विस्तारयन् तेन दिग्वन्धेन विघ्नानपसार्य्य दूरीकृत्य स्वर्णघटितमहद्रत्नमयकुम्भे करन्यासं कृत्वा देवमभजदिति परश्लोकेनान्वयः । कुम्भे कीदृशे उपात्ता स्वीकृता कान्तिर्येन तथाभूते । पक्षे नाना उप समीपे चारान् वात्स्यायनशास्त्रोक्तहस्तादिचालनान् कलयन् कुर्व्वन् प्रत्याशावन्धं विस्तारयन् विघ्नान् स्तने हस्तदानसमये प्रियाकृतवारणान् वलादपसार्य्य दूरीकृत्य अतिशयोक्त्या कुम्भस्थानीये हारादिरत्नविशिष्ट स्वर्णवर्णस्तने हस्तार्पणं कृत्वा ॥ २३ ॥

घटोपरि उमया सह देवं महादेवं लिखित्वा अभजदेव । कथम्भूतः कृतो द्विजेभ्यः आच्छादनवस्त्रदानैर्मानः आदरो येन सः । महादेवभजनानन्तरं आनन्दातिशयतरङ्गैः प्रियाया उमाया अङ्गेन सह आत्मनो महादेवस्य ऐक्यमगात् । पक्षे स्तनघटोपरिनखचिह्नरूपं सोमं चन्द्रं

दीव्यन्ति ता मे कथमेवमालयः
प्रेम्णेति राधा स्वगतं यदाब्रवीत् ।
तदा प्रकाशान् गमितेन तावत-
स्तदिच्छयामूरपि तेन रेमिरे ॥ २५ ॥
यास्त्वेतयोः केलिविलोकनं विना
नैवश्वसन्त्यासु गवाक्षसञ्चयं ।
श्रितासु काचिन्निजगाद पश्यता-
नयोर्दशा केयमभूदिहाद्भुता ॥ २६ ॥

लिखित्वा देवं क्रीड़ामभजदेव । दिव्यु क्रीड़ायां । कथम्भूतः; कृतं यद्दन्ताच्छादनस्याधरस्य चुम्बनरूपदानं तेनैव मान आदरो यस्य । पश्चात् सम्भोगातिशयात् प्रियाया अङ्गेन सह आत्मनः स्वस्य ऐक्यमगात् ॥ २४ ॥

श्रीराधिका प्रियेन सह सम्भोगसुखमनुभूय प्रेम्णा सखोरपि तादृश सुखमनुभावयितुं स्वगतमाह । मम ताः सख्यः कथं कृष्णेन सह-दीव्यन्ति क्रीड़न्ति तदैव प्रियाया अभिप्रायमनुमाय जाता या कृष्ण-स्येच्छा तयैव यावत्यः सख्यस्तावतः प्रकाशान् गमितेन प्रापितेन तेन कान्तेन सह अमूः सख्योऽपि रेमिरे ॥ २५ ॥

एतयोः राधाकृष्णयोः केलिविलोकनं विना याःनैव श्वसन्ति नैव जीवन्ति आसु किङ्करीषु सम्भोगदर्शनार्थं झरोका इति प्रसिद्धगवाक्ष-समूहं श्रितासु सतीसु काचित् किङ्करी निजगाद । हे सख्यः ! अनयोः कापि अद्भुता दशा अभूदिति यूयं पश्यत । अयमभिप्रायः । अनुरागो यदा उत्कर्षमाप्नोति तदा प्रेमवैचित्त्यदशा जायते प्रेमवैचित्त्यस्यायं स्वभावो, यत् सन्निकृष्टेऽपि कान्ते अदर्शनमुत्पाद्य मत्कान्तो मां विहाय कुत्रापि गतः अहं किं करोमीति विरहपीड़ामुत्पादयति । तथैव सम्भोग-समये आलिङ्गनेन परस्परं दृढ़स्पर्शेऽपि स्पर्शस्याज्ञानमुत्पाद्य मत्-

अन्योन्यदोःसन्दितविग्रहौ क्षणं
निष्पन्दतामेत्य पुनः सवेपथू ।
हा हेतिवैस्वर्य्य-भरास्फुटोदिता-
वुष्णाश्रुभिर्हन्त ! मिथोऽभ्यसिञ्चतां ॥२७॥

पराह हा ! स्वस्वकराहतालिका-
वाश्लेषमुक्तौ श्रितसंमुखस्थिती ।
अजस्रमस्रश्रवणैः परस्परं
न वीक्ष्य दूनौ कृशिमानमीयतुः ॥ २८ ॥

कान्तो मां विहाय कुत्र गतः, एवं मत्कान्ता मां विहाय कुत्र गता इति परस्परं द्वयोर्व्विरहपीड़ामुत्पादयति । एवं सति काचित् किङ्करी सम्भोगेऽपि तयोः प्रेमवैचित्त्यजन्यविरहपीड़ां दृष्ट्वा तत्कालोत्पन्नेन खेदेन सहसा तादृशसिद्धान्तास्फूर्त्त्या सन्दिहाना सती पृच्छतीति ॥ २६ ॥

परस्परं दोर्भ्यां सन्दितौ बद्धौ विग्रहौ ययोस्तौ आलिङ्गनजन्यानन्दातिशयेन क्षणं निष्पन्दतां प्राप्य पुनर्विरहपीड़या सवेपथू सकम्पौ सन्तौ विरहपीड़ाबोधकहाहेतिशब्दोच्चारणकाले वैश्वर्य्यभरेण विस्वरतातिशयेन अस्फुटं गद्गदं वचनं ययोस्तौ विरहजन्योष्णाश्रुभिर्म्मिथोऽभ्यषिञ्चतां ॥ २७ ॥

परा किङ्करी तयोर्व्विरहपीड़ां दर्शयन्ती आह । हा खेदे स्वस्वकारेण आहतौ ललाटौ याभ्यां तौ परस्परान्वेषणार्थं आलिङ्गनात् मुक्तौ पश्चात् आश्रिता सम्मुखस्थितिर्याभ्यां तौ निरन्तराश्रुश्रवणैः परस्परमदृष्ट्वा दूनौ दुःखितौ सन्तौ कृशिमानं बिरहजन्यकार्श्यमीयतुः ॥२८॥

तत्प्रेमवैचित्त्यभरातिवीचयः
प्रत्यूहमानङ्गरसेऽत्र तेनिरे ।
धिन्वन्ति दुन्वन्ति च सम्पदो न किं
द्रागानुराग्यो रसवक्रिमोर्म्मिभिः ॥ २६ ॥
क्षणादथान्याऽवददालयोऽधुना
मा खिद्यतालोकयतानयोर्मुदा ।
अन्योन्यमालिङ्गितयोः पुनर्दृशां
ता एव धारा दधिरेऽतिशीततां ॥ ३० ॥
क्वासीः प्रिये ! मानिनि ! हा ! विहाय मां
किं पर्य्यहासीः प्रिय ! निह्नुतीभवन् ।
संलापमित्थं रसयन्त्य एतयो-
राल्यो निभाल्योल्लसितस्मिता बभुः ॥ ३१ ॥

ग्रन्थकर्त्ता कविराह । तयोः प्रेमवैचित्त्यस्यातिशयतरङ्गाः आनङ्ग-रसे कन्दर्पसम्बन्धिनि रसे प्रत्यूहं विघ्नं तेनिरे विस्तारयामासुः । यतः आनुराग्यः अनुरागसम्बन्धिन्यः सम्पदः रसस्य वक्रिमारूपतरङ्गैः द्राक् शीघ्रं धिन्वन्ति सुखयन्ति अनन्तरं दुन्वन्ति दुःखयन्ति च ॥२९॥

क्षणानन्तरं अन्या किङ्करी अवदत् । हे आलयः अधुना यूयं-माखिद्यत । मुदा अन्योन्यमालिङ्गितयोरनयोः पुनर्दृशां ता एव अश्रु-धाराः संयोगेन शीतलतां दधिरे ॥ ३० ॥

मिलनान्तरं श्रीकृष्णः प्रियामाह । हे प्रिये ! मानिनि ! मां विहाय त्वं कुत्र आसीः । तदनन्तरं श्रीराधा प्रियमाह । हे कान्त ! निह्नुतीभवन् सन् किं मां पर्य्यहासीः ? परिहासमकार्षीः ॥ ३१ ॥

एकाह तत्र वैकयापि पृष्टा
सिद्धान्तयन्ती रसवस्तुतत्त्वं ।
हार्द्दं तयोः सर्व्वमियं विदग्धा
वेदैव तद्भावविभावितात्मा ॥ ३२ ॥

वैश्लेषजध्यानधुराधिरूढ़योः
स्फूर्त्यानयोराशु मिथः प्रतीतयोः ।
श्लेषार्थमुत्सारितवाहुभिर्म्मिथः
स्पर्शानुभूत्या विरहः शमं ययौ ॥३३॥

एकत्रस्थितयोस्तयोः कथं वा विरहो जातः? जाते चेद्विरहे कयापि मिलनं न कारितं? अकस्मात् कथं वा संयोगो जातः? इति कयापि किङ्कर्य्या पृष्टा एका किङ्करी रसवस्तु-तत्वं सिद्धान्तयन्ती सती आह। यतः इयं विदग्धा किङ्करी तयोः सर्व्वं हार्द्दं वेद। कथम्भूता, तयोर्भावरूपपुष्पेण भावितो वासितः आत्मा अन्तःकरणं यस्याः सा ॥ ३२ ॥

सिद्धान्तो यथा। प्रेमवैचित्त्यात् विच्छेदो जायते विच्छेदे च सति निरन्तरं चिन्तया ध्यानातिशयो जायते तदनन्तरं ध्यानविषयस्य कान्तादेः स्फूर्त्तौ प्राप्तिः प्राप्तौ च सत्यामालिङ्गनार्थमुद्यमः स्फूर्त्तिविषयस्य वस्तुनस्तदानीं तत्स्थले सत्ताया अलीकत्वेन न आलिङ्गनसिद्धिस्तदा तु कान्तादिप्राप्तिज्ञानस्य भ्रमत्वं निश्चित्य पुनर्व्विरहपीड़ा इति सर्व्वत्र रीतिः। अत्र प्रेमवैचित्त्यजन्यविरहस्थले तु स्फूर्त्तिविषयस्य तदानीं सत्ताया यथार्थत्वेन आलिङ्गनमपि यथार्थमेवातो न पुनर्व्विरहपीड़ेत्याह। वैश्लेषध्यानातिशये अधिरूढ़योः अर्थात् तादृशध्यानविशिष्टयोरनयो राधाकृष्णयोर्म्मिथः परस्परं स्फूर्त्त्या प्रतीतयोर्ज्ञातयोरालिङ्गनार्थं प्रसारितवाहुभिः परस्परं स्पर्शानुभवेन हेतुना विरहः शमं शान्तिं ययौ ॥ ३३ ॥

पश्यैनयोस्तत्फलमेतदारा-
दुत्कण्ठया कोटिगुणीभवन्त्या ।
पुनश्च सम्भोगधुरातिदैर्घ्यात्
समृद्धिमत्त्वं रभसादवाप ॥ ३४ ॥
निःसारिताच्छादनमात्मवल्लभौ
वियोग-भीत्यैव तयेतरेतरं ।
रुद्ध्वा भुजैः स्वस्वहृदन्तरं बलात्
प्रवेशयन्ताविव राजतः प्रियौ ॥ ३५ ॥
दधासि मा यत्र सदा तदेतत्
विशामि मध्ये हृदयं विहर्त्तुं ।

नच विरहजनकत्वेन प्रेमवैचित्र्यं हेयमिति वाच्यं, यतो न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते इति नियमेन प्रेमवैचित्र्यस्याप्युपादेयत्वमित्याह । एतयोः राधाकृष्णयोस्तस्य प्रेमवैचित्र्यजन्यविरहस्य एतत् फलं पश्य । फलमेवाह । विरहेण कोटिगुणीभवन्त्या उत्कण्ठया पुनर्म्मिलने सति जातः सम्भोगातिशयः स्वस्यातिदैर्घ्यात् दीर्घकालं व्याप्यस्थायित्वात् समृद्धिमत्त्वं वेगात् अवाप । तथा च समृद्धिमान् सम्भोगो जात इति भावः ॥ ३४ ॥

प्रियौ राधाकृष्णौ तया पूर्व्वोक्तया वियोगभीत्या आत्मवल्लभौ वल्लभा च वल्लभश्च वल्लभौ परस्परं भुजैरुद्ध्वा स्वस्वहृदयमध्ये बलात् प्रवेशयन्ताविव वर्त्तमानौ सम्भोगसमये निःसारितं दूरीकृतं आच्छादनं वस्त्रं यत्र तथाभूतं यथास्यात्तथा राजतः ॥ ३५ ॥

तादृशदृढालिङ्गनमुत्प्रेक्षते । यत्र चित्ते सदा मां धरसि तदेतत् मध्येहृदयं हृदयस्य मध्ये अहं विहर्त्तुं विशामीति संलप्य परस्परं

इत्येव संलप्य किमद्य गाढ़ा-
श्लेषैरिमौ तत्र विधौ यतेते ॥ ३६ ॥
आत्मा च चेतश्च यदेकमेतयो-
र्द्वित्वेन तन्वास्तदलं विलासिनोः ।
इतीत्थमेकीकुरुतेऽद्य किं जवा-
दनङ्ग एवैष मनीषिणां वरः ॥ ३७ ॥
एकं जगत्यत्र भवामि तुङ्ग
कुम्भाविमौ मामपि यज्जिगीषू ।
तद्वामनीकुर्व्व इतीव गर्व्वा-
द्वक्षो हरेरर्दयते कुचौ किं ? ॥ ३८ ॥
दृष्ट्वा स्मरः शीतकरारविन्दयोः
स्वमित्रयोः शात्रवमब्जयोरपि ।

---

संभाष्य इमौ राधाकृष्णौ किमद्य गाढ़ाश्लेषैः करणैः तत्र विधौ प्रवेश विधौ यतेते यत्नं कुरुतः ॥ ३६ ॥

तादृशगाढ़ालिङ्गनं पुनरन्यथा उत्प्रेक्षते । विलासिनोः राधाकृष्णयोर्यत् यस्मात् आत्मा च चेतश्च एकमेव तत्तस्मात् अनयोस्तन्वोः शरीरयोरपि द्वित्वेन अलं व्यर्थं इत्थं अनेन प्रकारेण इति विचार्य्य मनीषिणां बुद्धिमतां श्रेष्ठः कन्दर्प एव किं वेगात् अद्य एकोकुरुते ? ॥३७॥

गाढ़ालिङ्गनसमये वक्षसा स्तनमर्द्दनं उत्प्रेक्षते । अत्र जगति एकं अहमेव तुङ्गं भवामि कुम्भसदृशोच्चौ इमौ स्तनौ तु मामपि यद्यस्माज्जिगीषू भवतः तत्तस्मात्तौ अहं वामनीकुर्व्वे इति विचार्य्येव श्रीकृष्णस्य वक्षःस्थलं किं कुचौ अर्द्दयते ? ॥ ३८ ॥

श्रीकृष्णस्य मुखचन्द्रत्वेन श्रीराधाया मुखं कमलत्वेन च वर्णयित्वा

परस्पराश्लेषरसग्रहैर्व्वलात्
स्वकारितैर्म्मैत्र्यमिदं ससर्ज किं ? ॥ ३९ ॥
अत्रोज्वलागाधसरस्युदश्चतोः
किम्वा सुखाश्लेषणमब्जयोरिदं ? ।
कन्दर्पवात्या जनितं यदन्तरे
शीत्कारभृङ्गं ध्वनिरेष लक्ष्यते ॥ ४० ॥
यौ स्मारसृष्टावुदितौ विधू सदा
पूर्णौ निरङ्कावनयोः परस्परं ।

तयोरधरपानमुत्प्रेक्षते कन्दर्पः उद्दीपकत्वेन स्वमित्रयोः शीतकरारविन्दयोश्चन्द्रकमलयोः अब्जयोर्जलादुत्पन्नयोः अतः सहोदरयोरपि परस्परं शात्रवं दृष्ट्वा तयोर्म्मिलनार्थं स्वेनैव वलात्कारितैः परस्परालिङ्गनरूपरसग्रहणैः किं तयोर्म्मैत्र्यं ससर्ज ? ॥ ३९ ॥

पुनरधरपानमन्यथा उत्प्रेक्षते । किम्वा राधाकृष्णयोः शरीरस्यैक्येन तादृशशरीररूपोज्वलागाधसरसि पक्षे उज्वलरसस्यागाधसरसि उदश्चतोः उदयं प्राप्नुवतोस्तयोर्मुखाब्जयोर्वधूरा इति प्रसिद्धा या कन्दर्परूपवात्या तया जनितं इदं सुखाश्लेषणं । ननु मुखयोः कमलत्वे किं प्रमाणं ? तत्रानुमानालङ्कारमाह । ययोर्मुखयोरन्तरे मध्ये सम्भोगसमये शीत्काररूपभ्रमरध्वनिर्लक्ष्यते । तथा च मध्यस्थितभ्रमरध्वनि हेतुना मुखयोः कमलत्वं सिद्धमिति भावः ॥ ४० ॥

अधुना मुखयोश्चन्द्रत्वं निरूप्य पुनरप्यधरपानमन्यथा उत्प्रेक्षते । ब्रह्मणा सृष्टश्चन्द्र एक एव तत्रापि सदा न पूर्णः सकलङ्कश्चातएव न विवादावकाशः । कन्दर्पेण तु यौ द्वौ चन्द्रौ सृष्टौ तत्रापि सदा पूर्णौ कलङ्करहितौ चातः अनयोः परस्परं मात्सर्य्येण किमिदं युद्धं विभाति ? अन्धकाराणां शत्रुश्चन्द्रो भवति अतो विपक्षयोस्तयोर्युद्धरूप-

विभाति युद्धं किमिदं यदुच्चलः
प्रगल्भते वालतमश्च योऽभितः ॥ ४१ ॥
केनार्पिता चन्द्रवदत्र मञ्जुले
मसी सरोजेऽप्यहहेति विह्वलं ।
तदञ्जनं विम्वयुगं प्रगृह्य किं
स्वेनानुरागेण तदन्वरञ्जयत् ॥ ४२ ॥
एकत्र वन्धूकचतुष्टयं कथं
मरन्दलुण्टाकमितो नियुद्ध्यते ।
इतीव राजा मदनः सितेषुभिः
कुन्दैरिदं विध्यति पश्यतां लयः ॥ ४३ ॥

---

विपच्चिदर्शनात् प्रक्षीणान्धकारस्य का वार्त्ता वालतमः समूहोऽपि अति-चञ्चलः सन् अभितश्चतुर्दिक्षु आनन्देन प्रगल्भते । पक्षे वाला अलका एव तमः समूहः । तथा चाधरपानसमये अलकाश्चञ्चला भवन्तीति भावः ॥ ४१ ॥

इदानीं श्रीकृष्णस्याधरे लग्नं राधिकाया नेत्राञ्जनं मसित्वेन उत्-प्रेक्ष्य राधिकाकर्त्तृकाधरपानसमये श्रीकृष्णस्याधरे लग्नं राधिकाया अधरसम्बन्धिताम्बूलरागमनुरागत्वेनोत्प्रेक्षते । चन्द्रवत् चन्द्रे यथा कलङ्करूपा मसी वर्त्तते तथा अहह खेदे श्रीकृष्णस्याधररूपे मनोज्ञे कमलेऽपि केनापि मसी अर्पिता इति हेतोर्विह्वलं राधिकाया ओष्ठाधर-रूपविम्वयुगं कर्त्तृ श्रीकृष्णस्याधरलग्नं तदञ्जनं प्रगृह्य किं स्वेन ताम्बूलरागरूपानुरागेण तत्कमलं अन्वरञ्जयत् ॥ ४२ ॥

अधुना परस्पराधरे दन्तक्षतं वर्णयति । हे आलय ! एकत्र द्वयो-रोष्ठाधरचतुष्टयरूपवन्धूकचतुष्टयं अधरामृतरूपमकरन्दलुण्टाकं इत

शम्भू स्मरः पल्लवनव्यपाश-
द्वयेन वद्ध्वा किमिहार्द्धचन्द्रैः ।
शरैर्विभेदेति भयेन गङ्गा-
पृषत्शताभा पतिता भुवीतः ॥ ४४ ॥
विद्युद्घनाचिक्रमिषां यदोपरि
स्माराद्दधाना ववलेऽवलेपतः ।
तदा तु जालानि सखीदृशां वला-
ज्जालावलीं हर्षजलैः प्लुतां व्यधुः ॥ ४५ ॥
वहिस्तु यन्त्रव्यजनेन दास्य-
स्तौ वीजयाश्चक्रुरजस्रमस्रैः ।

एव हेतोः किं परस्परं युद्ध्यते इति अन्यायं विज्ञायेव राजा मदनः शितेषुभिस्तीक्ष्णशरस्वरूपैर्दन्तरूपकुन्दैरिवं वन्धूकचतुष्टयं विध्यति॥४३॥

स्तनोपरिनखक्षतं कन्दर्पस्यार्द्धचन्द्रशरत्वेनोत्प्रेक्ष्य मर्द्दनसमये स्तनोपरिस्थितहारस्य त्रोटनात् मुक्तानां एकैकतया भुवि पतनं गङ्गाया विन्दुविन्दुतया पतनत्वेनोत्प्रेक्षते । कन्दर्पः स्वशत्रू स्तनरूपौ द्वौ शम्भू श्रीकृष्णस्य हस्तरूपनव्यपाशद्वयेन वद्ध्वा किमिह नखाघातरूपार्द्धचन्द्रशरैर्विभेद । इति भयेन स्तनद्वयरूपमहादेवस्य मस्तकस्थमुक्ताहाररूपगङ्गा सङ्कुचितीभूय पृषत्शतैर्विन्दुशतैराभा कान्तिर्यस्यास्तथाभूता सती भुवि पतिता ॥ ४४ ॥

अधुना सम्भोगस्य वैपरीत्यं वर्णयति । विद्युत्स्वरूपा नायिका मेघस्वरूपनायकस्य आचिक्रमिषां आक्रमणेच्छां दधाना सती स्माराद्वलेपतः कन्दर्पसम्वन्ध्यहङ्कारात् यदा मेघोपरि ववले वलं प्रकाशयामास । तदा तु सखीदृशां जालानि समूहाः जालावलिं गवाक्षश्रेणीं हर्षजलैः प्लुतां व्याप्तां चक्रुः ॥ ४५ ॥

प्लुतेक्षणाश्चुक्रुधुरप्रमेय-
प्रेम्णे तदात्वानवलोकदीनाः ॥ ४६ ॥
प्रफुल्लनीलाम्वुजशीधुचन्द्रः
कामं पपावित्यसहिष्णु सद्यः ।
तत्रत्यमिन्दिन्दिरयोर्युगं किं
वलात्तदीयामृतमप्यधासीत् ॥ ४७ ॥
अभ्रान्तरुद्यज्ज्वलसूर्य्यमण्डले
ननर्त्त मुक्तावलिरात्तसम्मदा ।

वहिःस्थिता दास्यः डोरीवद्धयन्त्रव्यजनेन राधाकृष्णौ वीजयाञ्चक्रुः । अजस्रमस्रैः निरन्तरानन्दाश्रुधाराभिर्व्याप्तेक्षणास्ता दास्यः तदात्वे तत्काले प्रेमाश्रुधारायाः प्रतिवन्धकत्वेन योऽनवलोकः सम्भोगदर्शनाभावस्तेन दीनाः दुःखिताः सत्यः अपरिमितप्रेम्णे चुक्रुधुः । अस्माकं प्रेमा एवास्मान् दुःखयति अतएव स तु मास्तु इति प्रेमाणं प्रति क्रोधं चक्रुः ॥ ४६ ॥

श्रीकृष्णस्य मुखरूपप्रफुल्लकमलस्याधरामृतरूपं शीधु मधु राधिकाया मुखचन्द्रः विपरीतसम्भोग-समये कामं यथेष्टं पपौ । मत्पेयं वस्तु चन्द्रेण पीतमित्यसहिष्णु इन्दिन्दिरयोर्युगं तत्रत्यं प्रफुल्लनीलाम्बुजस्थं श्रीकृष्णस्य नेत्ररूपभ्रमरद्वयं तदीयामृतं चन्द्रसम्वन्ध्यमृतमपि सद्यस्तत्क्षण एव वलात् अधासीत् पानमकार्षीत् । धेट्पाने । तथाच श्रीराधिकाकर्त्तृकाधरपानसमये श्रीकृष्णेन विस्मयात्तस्या मुखावलोकनं कृतं अतस्तादृशावलोकनमेवामृतपानत्वेनोत्प्रेक्षितमितिभावः ॥ ४७ ॥

अधुना ज्ञानसिद्धानां सूर्य्यमण्डल-द्वारा अर्च्चिरादिमार्गं वर्णयन् तादृशशब्दानां श्लेषेण विपरीतसम्भोगमप्याह । अभ्रान्तः मेघस्य मध्ये यत् उद्यज्ज्वलत्सूर्य्यमण्डलं तत्र मुक्तश्रेणी मोक्षप्राप्त्यानन्देन

हंसावधूताः कनकावलीं श्रिता
वाद्यं विचित्रं रभसादवीवदन् ॥ ४८ ॥
तत्रागतश्रीमधुसूदनोद्य-
ज्ज्ञानं श्रुतिप्रेष्ठमभूदपूर्व्वं ।
येनैव सभ्या रसिकाङ्गवल्ली
द्रैत्यं दधे स्वेदमिषात् सवेपा ॥ ४९ ॥
वालास्तु कौटिल्यभृतोऽतिलौल्या-
दितस्ततः संसरणं भजन्तः ।

ननर्त्त । कथम्भूताः आत्तो गृहीतः सम्मदो हर्षो यया सा । तदैवपरम हंसा एवं अवधूताश्च ज्ञानिप्रभेदाः तेषां नर्त्तनं दृष्ट्वा रभसात् हर्षात् विचित्रं वाद्यं अवीवदन् वादयाञ्चक्रुः । कथंभूताः स्वयोगवलपरीक्षार्थं कणकावलीं वस्तुमात्रागम्यां पञ्चमस्कन्धोक्तकाञ्चनीभूमिं श्रिताः तत्रैव स्थित्वा वाद्यं चक्रुरित्यर्थः । विपरीतसम्भोगपक्षे श्रीकृष्णस्य वक्षःस्थलरूपाभ्रस्य मध्ये कौस्तुभरूपसूर्य्यमण्डले मुक्तावलिः राधिकाया मुक्ताहारो ननर्त्त । तस्मिन् समये हंसाः राधिकायाः पाद ःटकाः अवस्याकारलोपात् बधूताः कम्पिताः सन्तः विचित्रं वाद्यं अवीवदन् । कथंभूताः कनकावलीं राधिकायाश्चरणरूपकनकस्थलीं आश्रिताः ॥४८॥

तत्र काञ्चनीभूमौ अन्येषामागमनासम्भवादतएवागतस्य भगवतो मधुसूदनस्य कर्णप्रेष्ठमुद्यद्गानमभूत् येन गानेन शुकदेव-नारद-प्रभृति रसिकानां अङ्गवल्लयेव सभ्या सात्त्विकविकारवशाद् द्रैत्यं दधे । सम्भोग-पक्षे तत्समये द्वयोरङ्गयोः सुगन्धाधिक्य-प्रकाशनेन तत्रागता ये मधु-सूदना भ्रमरास्तेषां कर्णप्रेष्ठं गानमभूत् । येन गानेन रसिकानां किङ्क-रीणां अङ्गवल्लयेव सभ्या ॥ ४९ ॥

ज्ञानिनां सूर्य्यमण्डलद्वारा अर्च्चिरादिमार्गमुक्त्वा कर्म्मिणां चन्द्र-मण्डलद्वारा धूममार्गमाह । कौटिल्ययुक्ता वाला ।अज्ञास्तु विषयभोगे

श्रुतिप्रसक्ताः प्रतिकर्म्मभाता-
स्तस्थुर्म्मदादैन्दवमण्डलान्तः ॥ ५० ॥
अवार्य्यमाणामृतपानदृप्तयो-
र्विखण्डितस्थासकनव्यवर्म्मणोः ।
प्रयुक्तचञ्चद्भुजनागपाशयो-
र्यूनोर्जिगीषा समवर्द्धतर्द्धिभिः ॥ ५१ ॥
तयोर्म्मिथः पुष्पशराजिचातुरी
धुरीणतावेदनया विवादिनोः ।

अतिलौल्यात् इतस्ततः संसारं भजन्तः सन्तः मदात् अहङ्कारात् ऐन्दवमण्डलान्तः चन्द्रमण्डलमध्ये एव तस्थुः । कथम्भूताः श्रुतौ श्रुत्युक्तकर्म्ममार्गे प्रसक्ताः अतएव प्रतिकर्म्मभाताः कर्म्मणि कर्म्मणि ख्याताः कर्म्मठत्वेन प्रसिद्धा इत्यर्थः । विपरीतसम्भोग-पक्षे कौटिल्य-भृतो वालाः कुटिलालकाः अतिलौल्यात् चाञ्चल्यात् इतस्ततो गमनं भजन्तः सन्तः ऐन्दवमण्डलान्तः श्रीकृष्णस्य मुखरूपचन्द्रमण्डल मध्ये तस्थुः । श्रुतौ कर्णपर्य्यन्तस्थले प्रसक्ताः । प्रतिकर्म्मप्रसाधनं केश-संस्कार इति यावत् तत्र भाताः प्रकाशिताः ॥ ५० ॥

यूनोर्युवद्वयोः कन्दर्पयुद्धे । ऋद्धिभिः प्रतिक्षणं नवनवायमान-सम्भोगेच्छा सम्पत्तिभिर्जिगीषा सम्यगवर्द्धत । कथंभूतयोः वाम्याद्य-भावेन अवार्य्यमाणं वारणरहितं अधररूपामृतपानं तेन दृप्तयोः अन्ये योद्धारोऽपि अमृतपानेन निःशङ्काः सन्तः युद्धं कुर्व्वन्तीति सर्व्वत्र रीतिः । पुनः कथंभूतयोः युद्धसम्मर्द्देन विखण्डितौ चन्दनादिनिर्म्मित-स्वार इति प्रसिद्धस्थासकरूपौ कवचौ ययोस्तयोः । पुनश्च कथम्भूतयोः प्रयुक्तौ परस्परं निःक्षिप्तौ चञ्चलभुजरूपनागपाशौ ययोस्तयोः ॥ ५१ ॥

राधाकृष्णयोराष्टयामिकलीलासमूह एव जपमालास्वरूपस्तस्याः

श्रान्तिः स्वयं कापि निमन्त्र्य तत्क्षणा-
न्निद्रामुपानीय समादधे कलिं ॥ ५२ ॥

सनातनं रूपमुदीयुषोः क्षितौ
हृदा दधानो व्रजकाननेशयोः ।
तत्केलिकल्पागमसङ्गलीलिताः
सदालिवीथीरनुरागिणीर्भजे ॥ ५३ ॥

श्रीकृष्णचैतन्यघनं प्रपद्ये
सपद्यपध्वस्ततमःप्रपञ्चं ।
पञ्चेषुकोट्यर्व्वुदकान्तिधारा
परम्पराप्यायितसर्व्वविश्वं ॥ ५४ ॥

सोऽयं श्रीलोकनाथः स्फुरतु पुरुकृपा-
रश्मिभिः * स्वैः समुद्य-
न्नुद्धृत्योद्धृत्य यो नः प्रचुरतमतमः
कूपतो दीपिताभिः ।

मालायाः प्रत्येकलोलाः मणिया इति प्रसिद्धाः प्रत्येकमणयः । तथात्र यं मनिमाश्रित्य वर्णनारम्भः कृतस्तस्मिन्नेव मणौ समाप्तिमाह तयोर्म्मिथ इति । अस्य श्लोकस्य व्याख्या प्रथमत एव कृता ॥ ५२ ॥

मालायाः सुमेरुस्थानीयं प्रथमत एव मङ्गलाचरणत्वेन कृतं श्लोक-

* "राशिभिः" इत्यपिपाठः ।

दृग्भिः स्वप्रेमवीथ्या दिशम दिशमहो !
　　यां श्रितादिव्यलीला
रत्नाढ्यां विन्दमाना वयमपि निभृतं
　　श्रीलगोवर्द्धनं स्मः ॥ ५५ ॥

इति श्रीकृष्णभावनामृते महाकाव्ये नक्तन्तनलीला
स्वादनो नाम विंशतितमः सर्गः ।

---

सम्पूर्णं श्रीकृष्णभावनामृतं काव्यमिति ॥

---

अयं अन्त्यमङ्गलेऽपि तदेवाह । सनातनमिति । अस्यापि व्याख्या कृता एव ॥ ५३ ॥ ५४ ॥ ५५ ॥

समाप्तोऽयं विंशतितमः सर्गः ।

हरिरोम्तत् सत् ।

विश्वाकाशविकारसम्मितशके वारे गुरोः फाल्गुने
विश्वानन्दिनि पूर्णिमा-प्रतिपदोः सन्धौ सरस्योस्तटे ।
गान्धर्व्वा-गिरिधारिणोः सरभसं दोलाधिरूढ़ाङ्गयोः
श्रीचैतन्यदिने तदेतदुदगात् काव्यं भजत् पूर्णतां ॥१॥
तस्य श्रीगुरुपादपद्म मधुनः केन स्तुवे प्राभवं
यत्पीतं सहसैव हन्त मलिनं सच्चित्तमत्तालिनं ।
संसारोग्रमतङ्गजाङ्गमदिरां विस्मार्य्य वृन्दावने
राधामाधवकेलिकल्पलतिकावासे सदावीवसत् ॥२॥

---

विश्वं एकं । आकाशं शून्यं । विकारः षोड़शः । १६०१ शाके । होलिकोत्सवे दोलाधिरूढ़ाङ्गयोः राधाकृष्णयोः सरस्योः राधाकृष्ण-कुण्डयोस्तटे श्रीचैतन्यस्य जन्म-दिने काव्यं पूर्णतां भजत् सत् उद-गात् ॥ १ ॥ २ ॥